श्रीमदण्णङ्गराचार्यसंस्कृतग्रन्थमाला - अङ्कः ६.

॥ श्रीरस्तु ॥

श्रीगोदादेव्याऽनुगृहीतः

तिरुप्पावै नामकः

॥ श्रीगोदाव्रतदिव्यप्रबन्धः ॥

[द्राविडवेदात्मकदिव्यप्रबन्धवर्गे प्रथमसहस्रे तृतीयः प्रबन्धः ।]

—:o:—

श्रीजगदाचार्यसिंहासनाधीश-श्रीकाञ्ची-प्रतिवादिभयङ्कर-

अण्णङ्गराचार्य प्रणीतः

संस्कृतविवर्तः विपुलव्याख्यासमेतः

P. B. Annangaracharya

GRANTHAMALA OFFICE

KANCHEEPURAM.

चेन्नपुरीस्थ-रत्नम् प्रेस-ब्राञ्च मुद्रालये समसुद्रयत ।

प्राप्तिस्थानम्—ग्रन्थमाला आफीस्, काञ्चीपुरम् ।

मूल्यम् रूप्यद्वयमात्रम् ।

1953.

श्रीमदण्णङ्गराचार्यसंस्कृतग्रन्थमाला - अङ्कः ६.

॥ श्रीरस्तु ॥

श्रीगोदादेव्याऽनुगृहीतः

तिरुप्पावै नामकः

॥ श्रीगोदाव्रतदिव्यप्रबन्धः ॥

[द्राविडवेदात्मकदिव्यप्रबन्धवर्गे प्रथमसहस्रे तृतीयः प्रबन्धः ।]

— :o: —

श्रीजगदाचार्यसिंहासनाधीश-श्रीकाञ्ची-प्रतिवादिभयङ्कर-

अण्णङ्गराचार्य प्रणीतः

संस्कृतविवर्तः विपुलव्याख्यासमेतः

P. B. Annangaracharya
GRANTHAMALA OFFICE
KANCHEEPURAM.

चेन्नपुरीस्थ-रत्नम् प्रेस-ब्राञ्च मुद्रालये समगुद्रयत ।

प्राप्तिस्थानम्—ग्रन्थमाला आफीस्, काञ्चीपुरम् ।

मूल्यम् रूप्यद्वयमात्रम् ।

1953.

श्रीरस्तु

कृतज्ञतानिवेदनम्

—:o:—

श्रीगोदादेव्याऽनुगृहीतमिदं दिव्यप्रबन्धद्वितयम् मौलासर निवासि श्रीयुतसेठजी हजारीमल सोमाणी पुत्ररत्नस्य वाम्बे नगरवास्तव्यस्य श्रीनिवास काटन्मिल्स् अध्यक्षस्य परम भक्तमणेः गजाधरसोमाणीगुप्तस्य द्रव्यसाहाय्येन संमुद्रितम् ॥

श्री श्रीनिवासः प्रीयताम् ।

॥ श्री ॥

मद्रासनगर - तङ्गशालावीथीस्थतोण्डमण्डलम्महाविद्यालयमण्डपे
६ — १ — ५४ दिने सायम् षष्ठघण्टावादनावसरे

तिरुप्पावैदिव्यप्रबन्ध
सँस्कृतव्याख्यानप्रख्यापनमहोत्सव
प्रकटनपत्रिका

भो आस्तिकमहोदयाः !, अत्र चेन्नपुरे तङ्गशालावीथिकायां विराजमाने * तोण्डमण्डलम्-महाविद्यालयमहामण्डपे चिरात्प्रवचनानि प्रवर्तयन्तः श्रीकाञ्चीप्रतिवादिभयङ्कर - अण्णङ्गराचार्य स्वामिमहोदया वर्तमानेऽपि संवत्सरे धनुर्मासेऽस्मिन् प्रत्यहं सायम् श्रीगोदादेवीप्रणीत - तिरुप्पावैदिव्य-प्रबन्धदिव्यार्थप्रवचनमाचरन्तीति सर्वजनविदितमेतत् । अस्यां प्रवचनगोष्ठ्यां संपत्स्यमानं कमपि विशेषमधिकृत्य प्रस्तुमः ।

श्रीमदाचार्यचरणाः उत्तरभारतीयानाम् आन्ध्रदेशीयानां च महताम् अभ्यर्थनामनुसृत्य श्रीपरांकुशपरकालादि प्रणीत - द्राविडवेदव्यपदेश्यदिव्यप्रबन्धानाम् संस्कृतभाषया हिन्दीभाषया आन्ध्र-भाषया च अनुवादं विरचय्य प्रकाशयितुमङ्गीकृतवन्तः, तत्र कतिपयान् भागान् सम्मुद्रय प्रकाशितवन्तश्चेति तदिदं सर्वं जगज्जानाति ।

अस्यां प्रक्रियायाम् तिरुप्पावैदिव्यप्रबन्धस्य तात्पर्यार्थ - विशेषार्थ - ध्वन्यर्थान् अतिसरलसंस्कृत-भाषया सुविपुलं विलिख्य रमणीयदेवनागरलिप्यां सम्मुद्रय संपूरयामासुःसन्निहिते काले । बृहत्याकारे १५० पुटपरिमितोऽयं प्रबन्धः श्वोभाविनि सौम्यवासरे (6 - 1 - 1954) सायम् उपरिनिर्दिष्टोपन्यासमहामण्डपे प्रादुर्भावप्रख्यापनमहोत्सवमनुभविष्यति ।

तदात्वे श्रीमदुभयवे सर्. S. वरदाचार्यस्वामिपादाः (रिटैर्ड. फेडरल्न्यायालयनाड्विाकाः) अग्रिममासनमलङ्करिष्यन्ति । तदा सर्वेऽप्यास्तिका भक्ता भागवाः पण्डिताश्च सानन्दमुपस्थिता भूत्वा सहयोगमनुभवन्त्विति सादरं प्रार्थयामहे ।

उपरिनिर्दिष्टस्य संस्कृतग्रन्थस्य प्राप्तिस्थानम्—ग्रन्थमाला आफीस, काञ्चीपुरम् । अधुना तु. ४८. गोविन्दप्पनायकन्वीथी. जि. टि. मूल्यम् रूप्यद्वयमात्रम् । समीचीनरक्षाबन्धसमेतस्य मूल्यम् सार्धरूप्यद्वयम् । नाच्चियार्तिरुमोळिनामकदिव्यप्रबन्धविवर्तेन च सहितस्य मूल्यम् - सार्धरूप्यत्रयमात्रम् ॥

मद्रास. }
४ - १ - ५४. }

इति निवेदयत :—
भगवत्कथाप्रसङ्गसभायाः कार्यदर्शिनौ ॥

Rathnam Press, Madras - 1

Arangetral of Commentary on Tiruppavai in Sanskrit

BY

Ubhaya Vedanta P. B. Annangaracharya Swami of Kancheepuram,

On Wednesday, 6—1—54, at T. T. V. High School, Mint Street, George Town, Madras.

Friends,

All of you know that as in previous years, Sri P. B. Annangaracharya Swami is delivering lectures on Tiruppavai every evening from December 15, 1953, at the T. T. V. High School Hall under the auspices of the Bhagavat Katha Prasanga Sabha.

This year's discourses are invested with a special significance.

In response to the request of Asthikas, scholars and devotees of North India and Andhra, the Swamiji had been publishing portions of Nalayira Divya Prabhanda in simple Sanskrit, Hindi and Telugu. The Swamiji has now completed an exhaustive commentary on Tiruppavai in Sanskrit.

This commentary, printed in Devanagari script and running to 150 pages, is being introduced to the public on Wednesday, 6—1—'54, at 6 p.m. at the T. T. V. High School Hall.

MR. S. VARADACHARYA,
Supreme Court Judge (Retired) will preside.

On this day, the Swamiji will begin his daily discourse as usual at 6 p.m.

Asthikas and devotees are requested to participate in this function and earn the grace of Sri Andal.

Note:—Admission as usual.

Madras,
4—1—1954.


Bhagavat Katha Prasanga Sabha,
Secretaries.

The book can be had at Granshamala Office, Kancheepuram or for the time being, at 48, Govindappa Naick Street, G. T., Madras. It is priced Rs. 2/- (ordinary edition) or Rs. 2-8-0 (bound edition). With the Sanskrit translation of Nachiyar Thirumozhi, the book costs Rs. 3-8-0.

॥ श्रीरस्तु ॥

श्रीमच्छठकोपमुनये नमः । श्रीमते रामानुजाय नमः ।

श्रीसल्लोकगुरवे नमः । श्रीमद्वरवरमुनये नमः ॥



श्रीमदण्णङ्गराचार्यसंस्कृत ग्रन्थमाला-अङ्कः—६.

श्रीपराङ्कुश परकालादिदिव्यसूरि वरानुगृहीत
द्राविडवेदात्मक दिव्यप्रबन्ध संस्कृतविवर्त प्रस्तावना

लक्ष्मीनाथारम्भां शठरिपुयतिराजमध्यमामनघाम् ।
श्रीमद्वरवरमुनिराट्पर्यन्तां नौमि पूर्वगुरुपंक्तिम् ॥

श्रीकाञ्चीपरवादिभीकरगुरुश्रीवंशलब्धोदयो वेदान्तद्वयसिन्धुमग्नधिषणो नानाकलाकोविदः ।
श्रीमद्द्राविडवेदसूक्तिनिवहान् गीर्वाणवाण्या क्रमात् व्याचष्टे विदुषां मुदं प्रगुणयन्नण्णङ्गरार्याभिधः ॥

श्रीवैष्णवसंप्रदाये आळ्वारपदवाच्या दिव्यसूरयो दश । ते च—१ सरोयोगी, २ भूतयोगी, ३ महदाह्वययोगी, ४ भक्तिसारयोगी, ५ श्रीशठकोपमुनीन्द्रः, ६ कुलशेखरसूरिः, ७ भट्टनाथमुनिः ८ भक्ताङ्घ्रिरेणुसूरिः, ९ मुनिवाहन (श्रीपाण) सूरिः ; १० परकाल महायोगी-इति संशब्द्यन्ते । श्रीशठकोपमुनीन्द्रस्सर्वेषामेतेषामवयविभूतः, अन्ये पुनरेतस्यावयवभूता इति पूर्वाचार्यनिर्णयः । सर्वेऽप्येते दिव्यसूरिप्रवरा भक्तिबलात्कारेण भगवद्विषयकान् दिव्यप्रबन्धाननुगृहीतवन्तः । ते च द्राविडभाषामयाः । द्राविडवेदः, द्राविडाम्नायः, द्रमिडोपनिषत् , द्राविडब्रह्मसंहिता इत्यादिनामविशेषैर्व्यपदिश्यन्त एते दिव्यप्रबन्धाः ॥

श्रीशठकोपमुनीन्द्राणामन्तेवासी मधुरकविसमाख्यो ब्राह्मणाग्रणीरासीत् । सोऽपि दिव्यसूरिगोष्ठीपरिगणितोऽभूत् । श्रीशठकोपमुनीन्द्रैकदैवतस्स भगवद्विषयिणीं गाथामेकामपि न निरमिमीत । अपितु स्वाचार्यभूतशठकोपमुनीन्द्रविषयकमेव कमपि लघुतमं गुणैर्गुरुतमं दिव्यप्रबन्धमररचत् । सोऽपि प्रबन्धो द्राविडवेदसंकेतभाजनतां निन्ये पूर्वाचार्यैः ॥

सप्तमस्य श्रीभट्टनाथमुनेः श्रीमती गोदानाम्नी दुहिताऽऽसीत् । इयमयोनिजा मैथिलीव । भट्टनाथमुनेस्तुलसीकानने समुद्भूता तेन च पुत्रीत्वेन स्वीकृताऽभूत् जनकचक्रवर्तिना सीतेव । भगवद्दिव्यमहिषीष्वन्यतमा

सेयं गोदादेव्यपि स्वकान्तविषयकं परमभोग्यं मधुरमधुरं परमविलक्षणं दिव्यप्रबन्धद्वितयं प्रणिनाय ; तदपि द्राविड-वेदमध्यपरिगणितं विभ्राजते। एवंच निर्दिष्टैर्द्वादशभिर्व्यक्तिविशेषैः प्रकाशितानां परमपावनीनां दिव्यसूक्तीनां द्रविडाम्नायव्यपदेशः सुप्रथितः। पश्चात् भगवद्रामानुजमुनीन्द्र विषयकत्वेन श्रीरङ्गामृतकविनाम्ना सूरिवरेण प्रणीतः प्रपन्नगायत्रीति प्रसिद्धो * रामानुजनूत्तन्दादिनामा दिव्यप्रबन्धोऽपि द्रविडाम्नायान्तर्गतो व्यधायि पूर्वाचार्यै-रिति वेदितव्यम् ॥

संस्कृतभाषायां दिव्यमिति किमपि पदम् उत्तमोत्तमार्थकमुल्लसति। भगवद्गीतायां "जन्म कर्म च मे दिव्यम्" "दिव्यं ददामि ते चक्षुः" इत्यादिस्थलेषूपात्तमिदं दिव्यपदं श्रीवैष्णवसंप्रदाये प्रमाणप्रमेयप्रमातृषु प्रयुक्तं सत् परमविलक्षणं सौरभं धत्ते। तथाहि। प्रमाणेषु मूर्धन्यो द्राविडवेद एवेति तं दिव्यप्रबन्धनाम्ना व्यपदि-दिशुः। प्रमेयमूर्धन्यता अर्चावतारस्थलविशेषाणामेवेति तान् दिव्यदेशनाम्ना प्रथयामासुः। प्रमातृमूर्धन्यता श्रीपरांकुशपरकालप्रमुखसूरिवराणामेवेति तान् दिव्यसूरिपदेनाभिलपन्तिस्म। अहो! दिव्यतमेयं खलु व्यवस्था॥

दिव्यसूरिष्वेतेषु श्रीशठकोपमुनेरेव सर्वसंप्रतिपन्नं प्राधान्यम्। अन्ये सर्वेऽपि सूरयः शठकोपमुनेरस्य अवयवभूताः, अयमेव श्रीपरांकुशमुनीन्द्रः अवयवीति संप्रदायः॥

अवतारक्रमे प्राथम्यमनुद्वहतः शठकोपमुनेर्ननु कथमवयवित्वं प्रोच्यते? इति चेत्, तत्तु भगवत्सङ्क-ल्पाधीनतत्प्रभावातिशयनिबन्धनमिति सम्प्रति संक्षेपः। एतैः सर्वैरपि दिव्यसूरिवरैः प्रणीतास्सर्वेऽपि दिव्यप्रबन्धाः कदाचिद्विलुप्तप्रचारा अभूवन्। आचार्यपरम्परायामादिमः श्रीमन्नाथमुनिसमाख्यो गुरुवरस्तेषां दिव्यप्रबन्धानां पुनरुद्धारं चिकीर्षुस्सन् महतां नियोगेन श्रीशठकोपमुनीन्द्रदिव्यावतारस्थलीं श्रीकुरुकापुरीमुपेत्य तत्र दिव्यतिन्त्रिणी-तरुमूले निषद्य श्रीशठकोपमुनीन्द्रविषयकं श्रीमधुरकविसूरिप्रणीतं लघुतरं प्रबन्धं द्वादशसहस्रकृत्वः सनियमं जपित्वा अथ योगदशायां दत्तसाक्षात्कारात् श्रीशठकोपमुनीन्द्रात् चतुस्सहस्रसंख्याकगाथात्मकं द्राविडाम्नायं लेभे (श्रीमन्नाथमुनिः) इति संप्रदायः। अनेनापि हेतुना श्रीशठकोपमुनेः प्राधान्यमवसेयम्। अत्र चायमनुसन्धेयः श्लोकः *—पत्युः श्रियः प्रसादेन प्राप्तसार्वज्ञ्यसम्पदम्। प्रपन्नजनकूटस्थं प्रपद्ये श्रीपरांकुशम्॥ * इति। शठकोपमुनेरेव नामान्तरं श्रीपरांकुश इति। वकुलाभरणमुनिरित्यप्यस्य व्यपदेशः प्रथितः॥

एतादृशमहिमशालिनि सत्यपि श्रीशठकोपमुनौ, दिव्यप्रबन्धपरिगणनायां प्राथम्यं तु श्रीभट्टनाथ-(विष्णुचित्त) समाख्यदिव्यसूरिप्रणीतस्य तिरुप्पल्लाण्डुनाम्नो दिव्यप्रबन्धविशेषस्यैव समभूत्। स एव द्रावि-डाम्नायरूपसकलदिव्यप्रबन्धेष्वपि प्राथमिकं स्थानं प्राप्नोति। संस्कृतवेदोपक्रमे यथा नियतं प्रणवानुसन्धानं, तथा द्राविडवेदोपक्रमे तिरुप्पल्लाण्डुदिव्यप्रबन्धस्य पारायणं नियतम्। मङ्गलाशासनात्मकत्वादेतस्य प्रबन्धस्य॥ सोऽयं प्रबन्ध आदौ व्याख्यातोऽभूत्। अथ द्वितीयो भट्टनाथसूक्तप्रबन्धोऽपि विवृतः। तस्यैव श्रीविष्णुचित्त-सूरेर्भट्टनाथमुनीन्द्रस्य दुहित्रा गोदादेव्या प्रणीतः तिरुप्पावैनाम्ना सुप्रथितः सकलदिव्यप्रबन्धेष्वपि समुत्तुङ्गो निखिलत्रय्यन्तसारार्थभरितो दिव्यप्रबन्धोऽथ विवर्त्यते व्याख्यायते च॥ .... *

॥ श्रीरस्तु ॥

श्रीमते रामानुजाय नमः ॥ श्रीमद्वरवरमुनये नमः

श्रीकाञ्चीप्रतिवादिभयङ्कर—अण्णङ्गराचार्यकृतिषु द्राविडाम्नायदिव्यप्रबन्ध-विवर्ते प्रथमसहस्रे तृतीयो दिव्यप्रबन्धः

॥ तिरुप्पावै—श्रीव्रतप्रबन्धः ॥

(श्रीगोदादेवीप्रणीतः)

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम् ॥

[लक्ष्मीनाथसमारम्भामित्यादि—श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम्.]

(तिरुप्पावैदिव्यप्रबन्धस्य असाधारणमुखपद्यानि त्रीणि । तेष्वादिमं पद्यं श्रीपराशरभट्टार्यप्रणीतम् ॥)

नीलातुङ्गस्तनगिरितटीसुप्तमुद्बोध्य कृष्णं पारार्थ्यं स्वं श्रुतिशतशिरस्सिद्धमध्यापयन्ती ।
स्वोच्छिष्टायां स्रजि निगलितं या बलात्कृत्य भुङ्क्ते गोदा तस्यै नम इदमिदं भूय एवास्तु भूयः ॥

(विवरणम्—) श्रीकृष्णावतारे श्रीमहालक्ष्मीः गोकुले कुम्भनामकगोपालतल्लजस्य भवने * नप्पिन्नैप्पिराट्टिनाम्नाऽवतीर्य स्थिता । सा कृष्णेन भगवता सप्तवृषभौद्धत्यनिरसनपूर्वकं परिणीतेति प्रसिद्धिः । सैव संप्रदाये नीलानाम्ना व्यपदिश्यते । गोपालकुले अभिवृद्धस्य श्रीकृष्णस्य सैव प्रधानमहिषीत्वेनानुसन्धीयते श्रीपराङ्कुश-परकालादिभिस्सर्वैरपि दिव्यसूरिप्रवरैः । अस्मिन्नपि * तिरुप्पावैदिव्यप्रबन्धे तयैव नीलादेव्या सह शयानः कृष्णो भगवान् प्रबोध्यते । अष्टादशप्रभृतिषु तिसृषु गाथासु तस्या देव्याः प्रस्तावोऽत्र प्रेक्ष्यते । * कुत्तुविळक्केरियेत्ये-कोनविंशगाथाप्रक्रियामनुसृत्य तदिदं मुखपद्यं श्रीपराशरभट्टार्यैः प्रणिन्ये ॥ "नीलातुङ्गस्तनगिरितटीसुप्त हे कृष्ण! जागृहि" इति तस्यां गाथायां कथयति श्रीमती गोदा; तथा चोक्तमिह * नीलातुङ्गस्तनगिरितटीसुप्तमुद्बोध्य कृष्णम् * इति। तादृशं कृष्णमुद्बोध्य किं कृतवती गोदा? श्रुतिशतशिरस्सिद्धं स्वकीयं पारार्थ्यमध्यापयामास; तदुच्यते द्वितीयचरणे । * शित्तम्शिरुकाले वन्दुन्नैच्चेवित्तु * इत्येकोनत्रिंशगाथाप्रक्रियामनुसृत्य द्वितीयपादोऽभिहित इति ध्येयम् । पारार्थ्यं नाम—अनन्यार्हशेषत्वम् । तत्—श्रुतिशतशिरस्सिद्धम्—सकलवेदान्तप्रतिपाद्यमिति यावत् । तदध्यापयन्ती—इति कथनेन एतद्विषये गोदादेवी कृष्णस्य आचार्यपदमधितिष्ठतीत्युक्तं भवति। एकोनत्रिंशगाथायाम् "अस्मत्सकाशे निशमय कृष्ण !" इत्युक्तत्वात् तामुक्तिमनुसृत्य इयं रसोक्तिः रसिकमनोविनोदिनी भवितुमर्हति। बहोः कालात्प्रभृति प्रायस्सर्वैरपि जनैः स्वकीयस्यानन्यार्हशेषत्वस्य विस्मृतत्वेन भगवत्सन्निधावनागमनात् भगवानपि विस्मृतवानिव स्वं रूपम्। 'अत एव तस्मा अध्यापनं

प्राप्तमिति वेदितव्यम् । स्वकीयामनन्यार्हशेषतां विज्ञापयन्त्या गोदादेव्यैव भगवानपि स्वकीयं सर्वशेषित्वमनुस्मृतवानित्युक्तं भवति। एतेन च गोदादेव्या उक्तिप्रागल्भ्यं सर्वातिशायीति सूचितं भवति ।

[स्वोच्छिष्टायां स्रजि निगलितं या बलात्कृत्य भुङ्क्ते] इत्यनेन तृतीयचरणेन गोदादेव्याश्चरितप्रसिद्धो महिमविशेषोऽनुसन्धीयते । अनुपदमेवात्र प्रकाशयिष्यमाणे श्रीगोदावैभवे स द्रष्टव्यः। जगत्प्रसिद्धश्च। इह एकोनत्रिंशगाथायाम् * कुत्तेवलेङ्गळै कोळ्ळामल्पोहादु * [अस्मत्सकाशात् कैङ्कर्यमवश्यमेव स्वीकर्तव्यम्] इत्युक्तिमनुसृत्य "बलात्कृत्य भुङ्क्ते" इत्यनुगृहीतम् । तस्यै गोदायै नमो नमः ॥

द्वितीयं मुखपद्यम्—* अन्नवयल्पुदुवै * ॥

हंसविभूषितकेदाराढ्यश्रीधन्विनव्यनगरावतीर्णा श्रीमती गोदा श्रीरङ्गनाथाय सुप्रशस्तानि श्रीव्रतप्रबन्धपद्यानि अतिमधुरं गेयानि समार्पिपत्; पुष्पमालिकां च स्वचिकुरबन्धधृतां प्रददौ। तां संकीर्तय भो हृदय ! ॥ * ॥ [श्रीमती गोदादेवी मालिकाद्वितयमनुजग्राह। एका मालिका वाचिकी; अपरातु पौष्पिकी। उभयमिदं यद्यपि श्रीरङ्गनाथायैव समर्पितम्; तथाऽपि वाचिकी मालिका [दिव्यप्रबन्धमयी] सर्वभक्तभागवतसज्जनभोग्या कृता। पौष्पिकी मालिकातु भगवदेकभोग्या कृता—इति विवेकः। एवञ्च स्वस्य दयितम् अपत्यानि च संप्रहर्षयितुं मालिकाद्वितयं प्रदत्तवतीं गोदादेवीं सततं स्तवामेति कथितं भवति॥]

तृतीयं मुखपद्यम्—* शूडिक्कोडुत्तशुडर्क्कोडिये *

भगवते स्वचिकुरविधृतमाल्यसमर्पणसंजातौज्ज्वल्यशालिनि ! कनकलतिके ! श्रीव्रतप्रबन्धप्रणयनप्रकाशितकारुण्यवैभवे ! गोदे ! श्रीवेङ्कटपतेर्माधवस्यानन्यार्हशेषत्वं प्रार्थितवत्या भवत्याः श्रीसूक्तिषु निष्ठां संविधेहि मम ॥ [अस्मिन्पद्ये गोदादेवी साक्षात्संबोध्य प्रार्थ्यते। हे गोदे यथा वयं त्वदीयश्रीसूक्त्यर्थातिवर्तनमन्तरेण तदनुवर्तनभाग्यभाजो भवेम तथा नाम कृपां विधेहीति प्रार्थनाऽत्र क्रियते। गोदादेवी श्रीवेङ्कटपतेर्माधवस्यानन्यार्हशेषत्वं प्रार्थितवतीति यदिहोच्यते, तत्र शङ्का भवितुमर्हति—तिरुप्पावैदिव्यप्रबन्धेऽस्मिन् श्रीवेङ्कटाद्रिपतेः प्रस्तावोऽपि नास्ति खलु; तत्कथमुच्यत एवमिति; अत्रोच्यते; इतरेषां दिव्यप्रबन्धानामिव अस्यापि दिव्यप्रबन्धस्य अर्चावतारभगवदुद्देश्यकत्वमेव प्रधानमिति स्फोरयितुमेव प्रोक्तमेवमिति ध्येयम्। समनन्तरमेवानुगृह्यमाणे द्वितीये दिव्यप्रबन्धे [गोदासूक्ते] प्रथमतृतीयादिगाथासु श्रीवेङ्कटेशभगवदुक्तिः स्फुटतरमस्तीति च प्रतिपत्तव्यम्। गोदादेव्याः स्वकीये क्षेत्रे यो भगवान् विराजते वटपत्रशायीति, स तु श्रीवेङ्कटेश श्रीरङ्गनाथाद्यभिन्न एव भावितोऽनयेति च वेदितव्यम् ॥] ३

इति तनियन्समाख्यमुखपद्यविवरणं समाप्तम् ॥

॥ श्रीरस्तु ॥

श्रीमत्यै गोदादेव्यै नमः ।

श्रीपराङ्कुशयतीन्द्रवरवरमुनीन्द्रचरणा एव शरणम् ।

श्रीगोदाव्रतप्रबन्धप्रतिकृतिः ॥

अवतरणिका ।

श्रीवैष्णवसंप्रदाये सरोयोगि—शठकोपमुनीन्द्र—विष्णुचित्तमुनीन्द्र—परकालसूरिप्रभृतयो दिव्यसूरिवराः सुप्रथिताः । ते खलु परमकारुणिकेन भगवता स्वकीयनिर्हेतुककृपया समुद्बोधितास्सन्तः प्रबुद्धा अभूवन् । तेषां सर्वेषामपि सूरीणां दिव्यदुहितृस्थानमलङ्कुर्वती गोदादेवी स्ववैभवेन तानप्यतिशयाना तुलसीव स्वाभाविकज्ञानभक्तिसौरभसमृद्धा अतिप्रबुद्धं भगवन्तमपि स्वयं प्रबोधयन्ती परमविलक्षणा प्रथिता । पुरुषोत्तमं भगवन्तं भोक्तुं पुरुषापेक्षयाऽपि वनिता एव हि प्रभवन्ति विशेषतः । पराङ्कुशपरकालादयो हि दिव्यसूरयो निजपुरुषजन्मनि जुगुप्सामुद्वहन्त इव मध्येमध्ये वनिताभूमिकाधारिणस्सन्तो भगवन्तमन्वभूवन् स्त्रीभावनानिर्गलितगाथाविशेषैः । अस्यां खलु गोदादेव्यां तादृशारोपितभावनाया नैव प्रसक्तिः । जन्मनैव वनिता सती समुत्पन्ना सेयं भगवन्तं सुसमृद्धमनुभवन्ती सर्वभक्तसमुदायातिशायिवैभवा भासते । अत एव गोदास्तुतावनुगृहीतं निगमान्तसूरिवरैः— * भोक्तुं तव प्रियतमं भवतीव गोदे ! भक्तिं निजां प्रणयभावनया गृणन्तः । उच्चावचैर्विरहसंगमजैरुदन्तैः शृङ्गारयन्ति हृदयं गुरवस्त्वदीयाः ॥ * इति ।

प्रसङ्गादवतारमहिमानमस्या मनागुपवर्णयामः ।

पुरा त्रेतायुगे विदेहदेशे मिथिलापुर्यां जनकचक्रवर्तिनो यज्ञशालार्थक्षेत्रे यथा हि वैदेहीवपुषा श्रीरुदियाय, तथैव कलियुगेऽस्मिन् पाण्ड्यमण्डलान्तर्गते श्रीधन्विनव्यनगरे श्रीविष्णुचित्तमुनेः पुष्पोद्याने तुलसीवर्धनार्थमुपकल्प्यमाने भूभागे सैव श्रीरुदैद्विष्णुचित्तात्मजावपुषा कर्कटमासि पूर्वफल्गुनीनक्षत्रे परमपवित्रे । * जनकानां कुले कीर्तिमाहरिष्यति मे सुतेति यथा ह्यनुसंदधे विदेहभूपतिस्तथैव विष्णुचित्तसूरिरपि विशेषतोऽनुसंदधानः अनपत्याय स्वस्मै परमकारुणिकेन भगवता प्रदत्तां तां दुहितरं भावयन् गोदेति नाम तस्याः कुर्वन् * धन्वाध्वन्यस्य धारासलिलमिव धनं दुर्गतस्येव दृष्टिर्जात्यन्धस्येव पङ्गोः पदविहृतिरिव * इत्युक्तरीत्या अलभ्यलाभेन तेन परमानन्दपारावारनिमग्नहृदयस्स तां लोकोत्तरप्रक्रियया परिपोषयन् काले पञ्चभिश्च संस्कारैस्संस्कृत्य परज्ञानपरभक्तिविरक्तिसंपत्समुज्ज्वलामद्वितीययशस्विनीमकार्षीत् ॥

पित्रोः परमानन्दसंदोहसंदायिनी सेयमाशैशवादच्युते भगवत्यप्रच्युतभक्तिभूमा तस्यैव पत्नीभावं स्वस्मिन्नध्यवस्यन्ती * तमन्तरेण नैवान्यं मनसाऽपि पतिं वृणे * इति सुस्पष्टं च संगिरमाणा विष्णोरेव तस्य वैभवं विपुलं विचिन्तयन्ती व्याहरन्ती विलिखन्ती च विवर्धते स्म । जनकः श्रीमान् विष्णुचित्तः प्रत्यहं वटदलशायिभगवते समर्पयितुं पुष्पमालां सज्जीकृत्य कण्डोले निधाय कार्यान्तरपरस्स्यात् । तदात्वे सेयं दिव्याम्बरदिव्याभरणभूषिता सती तामेव पुष्पमालां स्वकीयचिकुरप्रकरे रहसि बिभ्रती "भगवतोऽहमनुरूपा मनोहरा च किमु वर्ते !" इति स्वात्मानं परीक्षमाणा, पुनः पितुरुपस्थानादर्वागेव तां पुष्पमालिकां चिकुरबन्धादुद्वास्य कण्डोले

तस्मिन्नेव यथायथं विनिदधती नित्यमेवमाचरन्ती, अविदितैतत्समाचारेण पित्रा समर्पितया तयैव स्रजा भगवन्तममन्दानन्दकन्दलितस्वान्तमाकलयन्ती चावर्तत ॥

एवमपगच्छति बहुतिथे काले कस्मिंश्चन दिने यथावत्पुष्पमालां सन्नाह्य कार्यवशाद्बहिर्गतो विष्णुचित्तस्सहसा च प्रतिनिवर्तमानो दुहितुश्चिकुरप्रकरे विन्यस्तां तां स्रजमवलोक्य, आः ! कीदृशमिदमपचरितमित्यवसीदन् अमर्षपरवशश्च सन् साध्वि ! नैवंविधं कर्म कर्तुमर्हति भवती ; मनसाऽपि चिन्तयितुमयोग्यमिदं कर्म हन्त कथं नु भवती कर्मणाऽपि कलयति ? किमेवं नित्यशः कलयन्ती वर्तसे ? हा बत ! मामपि खल्वपचारगर्ते निपातितवत्यसि, दुःसहमिदं मे दुःखं त्वया कृतम्' इत्यादिकमभिधाय 'मा स्म तावदितः परमेवं कार्षीः' इति च शिक्षयित्वा, तस्मिन्दिने भगवत्सन्निधौ पुष्पसमर्पणमकुर्वाणः कैङ्कर्यविच्छेदविषादाभिभूतस्तूष्णीक आसीत् ॥

अनुपदमेव निशीथे स एव वटपत्रशायी भगवान् मुनेरस्य स्वप्ने दर्शनं दिशन् 'कुतो नु भवानद्य मे स्रजं न समार्पिपत् ?' इत्यनुयुज्य, दुहितुरपचरितमेव तत्र निमित्तमिति मुनिना विज्ञापितमाकर्ण्य सादरमेवमादिदेश-"भगो ! चिराद्दुच्छिष्टामेव स्रजमुपभुज्य सुरभिमौलिस्समृद्धानन्दश्चाहमस्मि, तादृशाय मह्यं तादृशीमेव मालां नियतमुपहर्तुं मर्हति भवान्" इति । आदिश्य चैवमन्तर्हितो हरिः ॥

अथ शयनादुत्थितो गोदां स्वदुहितरं साक्षादखिलेशानां जगतो विष्णुपत्नीमेवावधारयन् ततः प्रभृति भगवद्दिव्याज्ञानुसारेण तादृशीमेव स्रजमुपहरन् तस्य निरवग्रहमनुग्रहमैकान्तिकमाससाद । अनेनैव हेतुना दुहितुश्च नाम चक्रे * शूडिक्कोडुत्त नाचियारिति [स्वोच्छिष्टमाल्यदात्री देवीति] । इदमैतिह्यमस्मिन्दिव्यदेशे अद्याप्यनुष्ठानगोचर आलक्ष्यते । प्रत्यहं प्रातर्गोदादेवीमन्दिरात्तदुपभुक्तं माल्यं वाद्यघोषादिमर्यादासनाथमानीयते श्रीभगवन्मन्दिरमिति ॥

गोदादेव्या वयो वर्धते ज्ञानभक्तिविरक्तिभिस्सह । भगवत्येकस्मिन्नेव चास्या अनुरागोऽप्यभिवर्धते । * पतिसंयोगसुलभं वयो दृष्ट्वा च मे पिता । चिन्तार्णवगतः पारं नाससादाप्लवो यथा * इति श्रीरामायणोक्तप्रक्रियया अस्या जनकोऽपि विष्णुचित्तो वैवाहिकचिन्तार्णवविनिमग्न आस्त । भगवन्तमेकमन्तराऽन्यं कापुरुषं नैव मनसाऽपि कलयेयमिति तावदेषा सुदृढमध्यवस्यति । पिता च तदीयं वस्तु स एव कामं स्वीकुरुतामिति निर्भरोऽवतस्थे । इयं च स्वकीयप्रेमपूरपरीवाहरूपं दिव्यप्रबन्धद्वितयं प्रादुर्भाव्य भगवन्तमनवग्रहानुग्रहोन्मुखं कर्तुमयतत । तच्च दिव्यप्रबन्धद्वयम्— तिरुप्पावै, नाचियार् तिरुमोऴि इति प्रसिद्धम् ॥

प्राथमिकस्य तिरुप्पावैनाम्नो दिव्यप्रबन्धस्य प्रभावः सर्वातिशायी सुप्रथितः । भगवान् रामानुजमुनिर्भाष्यकारो गुरुवर इममेव दिव्यप्रबन्धं नित्यमनुसंदधानः * तिरुप्पावैजीयरिति दिव्यनाम्नैव प्रथामाश्नुतेति संप्रदायविदो विदन्ति । दिव्यप्रबन्धेऽस्मिन्नशेषा अपि वेदान्तार्था स्समुल्लसन्तीति नातिशयोक्तिः । कृष्णावतारसमये गोप्यः कात्यायनीव्रतविशेषमन्वतिष्ठन्मार्गशीर्षमास इति पौराणिकी प्रथा वरीवर्ति । तदनुकार एव क्रियते दिव्यप्रबन्धेनानेन । (पावै) द्राविडभाषायां व्रतस्य नाम । (तिरु) श्रीशब्दपर्यायः । श्रीव्रतप्रबन्ध इत्युक्तं भवति ॥

इत्यवतारिका ।

श्रीः ॥

श्रीमत्यै गोदायै नमः ॥

श्रीकाञ्ची. प्रतिवादिभयङ्कर-अण्णङ्गराचार्यकृतः

॥ श्रीगोदाव्रतप्रबन्धविवर्तः—तिरुप्पावै ॥

(मूलम्.) मार्गळित्तिङ्गळ् मदिनिरैन्द नन्नाळाल् * नीराडप्पोदुवीर् पोदुमिनो नेरिळैयीर् *
शीर्मल्हुमाय्प्पाडि शेल्वच्चिरुमीर्गाळ् * कूर्वेल्कोडुन्तोळिलन्नन्दगोपन्कुमरन् *
एरार्न्दकण्णि यशोदैयिळञ्शिङ्गम् * कार्मेनिच्चेङ्गण् कदिर्मदियम्पोल् मुहत्तान् *
नारायणने नमक्के परैतरुवान् * पारोर्पुहळ प्पडिन्देलोरेम्बावाय् ॥ १

मार्गशीर्षमासोऽयम् ; पक्षश्च चन्द्रमसा परिपूर्णः ; भो भो दिव्यभूषणाढ्याः ! समृद्धिसमेतव्रजवासिन्यः ! संपन्नबालिकाः ! स्नातुमाजिगमिषवः ! काममागच्छत ; तीक्ष्णशूलायुधेन कठोरकर्मकर्तुर्नन्दगोपस्य सूनुः सुभगदृशो यशोदाया बालसिंहः कालमेघनिभतनुः पुण्डरीकाक्षः सूर्यचन्द्रोपममुखशाली नारायण एव अस्माकमेव पुरुषार्थं प्रदास्यति ; भूमण्डलस्थास्सर्वेऽपि यथा श्लाघेरन् तथा नाम मार्गशीर्षव्रतेऽस्मिन्नवगाढा भवेम ॥ (इति गाथाविवर्तः ।)

मार्गशीर्षव्रतविशेषानुष्ठानार्थं संमिलिता गोपिका अन्या अपि गोपीः स्वगोष्ठ्यामन्वेतुमाह्वयन्तीति भावबन्धं निधाय निबध्नाति स्म गोदा प्रथमां गाथाम् * मार्गळित्तिङ्गळ्मदिनिरैन्दनन्नाळालित्यादिकाम् । मार्गशीर्षमासस्संप्राप्तः ; आपूर्यमाणपक्षश्च [राका च] सन्निदधे । अद्य यासामिह गोपीनां व्रताङ्गभूतं पुण्यस्नानं कर्तुमभिरुचिरास्ते ताः काममागच्छन्त्विह । असीमकरुणावरुणालयो यशोदास्तनंधयो नन्दनन्दनो भगवान् कृष्ण एतदस्मदीयं व्रतं फलेग्रहि संविधास्यति । अतो निश्शङ्कमागन्तव्यमागन्तुकामैर्ललनानिवहैः इति गोपीगिरा गोदादेवी कथितवती ।

चिरं निगलबन्धे स्थितो जनः कदाचित्तस्माद्बन्धाद्दैवाद्विमुक्तस्सन् बन्धमोक्षप्रापको दिवसोऽयं सुशोभन इति यथा तं दिवसं पुनःपुनरभिनन्दति, यथा च धनुर्यागोत्सवप्रेक्षणापदेशेन कृष्णबलरामौ व्रजादानेतुं कंसेनादिष्टो महात्मा अक्रूरः * अद्य मे सफलं जन्म सुप्रभाता त मे निशा । यदुन्निद्राब्जपत्राक्षं विष्णोर्द्रक्ष्याम्यहं मुखम् * इति तं दिनविशेषं श्लाघतेस्म, तथा गोप्योऽपि श्रीकृष्णविश्लेषेण चिरमवसन्नास्स्थिता अधुना व्रतानुष्ठाननिर्वर्तनच्छलेन तन्मुखारविन्दसेवाप्राप्तिहेवाकभरिता व्रतानुष्ठानार्थं गोपवृद्धानामनुमतिं यस्मिन्दिने प्रापुस्तदेव सुदिनं सुष्ठु श्लाघन्ते । गीताचार्यो भगवान् (दशमेऽध्याये) * मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः * इति मार्गशीर्षमासं स्वांशभूतमकथयदिति सुप्रथितम् । तादृशः पावनो मासो यदृच्छयाऽद्य संप्राप्त इति संतोषभूमानं प्रकाशयन्ति गोप्यः * मार्गशीर्षमासोऽयम् * इति । ब्राह्ममुहूर्तवदसौ मासः सत्त्वोत्तरकालविशेषः खलु । वैष्णवो हि मासोऽयम् । * चैत्रः श्रीमानयं मासः पुण्यःपुष्पितकाननः । यौवराज्याय रामस्य सर्वमेवोपकल्प्यताम्*

इति श्रीरामचन्द्रयौवराज्याभिषेकमनोरथसमयोपस्थितचैत्रमासोपलालनवदिहापि मासोपलालनं स्थाने। माङ्गलिककार्यानुष्ठानम् * आपूर्यमाणे पक्षे पुण्ये नक्षत्रे * कर्तव्यमिति शास्त्रचोदितम् । तादृशोऽपि समयविशेषो यदृच्छया समुपनत इति पुनस्संतोषातिशयः प्रकाश्यते * पक्षश्च चन्द्रमसा परिपूर्णः * इति।

समुपस्थितेऽस्मिन् परमपावने परमशोभने च समयविशेषे किं चिकीर्षितमित्यपेक्षायाम् स्नानं चिकीर्षितमिति प्रतिपादयन्ति * स्नातुमाजिगमिषव इत्यनेन। मार्गशीर्षव्रताङ्गस्नानं चिकीर्षितमिति बाह्योऽर्थः। भगवदनुबुभूषैव सैत्यमन्तरङ्गार्थः। * एष ब्रह्म प्रविष्टोऽस्मि ग्रीष्मे शीतमिव ह्रदम् * इति खलु ब्रह्मानुभवसमुत्सुकानां वचःप्रणाली। गोपीनां कृष्णसकाशोपसर्पणं प्रति व्रतविशेषानुष्ठानमिति व्याजमात्रं ह्येतत्। कृष्णस्य धूर्ताग्रेसरतां गोपकुमारिकाणां यौवनसंमुखीनवयस्कतां च विलोकितवन्तो गोपवृद्धाः कृष्णमन्यतो गोपीश्चान्यतो न्यवीविशन्; परस्परं मुखावलोकनप्रसक्तिरपि नाभूत्। अस्यामवस्थायां कृष्णस्य गोपीनां च परमभाग्यवशादनावृष्टिरजनि। गोधनानां व्रजवासिनां वल्लवानामनावृष्ट्या सुदुस्सहो हि महान् क्लेशः; अत एव ते वृष्टिसम्पत्त्यर्थमुपायचिन्तां वितेनिरे। "वृष्ट्यै गोपबालिकास्संघीभूय व्रतविशेषमनुतिष्ठन्तु; घटकाग्रणीः कृष्णो व्रतनिष्पादको भवतु" इत्यवधारयामासुः। एवं नाम गोपवृद्धानामनुमतिसम्प्राप्य तेषामुपच्छन्दनार्थं व्रतानुष्ठानप्रवृत्तिरिति व्याजमात्रम्। तदर्थं व्रताङ्गस्नानाचरणप्रसङ्गो मध्येमध्ये भवति तावत्। स्नानप्रस्तावं कुर्वत्य इमा गोपिकाः स्नानार्थं जलाशयतीरं गता इति तु नास्मिन् प्रबन्धे मात्रयाऽपि प्रतिपाद्यते। भगवतो नीलाभर्तुः कृष्णस्य सन्निधिमभ्येत्य स्वकीयामनन्यार्हतां नित्यसंश्लेषाभिरुचिं नित्यकैङ्कर्यश्रद्धां च विज्ञाप्य कृतकृत्या अभूवन्नित्येव सुस्पष्टमवगम्यते। तथाचात्र क्रियमाणः स्नानप्रस्तावो भगवदनुभवकुतूहलमेव विवक्षतीति वेदितव्यम्। दिव्यप्रबन्धोऽयं व्यङ्ग्यार्थप्रधान इत्युपरिष्टादुपपादयिष्यते। तद्बीजभूतमिदमितिच बोध्यम्॥

भो दिव्यभूषणाढ्या इति यदस्ति गोपीनां संबोधनम् तस्यायमभिप्रायः; कृष्णसंश्लेषप्रस्तावमात्रेणैव रोमाञ्चितदिव्यदेहा इमा वल्लव्यः सर्वाभरणभूषिता इव विराजन्त इति। * आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान्। सदा परगुणाविष्टो द्रष्टव्यस्सर्वदेहिभिः॥ * इत्युक्तलक्षणसम्पन्नता हि वस्तुतो भागवतजनानां दिव्यभूषणभूषितत्वं नाम। [समृद्धिसमेतव्रजवासिन्यः संपन्नबालिकाः !] इति संबोधनद्वितयस्यायमर्थः; श्रीवैकुण्ठे दिव्ये धाम्नि विराजमानो भगवान् परमपुरुषः स्वकीयं स्वामित्वशेषित्वादिरूपं परत्वमेव केवलं सूरीननुभावयति; तत्र दुःखितानामभावात् परदुःखदुःखित्वरूपदयायाः प्रदर्शनमप्रसक्तम्; दुष्टानामभावात् दोषादर्शित्वदोषभोग्यत्वादिरूपवात्सल्यगुणस्य प्रकाशनमनवकाशपराहतम्। मन्दानामभावात् * महतो मन्दैस्सह नीरन्ध्रसंश्लेषलक्षणकसौशील्यस्याविष्करणमलब्धास्पदम्। आगस्विनामभावात् क्षान्तिप्रकटनमपि निरवकाशम्। * निरञ्जनः परमं साम्यमुपैतीत्युपनिषदाम्नातरीत्या स्वेन सह सर्वथा साम्यमधिगतवत्सु तत्रत्येषु सूरिषु दयावात्सल्यसौशील्यक्षान्त्याद्युत्तमगुणानां प्रकाशनमसंभवीति निर्विवादमेतत्। तत्तादृशानामनवधीनामुत्तमगुणानामाविष्करणार्थमेव हि भगवान् विभवावतारान् वितनोति। * गुणपरीवाहात्मनां जन्मनाम् * इत्येषा श्रीपराशरभट्टार्यदिव्यसूक्तिरिममेव ह्यर्थमुद्घाटयति। निर्दिष्टानामुत्तमगुणानां रामाद्यवतारापेक्षयाऽपि कृष्णावतारे हि प्रकाशपौष्कल्यम्। एवंविधगुणसमृद्धिशालित्वमेव

व्रजे अभिप्रेत्य "समृद्धिसमेतव्रजवासिन्यो भोः" इत्युक्तम् । अथ च संपन्नबालिकाः ! इति संबोधने कीदृशं सम्पन्नत्वं बालिकासु विवक्षितमितिचेत्; * स तु नागवरः श्रीमान् * इति ग्राहग्रस्तगजेन्द्रविषये, * लक्ष्मणो लक्ष्मिसम्पन्नः * इति खनित्रपिटकादिधरणशीललक्ष्मणविषये, * अन्तरिक्षगतः श्रीमान् * इति लङ्केश्वरधिकृताकिञ्चनविभीषणविषये च यादृशं संपदाढ्यत्वं महर्षिभिरभिसंहितम्—भगवद्दास्यैकनिष्ठागरिष्ठत्वात्मकम्, तादृशमेव संपन्नत्वमिहापि बल्लवीषु विवक्षितमिति वेदितव्यम् । अन्यास्तु संपदो नश्वरत्वेनावधारिताः; इयमेकैव हि संपत् यावदात्मभाविनी विराजितुमलम् ॥

भो बालिकाः ! इति संबोधनं च साकूतम्; व्रजे पुंसां वृद्धनारीणां च जन्म विगर्हणीयं भवति—कृष्णोपभोगयोग्यताविरहात् । तादृशं गर्हणीयं जन्म विहाय कृष्णोपभोगयोग्यतासमृद्धं बालिकाजन्म प्राप्तवतीनां युष्माकं भाग्यपरिपाको हि वाचामभूमिरिति ॥ व्रजे जन्म, कृष्णसमकाले जन्म, कृष्णस्पृहणीयवयस्कत्वेनावस्थितिश्चेत्यादिकं वः सुमहत्तरं हि सौभाग्यमिति प्रशंसितं भवति ॥ * आजिगमिषवः काममागच्छत * इतिकथनेन भगवद्विषयावगाहने इच्छामात्रमधिकारः, नान्या योग्यतासंपदपेक्षिता—इति सूचितं भवति । * श्रद्धैव कारणं पुंसामष्टाक्षरपरिग्रहे * इत्येतदपि वचनमत्र स्मर्तव्यम् । देशनियमः कालनियमः प्रकारनियमः अधिकारिनियमइत्येवंविधेषु नियमेषु नैकोऽप्यत्रापेक्षितः, अभिलाष एक एवापेक्षितः, तस्य च भगवद्विषयकत्वमावश्यकम्—इत्युक्तं भवति । * विदितस्स हि धर्मज्ञः शरणागतवत्सलः । तेन मैत्री भवतु ते यदि जीवितुमिच्छसि ॥ * इति प्रतिकूलाग्रेसरं महापापिनं रावणमपि खल्वाह्वयति भगवती जानकीदेवी । अथ भृशमनुकूलानामाह्वाने को विस्मयः ।

स्वात्मनां पुरुषार्थप्रदायकत्वेनात्र निर्दिश्यमानो नारायणो नन्दगोपस्य तनयत्वेन यशोदायाः सिंहशावत्वेन च कीर्त्यते । गोप्य इमाः कृष्णस्य गोपालडिम्भत्वमेव ज्ञातुं प्रभवन्ति न पुनर्नारायणत्वम्; अथाप्यत्र नारायण इति कथनं तु * एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः । नागपर्यङ्कमुत्सृज्य ह्यागतो मथुरां पुरीम् ॥ * इति ज्ञानिनां मुखादसकृद्विनिर्गच्छतः प्रमाणरत्नस्य श्रवणभूम्नेति रसवत्तरं भाषितमाचार्यवर्याणाम् । नन्दगोपस्य यद्विशेषणमस्ति * तीक्ष्णशूलायुधेन कठोरकर्मकर्तुः * इति; अत्रेदं हृदयम्: । नन्दस्तावत् कृष्णलाभात्पूर्वं परमसाधुरासीत्; बालतृणेष्वपि गाढं पादन्यासं न कुर्यादिव क्रिमिकीटाद्युपमर्दचकितस्सन् । तवादृशः परमसात्त्विकानामग्रेसरोऽयं नन्दः कृष्णलाभादनन्तरं परमसुकुमारतदीयदिव्यशुभविग्रहे प्रेमभूम्ना पिपीलिकादिक्षुद्रजन्तुभ्योऽप्यवद्यमाशङ्कमानस्सन् कृष्णशिशुशयनास्पददोलिकाया अधस्तात्तीक्ष्णायुधपाणिरुपविश्य स्वकीयं शौर्यं तेष्वल्पजन्तुष्वपि व्यापारयितुमुपचक्रम इव; तद्द्योतनमिह विवक्षितम् । एतेन नन्दस्य मङ्गलाशासनपरत्वमतिविलक्षणं सूचितं भवति । मङ्गलाशासने विख्यातस्य विष्णुचित्तसूरेरात्मजा गोदा सेयं तत्र दृष्टिं न्यधादिति युक्तरूपमेतत् । नन्दगोपस्य सूनुरिति कथनेन— * जन्माद्यस्य यत इत्याद्युक्तरीत्या सर्वकारणभूतोऽपि भगवान् * अजायमानो बहुधा विजायते * * पिता पुत्रेण पितृमान् योनियोनौ * इत्याद्याम्नातप्रक्रियया केवलं करुणाभूम्ना नन्दनन्दनस्सन्नवातरदस्मादृशान् समुत्सुकजनाननुग्रहीतुमेवेत्यभिव्यञ्जितं भवति । नन्दगोपयशोदयोरात्मज इत्यनभिधाय "नन्दस्य सूनुः, यशोदायाः

सिंहशाव " इत्यभिधानेन—कृष्णकिशोरो हि हितकामिनन्दगोपसकाशे पुत्रत्वोचितविनीतत्वचकितत्वादिपरिकर्मितो वर्तेत, प्रियकामिन्या यशोदाया स्वसविधे तु सिंहशाव इव व्यतिवेलखेलत्सन् अप्रधृष्यो वर्तेत-इति प्रसिद्धिरुपबृंहिता भवति। वस्तुतो यशोदा च कृष्णस्य दौर्ललित्यानि द्रष्टुमुत्कण्ठिता सती तं विनेतुमनिच्छन्ती पुनःपुनरुद्धतकृत्येष्वेव समुज्जृम्भितोत्साहमाकलयतीति इयमेव खलु गोदा कथयति स्वसूक्ते [उपरितनदिव्यप्रबन्धे] * अञ्जवुरप्पाळशोदै आणाडविट्टिट्टिरुक्कुम् * इत्यनया गाथया। [तस्या इयं छाया—" तव जननी यशोदाऽपि त्वां न भीषयति ; प्रत्युत सा धूर्तचेष्टितेष्वेव त्वां प्रोत्साहयति " इति ॥ यशोदायाः " सुभगदृश " इति विशेषणेन नयनसौभाग्य-प्रतिपादनमकारि। साक्षाज्जननी देवकी क्षणमात्रमेव कृष्णमवेक्ष्य दौर्भाग्यभूम्ना तमन्यत्र प्रेषितवती स्वचक्षुषा अतिमानुषशीलवृत्तवेषान् अतिवृत्तामरविक्रमप्रतापांश्च न मनागप्यवेक्षितुमविन्दत भाग्यम् ; एषा तु यशोदा सर्वमपि तदीयं चेष्टितवर्गं सकलमप्यवयवसौन्दर्यलावण्यादिकमनुक्षणमवेक्ष्य " जगति मत्सदृशी पुत्रवती नान्या काचिद-प्यस्ती " ति सुधीरमभिधातुं प्राभवत् ; अतश्च यशोदाया एव चक्षुस्सौभाग्यमनिर्वचनीयमित्यवगन्तव्यम् ॥

अथ " कालमेघनिभतनु " रित्यादि कृष्णान्वयि विशेषणत्रयं तस्य निरवधिककारुण्यशालितां व्यनक्ति। दिव्यमङ्गलविग्रहे दिव्यनेत्रे दिव्यमुखारविन्दे च खलु करुणातिशयस्सुगमो भवति। स्वाभीष्टपुरुषार्थप्रदानं प्रति करुणाया एव प्रधानसाधनत्वात् तत्पौष्कल्यविवक्षया तदिदं विशेषणत्रयं प्रयुक्तमिति ध्येयम्। * सूर्यचन्द्रोपममुखशालीत्यनेन—परेषामनभिभवनीयत्वम् आश्रितानां सर्वदोपसेव्यत्वं च कथितं भवति। भगवन्निष्ठं सौलभ्यं हि न सर्वजनताविषयम् ; भक्तानां सुलभ एव सन् इतरेषामग्निवदनुपसृप्यो भवति सः। इदमुभयं चात्यावश्यकं हि तस्य ; भक्तानां परमप्रीतये च कल्पते ॥ [नारायण एव, अस्माकमेव] इत्युभयत्र एवकारं प्रयुञ्जानानां गोपिका-नामयमाशयः— * न हि पालनसामर्थ्यमृते सर्वेश्वरं हरिम् * इत्युक्तरीत्या पुरुषार्थप्रादातृत्वं भगवदेकनिष्ठम् ; आकिञ्चन्यानन्यगतित्वशालिनामेव जनानां फलप्राप्तौ अव्यभिचारप्रसिद्ध्या तदुभयशालिनीनामस्माकमेव पुरुषार्थ-प्रतिग्रहयोग्यता—इति। अचेतनक्रियाकलापस्य फलप्रदत्वमसंभवि ; क्रियया स्वत एव वा सुप्रसन्नो भगवानेव फलप्रदाने प्रवीण इति * फलमत उपपत्तेरित्यादिब्रह्मसूत्रसाधितोऽर्थ इहानुसन्धेयः। * पुरुषार्थं प्रदास्यतीत्यस्य बाह्योऽर्थः अन्तरङ्गार्थश्चेति वर्ततेऽर्थद्वयम् ; उपरि षड्विंशगाथायाम् [* मालेमणिवण्णा ! * इत्यस्याम्] अभ्यर्थयिष्यमाणव्रतोपकरणवस्तुवर्गप्रदानेन व्रतनिष्पादकस्स्यादिति सर्वजनवेद्यो बाह्योऽर्थः ; व्रतानुष्ठानमपदिश्य कृष्ण-कामनैकनिरतानामस्माकं स स्वात्मीयपरिपूर्णानुभवप्रदानेनास्मदीयमनोरथपूरकस्स्यादित्यन्तरङ्गाभिप्रायः। " गोविन्द ! सततं त्वया सहैव संयुक्ता भूयास्म ; त्वन्नित्यकैङ्कर्यनिरताश्च भूयास्म " इति हि [* शिवञ्शिरुकाले * इति] उपान्त्यगाथायामुदीरयन्ति ॥

अन्ततो यदुच्यते * भूमण्डलस्थास्सर्वेऽपि यथा श्लाघेरन्निति ; तत्रेदमवधेयम् ; ख्यातिलाभपूजानिर-पेक्षाणामुत्तमाधिकारिणां परकीयश्लाघायां दत्तदृष्टित्वं नोपपत्स्यते ; श्लाघनमिह तत्कारणभूते संतोषे वर्तते। संतोषपारवश्याद्धि लोके श्लाघनमवतरति। तथा च, सर्वेऽपि जना यथा प्रहृष्येयुस्तथेत्युक्तं भवति। गोपीनामनेन व्रतानुष्ठानेन सुमहत् सुभिक्षं समभूदिति व्रजवासिनां हर्षप्रकर्षो भूयादित्युक्तं भवति ॥

अथ ध्वन्यर्थविवरणप्रस्तावना ॥

दिव्यप्रबन्धस्यास्य प्रभावविशेषमधिकृत्य प्रतिपादयन्तः प्राञ्चः * पातकङ्गळ् तीर्कुम् परमनडिकाट्टुम् वेदमनैत्तुकुम् वित्ताहुम् * इत्यादिपद्यविशेषं प्राणैषुः ; अस्यार्थस्तु—सकलपातकप्रणाशकं परमपुरुषपादारविन्दप्रदर्शकं सकलवेदबीजभूतं च त्रिंशद्गाथात्मकगोदादिव्यप्रबन्धं ये न जानते, ते सत्यं भुवो भर इति। नात्र मनागप्यतिशयोक्तिः । सकलपातकप्रणाशकत्वं परमपुरुषपादारविन्दप्रदर्शकत्वं चाधिकृत्य किमस्माभिरिह लेखनीयमस्ति ? तत् सर्वेषामास्तिकानां स्वस्वानुभववेद्यं भविष्यति। सकलवेदबीजभूतत्वं यदुक्तम् तत्तु विवरणसापेक्षम्। सकलवेदसारार्थगर्भितत्वं दिव्यप्रबन्धस्यास्य सुमहान् विशेषः। अत एव हि चतुश्शास्त्रवित्तमो भगवान् रामानुजमुनिरमुमेव दिव्यप्रबन्धं सततमनुसन्दधानः * तिरुप्पावैजीयरिति प्रथितो विरेजे। दिव्यप्रबन्धस्यास्य मार्गशीर्षमासि परं नोत्कर्षः ; अपि तु स दैनन्दिनिकः। मन्दिरेषु मठेषु सदनेषु सर्वेष्वपि प्रतिदिनमेतत्प्रबन्धानुसन्धानमन्तरा भगवदाराधनपूर्तिर्न भवतीति प्रात्यक्षिकं ह्येतत्। एवं नाम समेधमानः प्रभावातिशयोऽस्य दिव्यप्रबन्धस्य सकलार्थपुष्टिभासुरत्वप्रयुक्त एवेति वेदितव्यम्। ते चार्थविशेषा इह ध्वन्यर्थत्वेन विव्रियेरन् प्रतिगाथम्। प्रबन्धस्यास्य द्राविडव्याख्यानानि परमकृपया प्रणीतवन्तस्सर्वज्ञाः पूर्वाचार्यवर्या ध्वन्यर्थविवरणे न प्रवृत्ता इति हेतुना केचिदर्वाचीना ध्वन्यर्थानिह नाद्रियन्ते ; दूरे सन्तु नाम तादृशा अरसिका जडाः। उपदेशमात्रगम्यास्तादृशोऽर्थविशेषा इति धियैव पूर्वाचार्या न सुस्पष्टं व्यलिखंस्तान्। तेऽपि महामतयस्तत्रतत्र मात्रया सूचितवन्त एव सन्ति। आचार्यहृदयदिव्यशास्त्रमहार्णवे गाढमवगाढानां सतां यथा परमा तृप्तिरुदियात्तथा नाम ध्वन्यर्थविशेषाणां विशदीकरणे सुमहती श्रद्धा जागर्ति नः। एकतस्तावदस्ति ग्रन्थविस्तरभीतिश्च ; विस्तृतं ग्रन्थं कोमलमतयो विलोकितुमुद्विजेरन्निति। तद्विलिखामो नातिसंक्षिप्तविस्तृतमर्यादया ध्वन्यर्थविशेषान्। ध्वन्यर्थो— व्यङ्ग्यार्थः स्वापदेशार्थ इति पर्यायः ॥

अलङ्कारशास्त्रे रूपकातिशयोक्तिर्नाम कश्चिदलङ्कारः प्रथितः ; * पश्य नीलोत्पलद्वंद्वान्निस्सरन्ति शिताः शराः * इति तल्लक्ष्यम्। अत्र नीलोत्पलद्वंद्वमप्यविवक्षितम्, शिताः शरा अप्यविवक्षिताः। प्रेयस्या नयनद्वयान्निस्सरतः कटाक्षपातान् विवक्षन् विचक्षण एवमाचचक्षे। कृत्स्नेऽपि दिव्यप्रबन्धेऽस्मिन्नयमलङ्कारस्सुनिविष्ट इति सुवचम्। अन्यदप्यलङ्कारचतुष्टयमस्ति नाम—अप्रस्तुतप्रशंसा, प्रस्तुताङ्कुरः, मुद्रा, समासोक्तिरिति। * अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया * इत्यप्रस्तुतप्रशंसालक्षणम् ; प्रकृतस्य कस्यचन विषयस्य परिस्फूर्तये अप्रकृतस्य कस्यचिद्विषयस्य कथनम् अप्रस्तुतप्रशंसेत्युच्यते। एतदलङ्काररीत्याऽपि काश्चन गाथा इहावतीर्णा इति सुवचम्। नात्र भूयिष्ठमौचित्यं पश्यामः॥ * प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः * इति तु प्रस्तुताङ्कुरालङ्कारलक्षणम्। वाचनिकतया प्रतिपाद्यमानस्यार्थस्यापि प्रस्तुतत्वम्, व्यञ्जनावृत्त्या प्रतीयमानस्यार्थस्यापि प्रस्तुतत्वं यत्र तत्र प्रस्तुताङ्कुर इत्याहुः। त्रिंशत्यपि गाथासु अयमेवालङ्कार इत्यभ्युपगमोऽपि साधीयान्। वाच्यार्थव्यङ्ग्यार्थयोरुभयोरपि समप्राधान्यसिद्धिरिह बोध्या। * समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् * इति समासोक्त्यलंकारलक्षणमाहुः। प्रस्तुते कस्मिंश्चन विषये वर्ण्यमाने अप्रस्तुताः केचिदर्था यत्र स्फुरेयुस्तत्र समासोक्तिरलङ्कार इति सिध्यति।

दिव्यप्रबन्धेऽस्मिन्नेतदलङ्कारस्मरणं सर्वथाऽप्यप्रसक्तम् ; वाच्यार्थापेक्षयाऽपि व्यङ्ग्यार्थानामेवात्र प्राधान्यातिशय इति सिद्धान्तबलात् ॥ * सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः * इति मुद्रालङ्कारलक्षणमाहुः ; एषोऽप्यलङ्कारोऽत्र प्रबन्धे भूरिशस्समन्वेति ।

प्राधान्येनात्रेदमस्माकं विवक्षितम् ; दिव्यप्रबन्धेऽस्मिन्नुपरिष्टात्सप्तमगाथायाम् प्राभातिकाभिज्ञानकथने "पक्षिविशेषाणां मिथस्संमिलितानां भाषणस्य ध्वनिः किं त्वया न श्रूयते ?" इति कथितमस्ति । "भाषणं किं त्वया न श्रूयते ?" इत्युक्तिविन्यासो हि स्वारसिकः ; "भाषणस्य ध्वनिः किं त्वया न श्रूयते ?" इति विलक्षणो ह्ययं वाक्यविन्यासप्रकारः ; एतेन च, ध्वनिप्रधानतयैव भाषन्ते महान्तः, वाचनिकादर्थादपि ध्वन्यर्थ एव सामिनिवेशं ग्राह्य इति ग्राहितं भवति । इति ॥

अथ ध्वन्यर्थविवरणम् ॥ मार्गशीर्षपदेन दिव्यप्रबन्धोऽयमुपक्रम्यते ; मृगशीर्षनक्षत्रयुक्ता पौर्णमासी यस्मिन्मासि भवति स मार्गशीर्षमासः । नक्षत्रेषु तिथिषु च वृद्धिक्षयसंभवात् तदानुगुण्येन कदाचिद्विपर्ययो भवतु कामम् ; प्रायेण मृगशीर्षनक्षत्रपौर्णमासीतिथ्योस्सहयोगं निमित्तीकृत्यैव मार्गशीर्षमासव्यपदेशस्समजनि । चैत्रवैशाखादिफाल्गुनान्तव्यपदेशा अपि चित्राविशाखादिनक्षत्रपौर्णमासीतिथियोगनिमित्तका एवेति वेदितव्यम् । एवंच मार्गशीर्षपदस्य यथावस्थितोऽर्थ उक्तः । अथावधेयम् । मार्गः शीर्षमिति पदद्वयं मिलितं सत् मार्गशीर्षमिति भवति च । वासुदेवपदम् वसुदेवस्यापत्यमित्यर्थे तद्धितवृत्त्या यथा निष्पद्यते, तथा (सर्वत्र) वसतीति वासुः ; वासुश्चासौ देवश्च वासुदेव इति (अर्थभेदेन) व्युत्पादनप्रकारान्तरेणापि निष्पद्यत इति श्रीभट्टपादानां निरूपणमिह स्मर्तव्यम् । मार्गेषु यच्छीर्षम् तन्मार्गशीर्षम् । मार्गपदं साधनवाचि । साधनमुपाय इति पर्यायः । उपायेषु यच्छीर्षम् अन्ततो निविष्टम् तदेवात्र मार्गशीर्षपदामिलप्यम् । उपायास्तावत् कर्मयोगो ज्ञानयोगो भक्तियोग इत्येवं परिगण्यन्ते ; आचार्याभिमान एवह्युपायपरम्परायामन्ततोऽवतिष्ठते । तत उपरि साधनकोटौ गणयितुं किमपि वस्तु नास्ति । तथाच आचार्याभिमान एवात्र मार्गशीर्षपदोपस्थापितो भवति । कृत्स्नोऽयं दिव्यप्रबन्ध आचार्याभिमानरूप [मार्गशीर्ष] चरमोपायप्रतिपादने गाढरूढतात्पर्यक इति आदौ मुद्रालङ्कारप्रक्रियया प्रतिश्रुतं भवतीति प्रतिपत्तव्यम् । गोदादेवी सैषा आचार्याभिमान एव स्वस्य बलिष्ठ उपाय इति स्वकीये द्वितीयदिव्यप्रबन्धे [गोदासूक्ते] गाथाद्वितयेन सुस्पष्टं प्रतिपादयति ; तथाहि ; तत्र दशमदशके चतुर्थचरमगाथे एतत्प्रतिपादनपरे अवतीर्णे ; चतुर्थगाथायां तावदिदमुच्यते [* कोलैयरक्कियै मूक्करिन्दिट्ट * इत्यादि ।] "स्वैरचारिण्याः शूर्पणखाया अङ्गभङ्गमाकलितवतो भगवतो रामचन्द्रस्य वचनं यद्यपि वितथं भवेत् ; मम यदस्ति विष्णुचित्तमुनीन्द्रपुत्रीत्वम् तदपि किं वितथं भवेत् !" इति । इदमत्र हृदयम्–, * मित्रभावेन संप्राप्तं न त्यजेयं कथञ्चनेत्यादिभगवद्वाक्यवैतथ्ये सत्यपि आचार्यसंबन्धस्य वैतथ्यं न खलु संभविष्णु ; * सिद्धिर्भवति वा नेति संशयोऽच्युतसेविनाम् । न संशयोऽस्ति तद्भक्तपरिचर्यारतात्मनाम् * इति ह्याहुः । * द्यौः पतेत् पृथिवी शीर्येद्धिमवान् शकलीभवेत् । शुष्येत्तोयनिधिः कृष्णे ! न मे मोघं वचो भवेत् * इत्युक्तवतो भगवतो वचनादपि आचार्यसंबन्धस्य विश्वसनीयता व्यञ्जिता भवति ॥] अथ तत्र दशमगाथा तावदेवम् [* नल्लवेनूतोळि !. इत्यादि ।] अयिभो

मदीयप्राणसखि! भोगिभोगशयनीयशायी भगवान् सर्वस्मात्परो निरवधिकैश्वर्यसम्पन्नस्सर्वाभ्यधिकः परमपुरुषः; वयं तु क्षुल्लका मर्त्यजनाः; हन्त किं वयं करवामहै! सर्वाधिकस्य तस्य भगवतः क्षुद्राणामस्माकं च कथमिव साङ्गत्यं घटेत? (इति वैयाकुल्यां सत्याम् मनस्समाहितिरीदृशी भवितुमर्हति; कथमिति चेत्) मदाचार्यो धन्विनव्यनगराधिनाथो विष्णुचित्तसूरिः सर्वथा स्वस्य विधेयभूतं तं परमपुरुषं स्वस्य सुकरैस्सदुपायैर्यदि समाहूय स्वसन्निकृष्टं कुर्यात् तदा वयं तं सुखेन सेवेमहि ॥ इति; अनया गाथयैतदुक्तं भवति—आचार्यद्वारैव भगवान् लभ्येत, न प्रकारान्तरैरिति ॥ एवञ्च गोदादेव्या द्रढीयानध्यवसायो निदर्शितगाथाद्वितयतः स्पष्टीकृतोऽभूत्। तमेवाध्यवसायमुपबृंहयद्भिर्वचोविशेषैः पूरितेऽस्मिन्दिव्यप्रबन्धे आचार्यवैभवादिकमेव ध्वन्यर्थप्रणाल्यामवतार्यत इत्यवगन्तव्यम्। "मया सुदृढमध्यवसितं शीर्षभूतं मार्गमेव प्रबन्धेऽस्मिन् जीवनाडीनिधायं निधाय अन्यापदेशेन किमपि कथयाम्यहम्" इति गोदादेवी पुरस्तादेव मार्गशीर्षपदविन्यासतः समसूचयदित्यनुसन्धेयम् ॥

अथ [पक्षश्च चन्द्रमसा परिपूर्णः] इत्युच्यते। परेषामाह्लादकं सुविमलं सुविशदं सौम्यं ज्ञानमधुना नः परिपूर्णं भविष्यतीति भावः; * आशंसायां भूतवन्निर्देशः शास्त्रीयः ॥ प्रतिपक्षिपक्षप्रतिक्षेपणौपयिकरूक्षार्थप्रतिपादकतर्ककर्कशग्रन्थसेवां विहाय दिव्यशिशिरसूक्तिसेवाहेवाकातिशय इदानीं धर्तव्य इति च सूच्यते। अथ [स्नातुमाजिगमिषवः! काममागच्छत] इति स्नानार्थमाह्वानमिह निबद्धम्; एतदधिकृत्य पुरस्तादेव प्रोक्तम्; पुनरपि किञ्चिदुदञ्च्यते। श्रीरङ्गराजस्तवप्रणेतारो भट्टपादाः पञ्चाशदधिकैः पद्यैः कावेरीतत्तीरोद्यानवनवीथीप्राकारदिव्यमण्डपचन्द्रपुष्करिणीपुन्नागतरुतल्लजादिकमत्याश्चर्यप्रक्रिययाऽनुभूय, अथ गर्भगृहान्तः प्रविश्य वेत्रवरम् आमोदस्तम्भं चानुभूय श्रीरङ्गनाथदिव्यमङ्गलविग्रहानुभववक्तव्यतायामुपस्थितायाम् * उत्फुल्लपङ्कजतटाकमिवोपयानि श्रीरङ्गराजमिह * इति, * पिब नयन! पुरस्ते रङ्गधुर्याभिधानं स्थितमिव परिफुल्लत्पुण्डरीकं तटाकम् * इति च व्याजह्रुः। मुकुन्दमालायां च * करचरणसरोजे कान्तिमन्नेत्रमीने श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे। हरिसरसि विगाह्य * इत्युक्तिः सुप्रसिद्धा। तथाच भगवद्दिव्यवपुरवगाहनं कमलतटाकविगाहनं चेत्युभयं भक्तानां मते पर्याय इति सुगमम्। स्नानेन देहनैर्मल्यं भवति; भगवद्विषयावगाहनेन आत्मनोऽपि नैर्मल्यं भवति। तदपेक्ष्याऽप्यत्यन्तनैर्मल्यसंपादक-तीर्थशब्दाभिलप्यमहाचार्यकुलावगाहनमिह विवक्षितम्। आचार्यकुलेऽवगाह्य देहेन्द्रियमनोबुद्ध्यात्मनामशेषाणामपि नैर्मल्यं सम्पादयितुं कामयमानास्सर्वेऽपि काममागच्छतेत्याह्वानं सिध्यति। * सत्यं वदेति वैदिकविधेर्यथा सर्वाधिकारिकत्वमक्षतम्, तथैवैतदपीति भावः। आहूयमानानां दिव्यभूषणाढ्यत्वं यदुच्यते, तत्रेदं बोध्यम्; श्रीवैष्णवानां शमदमादयो गुणा एव भूषणतया प्रोच्यन्ते; कङ्कणकुण्डलादिकं तु देहालङ्करणमात्रम्; शमदमादिसम्पत्तिरात्मालङ्कारः। तथाच श्रीवचनभूषणे— (९६ — ९७) * शमो दमश्च मुख्यस्स्यात्सर्वेष्वात्मगुणेष्वपि। उभयोरनयोस्सिद्धौ गुरुर्हस्तगतो भवेत्। गुरौ हस्तगते मूलमन्त्रः करगतो भवेत्। मन्त्रे करगते श्रीमानीश्वरः प्राप्नुयात्करम्। ईश्वरे हस्तमायाते प्राप्यभूमिः करे स्थिता ॥ * इति। एतादृशात्मगुणभूषणभूषितत्वमेवेह विवक्षितम्। इदं भूतकालिकं वा भवतु; भविष्यत्कालिकं वा भवतु; उभयथाऽपि घटते।

अथ [संपदाढ्यव्रजवासिन्यो भोस्संपन्नबालिकाः!] इति संबोधनहृदयमुच्यते। पशूनां वासस्थानं व्रजः; * नृपशुरिति श्रीयामुनार्यैः * वृत्त्या पशुर्नरवपुः * इति श्रीवरवरमुनीन्द्रैश्च प्रोक्तरीत्या पशुप्रायैरस्मादृशैरविवेकिभिरध्युषितमिदं संसारमण्डलमेव व्रजः। अत्र ज्ञानिनो गुरुवरास्तत्त्वदर्शिनोऽपि विराजन्त इति हेतुनाऽस्य संपदाढ्यत्वमुपपन्नम्। अथ च आहूयमानानां जनानां संपन्नत्वं बालत्वं स्त्रीत्वं च यदवबोध्यते तेत्रेदं वेदितव्यम्;— एवमाह्वानलक्ष्यभूतत्वमेव संपन्नत्वम्; ग्रहणधारणपोषणपटुत्वं बालत्वम्; सर्वथा पारतन्त्र्यमेव स्त्रीत्वम्। तथाच, भो शिष्यलक्षणसंपन्नाः! ग्रहणधारणपोषणपटवः! पारतन्त्र्यस्वरूपविदः! समागच्छत—इत्युक्तं भवति। अथ नारायण एव अस्माकमेव पुरुषार्थं प्रदास्यतीति कथ्यते; नारायणस्य बहूनि विशेषणानि च प्रयुज्यन्ते। अत्रेदमवधेयम्। * साक्षान्नारायणो देवः कृत्वा मर्त्यमयीं तनूम्। मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना * इति साक्षान्नारायण एव मानुषविग्रहं परिगृह्य आचार्यतयाऽवतरतीति कथनात् नारायणशब्देनात्र तत्पर्यायभूत आचार्यो विवक्षितः। विशेषणानि च आचार्ये सुष्ठु समन्वितान्येव भवन्ति। तीक्ष्णेनायुधेन कठोरकर्मकर्ता, नन्दगोपः, कुमारः इति प्रत्येकशस्त्रीणि विशेषणानीत्यनुसन्धेयम्। मुद्रालङ्काररीतिरत्र द्रष्टव्या। तीक्ष्णेनायुधेन कठोरकर्मकर्तृत्वं नाम—सुदर्शनपाञ्चजन्याङ्कनरूपकार्यविशेषेण सकलकिल्बिषविनिर्मुक्तत्वसम्पादनरूपकठिनकृत्यकर्तृत्वमाचार्ये प्रथितम्। अयःपिण्डस्य कनकखण्डत्वसम्पादनवत् नित्यसंसारिणं परमनीचं जन्तुं नित्यसूरिनिर्विशेषतां प्रापयतीति यत् तदिदमतिकठिनं हि कृत्यम्। नन्दगोपशब्दोऽप्याचार्ये समन्वेति। नन्दश्चासौ गोपश्चेति नन्दगोपः। नक्तंदिवं ब्रह्मानन्दानुभवभूम्ना आनन्दतुन्दिलस्वान्तः; मन्त्रतदर्थादिगोपनशीलश्च य आचार्यः तस्मिन्नन्दगोपत्वमव्याहतं खलु। नन्दगोपो यथा भगवन्तं वासुदेवं निधिलाभमलभत विना प्रयासगन्धम्, यथा च निर्हेतुककृपाफलभूतपरगतस्वीकारपात्रभूतः तथा अनायासं भगवदनुभवलब्धरि तन्निर्हेतुककृपाभाजने चाचार्ये नन्दगोपशब्दवाच्यता साधर्म्यतोऽप्युपपद्यते। अथास्मिन् कुमारत्वं च संगच्छते; श्रीरामायणे (२-१२-१०६.) * अहं पुनर्देवकुमाररूप मलंकृतं तं सुतमाव्रजन्तम्। नन्दामि पश्यन्नपि दर्शनेन भवामि दृष्ट्वा च पुनर्युवेव * इति दशरथचक्रवर्ती प्राहेति प्रसिद्धं ननु। स यथा श्रीरामचन्द्रानुभवेन पुनर्युवेव बभूव, तथा भगवदनुभवभूम्ना रसायनसेवयेव कौमारं प्राप्नोत्याचार्य इति ध्येयम्।

अथ सुशोभनचक्षुष्कत्वं यशोदात्वं कण्ठीरवत्वं चेति विशेषणत्रयमाचार्ये योजनीयम्। * चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना * (रघुवंशे) इत्युक्तरीत्या शास्त्रैकचक्षुष्कत्वमाचार्ये। "एरार्न्द कण्णि" इति मूलगाथास्थद्राविडवाक्यम् सुन्दरमालिकाधारीत्यर्थमप्यभिधत्ते; * अम्भोजबीजमालाभिरभिजातभुजान्तरम् * इत्युक्तरीत्या तुलसीनलिनाक्षमालाञ्चितत्वमपीह ग्रहीतुं योग्यम्। अथ यशोदासधर्मा च भवत्याचार्यः— कृष्णकिशोरचेष्टितादिभोगानशेषानपि तद्वदविन्दतेति। यशोदा तु बाह्यचक्षुषाऽविन्दत; आचार्यस्तु हार्दचक्षुषेति विशेषः। कण्ठीरवत्वं च गुरुवरे सुनिर्वहम्; श्लो॥ वेदोत्तंसगुहाविहारपटुना श्रीशैलशृङ्गोल्लसन्मायाकेसरिमानितेन गहनन्यायाटवीचारिणा, गम्भीरेण परात्मभेदनमहानादेन नाथेन मे गुप्तोऽहं यतिसार्वभौमहरिणा वर्ते भृशं निर्भयः॥

* मायिमतङ्गजमस्तककोटीपाटनपाटलपाणितलो यः। श्रुत्यटवीकुहरेषु समिन्धे स प्रतिवादिभयङ्करसिंहः ॥ * इत्यादिकमिहानुसन्धेयम् ॥

अथ कालमेघनिभतनुश्च भवत्याचार्यः। वस्तुगत्या स्वर्णच्छायोज्ज्वलतनुरपि सन्नसौ स्वहृदयान्तर्निहितनीलमेघनिभभगवद्विग्रहच्छायया स्वात्माऽपि कालमेघनिभो भवतीति बोध्यम्। अत्रेदमनुसन्धेयं श्रीरङ्गराजस्तवपद्यरत्नम्— * अपि फणिपतिभावात् शुभ्रमन्तश्शयालोर्मरतकसुकुमारै रङ्गभर्तुर्मयूखैः। सकलजलधिपानश्यामजीमूतजैत्रं पुलकयति विमानं पावनं लोचने नः * इति। श्रीरङ्गविमानराजः आदिशेषांशतया शुद्धवर्णोऽपि सन् अन्तश्शयनभाजो रङ्गनाथस्य नीलजीमूतजैत्रदिव्यवपुस्सुषमाच्छायया नीलवर्ण एव विभातीति ह्युक्तम्। * क्षीराम्भोधेर्जठरममितो देहभासां प्ररोहैः कालोन्मीलत्कुवलयदलाद्वैतमापादयन्तम् * इति चम्पूरामायणश्लोकोऽप्यत्र स्मर्तव्यः। अथ समीचीननयनवत्त्वं चाचार्ये समीचीनज्ञानशालित्वरूपम्। * यतिः पूज्यो न संशयः * इत्युक्ते यतिः पूज्यो न= यतिर्नैव पूज्यः; संशयः — तस्य चर्यायां संशयोऽस्ति खलु— इति ये तावदर्थं वर्णयन्ति ते कुटिलज्ञानशालिन इति वेदितव्यम्। अथ सूर्यचन्द्रतुल्यमुखशालित्वं च गुरुवरे सुलभसमन्वयम्; श्रीभाष्यादिप्रवचनकाले तपनः, भगवद्विषयश्रीवचनभूषणादिप्रवचनकाले प्रह्लादनः इति॥ अवशिष्टं सुस्पष्टम्॥ एतद्गाथासारार्थसंग्राहकश्लोक एषः—

श्लो॥ संप्राप्तो मार्गशीर्षो हिमकरकिरणोद्गाररम्यश्च पक्षः
स्नानं पुण्यं व्रताङ्गं कलयितुमभिलाषोऽस्ति यासामिहाद्य।
गोप्यस्ताः क्राममायान्त्वनवधिकरुणो नन्दसूनुर्यशोदा-
सिंहोऽनुग्राहकस्स्यादिति कथितवती भातु गोदा पुरो नः ॥ १ ॥

इति प्रथमगाथाविवरणं समाप्तम्॥

---

२. द्वितीयगाथा—वैयत्तुवाळ्वीर्हाळ्॥

(मूलम्.) वैयत्तु वाळ्वीर्हाळ् नामुम् नम्पावैक्कु * शेय्युम् किरिशैहळ् केळीरो * पार्कडलुळ्
पैयत्तुयिन्र परमनडिपाडि * नेय्युण्णोम् पालुण्णोम् नाट्काले नीराडि *
मैयिट्टेलुदोम् मलरिट्टु नामुडियोम् * शेय्यादन शेय्योम् तीकुरळै शेन्रोदोम् *
ऐयमुम् पिच्चैयुम् आन्दनैयुम् कैकाट्टि * उय्युमारेण्णियुहन्देलोरेम्बावाय् ॥ २ ॥

अयि भो भूमण्डले सुमुज्जीवन्त्यो जनताः! अस्माभिरस्मदीयव्रतसाद्गुण्यार्थमनुष्ठेयाः क्रियाः [उपादेयोपादान—त्याज्यत्यागरूपाः] शृणुत; क्षीराब्धौ सावधानं शयानस्य परमपुरुषस्य पादौ संकीर्तयेम; घृतं दुग्धं च न पिबेम; प्रत्यूषे स्नानमाचरेम; दृशोरञ्जनाञ्चनं शिरसि पुष्पधारणं च वर्जयेम; पूर्वैरनाचरितानि कृत्यानि नाचरेम; अवाच्यानि कटुवचनानि न वदेम; सत्पात्रेषु दीनेषु च देयां भिक्षां यथाशक्ति वितरेम; उज्जीवनोपायविचिन्तनेन संतुष्येम॥ (इति मूलगाथाविवर्तः।)

प्रकृतव्रतसमाप्तिपर्यन्तं यानि यानि कृत्यानि कर्तव्यानि, यानि च त्याज्यानि तान्यभिधीयन्ते गाथयाऽनया; कृत्याकृत्यविवेकसंकल्पप्रकाशिका सेयं गाथेति यावत्। किमर्थमेतत्प्रस्ताव इदानीमितिचेत् उपक्रान्तव्रतसाद्गुण्यायेति ध्येयम्। "कृत्यानि कुर्याम, अकृत्यानि वर्जयेम" इति संकल्पितं भवति गाथयाऽनया। कर्तव्यत्वेनाभिमतेषु कर्मसु क्षीराब्धिशयपरमपुरुषपादसंकीर्तनात्मकं कृत्यं प्रथमतो निर्दिश्यते। प्रकृते परमदैवतभूतं नन्दनन्दनं कृष्णकिशोरं विहाय क्षीराब्धिनाथसंकीर्तनमधुना किमर्थं प्रस्तूयत इति चेत्; * एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः। नागपर्यङ्कमुत्सृज्य ह्यागतो मथुरां पुरीम् * इतिसुप्रसिद्धप्रमाणरीत्या क्षीरार्णवनिकेतनस्यैव श्रीकृष्णत्वेनावतीर्णत्वात् मूलकन्दभूतस्थानात्प्रभृति उद्देश्यतां हृदि निधाय कथितमेवमिति विभाव्यम्। "क्षीराब्धिशायिनं परमपुरुषं संकीर्तयेम" इत्यनभिधाय तस्य पादौ संकीर्तयेमेति कथनेन—मन्त्ररत्नप्रक्रियया चरणारविन्दद्वंद्वनिष्ठैव स्वरूपोचितेति सूचितं भवति। * अनतिक्रमणीयं हि चरणग्रहणमिति न्यायेन चरणग्रहणमेव हि प्रपन्नानाम् अव्यभिचरितं साधनम्। [क्षीराब्धौ सावधानं शयानस्येति।] भक्तानामार्तध्वनिश्रवणे दत्तावधानत्वमेव सावधानमित्यनेन विवक्षितम्। भगवान् खलु सहस्रनामाध्याये * शुचिश्रवा इत्यभिष्टूयते; भक्तप्रार्थनाश्रवणे अवहितत्वमेव हि शुचिश्रवस्त्वम्।

क्षीराब्धिनिलयस्य परमपुरुषस्येत्यनुक्त्वा "क्षीराब्धौ शयानस्य परमपुरुषस्येति" कथनेन भगवतः शयनावस्थायां पारम्यप्रतिपत्त्या भक्तानां विद्धहृदयत्वं द्योतितं भवति। विश्वामित्रेण मुनिना स्वकीयाध्वरपरित्राणार्थं नीयमानो रामचन्द्रो निशि शयनविवश आसीत्; तमुत्थापयति प्रभाते मुनिवरः * कौसल्यासुप्रजाराम! पूर्वा सन्ध्या प्रवर्तते। उत्तिष्ठ नरशार्दूल! * इति। अत्र कौसल्यासुप्रजा इति रामसंबोधनम्— हे कौसल्यासत्पुत्रेति यावत्। एवमेव बहवो मन्यन्ते। महारसिकसार्वभौमा आचार्यास्तु 'कौसल्या, सुप्रजाः' इति पदच्छेदमारचय्य वाक्यभेदं च मन्यन्ते। * संभवत्येकवाक्यत्वे वाक्यभेदो न युज्यते * इत्येतत्तु अर्थस्वारस्यस्थलेषु नोपादेयमिति च रसिकप्राज्ञसिद्धान्तः। नम्पिळ्ळैनाम्ना सुप्रसिद्धानां श्रीमत्कलिवैरिदासगुरुवराणामन्तेवासिभिः द्राविडवाण्या यदनुगृहीतम् तत्तथैव संस्कृतगिराऽनूदितं श्रीरामायणव्याख्याने गोविन्दराजीये। तथाच तत्रत्याः पङ्क्तयः— "उभयप्रबोधनार्थमागतो विश्वामित्रो रामस्य निद्राकालिकश्रियमवलोक्य च तदासक्तस्सन् स्वागमनकार्यं विस्मृत्य 'इमं प्रसूतवती कौसल्या किं वा तपस्तप्तवती' इति विस्मयते। [कौसल्या सुप्रजाः] .... शोभना प्रजा पुत्रो यस्यास्सा सुप्रजाः— त्वज्जननी कौसल्या सुपुत्रा। यद्वा स्वगतवचनम् — एतज्जननी कौसल्या सुप्रजाः। * कौसल्या शुशुभे तेन पुत्रेणामिततेजसेतिवत्। यद्वा कौसल्यायास्सुप्रजा इति संबोधनम्"— इति॥ अत्र "स्वागमनकार्यं विस्मृत्ये" त्यादिवाक्यसमनन्तरं "भोजनकाले विस्मृतमुखो मुनिरासीत्" इति किमपि वाक्यमवलोक्यते। [यद्यपि मुद्रितकोशेषु 'बोधनकाले विस्मितमुखो मुनिरासीत्' इत्येवंरीत्या पाठो दृश्यते, स स्वपपाठ इति विसृज्यताम्; प्रभातकाले का नाम भोजनप्रसक्तिः! बोधनमेव हि प्रसक्तम् इति मन्यमानैर्लेखकैर्मुद्रापकैर्वा पाठविपर्यासः कृतः; नैव स तात्त्विकः पाठ इत्यवधारणीयम्।] * वैयत्तु वाळवीर्हाळिति प्रकृतगाथायाः षट्सहस्रिकाव्याख्यायाम् "[कौसल्यासुप्रजा राम] உண்ணப்புக்கு வாயை மறப்பாரைப்

போலே வந்த காரியத்தை மறந்தான் ரிஷி; ஒரு திருவாட்டி பிள்ளை பெறும் படியே! என்கிறான்" इति दिव्यसूक्तिरनुगृहीता वर्तते। परंमरसघनं वाक्यमिदम्; भोजनकाले मुखं विस्मरन् पुमानिव स्वागमनकार्यं व्यस्मार्षीन्महर्षिः; आः सौभाग्यवती कौसल्या ईदृशं वाचामगोचरसौन्दर्यशालिनं पुत्रं हि प्रासूतेति विस्मयते — इति द्राविडव्याख्यानसूक्तितात्पर्यम्। यो हि जनो भोक्तुं प्रवृत्तः स कथमिव मुखं विस्मरेत्; नैव विस्मरेत्; तर्हि कोऽर्थो वाक्यस्यास्येतिचेदवधीयताम्। भोजनविस्मरणमेव मुखविस्मरणमित्युच्यतेऽत्र। क्षुधितः पुरुषो भोज्यं वस्तु स्ववदनान्तः प्रवेशयितुं खल्वर्हति; तथा अकरणमेव मुखविस्मरणम्। भोज्यवस्तुन आकारसौष्ठवादिविलक्षणरामणीयकं वीक्ष्य विस्मितः कोऽपि पुमान् तस्य वस्तुनो भोजनं विसृज्य "आः कथमस्ति वस्त्विदम्! केन विदग्धेन सृष्टमिदम्! कथं नु सृष्टम्! पाचकोऽयमद्वितीयश्चतुरः!" इत्यादिरूपेण हर्षप्रकर्षरूपाणां वाचां विसर्गं कलयन् तदेव वस्तु अविरतमवलोकत इति ननु संभावितमिदम्। एवमेवासौ कौशिको मुनिवरोऽपि उपरि सहसा निर्वाह्ये सत्रानुष्ठानरूपे स्वकार्ये व्यग्रतां विसृज्य अत्याकर्षकसौन्दर्याभिरामरामजननीप्रशंसने प्रवृत्त इति प्रकृते व्याख्यातृगुरुचरणहृदयम्। भगवतः परमविलक्षणसौन्दर्याभिव्यक्तिः शयनदशायामेव भूयस्तरां बोभवीतीति च निश्चीयते। अत एवास्यां गाथायां "शयानस्य परमपुरुषस्य" इति प्रोक्तमिति प्रतिपत्तव्यम्।

अथ [घृतं दुग्धं च न पिबेम] इत्यनेन व्रतसमाप्तिपर्यन्तं घृतदुग्धपानवर्जनं संकल्प्यते। उपरिष्टात् सप्तविंशगाथायां भगवता सह क्षीरान्नभोजनादिकं प्राप्तव्यमिति प्रार्थ्यते; अधुना तु व्रतनिष्पत्तये देहधारणमात्रौपयिकं किमप्याश्यमिति भावः। उपवासकृशा दीना वयमिति स्वात्मगात्रप्रदर्शनेन स कृष्णोऽनुकम्पयितव्य इति हृदयम्। * वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः * इत्युक्तरीत्या भगवन्तं वासुदेवमेव धारकपोषकभोग्यादिसकलवस्तुत्वेन परिगृह्य प्राकृतेषु धारकपोषकभोग्यवस्तुषु वीततृष्णा भवेमेति च हृदयम्॥ अथ [प्रत्यूषे स्नानमाचरेम] इति यत्कथ्यते तत्रेदं विमृश्यते; किमिदं प्रत्यूषे स्नानं व्रताङ्गतयाऽनुष्ठेयम्? प्रत्यहमपि यावज्जीवं प्रभात एव खलु स्नातव्यम्; एवमेव हि शास्त्रचोदना; कथं तर्हि संप्रति व्रतनियमार्थमिदमुच्यत इति। अत्रोच्यते; अधुना विवक्षितः प्रत्यूषकालस्तु नित्यस्नानोचितकालापेक्षया विशिष्टो वेदितव्यः। वस्तुतो धनुर्मासि स्नानकालो नित्यस्नानकालतो भिद्यत एव खलु। अथ [दृशोरञ्जनाञ्चनं शिरसि पुष्पधारणं च वर्जयेम] इति व्रतसमाप्तिपर्यन्तं पुष्पधारणवर्जनम् अञ्जनालङ्करणवर्जनं च संकल्प्यते; तदिदं युज्यते व्रतार्थतया; अथ यदुच्यते [पूर्वैरनाचरितानि कृत्यानि नाचरेम — इत्यादि] अत्र विचारणीयमस्ति; पूर्वैरनाचरितानां कृत्यानां वर्जनम् अवाच्यानां कटुवचनानां प्रहाणं च न तावद्व्रताङ्गभूतं भवितुमर्हति; अकृत्यकरणस्य अवाच्यकथनस्य च यावज्जीवं परिहर्तव्यत्वात्। यदि व्रतसमाप्तिपर्यन्तमेव अकृत्यकरण-अवाच्यकथनयोर्वर्जनं संकल्प्यते, तर्हि व्रतसमाप्तेरनुपदमेव घृतदुग्धाशनपुष्पाञ्जनस्वीकरणादिवत् अकृत्यकरणस्य अवाच्यकथनस्य च स्वीकरणं प्रसज्येत खलु—इति॥ अत्रोच्यते। तैत्तिरीयसंहितायां द्वितीयकाण्डे पञ्चमप्रपाठके श्रूयते * तस्यैतद् व्रतम्, नानृतं वदेत् न मांसमश्नीयात् * इति। अत्र अधिकारिविशेषस्य व्रतत्वेन कीर्त्यमानम् अनृतकथनवर्जनं मांसाशनवर्जनं च वस्तुतो न

नैमित्तिकम् अपि तु नित्यमेव सर्वेषामधिकारिणाम् ; तथाऽपि * तस्यैतद् व्रतमिति कुतः कथ्यत इति चेत् नित्यशः परिहरणीयस्याप्यनृतकथनमांसाशनादेः व्रतकाले विशिष्य परिहरणीयत्वं शास्त्राभिप्रेतम् ; व्रतकाले परिहरणाभावे द्विगुणपातकोपधायकत्वमिति । एवमत्राप्यनुसन्धेयम् ; साधारणकालेषु अकृत्यकरण — अवाच्यकथनादेर्यावत्पातकम् ततोऽपि द्विगुणं पातकमधुना व्रतकाले भवेदिति प्रतिपत्तव्यम् । ततश्च व्रतसमाप्त्यनन्तरं दुष्कृत्यकरणाद्यापादनमनवकाशपराहतमिति मन्तव्यम् ।

अत्र च "शास्त्रदूषितानि कृत्यानि नाचरेम" इत्यनुक्त्वा 'पूर्वैरनाचरितानि कृत्यानि नाचरेम' इति कथनेन, शास्त्रापेक्षया शिष्टाचारस्य प्रबलं प्रामाण्यं प्रकाशितं भवति । शास्त्रेष्वनुष्ठेयतया कथितान्यपि कानिचन कृत्यानि शिष्टैरननुष्ठितानि चेत् तेषां प्रहाणमेव युक्तमिति भावः । तैत्तिरीयोपनिषदि * अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् । ये तत्र ब्राह्मणास्संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामास्स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः * इत्याम्नातमिहानुसन्धेयम् । अथ [अवाच्यानि कटुवचनानि न वदेम] इत्यत्र * सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् * नारुन्तुदस्स्यान्न नृशंसवादी * परनिन्दा मृषावाक्यमात्मस्तोत्रं च हेलनम् । स्तोभोक्तिरिति पञ्चैतान्यतिहेयानि चक्षते * इत्यादिप्रमाणबृन्दमनुसन्धेयम् । अथ [सत्पात्रेषु दीनेषु च देयां भिक्षां यथाशक्ति वितरेम] इति यत् संकल्प्यते तत्रेदं बोध्यम् ; * दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् * इति गीतोक्तरीत्या यथाशक्ति दानश्रद्धालुभिरस्माभिर्भवितव्यम् । दानं सत्पात्रेष्वेव न भवति ; अपात्रेषु सत्स्वपि दैन्यदर्शनेन दानमवर्जनीयं भवति । उभयविधमपि दानं कर्तव्यमेव नः । यावच्छरीरपातं कर्तव्यस्यास्य दानस्य व्रताङ्गतया संकल्पनं किमर्थमिति शङ्का माभूत् ; समाहितचरमिति ॥ अन्ततः "उज्जीवनोपायविचिन्तनेन संतुष्येम" इति कथ्यते ; कृत्स्नगाथयोक्तमखिलमपि उज्जीवनोपायविचिन्तनात्मकमेवेति वेदितव्यम् ॥

अथ ध्वन्यर्थविवरणम् ॥ अधस्तनगाथायाम् "स्नातुकामास्सर्वास्समागच्छत" इत्यनेन सद्विषयानुभवकुतूहलिनां सर्वेषामपि जनानाम् अविशेषेण आह्वानं निबद्धम् ; तेन च ज्ञापितमभूत् प्रकृतानुभवस्य अधिकारिनियमो नास्तीति, अभिरुचिशालिनस्सर्वेऽप्यधिकारिण इति च । उपनिषदि * सत्यं वद । धर्मं चर * इति वाक्यद्वयं विराजते ; अत्र च * धर्मं चरेतिवाक्यस्य विवरणे चिकीर्षिते, जात्याश्रमादिभेदेन धर्माणां भिद्यमानतया सर्वेषामपि धर्माणां सर्वेऽप्यधिकारिण इति न सिध्येत् ; अधिकारिभेदेन धर्मभेदोऽवश्यमवगन्तव्यस्स्यात् । * सत्यं वदेति विधिस्तु न तथाऽधिकारिभेदेन भिद्येत । जगति जातास्सर्वेऽपि जना स्समरूपमेव भवन्त्यधिकारिणस्सत्यवचनस्य । तद्वदेव भगवद्भागवताचार्याश्रयणरूपकृत्यविशेषस्य सर्वाधिकारिकत्वे वास्तविके सत्यपि अत्रापि मनागिव शिक्षणमपेक्षितं भवति ; तच्छिक्षणार्थमियं गाथाऽवतरतीति प्रतिपत्तव्यम् । शास्त्रवश्यत्वं मुख्योऽधिकार इति प्रदर्शयति सेयं गाथा । भगवद्गीतायां षोडशाध्यायावसाने भगवता कीर्तितं श्लोकद्वयमिहावधेयम् — * यः

शास्त्रविधिमुत्सृज्य वर्तते कामकारतः। न स सिद्धिमवाप्नोति न सुखं न परां गतिम् * तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ * इति। तथाचैवंविधशास्त्रवश्यत्वशालिन एव प्रकृतव्रतविशेषाधिकारिण इति, अतादृशास्त्व-नधिकारिण इति च प्रतिपादनस्यात्यावश्यकत्वेन तत्प्रतिपादनमिह क्रियत इति बोध्यम्।

शास्त्रं तावत् विधिनिषेधात्मकं विराजते। स्मृतीतिहासपुराणादिसनाथा श्रुतिरेव शास्त्रम्। अत्र विधयो निषेधाश्च सन्ति। * मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव * सत्यं वद, धर्मं चर * इत्यादीनि वाक्यानि विधिरूपाणि। * नाप्सु मूत्रपुरीषं कुर्यात्, न निष्ठीवेत्, न विवसनः स्नायात् * नानृतं वदेत् न मांसमश्नीयात् * इत्यादीनि निषेधरूपाणि। कर्तव्यानां सत्कार्याणां कृतिचोदनपराः शास्त्रभागा विधिपरा वेद्याः; हेयानां दुष्कर्मणां प्रहाणप्रतिपादकाः शास्त्रभागा निषेधपरा निध्येयाः। एवमुभयप्रकारशास्त्रपद्धतिपरिपा-लनवद्धदीक्षत्वमेव शास्त्रवश्यत्वं नाम। "स्नानार्थमागन्तुकामा आगच्छते" ति पूर्वगाथया आहूतैर्जनैरेवंविध-शास्त्रवश्यत्वपूर्तिभरितैर्भवितव्यमिति प्रतिपादनमेव गाथाया अस्या ध्वन्यर्थसर्वस्वं मन्तव्यम्।

पूर्वगाथायां व्रजवासिनीनामेव वनितानां संबोधनं निबद्धम्; अस्यां तु गाथायां भूमण्डलवासिकृत्स्नजन-तानां संबोधनं निबध्यते; एतेन च सुगमम्—व्रजवासिनो जनानेव केवलमुद्दिश्य नैतदुच्यते, जम्बूद्वीपे भारतवर्षे भरतखण्डे यावन्तस्सन्ति समुज्जीवनेच्छवो जनाः तावतस्सर्वानुद्दिश्यैव कथ्यत इदमिति। * गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे। स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषास्सुरत्वात् * इति पुराण-रत्नोक्तरीत्या परमपवित्रे भारतभूमिभागे जननम्, दुर्लभमानुषदेहधारणम्, दीर्घायुष्ट्वम्, शास्त्राधिकारयोग्यजातौ जननम्, * तस्माद्बाल्ये विवेकात्मा यतेत श्रेयसे सदेत्युक्ते बाल्ये वयसि वर्तनम्, अभिरुचिशालित्वम् इत्यादि-भूरितरयोग्यतासम्पत्त्या भूमाविह वैलक्षण्येन विराजमाना भो महात्मान इति संबोधितं भवति। समुज्जीवनं तावत् भूमावेव, न तु दिवीति च सूचितं भवति। * वैकुण्ठवासेऽपि न मेऽभिलाष इति कथयतां महतां मते भूमावेव हि समुज्जीवनं सिद्धान्तकोटिमाटीकते। "भूमण्डले" इत्यत्र अपिशब्दयोजनमपि स्वादु मन्यन्त आचार्यचरणाः; सद्बुद्धिविनाशनिदानभूतनानाविधदुर्विषयदन्तुरे, महाज्ञाननिधीनामपि सतामज्ञानमुत्पादयितुमभिवर्धयितुं च क्षमेऽस्मिन् भूमण्डले समुज्जीवनं हि सुदुर्लभम्; तदप्यत्र लभमाना भो भाग्यशालिनो जना इति संबोधनाभिप्रायः।

एवं संबोध्य अथ कथ्यते [अस्माभिरस्मदीयव्रतसाद्गुण्यार्थमनुष्ठेयाः क्रियाः शृणुत] इति। अस्माभि-रित्यनेन स्वात्मनां वैलक्षण्यातिशयो द्योत्यते; न वयं नास्तिकाः शास्त्रदूषकाः; नाप्यास्तिकनास्तिकाः। अपि तु * श्रुतिस्स्मृतिर्ममैवाज्ञा यस्तामुल्लंघ्य वर्तते। आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः* इत्यादि-शास्त्रार्थेषु परिपूर्णविश्वासशालिन आस्तिकाः खलु वर्तामहे इति स्वोत्कर्षस्सूचितो भवति। "अस्मदीयव्रतसाद्गु-ण्यार्थम्" इत्यत्र किमेतेषां व्रतमिति विवेचनीयम्; श्रीशठकोपमुनीन्द्रे मधुरकविना, भगवद्रामानुजे श्रीरङ्गामृत-कविना च यादृशी निष्ठा प्रकाशिता तादृशनिष्ठानिरतत्वमेवात्र अस्मदीयव्रतपदविवक्षितम्; * आचार्यादिह देवतां समधिकामन्यां न मन्यामहे * इत्यध्यवसायभासुरचेतस्कत्वमेव शिष्यजनानां व्रतम्। एवं तर्हि आचार्यनिष्ठैः किं

ननु भगवति विमुखैर्भवितव्यमिति शङ्का जायेत; अत्रावधेयम्। मधुरकविरमृतकविरित्यादयोऽप्याचार्यनिष्ठा न भगवति सर्वथा वैमुख्यं दधुः; भगवति साक्षादुद्देश्यताधियं विसृज्य 'अस्मदाचार्योद्देश्योऽयम्' इतीदृश्या धिया तस्मिन् प्रवणता न दुष्यति; आचार्यमुखोल्लासाय भगवद्भक्तिरपि प्राप्तेति प्रतिपत्तिरेव स्वरूपानुरूपा मन्तव्या। तथाच आचार्यनिष्ठानामुत्तमाधिकारिणां भगवान् त्याज्य इति ग्रहणं माभूत्। श्रीवचनभूषणे चरमपर्वनिष्ठाप्रकरणे "उपकार्यवस्तुगौरवेण आचार्यादप्यत्यन्तमुपकारक ईश्वर" इतिचूर्णिकाया मननमत्यावश्यकम्। आचार्यरूपस्य परमश्लाघ्यवस्तुनः प्रदाता भगवानेव खल्वित्यनुसन्धानमुखेनापि भगवति भक्तिरुपपद्यत इत्युक्तं भवति।

अथ [अनुष्ठेयाः क्रियाः शृणुत] इति सब्रह्मचारिणः प्रति कथ्यते। कर्तव्यास्त्यक्तव्याश्च क्रियाः कथयामि आकर्णयतेति यावत्। गोपीजनपरिगृहीतव्रतविशेषार्थम् कतिपयकर्मणां कर्तव्यत्वम् कतिपयकर्मणां त्यक्तव्यत्वं च यदुच्यते तत् प्रायस्तद्व्रतसमाप्तिपर्यन्तम्; उपरि * कूडारैवेल्लुम्शीरिति सप्तविंशगाथाप्रक्रियया सर्वमपि प्रायः परिगृहीतं भविष्यति; ध्वन्यर्थप्रणाल्याम् आचार्यनिष्ठारूपस्य व्रतस्य तु कदाऽपि समाप्त्यभावात् अत्र कथ्यमाने त्यागोपादाने शाश्वतिके मन्तव्ये। क्षीराब्धिशयपरमपुरुषपादसंकीर्तनम् प्रत्यूषे स्नानकरणम् भिक्षाया यथाशक्ति वितरणम् उज्जीवनोपायचिन्तनमित्येतानि कर्तव्यकर्मतया कथ्यन्ते; घृतदुग्धाशनम् अञ्जनाञ्चनम् पुष्पधारणम् अकृत्यानामाचरणम् अवाच्यानां वचनमित्येतानि त्याज्यकर्मतया कथ्यन्ते। क्षीराब्धौ शयानस्य परमपुरुषस्य पादसंकीर्तनमित्यत्र इदमवधेयम्। भगवतः कल्याणगुणाः क्षीरशब्दविवक्षिताः; * उनदु पालेपोल् शीरिल् पळुत्तोळिन्देन् * [त्वदीयक्षीरतुल्यगुणानुभवे परिपक्वोऽहम्] इति श्रीपराङ्कुशमुनिना भगवद्गुणानां क्षीरोपमत्वेन कथनात्। तेषां च गुणानामपरिच्छेद्यतया अब्धित्वेनोक्तिः। भगवद्गुणसागरे शयनं नाम — गुणानुभवजनितपरमानन्दानुभूतिः। तत्कर्ता परमपुरुषः— आचार्यः। तत्पादसंकीर्तनं नाम — साक्षात्तच्चरणकीर्तनम्, तच्चरणप्रायाणामन्तरङ्गशिष्याणां कीर्तनं च भवति। शठकोपमुनेः पादो रामानुजः, रामानुजमुनेः पादो दाशरथिसूरिः इति प्रधानशिष्याः पादशब्देन व्यपदिश्यन्ते खलु।

[घृतं दुग्धं च न पिबेम.] घृतदुग्धाशनं देहपोषणार्थं खलु भवति; आत्मोज्जीवनैकश्रद्धालूनां मुमुक्षूणाम् * तादृग्गुणो ननु बभूविथ राघवत्वे यस्तावकं चरितमन्वहमन्वभुङ्क्त। सोऽत्रैव हन्त हनुमान् * (अतिमानुषस्तवे) इत्युक्तरीत्या भगवद्गुणगणैकधारकपोषकभोग्यकत्वध्रौव्यात् प्राकृताशनेषु रुचिपरित्यागः प्रोक्तो भवति। * वासुदेवस्सर्वमिति स महात्मा सुदुर्लभ इति गीतोक्तरीत्या वासुदेवो भगवानेव नः सर्वमिति धीर्यद्यप्यस्मादृशामसंभविनी, तथाऽपि तादृशी धीः क्रमेण जायतामित्याशंसनमिह स्थितम्। [प्रत्यूषे स्नानमाचरेम] इति। स्नानोपलक्षितसकलनित्यनैमित्तिककृत्यवर्गानुष्ठाननिरता भवेमेत्यर्थः। सर्वधर्माणामात्यन्तिकत्याग एव चरमश्लोकतात्पर्यमिति धियं विसृज्य * निजकर्मादि भक्त्यन्तं कुर्यात्प्रीत्यैव कारितः। उपायतां परित्यज्य न्यस्येद्देवे तु तामभीः * इति गीतार्थसंग्रहानुगृहीतरीत्या, * वर्णाश्रमाचारवता पुरुषेण परः पुमान्। विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः * इत्युक्तरीत्या, * क्रियमाणं न कस्मैचिद्यदर्थाय प्रकल्पते। अक्रिया-

वदनर्थाय तत्तु कर्म समाचरेत् * इत्युक्तरीत्या च कर्मानुष्ठानव्यग्रतावश्यकता बोधिता भवति। श्रीकुलशेखरसूरिः स्वसूक्ते (१—७.) * इरुमुप्पोलुदेत्ति * इत्यादिसूक्तया पाञ्चकालिककर्मानुष्ठाननिरतान् भक्तान् धर्मशास्त्रपद्धतिबद्धादरान् स्तौति खलु। [दृशोरञ्जनाञ्चनं शिरसि पुष्पधारणं च वर्जयेम] इत्यत्रायमर्थः :— अञ्जनाञ्चनं पुष्पधारणं च देहालङ्करणकोटिप्रविष्टम्; आत्मालङ्कारश्रद्धां वर्जयित्वा देहमात्रालङ्करणे श्रद्धा न बोढव्येति कथितं भवति। श्रीभक्तांघ्रिरेणुसूरिः श्रीमालाख्यदिव्यप्रबन्धे (६) * पुरञ्जुवर् कोलम् शेयूदु * इत्यादिना — श्रीरङ्गनाथकिङ्करतामनङ्गीकृत्य मांसभित्तिरूपं शरीरं बाह्यालङ्कारैः केवलं शोभयितुमुद्युक्तान् जनान् विनिन्दतीति यत्तदिह स्मर्तव्यम्। एतेन देहालङ्करणं सर्वथा हेयमिति न कथितं भवति; आत्मालङ्कारविरहितं केवलदेहालङ्करणं विगीतमिति तु वेदितव्यम्।

[पूर्वैरनाचरितानि कृत्यानि नाचरेम] उपदेशरत्नमालायाम् (६७) * सर्वेऽपि पूर्वगुरवस्समयेन येन चेरुस्तमाकलयतामयथावदेव। वाचो निशम्य वरमानस! मा भ्रमीस्त्वं वर्तस्व पूर्वतरदेशिकवर्तनेन * इत्यनुगृहीतरीत्या सारासारविवेककुशलानां पूर्वेषां गुरुवराणामाचरितमेव प्रधानतया प्रेक्षणीयम्; ते खलु महान्तः शास्त्रविहितान्यपि कानिचन कर्माणि यदि नानुतिष्ठन्तिस्म, तानि नास्माभिरनुष्ठेयानीति भावः। * यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः * इति हि जगौ गीताचार्यः। * धर्मज्ञसमयः प्रमाणमित्यापस्तम्बश्चाह। शास्त्रविहितकर्मानुष्ठानापेक्षया पूर्वाननुष्ठितकर्मवर्जनं प्रधानमिति द्योतयितुमेव व्यतिरेकमुखेन कथितमिह : एकादशीश्राद्धं महालयश्राद्धम् अष्टकान्वष्टकाश्राद्धम् असकृन्नमस्करणम् अदृष्टार्थानुष्ठानम् इत्यादिकं पूर्वैरनाचरितमित्यनेनैव हि हेतुना नाचर्यते सत्सम्प्रदायनिष्ठागरिष्ठैः शिष्टैः॥ [अवाच्यानि कटुवचनानि न वदेम.] स्वात्मनि दुर्गुणसंभृतत्वे सत्यपि स्वस्य महागुणशालितया स्वयमेव प्रशंसनम्, बहुसद्गुणभरितेष्वपि परेषु दोषाविष्करणम्, गुणानामपि दोषत्वेन प्रपञ्चनम्, यथावस्थिततत्वभूतहिततत्त्वविधुराणां वचसां वर्षणम् प्राप्तविषयस्तवनार्थया जिह्वया अप्राप्तविषयस्तवनम्, निष्कारणं महात्मनां धिक्करणं चेत्यादिकं वाग्दुरितं प्रसह्य वर्जनीयमिति शिक्षितं भवति।

[सत्पात्रेषु दीनेषु च देयां भिक्षां यथाशक्ति वितरेम.] इत्यत्रेदमवधेयम्। लोके सत्पात्रेष्वपि दीयते, दयनीयेभ्यो दीनेभ्योऽपि दीयते; उभयविधमपि दानं प्राप्तमेव। एवं ज्ञातारो ज्ञानाधिकेभ्योऽपि ज्ञानदानं कुर्युः, अज्ञेभ्योऽपि तथा। * वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे * इति भवभूतिकथितरीत्या प्रात्यक्षिकमेव ह्येतत्। केचित् प्राज्ञेभ्य एव ज्ञानोपदेशं कुर्युः; अपरे तु अज्ञानेव प्रतीक्षेरन्। नैवम्। उभयेभ्योऽपि ज्ञानदानं कर्तव्यमित्युक्तं भवति। भगवान् रामानुजः श्रीकूरनाथकुरुकेश्वरार्यगोविन्दभट्टारकादिभ्यो महाज्ञाननिधिभ्य इव कस्मैचन मूकायापि स्वपादारविन्दं शरणतया प्रादर्शयदितीतिहासोऽत्रानुसन्धेयः। मूलगाथायां तावत् भिक्षाप्रदानार्थे (கைகாட்டி इति) हस्तप्रदर्शनशब्दविन्यासः कृतः; आचार्येण प्रदर्श्यमाना हस्तमुद्रैव हि शिष्याणां परमं शरणम्। * उद्गृह्णतीमुपनिषत्सु निगूढमर्थं चित्ते निवेशयितुमल्पधियां स्वयं नः। पश्येम लक्ष्मणमुनेः प्रतिपन्नहस्तामुन्निद्रपद्मसुभगामुपदेशमुद्राम् * इति यतिराजसप्ततिसूक्तिः, * मनस्स्फटिकदर्पणप्रतिफलत्परब्रह्मणः प्रदर्शनमिवाचरन् प्रथितबोधमुद्राङ्कितः। सतामभयशंसिता भवभयाभितप्तात्मनाम् अघानि शमयेत नः शठरिपोरवामः करः * इति नक्षत्रमालिकासूक्तिश्चात्रानुसन्धेये।

6

[उज्जीवनोपायविचिन्तनेन संतुष्येम] इति चरमं वाक्यम् । 'को नामास्माकमुज्जीवनोपायः' इति विचिन्तनं न विवक्षितम् ; तादृशचिन्तायाः स्वरूपानुचितत्वेन श्रीवचनभूषणादितः प्रतिपत्तेः । 'उज्जीवनोपायः सुशोभनो ह्यस्माभिरुपलब्धः ! अन्यादृशं हि नो भाग्यम् !' इति हर्षप्रकर्षेण सह मुहुर्विचिन्तनमेव कर्तव्यमित्युक्तं भवति ॥

तथा चैतद्गाथार्थसंग्राहकः श्लोक एषः —

श्लो ॥ दुग्धाब्धीशस्य विष्णोः पदकमलयुगं कीर्तयध्वं, कुरुध्वं
कल्ये स्नानं च, गव्याशनरुचिरुचिता नैव, पुष्पाञ्जनादि ।
नो सेव्यम्, त्याज्यकृत्यं त्यजत, कटुवचो नैव वाच्यं, यथाश-
क्त्यास्थेयं पात्रदानं व्रतनियतय इत्यूचुषी पातु गोदा ॥ २ ॥

---

३. तृतीयगाथा—ओङ्गियुलहळन्द.

(मूलम्) ओङ्गियुलहळन्द उत्तमन्पेर्पाडि * नाङ्गळ् नम्पावैक्कु चात्ति नीराडिनाल् *
तीङ्गिन्रि नाडेल्लाम् तिङ्गळ् मुम्मारि पेय्दु * ओङ्गु पेरुञ्शेन्नेलूडु कयलुहळ *
पूङ्कुवळैप्पोदिल् पोरिवण्डु कण्पडुप्प * तेङ्गादे पुक्किरुन्दु शीर्त्त मुलैपत्ति
वाङ्ग * कुडम् निरैक्कुम् वळ्ळल् पेरुम्पशुक्कळ् * नीङ्गाद शेल्वम् निरैन्देलोरेम्बावाय् ॥ ३ ॥

आकाशसीमान्तमभिव्याप्य लोकान् विक्रान्तवत उत्तमपुरुषस्य दिव्यनामानि वयं संकीर्त्य अस्मदीयव्रतापदेशेन यदि स्नानमाचरेम, तर्हि सर्वेष्वपि देशेषु ईतिबाधागन्धमन्तरेण प्रतिमासं त्रिः वृष्टिस्स्यन्देत ; आकाशान्तमभिव्याप्य वर्धमानानां शालिसस्यानामन्तराले शफरा स्सोल्लासं विहरेयुः ; विकसितेषु कुवलयकुसुमेषु रमणीया द्विरेफा निद्रासुखमनुभवेयुः ; गोष्ठं प्रविश्य तत्र सधैर्यमुपविश्य धेनूनां पीनस्तनाकर्षणमात्रेण परमौदार्यशालिन्यस्ता महत्यो गावो दुग्धपूरेण कुम्भान् पूरयेयुः ; एवं नाम सततमविच्छिन्नसम्पदुल्लासो भवेत ॥ इति मूलगाथाविवर्तः ॥

प्रकृतव्रतानुष्ठानेन संपत्स्यमानं फलं संकुचितं न भविष्यति, अपितु सर्वलोकव्यापि भविष्यतीत्यभिधीयते गाथयाऽनया । एतत्प्रबन्धाध्ययनफलम् अन्तिमगाथायामभिधीयते, एतत्प्रबन्धप्रतिपाद्यव्रतानुष्ठानफलम् अनया गाथया निगद्यत इति प्रतिपत्तव्यम् । त्रिविक्रमस्य पुरुषोत्तमस्य दिव्यनामसंकीर्तनपूर्वकं प्रस्तुतव्रतनिर्वर्तने सति सर्वेषामपि जनपदानां क्षेममनपायं भवेत् । वृष्टिश्च मासिमासि त्रिः स्यन्देत ; सस्याभिवृद्धिश्च सुसमृद्धा भवित्री । तथा गव्याभिवृद्धिश्च भवेदिति प्रतिपाद्यते । सत्कृत्यानुष्ठातारो महानुभावा यत्र निवसन्ति तत्र सर्वा अपि संपदस्समृद्धा भवन्ति, विपदश्च दवीयस्यो भवन्तीत्ययमंशः * यत्राष्टाक्षरसंसिद्धो महाभागो महीयते । न तत्र संचरिष्यन्ति व्याधिदुर्भिक्षतस्कराः * इत्यादिप्रमाणावगतः ।

श्रीकृष्णकिशोरे अनन्यप्रीतिभरं बिभ्राणा इमा गोपकन्याः त्रिविक्रमभगवद्गुणकीर्तने किमर्थं मधुना प्रवृत्ता इति चेत्, त्रिविक्रममूर्तेः पूर्वतनी या वामनमूर्तिस्तस्यास्सौन्दर्यं कृष्णस्यास्य सौन्दर्यं च मिथस्समानमिति प्रसिद्धिमूम्ना यशोदा तदातदा कृष्णमाह्वयन्ती "आयाहि वामन हरे मम बालकृष्ण!" इत्याह्वयतिस्मेति प्रसिद्धम्। सैव वासना गोपीनामपि भवति। उपरिष्टात् कृष्णप्रबोधनसमयेऽपि सप्तदशगाथायां * लोकविक्रान्तपाद! स्वामिन् देवाधिदेव! त्यज शयनरुचिम् * [अम्बरमूडरुत्तोङ्गियुलहळन्द उम्बर्कोमाने उरङ्गादेलुन्दिराय्] इत्युक्तमिह ध्येयम्। अथ च सिंहासने निषण्णस्य मङ्गलाशासनसमयेऽपि * विक्रान्ताशेषलोकप्रभुवर! जयतात्ते पदाम्भोज-युग्मम् * [अन्निव्वुलहमळन्दायडिपोत्ति] इत्यभ्यधायि। अतश्च गोपीनां श्रीमति कृष्णकिशोरे त्रिविक्रमाभेद-भावना सर्वथा समुल्लसतीति सुस्पष्टमवधार्यते।

[उत्तमपुरुषस्य] त्रिविक्रमस्यैव भगवत उत्तमपुरुषत्वं संप्रतिपन्नम्। परेषां हानिमुत्पाद्य स्वयं जीवन् पुरुषः अधमः। स्वजीवनाविरोधेन परजीवनमनुमन्यमानो मध्यमः। स्वहानिं सर्वथा सकुतूहलं सोढ्वा परेषां जीवन-मेव परमपुरुषार्थम् मन्यमानः पुमानुत्तमः। (परहानिकृते स्वहानिमपि संमन्यमानस्त्वधमाधम इति तदास्ताम्।) भगवान् खलु देवेन्द्रस्य श्रेयसे स्वयं सर्वजनपरिहासार्हवामनमूर्तिम् बिभ्राणो याच्ञावृत्तिमप्यवालम्बतेति सत्य-ममुष्यैव संप्रतिपन्नमुत्तमत्वम्। * याचना हि पुरुषस्य महत्त्वं नाशयत्यखिलमाशु * इत्युक्तरीत्या स्वस्य महत्त्व-हानिसंपादनक्षमां याच्ञावृत्तिमप्यसौ यदधत्त सोत्सहं, तदहो केवलं परजीवनार्थमेव खलु। एतादृशस्योत्तमपुरुषस्य हरेर्नाम संकीर्त्य यदि वयं प्रस्तुतं व्रतं संपादयेम, तर्हि * अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः। अतिक्रूराश्च राजानः षडेता ईतयस्स्मृताः * इत्युक्त—ईतिबाधाविरहेण सर्वजनपदक्षेमसमृद्धिस्स्यात्। क्षेमप्रकारश्च कीदृश इति चेत् प्रतिमासमित्यादिना तद्विवरणं क्रियते। ब्राह्मणानां वेदाध्ययनानुष्ठानसंपत्समृद्धिनिमित्तमेका वृष्टिः भूपतीनां यथान्यायराज्यपरिपालननिमित्तमेका वृष्टिः; सतीनां वनितानां पातिव्रत्यपरिपालननिमित्तमेका वृष्टिरिति आहत्य त्रिर्वर्षणं विचक्षणा व्याहरन्ति। तादृशी वृष्टिर्नियतं संपद्येत अस्मदीयव्रतानुष्ठानसाद्गुण्यत इति कथितं भवति।

अथ [आकाशान्तमभिव्याप्य वर्धमानानां शालिसस्यानामन्तराले शफरास्सोल्लासं विहरेयुः] इत्यस्मिन् वाक्ये द्विविधस्य श्रेयसः कथनमुपलभ्यते; आकाशान्तमभिव्याप्तिरूपा सस्यानामभिवृद्धिः एकं श्रेयः; शफराणां सोल्लासविहृतिः अपरं श्रेयः। नीरपूरसमृद्धिमन्तरा शफरविहृतेरसंभवात् केदारेषु सततमनपाया पयःपूरसमृद्धिः प्रोक्ता भवति। तथाच निरन्तरपयःप्रवाहसम्पादकवृष्टिमूम्ना सस्याभिवृद्धिरूपं श्रेयः कथितमिति वेदितव्यम्।

अथ [विकसितेषु कुवलयकुसुमेषु रमणीया द्विरेफा निद्रासुखमनुभवेयुः] इति किमर्थं कथ्यते? इति चेत्, पुष्पाणां विकसितत्वम् मधुपसौख्यावहमधुसमृद्धत्वं च सुभिक्षलक्षणमेव खलु; अत एवोच्यते। कालेकाले सम्पद्यमानाया वृष्टेर्यद्यत्फलभूतं तदखिलमभिधीयत इति बोध्यम्। मूले (पोरिवण्डु — पोंरुवण्डु) इति पाठद्वयं प्रथते; प्रथमे पाठे — रमणीया द्विरेफा इत्यर्थः। द्वितीये पाठे तु मिथः स्पर्धाशीला द्विरेफा इत्यर्थः।

मधुपानार्थम् अहमहमिकया संपततां भ्रमराणां मिथः स्पर्धा संभवति हि। मधुपानेन तत्रैव प्रसुप्तानां तेषां प्रणयरोषजा स्पर्धा च मुक्ता। एवं केदारे संभविनी समृद्धिरभ्यधायि ; अथ ग्रामे संभविनी समृद्धिरभिधीयते— * गोष्ठं प्रविश्य * इत्यादिना गाथाशेषेण। समृद्धा गावस्तावत् श्रीवेङ्कटाद्रौ निर्झरा इव अविच्छिन्नस्रोतोरूपान् दुग्धपूरान् प्रवाहयेयुः ; तद्दोहनकर्मणि सामान्यजनः प्रवर्तितुं न प्रभवति ; समुद्रतरणे यथा मारुतिरेक एव महाधीरस्तमुदजिहीत, तथा अतिधैर्यशालिन एव गोपा गोदोहनप्रगल्भा भवन्ति। तेषु दोहनार्थं गोस्तनाग्रं स्पृष्टवत्सु सत्सु सद्य एव गावः क्षणमात्रे बहून् कुम्भान् दुग्धप्रपूर्णान् कलयेयुरिति गव्यसमृद्धिः कथिता भवति। एवंविधोच्चावचसम्पदामुल्लासो भवितेति प्रकृतव्रतफलकथनं स्थितम्॥

अथ ध्वन्यर्थविवरणम्॥ आचार्यगुणानुभवार्थमाजिगमिषवस्सर्वेऽप्यागच्छतेति प्रथमगाथायामाह्वानं निबद्धम् ; तथा आगन्तृभिः शास्त्रवश्यैर्भवितव्यमिति, सैव प्रधानतमा योग्यतेति च ज्ञापितं द्वितीयगाथायाम्। अथास्यां गाथायाम् — आचार्यकुलेऽस्माकमवगाहनेन प्रपन्नसन्ताने मुमुक्षूणां सर्वेषां महत्तराणि भूयांसि श्रेयांसि संपद्येरन्निति ज्ञाप्यते। [आकाशसीमान्तमभिव्याप्य लोकान् विक्रान्तवत उत्तमपुरुषस्य] इत्यनेन आचार्यवैभवमेव प्रतिपाद्यते। भगवान् आकाशसीमान्तमभिव्याप्तः स्वदिव्यमङ्गलविग्रहेण ; आचार्यस्तु स्वकीयदिव्ययशसा। भगवद्यशोपेक्षयाऽप्याचार्ययशसस्समुत्तुङ्गत्वं वेदितव्यम् ; * यदायदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् * इति गीतोक्तरीत्या तदातदा नानायोनिष्ववतीर्य प्रत्यक्षतामेत्य भूयिष्ठानुपदेशान् कुर्वन्नपि भगवान् * अवजानन्ति मां मूढाः * [गीता— ९ – ११.] इति स्वेनैवोक्तरीत्या मर्त्यैरवज्ञायते, न पुनः केनाप्याद्रियते ; एवं भगवदवतारे मोघतां गते सति आचार्यसार्वभौमोऽवतीर्य भगवदुद्दिष्टानि कार्याण्यनायासतस्साधयति। भगवान् * मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते * मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु * * मामेकं शरणं व्रज * इत्यादितः स्वचरणकमलसेवनं व्यधत्त ; अत एव स मर्त्यैरवज्ञातोऽभूत् स्वात्मप्रतिष्ठाकामोऽयमिति धिया। आचार्यास्तु न कदाऽपि स्वचरणसेवनकर्तव्यतामुपदिशन्ति ; * तस्यैव विष्णोश्चरणं भजध्वम् * स एव सेव्यः पुरुषोत्तमोऽच्युतः * इत्यादिकथनमुखेन परस्यैव पुंसस्सेवनमुपदिशन्ति ; अतएवामी अवज्ञादवीयांसो यशसा समुत्तुङ्गा विलसन्तीति युक्तमेतत्। भगवानपि स्वावतारकालेषु वसिष्ठसान्दीपनिप्रभृतीन् आचार्यपदे स्वीकृतवानित्यनेनापि हेतुना आचार्यस्योत्तुङ्गत्वमवगन्तव्यम्। * तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥ * [गीता. ४ — ३४.] इति भगवतैव स्वयमाचार्यप्रभावस्य प्रख्यापितत्वादपि तदुत्तुङ्गत्वं सुगमम्। * नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम् * इत्युक्तरीत्या नमनेनापि प्राप्तसमुन्नतिका आचार्या एवेत्यवधार्यम्।

अथ "लोकान् विक्रान्तवत" इत्यनेनोक्तं लोकविक्रमणमपि आचार्ये सुष्ठु संगच्छते ; भगवान् सकलमपि जगत् स्वपादस्पर्शधन्यं यथा कृतवान् तथा गुरुवरोऽपि * श्रीरङ्गं करिशैलमञ्जनगिरिं तार्क्ष्याद्रिसिंहाचलौ श्रीकूर्मं पुरुषोत्तमंच बदरीनारायणं नैमिशम्। श्रीमद्द्वारवतीप्रयागमथुरायोध्यागयापुष्करं सालग्रामगिरिं निषेव्य रमते

रामानुजोऽयं मुनिः॥ * इत्याद्युक्तप्रक्रियया सर्वास्वपि दिक्षु स्वपादारविन्दसंचारणमारचय्य पवित्रतामातनोतीति, * ततः स्वचरणाम्भोजस्पर्शसम्पन्नसौरभैः। पावनैरर्थिनस्तीर्थैर्भावयन्तं भजामि तम् * इत्युक्तरीत्या जाह्नवीतीर्थादप्यतिमात्रं पवित्रं स्वकीयश्रीपादतीर्थमनुगृह्य सर्वान् शिवयतीति च विज्ञेयम्। भगवान् यथा स्वकीयमप्रमेयं माहात्म्यमुपगुह्य वामनमूर्तिस्सन्नसुरप्रकृतेस्सकाशमुपेत्य ययाचे; तथा देशिकेन्द्रोऽपि नित्यसूरिनिर्विशेषत्वरूपं स्वकीयं महत्त्वं निगुह्य लघुतममनुष्यसजातीयो भूत्वा असुरनिर्विशेषाणां बद्धसंसारिणामग्रतस्समागत्य भो मदीयां वाचमाकर्णयतेति याचको भवति। भगवान् प्रतिजग्राह; आचार्यस्तु प्रदानशीलो भवतीति विशेषः। स्वकीयपदत्रयमितां भूमिं भिक्षमाणो भगवान् त्रितयं प्रतिजग्राह; आचार्यस्तु, रहस्यत्रयम् तत्त्वत्रयम् पञ्चकत्रयम् तत्त्वहितपुरुषार्थत्रयम् आकारत्रयम् इत्येवंरीत्या त्रित्वेन मितं वस्तुजातं वितरति। त्रिविक्रमो भगवान् जगदाक्रमणकाले शुक्रनमुचिप्रभृतीनामवज्ञां यथा ह्युदपादयत्तथा गुरुवरोऽपि क्षेत्रतीर्थपर्यटनच्छलेन पाषण्डद्रुमषण्डदावदहनः चार्वाकशैलाशनिः बौद्धध्वान्तनिरासवासरपतिः जैनेभकण्ठीरवः मायावादिभुजङ्गभङ्गगरुडश्च सन् विभ्राजते। एवं भूयोभिः प्रकारैः वामनेन त्रिविक्रमेण च भगवता साम्यमाचार्यवर्ये द्रष्टव्यम्।

अथ [उत्तमपुरुषस्य] इति यदुक्तं तत्रेदमवगन्तव्यम्। उपदेशप्रदातृषु अधमा मध्यमा उत्तमाश्च सन्ति; कर्मकाण्डार्थोपदेष्टारो ह्यधमाः; (जैनबौद्धादिग्रन्थप्रवक्तारोऽधमाधमाः इति तदास्तां नाम।) ब्रह्मकाण्डार्थोपदेष्टारो मध्यमाः; रहस्यत्रयार्थोपदेष्टार उत्तमाः। प्रकारान्तराणि च सन्ति; सर्वथा परोपदेशविमुखा अधमाः; शिष्यनिर्बन्धभूम्ना परोपदेशं कुर्वाणा मध्यमाः; स्वकीयनिर्हेतुककृपया सकुतूहलमुपदेष्टार उत्तमाः। ज्ञानानुष्ठानविकला अधमाः; अन्यतरभरिता मध्यमाः; उभयपरिकर्मिता उत्तमाः। काव्यनाटकादिप्रवचनकर्तारोऽधमाः; वेदाध्यापननिरता मध्यमाः; दिव्यप्रबन्धतद्व्याख्यानाद्यध्यात्मशास्त्रप्रवचननिष्णाता उत्तमाः॥ एवमुत्तमश्रेणिनिविष्टस्याचार्यस्य दिव्यनामसंकीर्तनम् * गुरोर्नाम सदा जपेत् * इत्यादिप्रमाणसिद्धम्। भगवद्यामुनाचार्यश्रीकूरनाथभट्टपादप्रभृतय आचार्या भगवन्तं स्तोतुमुपक्रम्य आचार्यानेव हि प्रप्रथममुपश्लोकयामासुः। दिव्यप्रबन्धपारायणोपक्रमेऽपि आचार्याणां स्तुतिपद्यान्येव हि पुरस्तादनुसन्धीयन्ते। तथाच उत्तमाचार्यनामसंकीर्तनं पूर्वं प्राप्तम्।

अथ [अस्मदीयव्रतापदेशेन यदि स्नानमाचरेम] इत्यत्रेदमवधेयम्; अस्मदीयव्रतशब्देन — शत्रुघ्नस्य श्रीमधुरकवेः श्रीरङ्गामृतकवेश्च या निष्ठा सा विवक्षिता। श्रीरामभक्ताग्रेसरं भरतं विना न कमप्यन्यं स्वप्रावण्यलक्ष्यभूतं चकार शत्रुघ्नः। भगवद्भक्ताग्रगण्यं श्रीशठकोपमुनीन्द्रादितरं न कमप्यनुसन्दधे मधुरकविः। अच्युतपदाम्बुजयुगरुक्मव्यामुग्धाद्भगवद्रामानुजमुनीन्द्रात् श्रीकूरनाथगुरुवराचान्यं न कमपि शरणं प्रतिपेदे श्रीरङ्गामृतकविवरः। एवंविधं विलक्षणव्रतमिह अस्मदीयव्रतशब्दाभिलप्यं वेदितव्यम्। एतद्व्रतौपयिकं स्नानं नाम सर्वाङ्गनैर्मल्यसंपादकं गुरुकुलावगाहनम्; तदाचरेम यदि॥ ततो भविष्यन्ति श्रेयांसि अथ कथ्यन्ते [सर्वेष्वपि देशेष्वीतिबाधागन्धमन्तरेण] इत्यादिना। अतिवृष्ट्यनावृष्ट्यादयः षडीतयो यथा देशक्षेमहानिबीजभूताः तथा देहात्मभ्रमादिरूपाः विप्रतिपत्तयः षट् आत्मक्षेमहानिबीजभूताः प्रथिताः, तास्तु परिहारप्रक्रियया च सह अष्टश्लोक्याम् * देहासक्तात्मबुद्धिर्यदि भवति पदं साधु विद्यात्तृतीयं स्वातन्त्र्यान्धो यदि स्यात्प्रथममितरशेषत्वधीश्चेद्

द्वितीयम् । आत्मत्राणोन्मुखश्चेन्नम इति च पदं बान्धवाभासलोलः शब्दं नारायणाख्यं विषयचपलधीश्चेच्चतुर्थीं प्रपन्नः ॥ * इत्यनेन श्लोकेन प्रतिपादिता वेदितव्याः । * यत्राष्टाक्षरसंसिद्धो महाभागो महीयते । न तत्र संचरिष्यन्ति व्याधिदुर्भिक्षतस्कराः * इत्युक्तरीत्या व्याध्यादिबाधाविनाशोऽपि विवक्षितोऽत्र भवितुमर्हति ।

अथ, मूलगाथायाम् [तिङ्गळ् मुम्मारि पेय्दु] इति यद्वाक्यमस्ति द्राविड्याम्, तस्यानुवादः "प्रतिमासं वृष्टित्रयं स्यन्देत" इति तावत् कृतः । प्रतिमासमिति स्थाने सौम्यमित्यनुवादोऽपि युज्यते ; तथाच "सौम्यं वृष्टित्रयं स्यन्देते" ति कथितं भवति । आचार्यमुखाद्विनिर्गच्छतो विशेषार्थवर्षणस्यैव वृष्टिशब्देनाभिधानम् । तत्र त्रैविध्यसद्भावात् वृष्टित्रयमित्युच्यते । त्रैविध्यं कथमिति चेत् ; प्रथमतः कर्णमूले क्रियमाणो मन्त्रोपदेशः ; अथ मन्त्रार्थप्रवचनम् ; अथ च नानाविधानामध्यात्मग्रन्थानामध्यापनम् इति । अथ वा, संस्कृतवेदान्तप्रवचनम्, द्राविड-वेदान्तप्रवचनम्, स्मृतीतिहासपुराणादिप्रवचनम्—इति वा त्रैविध्यं बोध्यम् ।

अथ सस्यानामभिवृद्धिरभिधीयते ; जीवात्मनां ज्ञानानुष्ठानसंपदभिवृद्धिकथनमेवैतत् । मुक्तिप्राप्त्यनन्तरमसौ जीवात्मा कथयति * अहमन्नमहमन्नमहमन्नम् * इति । भूमौ सशरीरस्य स्थितस्य जीवस्य व्रीह्यवस्था वेदितव्या । तुषसहिततण्डुलमेव व्रीहिशब्देन व्यवहरामः । स्थूलशरीरमेव तुषस्थानीयं वेद्यम् । तुषापगमेऽपि तण्डुलोपरि सूक्ष्मकणावयवास्सन्ति यथा, तथा स्थूलशरीरव्यपगमानन्तरमपि सूक्ष्मशरीरमवतिष्ठते । तण्डुलोपरि स्थितानां सूक्ष्मकणावयवानां यथा सलिलप्रपूर्णपात्रे क्षालनेन व्यपगमो भवति तथा सूक्ष्मशरीरस्यापि विरजातोयावगाहनतो विनिष्क्रमणं भवति । अथ भोजनार्थमुपयुज्यमानवस्तुभूततण्डुलस्थाने जीवात्मा ग्राह्यः । सोऽयम् * अहमन्नमहमन्नमहमन्नम् * इति यदनुसन्धत्ते अन्ततः, तदतितरां युक्तमेव । भगवान् भोक्ता ; तस्य भोग्यो जीवात्मेति हि सत्सम्प्रदायसर्वस्वम् । तथा चैवं भोग्यस्य अन्नशब्दाभिहितस्य जीवात्मनः संसृतिदशायां व्रीहिदशापन्नत्वकथनं संप्रतिपन्नम् । धान्यगुच्छका यदा क्षीरोदयमपि न बिभ्रति, तदा नम्रत्वहीना ऊर्ध्वमुखा अवतिष्ठन्ते ; यदा तु ते व्रीहिभरभरिता भवन्ति तदा भृशं प्रणम्रास्सन्तोऽधोमुखा विराजन्ते । तद्वदेव चेतना अपि विद्यादिसम्पद्दारिद्र्यकाले अल्पज्ञत्वनिबन्धनावलेपभूम्ना विनयविहीना ऊर्ध्वमुखा वर्तन्ते ; अथ क्रमश उपचीयमानविद्यासम्पद्भरातिशयाः प्रणमनैकशीला अधोमुखा विलसन्तीत्यनेनापि हेतुना सस्यसमानत्वमेतेष्ववसेयम् । एतेषामभिवृद्धिर्भवित्रीति कथितं भवति । अथ च शफराणां सविलासविहारो भवितेति यत्कथ्यते तत्रेदमवगन्तव्यम् ; * न च सीता त्वया हीना न चाहमपि राघव ! । मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ * इति सौमित्रिकथितरीत्या भगवद्विश्लेषं क्षणमात्रमपि सोढुमशक्ता मुमुक्षवो मत्स्यतया प्रोच्यन्ते ; तेषां सविलासविहारो हि भगवन्नित्यसंश्लेषत एव भवितुमर्हति नान्यथा । निरन्तरभगवद्गुणानुभव एव हि भगवन्नित्यसंश्लेषः । एवं च शफराणां सविलासविहारो भवितेत्यनेन सन्ततभगवद्गुणानुभवौत्सुक्यसमृद्धानां मुमुक्षूणां मनोरथपूर्तिरसंशयं संपत्स्यत इति कथितं भवति ।

अथ कुवलयकुसुमे द्विरेफाणां सुखशयनं यदुच्यते, तत्रेदं बोध्यम् । पुंसां नयनं नलिनत्वेन, ललनानां नयनं कुवलयत्वेन च कथयन्ति कवयः । वनितानामपि दृशः कमलत्वेन वर्णनं क्वचिदास्तां नाम ; कुवलयत्वेन

वर्णनमेव भूयिष्ठम्। तथाचात्र कुवलयकुसुमपदेन लक्ष्मीकटाक्षोऽभिधीयते। * लक्ष्मीनेत्रोत्पलश्रीसततपरिचयादिति तत्त्वमुक्ताकलापमुखपद्यमप्यत्रानुसन्धातुं योग्यम्। द्विरेफशब्देन भगवच्चरणारविन्दमधुपानरसिका ऐकान्तिककिङ्करा विवक्षिताः। * तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छति। स्थितेऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्षते * इति स्तोत्ररत्नोक्तरीत्या अमृतस्यन्दिनि भगवत्पादपङ्कजे आचार्यचरणारविन्दद्वंद्वे वा निवेशितमनस्कानां तदितरस्पृहाविरहितानां सतां भ्रमरत्वेन कथनं दिव्यप्रबन्धेषु भूयिष्ठम्; तादृशा उत्तमाधिकारिणो लक्ष्मीकटाक्षवीक्षालाभभूम्ना निर्भरा निर्भयास्सन्तः सुखशयनं करिष्यन्ति इत्युक्तं भवति। निर्विचारत्वमेव सुखशयनपदेनापदिश्यते। * यस्याः कटाक्षवीक्षाक्षणलक्षं लक्षिता महेशाः स्युः * (श्रीस्तवे) इति श्रीकूरनाथगुरुवरोक्तरीत्या लक्ष्मीकटाक्षवीक्षालक्ष्यभूतानां परमश्रेयःप्राप्तौ कस्सन्देहः॥ * श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते संसृत्यक्षरवैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् * इति भगवद्यामुनार्यसूक्तिरप्यत्रानुसन्धेया। मूलगाथायाम् (पोरुवण्डु) इत्यपि पाठो वर्तत इति प्रदर्शितम्। तस्मिन् पाठे श्रीवैष्णवानां स्पर्धाशीलत्वं कीदृशमिति चेत्; * वाचालयन्ति वसुधे! रसिकास्त्रिलोकीं न्यूनाधिकत्वसमताविषयैर्विवादैः * इति गोदास्तुतौ श्रीमन्निगमान्तगुरूक्तरीत्या रासिकचमूप्रयुक्तविवादकेलिश्रद्धालुत्वमेवेति प्रतिपत्तव्यम्।

अथ [गोष्ठं प्रविश्य तत्र सधैर्यमुपविश्य धेनूनां पीनस्तनाकर्षणमात्रेण परमौदार्यशालिन्यस्ता महत्यो गावो दुग्धपूरेण कुम्भान् पूरयेयुः] इति गव्यसमृद्धिर्या कथ्यते तत्रेदमवधेयम्। * गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश * इत्युक्तरीत्या गावो यथा स्वाङ्गेषु चतुर्दश भुवनानि धारयन्ति तथा चतुर्दशविद्याभरभरिता महान्त इह विवक्षिताः। गावो यथा गृहेषु जघन्यस्थले (निष्कुटभागे) तिष्ठन्ति, तथा * त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्यभृत्यस्य भृत्य इति मां स्मर लोकनाथ! * त्वद्दासदासगणनाचरमावधौ यस्तद्दासतैकरसताऽविरता ममास्तु * इत्याद्युक्तप्रक्रियया शेषत्वपरमकाष्ठायां तिष्ठन्ति महान्तः। गावो यथा स्तनचतुष्टयद्वारा पयः प्रस्नुवते तथा महान्तोऽपि पयोनिर्विशेषान् अमृतमयानर्थविशेषान् चतुर्भिर्निमित्तैः प्रस्रावयन्ति; तानि चत्वारि निमित्तानि कानीति चेत्; १. आचार्या अमी शिष्योज्जीवनार्थमेव खलु भगवता क्षितितलेऽस्मिन्नवतारिताः; ततश्च भगवदाज्ञापरिपालनार्थमुपदिशामो वयमिति प्रतिपत्तिः प्रथमं निमित्तम्। २. शिष्याणां प्रार्थनया च खलु अमी उपदिशन्ति; ततश्च शिष्यप्रार्थना द्वितीयं निमित्तम्। ३. शिष्यप्रार्थनाविरहेऽपि तदीयदुर्गतिमसहमानाः खल्वमी उपदिशन्ति; ततश्च शिष्यदुर्गत्यसहिष्णुता तृतीयं निमित्तम्। ४. शिष्याणां दुर्गतिः तदसहिष्णुता च तिष्ठतु नाम; उपदेशाकरणे स्वात्मधारणमेषामशक्यं खलु भवति; ततश्च स्वात्मधारणार्थता चतुर्थं निमित्तम्। एभिश्चतुर्भिर्निमित्तैरुपदिशन्तीति यत् तदिदं चतुर्भिः स्तनैः गवां पयःप्रस्रावणं मन्तव्यम्। तथाच धेनुसाधर्म्यमभिवहतामाचार्याणां कुलं प्रविश्य पयोरूपानर्थविशेषान् दोग्धुकामैरन्तेवासिभिः महाधीरैर्भवितव्यम्; * नासंवत्सरवासिने प्रब्रूयात् * इत्युक्तत्वात् चिरं गुरुकुलवासे समुत्साहो धर्तव्यः; * तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः * इति गीतोक्तरीत्या प्रणिपाताभिवादनपरिप्रश्नसेवासु च समुत्साहो धर्तव्यः। एवंविधोत्साहसमृद्ध्या सह गुरुकुलप्रवेशः सूचितो भवति।

अथ [स्तनाकर्षणमात्रेण गावः पयसा कुम्भान् प्रपूरयेयुः] इति यदुक्तं तत्रायं भावः - अर्जुनः * शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् * इति मनागभ्यर्थितवान्; अथ भगवान् गीताचार्यस्तावत् * भूय एव महाबाहो शृणु मे परमं वचः * परं भूयः प्रवक्ष्यामि * हन्त! ते कथयिष्यामि * इति मुहुः प्ररोचयन् पर्याप्तिमनधिगच्छन् भूयिष्ठानर्थविशेषानवाकिरत्। * तपस्स्वाध्यायनिरतं तपस्वी धाग्विदां वरम्। नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् * इत्युक्तरीत्या प्राचेतसे मुनिवरे स्वल्पं पृष्टवति सति नारदो महर्षिरपरिमितमभ्यवर्षत्। * पराशरं मुनिवरं कृतपौर्वाह्णिकक्रियम्। मैत्रेयः परिपप्रच्छ प्रणिपत्याभिवाद्य च ॥ * इत्युक्तरीत्या मैत्रेये मनाक् पृष्टवति सति, चिदचिदीश्वरतत्त्वभावभोगापवर्गतदुपायगतीस्संदर्शयन् पराशरो मुनिवरो भूयिष्ठमभिववर्ष। एवमेव शिष्याणामल्पप्रार्थनया भूरिभूरि भूयोभूय उपदिश्य परमभोग्यभूतसदर्थप्रवाहान् उपबृंहयेयुरित्युक्तं भवति। महत्यो गावः पात्राणि यथा पूरयन्ति तथा महाचार्या अपि * अनुत्तमं पात्रमिदं दयायाः * इति कथयितुमर्हान् सत्पात्र-भूतानुत्तमश्रीवैष्णवान् पूर्णान् कुर्वन्तीति वेदितव्यम्। शिष्याणां पूरणं नाम स्वात्मनिर्विशेषं ज्ञानपूर्तिसंपादनमेव। एवं बहुविधास्सम्पदः क्रमशस्समेधेरन् इति निगमनम् ॥

एतद्गाथार्थसंग्राहकश्लोक एषः—

त्रैलोक्याक्रामिपादोत्तमपुरुषहरेर्नाम संकीर्त्य दिव्यं
संपाद्येत व्रतं चेत्सकलजनपदक्षेममव्याहतं स्यात्।
वृष्टिश्च स्याद्यथावत्तदनु समुदियात्सस्यवृद्धिस्समृद्धा
स्याद्गव्यस्याभिवृद्धिर्भृशमिति गृणती पातु गोदा सदा नः ॥ ३ ॥

इति तृतीयगाथाविवरणम् ॥

---

४. चतुर्थी गाथा—आऴिमऴैक्कण्णा.

आऴिमऴैक्कण्णा! ओन्रुनी कैकरवेल् * आऴियुळ् पुक्कु मुहन्दु कोडार्त्तेरि *
ऊऴिमुदल्वनुरुवम्पोल् मेय् करुत्तु * पाऴियन्तोळुडै प्पर्प्पनावन् कैयिल् *
आऴिपोल् मिन्नि वलम्पुरिपोल् निन्नदिर्न्दु * ताऴादे शार्ङ्गमुदैत्त शरमऴैपोल् *
वाऴ वुलहिनिल पेय्दिडाय् * नाङ्गळुम् मार्हऴिनीराड महिऴ्न्देलोरेम्बावाय् ॥ ४ ॥

अयि भो गम्भीर! वृष्टिनिर्वाहक पर्जन्यदेव! स्वकीयमौदार्यं मनागपि मास्म वितथं कार्षीः। (त्वया कर्तव्यं कृत्यं किमिति चेत्;) अर्णवान्तरवगाह्य तत्रत्यं तोयमुपादाय गर्जनमाकल्प्य व्योमाङ्गणमधिरुह्य, कालोपलक्षितसकलपदार्थकारणभूतसर्वेश्वरविग्रहसावर्ण्यमवाप्य पृथुरमणीयभुजशालिनस्तस्यैव भगवतः पद्मनाभस्य वाह्वग्रस्थितसुदर्शनवद्भिभासुरो भूत्वा, पाञ्चजन्यवद्विपुलं घोषमुद्घाव्य शार्ङ्गप्रसूतशरवर्षवत् सलिलधारा अविलम्बं समुत्पादय जगति सर्वोज्जीवनकृते अस्माकं सानन्दं मार्गशीर्षावगाहनकृते च ॥ (इति गाथाविवर्तः।)

हे अम्बुद! त्वं सागरे गाढमवगाह्य ततः सलिलमुपादाय श्रीनारायणदिव्यमङ्गलविग्रहवत् नीलिमानमनुप्राप्य, अथ तदीयश्रीपाञ्चजन्यवत् गम्भीरं ध्वनिमुत्पाद्य तदीयहेतिराजवद्भासमानस्सन् शरवर्षितदीयश्रीशार्ङ्गवन्महतीं वृष्टिं कलयन् अस्मदीयं व्रतं निर्वर्तय — इति पर्जन्यदेवतां गोप्य आज्ञापयन्ति। ननु कथमिदं संगच्छते मानुष्य इमा उत्कृष्टां देवतामाज्ञापयन्तीति? इति चेत्; * भीषाऽस्माद्वातः पवते, भीषोदेति सूर्यः * इत्याद्युपनिषत्प्रक्रियया भगवानिव भगवन्महिष्योऽपि प्रभवन्त्येव। किञ्च, श्रीविष्णुधर्मे * द्रवन्ति दैत्याः प्रणमन्ति देवताः नश्यन्ति रक्षांस्यपयन्ति चारयः। यत्कीर्तनात् सोऽद्भुतरूपकेण ममास्तु माङ्गल्यविवृद्धये हरिः ॥ * इति तावत् भागवतप्रभावः प्रतिपाद्यते; अत्र 'यत्कीर्तनात् देवताः प्रणमन्ति' इति कथनात् पर्जन्यदेवस्य प्रणतत्वम् अथ तस्मै आज्ञाप्रदानं च नानुपपन्नमिति प्रतिपत्तव्यम्।

भगवान् परमपुरुषो जगन्निर्वाहार्थं सूर्ययमादिदेवता अपि परिकल्पितवान्; ताः खलु देवता जगतां सन्तापहेतवो भवन्ति; हे पर्जन्य! त्वं तु न तथा; तापसंतप्तानां सर्वासामपि प्रजानां शिशिरीकरणे सुचारुकृत्ये प्रकल्पितोऽसीति स्तुवन्त्य इव संबोधयन्ति [अयि भो! गम्भीर! वृष्टिनिर्वाहक पर्जन्यदेव!] इति। एवमाहूतस्स देव स्साञ्जलिबन्धमवतस्थे पुरतः 'आज्ञापयन्त्वार्या' इति। अथादिशन्ति [स्वकीयमौदार्यं मनागपि मास्म वितथं कार्षीः] इत्यादिना। वस्तुत औदार्यं नाम गुणः पर्जन्यदेवे एकस्मिन्नेव लब्धास्पदः; स खलु प्रतिप्रयोजननिरपेक्षस्सन् कालेकाले सर्वत्र वर्षति। ईदृशमौदार्यं सुकृतिनां सविध एव प्रदर्शनीयम्, पापिनां सविधे तु न प्रदर्शनीयम् इति व्यवस्थां मा स्म कलयः, सर्वत्र समरूपमभिवर्ष तावत् इति कथयन्ति गोप्यः। 'हे पर्जन्य! त्वया सलिलवर्षणं कर्तव्यम्' इत्येतावन्मात्रकथनं पर्याप्तम्; "अर्णवान्तरवगाह्य तत्रत्यं तोयमुपादाय" इत्यादिकथनस्य नास्त्यत्यन्तमावश्यकता; तथाऽपि यत्कथ्यत इह, तदिदं ध्वन्यर्थनिरूपणे भृशमुपयुज्यत इति प्रतिपद्यन्तां रसिकाः। अतश्च ध्वन्यर्थविशेषानेवात्र सुविशदमुपपादयामः।

गाथायामस्यां मेघापदेशेन विद्वांसो भक्तोज्जीवनतत्परा महाभक्ताग्रेसरा एव संबोध्यन्त इति वेदितव्यम्।

१. मेघो यथा क्षारमपि सागरसलिलं स्वयं निपीय स्वादु वर्षति तथा श्रुतिसागरगतानर्थान् दुरवगाहानपि कटूनपि स्वादिष्ठानारचय्य सर्वोपभोग्यतया प्रतिपादयन्ति महान्तः।

२. मुदिरो यथा तत्रतत्र सञ्चरन् वर्षति तथा महान्तोऽपि क्षेत्रतीर्थयात्रापदेशेन तत्रतत्र पर्यटन्तस्सन्तः सर्वोपजीव्यानर्थविशेषानभिवर्षन्ति।

३. जीमूतो यथा निम्नस्थलानि वृष्ट्या परिपूरयति तथा ज्ञानिनोऽपि सदुपदेशवृष्टिभिर्नीचानपि ज्ञानपरिपूर्णान् विदधति।

४. जलदस्तु सर्वदाऽपि न वर्षति; अपितु कालविशेषेष्वेव। एवं गुरवोऽपि समयविशेषेष्वेव सदुपदेशनिष्णाता भवन्ति।

५. जलधरो यदि प्राप्तकालेषु न वर्षति तर्हि जगति नानाविधाः पीडास्संभवन्ति । एवं समयेषु सदाचार्यसदुपदेशविरहे सति देहात्मभ्रम—स्वस्वातन्त्र्यभ्रम—अन्यशेषत्वभ्रम—स्वरक्षणे स्वान्वययोग्यताभ्रम—अबान्धवेषु बन्धुत्वभ्रम—विषयप्रावण्यादिरूपाः पीडा उत्पद्येरन् ।

६. वलाहका अत्यधिकं वर्षन्तोऽपि कदाऽपि तृप्तिं नाधिगच्छन्ति, नापि प्रत्युपकारप्रतीक्षिणो भवन्ति । एवमाचार्या अपि अधिकाधिकमर्थविशेषोपदेशनिरता अपि सन्तो न पर्याप्तिमधिगच्छन्ति नापि प्रत्युपकारं प्रेप्सन्ति । अनन्यप्रयोजनास्सन्त उपर्युपर्युपदेशानुकूलसमयप्रतीक्षिणस्समुत्कण्ठिता एव भवन्ति ।

७. तोयदः कदाचित् कतिपयान् पयःकणान् विकीर्य विरमति, कदाचन तु अलमलमित्युक्तिं जनयन्तीम् महावृष्टिमुत्पाद्य विश्वं विस्मापयति । एवं प्राज्ञपुंगवा अपि कदाचित्कर्णमूले मंत्रोपदेश इति कानिचिदक्षराण्युपदिश्य विरमन्ति ; अन्यदा तु श्रुतिस्मृतीतिहासपुराणोभयवेदान्तरहस्यसारार्थरत्नामृतान्युद्वेलं सुचिरमुपदिशन्तो हन्त ! केयं महावृष्टिरिति श्रोतृजनान् विस्मयविवशान् विदधति ।

८. वलाहकैः कदाचित्कुत्रचित्सिच्यमानं सलिलं तप्तायःपिण्डे क्षिप्तं जलमिव सद्य एव भजत्यसत्कल्पताम् ; कदाचिदन्यत्र सिच्यमानमुदकं मुक्ताफलात्मना परिणमति ; एवमाचार्यैः कुत्रचिदुपदिश्यमाना अर्था अनवधानविस्मरणादिभिरसत्कल्पतामाप्नुवन्ति । अन्यत्र तु मेधाविष्वनवधिम् पुष्टिमनुविन्दन्ति । मुक्ताफलवत् श्रीवचनभूषणादिनामभिर्भूषणतामुपयन्ति च ।

९. तोयदप्रत्तं तोयं सरित्कूपसरस्यादिषु प्रविष्टं सत् सर्वोपजीव्यं भवति । अन्यत्र प्रविष्टं तद् ग्रहीतुमप्ययोग्यं भवति । एवमभिज्ञैरधिकारिषु सत्पात्रेषु समुपदिष्टा अर्थाः * पूर्वे पूर्वेभ्यो वच एतदूचुः * (काठके) इत्याम्नातरीत्या सदुपदेशपरम्परायामुपजीव्या भवन्ति ; अनधिकारिषु निविष्टास्तु ते निष्प्रयोजना भवन्ति हन्त ।

१०. जीमूता अनन्यगतिभिस्सस्यादिभिस्सततं प्रतीक्ष्यमाणा भवन्ति ; त एव अर्कक्षुपादिषु वर्षन्तः * त्वयि वर्षति पर्जन्य ! सर्वे पल्लविता द्रुमाः । अस्माकमर्कवृक्षाणां पूर्वपत्रेषु संशयः ॥ * इत्युक्तरीत्या अपायप्रदा भवन्ति । एवं सदाचार्यैरनुगृह्यमाणास्सदर्था अनन्यगतीनां सादरं सकुतूहलं प्रतीक्षणार्हाः इतरेषां तु * गाथा ताथागतानां गलति गमनिका कापिली क्वापि लीना * इत्युक्तरीत्या प्रणाशप्रदाश्च भवन्ति । एवमेवं बहुधा निर्वाह्यैस्साम्यप्रकारैरिह मेघत्वेन विवक्षितास्सदाचार्या एवेति सुगमम् ।

प्राञ्चोऽपि प्रकृतोपयोगि श्लोकरत्नमिदमन्वगृह्णन्— * लक्ष्मीनाथाख्यसिन्धौ शठरिपुजलदः प्राप्य कारुण्यनीरं नाथाद्रावभ्यषिञ्चत्तदनु रघुवराम्भोजचक्षुर्झराभ्याम् । गत्वा तां यामुनाख्यां सरितमथ यतीन्द्राख्यपद्माकरेन्द्रं संपूर्य प्राणिसस्ये प्रवहति सततं देशिकेन्द्रभ्रमौघैः ॥ * इति । तदिदमिह सुसंगतमनुसन्धेयम् । तथाच सदर्थराशिवर्षुको महाप्राज्ञ आचार्य इह अम्बुदेति संबोधितोऽभूत् । [अर्णवान्तरवगाह्य] * श्रुतिसागरः *

* द्राविडवेदसागरः * इति सुप्रथितवेदान्तद्वंद्वाख्यसागरे तलस्पर्शि यथावथा अवगाह्य। * अब्धिर्लङ्घित एव वानरभटैः किंत्वस्य गम्भीरताम् आपातालनिमग्नपीवरतनुर्जानाति मन्थाचलः * इत्युक्तप्रक्रियया सारस्वतसारावबोधक्षमतां प्राप्येति यावत्। [तत्रत्यं तोयमुपादाय] जीवराशिसंजीवनसमर्थमर्थसार्थं संगृह्य इत्युक्तं भवति। मेघसंबोधनसमनन्तरमेव यदुक्तम् [स्वकीयमौदार्यं मनागपि मास्म वितथं कार्षीः] इति, तत्रेदमवधेयम्। आचार्याणामौदार्यं न केवलमन्तेवासिष्वेव फलेग्रहि; अपि तु सर्वेश्वरेऽपि सफलं भूयादित्याशास्यते। * मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना * इत्युक्तरीत्या आचार्यः संसारिभ्यो हस्तावलम्बं प्रयच्छतीति सर्वविदितम्; एवं सर्वेश्वरायापि हस्तावलम्बप्रदानमावश्यकं भवति; तदिदं यतिराजसप्तत्या सुगमम्। तत्र हि (श्लो ३८.) *'कुदृष्टिकुहनामुखे निपततः परब्रह्मणः करग्रहविचक्षणो जयति लक्ष्मणोऽयं मुनिः * इत्युच्यते। मायावादिनां कुदृशां वितथवागाडम्बरकोलाहलभूम्ना हन्त भगवत्यपि अधःपातालनिपतिते सति तस्योद्धरणाय हस्तावलम्बप्रदानम् भगवद्रामानुजसधर्मणामाचार्याणामेव हि भरो भवति। [स्वकीयमौदार्यं मनागपि मास्म वितथं कार्षीः] इत्यनेन श्रीमन्नाथयामुनादिपूर्वाचार्यापेक्षया भगवति रामानुजे सुप्रथित औदार्यातिशयस्सूचितो भवति। ते खलु प्राचीना आचार्याः * ओरांण्वळियायुपदेशित्तार्मुन्नोर् * इत्युपदेशरत्नमालागाथोक्तरीत्या स्वकीयमौदार्यमतीव संकुचितं चक्रुः; भगवतो रामानुजस्यैव ह्यौदार्यं क्वचिदपि संकोचमनाप्नुवत् विश्वविसृत्वरमभासत।

अथ [गर्जनमाकलय्य] इत्यनेन * गम्भीरेण परात्मभेदनमहानादेन नाथेन मे गुप्तोऽहं यतिसार्वभौमहरिणा * इत्युक्तरीत्या कुदृष्टिकलभव्रजकवलीकरणे कण्ठीरवनिर्विशेषाणामाचार्याणां वादगोष्ठीषु गम्भीरं गर्जनं सूचितं भवति। [व्योमाङ्गणमधिरुह्य] मेघो यथा व्योमाङ्गणमधिरोहति, तथा आचार्या उपदेशार्थं सिंहासनमधिरोहन्ति। * भजति यतिपतौ भद्रवेदीं त्रिवेदीम् * इति यतिराजसप्ततिसूक्तिरिहानुसन्धेया। अथ सर्वेश्वरविग्रहसावर्ण्यावाप्तिराशास्यते। सर्वेश्वरविग्रहसावर्ण्यं मेघे घटत एव; आचार्येषु तदिदं कथं घटेतेति चेत्; सुष्ठु घटेत; नीलमेघनिभं परमपुरुषं सदा स्वात्मनि बिभ्रदाचार्यः अन्तर्गतभगवद्विग्रहच्छायाया बहिर्विशदप्रसरणेन स्वयमपि नीलमेघनिभो भासत इति। यस्य भगवतस्सावर्ण्यमवाप्यत्वेनोच्यते स भगवान् कालोपलक्षितसकलपदार्थकारणभूतत्वेन विशेष्यते [ऊळिमुदल्वन् इति]; एवंविधविशेषणस्य किं प्रयोजनमिति चेत्; महदस्ति प्रयोजनम्-भगवान् यद्यपि सर्वदाऽपि कारुणिक एव; तथाऽपि सृष्टिकाले तस्य परमकारुणिकत्वं प्रमाणप्रतिपन्नम्; * अचिद्विशेषितान् प्रलयसीमनि संसरतः करणकलेबरैर्घटयितुं दयमानमनाः * इति श्रीभट्टपादा आहुः श्रीरङ्गराजस्तवे; * अचिदविशिष्टान् प्रलये जन्तूनवलोक्य जातनिर्वेदा। करणकलेबरयोगं वितरसि वृषशैलनाथकरुणे! त्वम् * इति वेदान्ताचार्या दयाशतके। तथाच परमकारुणिकत्वप्रकाशकविग्रहविशिष्टत्वं कारणत्वदशायामिति ज्ञायते। आचार्योऽपि तथा नाम परमकारुणिकतां स्वदिव्यमङ्गलविग्रहे प्रकाशयत्विति प्रार्थना फलति।

अथ [तस्यैव भगवतस्सुदर्शनवद्विभासुरो भूत्वा] इति यदुच्यते, तत्रोच्यते। श्रीरामानुजनूत्तन्दादिदिव्यप्रबन्धे त्रयस्त्रिंशगाथायामभिधीयते— "श्रियःपत्युः पाणितले विराजमाना सुदर्शननन्दककौमोदकीशार्ङ्गपाञ्च-

जन्याभिधाना पञ्चायुधी भूतलपालनाय भगवद्रामानुजमुनिमाविवेश " इति । इमां गाथामनुसृत्य यतिराजसप्ततौ * प्रथयन् विमतेषु तीक्ष्णभावमित्यस्मिन्पद्ये * अपृथक्प्रतिपन्नयन्मयत्वैर्ववृधे पञ्चभिरायुधैर्मुरारेः * इत्यभ्यधायि । तथा च भगवद्रामानुजस्य पञ्चायुधावतारभूतत्वं प्रतीयते । तदिदमिह गाथायां स्फोर्यते । उपात्तश्रीरामानुजनूत्तन्दादि-सूक्तौ प्रथमतस्सुदर्शनस्य अन्ततः पाञ्चजन्यस्य च कथनात् अत्रापि प्रत्याहारन्यायेन " सुदर्शनवत्........पाञ्चज-न्यवत् " इत्यभिहितमिति प्रतिपत्तुं योग्यम् । प्रकारान्तरेणाप्यत्र ध्वन्यर्थवर्णनं संभवति ; * काशीविप्लोषचैद्यक्षपण-घरणिजध्वंसेत्यादिसुदर्शनशतकश्लोकोक्तरीत्या हेतिराजो यथा दिक्षु विदिक्षु च प्रधाव्य विविधानि विरोधिवर्गनि-रसनानि वितनुते तथा आचार्यसार्वभौमोऽपि, पाषण्डचार्वाकजैनबौद्धमायावादिप्रभृतयो बाह्याः कुदृष्टयश्च यत्रयत्र वर्तन्ते तत्रतत्र व्रजन् तान् समूलमुन्मूलयति खलु ; तद्विवक्षणमिह युज्यते । अथ [पाञ्चजन्यवद्विपुलं घोषमुद्भाव्यं] इत्यस्यामुक्तौ इदमवधेयम् । भारतसमरोपक्रमे हृषीकेशे पाञ्चजन्यघोषमुद्भावितवति सति स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ; तद्वत् अचार्यसार्वभौमोऽपि स्वकीयगभीरकण्ठनादप्रकटनमात्रेण वैरिव्रातावलेपविलोपनं वितनोतीति ध्येयम् । हेतिराजो भगवतः पाणितलं विसृज्य सुदूरं गत्वाऽपि कैङ्कर्यमाकलयति ; पाञ्चजन्यस्तु भगवद्विश्लेषं क्षणमात्रमप्यसहमानः सततमपि पाणितलमेवालङ्कुर्वन् कैङ्कर्यं वितनोति ; एवमाचार्यसार्वभौमोऽपि श्रीरङ्गाद्विनिस्सृत्य विदेशेषु पर्यटन्नपि कैङ्कर्यं करोति ; * द्वयमर्थानुसन्धानेन सह सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्व * (शरणागतिगद्ये) इत्येवंविधभगवदाज्ञानुसारेण स्वस्थानमविजहदपि कैङ्कर्यं कलयतीति अन-याऽपि विधया सुदर्शनपाञ्चजन्यसाधर्म्यं सुनिर्वहम् ।

अथ [शार्ङ्गप्रसूतशरवर्षवत् सलिलधारा अविलम्बं समुत्पादय] इति प्रार्थनाया हृदयमेतत ; शार्ङ्गं नाम धनुः ; तस्मात् शरवर्षप्रसूतिर्भवति । * प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते * इत्युपनिषत्प्रक्रियया प्रणव एव धनुश्शब्दविवक्षितोऽत्र । आचार्यैरभिवृष्यमाणास्सर्वेऽप्यर्थाः प्रणवमूलका एव खलु ; * प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः * इति ह्याहुः । तथाच सकलात्मनां संतापप्रशमनकुशलान् अर्थविशेषान् प्रणवव्याख्यान-मुखेन प्रकाशय भो महागुरो ! इति प्रार्थितं भवति । * शरासनविनिर्मुक्ताः शरा आशीविषोपमाः । वैरिव्रातं विनिघ्नन्ति राघवस्य महात्मनः * इत्युक्तरीत्या शार्ङ्गधन्वनो रामभद्रस्य धनुषो विनिर्गता बाणाः * ब्रह्मदण्डप्र-काशानां विद्युत्सदृशवर्चसाम् । स्मरन् राघवबाणानां विव्यथे राक्षसेश्वरः * इति वर्णनयोग्यां क्रियां यथा ह्यकुर्वन् तथा आचार्यमुखविनिर्गताः प्रमाणयुक्तिपुञ्जाः परेषां भृशमरुन्तुदा भवेयुरिति सूचितं भवति । [अविलम्बम्] इति कथनात्—लोके तावत् जनानां स्वरूपानुरूपसदर्थश्रवणाभिरुचिस्सर्वदा न भवति ; कदाचिदेव जायते ; मनसश्च-ञ्चलत्वात् सा रुचिः क्षणान्तरे विपर्यस्येदपि । रुचिविपर्ययात्प्रागेव झडिति कर्तव्य उपदेश इति सूच्यते । * निवे-दयत मां क्षिप्रं विभीषणमुपस्थितम् * इति खल्वाह विभीषणश्च ; * त्वां तु धिक्कुलपांसनम् * इति दूषितवतो रावणस्य सकाशेऽपि मम पुनर्जिगमिषा कदाचित्संभवेदपि ; तादृशदुर्बुद्धिजन्मनः प्रागेव क्षिप्रं निवेदयत—इत्येतद्धि विभीषणस्य हृदयम् ; तथैवात्रापि ग्राह्यम् । मूले (ताळादे) इति द्राविडपदम् अविलम्बमित्यनुवादमिव ' अव्या-हतं यथातथा ' इत्यनुवादमपि सहते । सकलानपि शास्त्रार्थान् हृदि बिभ्राणा अचार्यवर्या निरर्गलं विनिर्गलद्भिर्वा-

ग्जालैः खलु अप्रस्खलितमुपन्यस्यन्ति। अथ [जगति सर्वोज्जीवनकृते] इत्यनेन, परेषामरुन्तुदानुपन्यासान् आचार्यवर्या न कदाऽपि कुर्युः; सर्वेऽपि समुज्जीवन्तु काममिति धियैव सर्वभोग्यानर्थविशेषानुपन्यस्येयुः; ते केषाञ्चित्तापिनामरुन्तुदा भवन्तीति यत् तत् आचार्याणां नावद्यम् इति सूचितं भवति। मेघस्तावत् सर्वान् द्रुमान् पल्लवितान् कर्तुमेव वृष्टिं सृजति; प्रायस्सर्वे द्रुमाः पल्लविता भवन्ति च ततः; तयैव वृष्ट्या यदि अर्कपत्रादीनि कतिचिदल्पानि प्रणश्यन्ति, तर्हि मेघानां किमवद्यम्? सर्वेषां प्रकाशसुखावहे प्रदीपे यदि शलभाः स्वयं निपत्य निधनमवाप्नुवन्ति, काममवाप्नुवन्तु; तत्तु न दीपस्यापराधः। तथैवह्येतदपि।

[अस्माकं सानन्दं मार्गशीर्षावगाहनकृते च] इति चरमं वाक्यम्। मार्गशीर्षावगाहनशब्दार्थः प्रथमगाथाव्याख्याने विवृतः; मार्गेषु शीर्षम्—चरमोपायः, तत्रावगाहनार्थमित्यर्थः। आचार्यनिष्ठायामस्माकं यथा श्रावण्यातिशय उज्जृम्भेत तथा नाम क्रियतामुपन्यास इति प्रार्थितं भवति॥

अथैतद्गाथार्थसंग्राहकः श्लोक एषः—

श्लो.॥ अब्धौ गाढं विगाह्याम्बुद! सलिलमुपादाय लक्ष्मीशतन्वा
तौल्यं प्राप्याथ शंखध्वनिसमनिनदं जृम्भयन् चक्रवद्भाम्।
भूत्वा श्रीशार्ङ्गवत् त्वं कलय शरमहावर्षमस्मद्व्रताये—
त्यादेशं मेघदेवं प्रति कलितवती पातु गोदाख्यगोपी ॥ ४ ॥

इति चतुर्थगाथाविवरणम् ॥

---

५. पञ्चमी गाथा—मायनै मन्नुवडमदुरै॥

मायनै मन्नुवडमदुरै मैन्दनै * तूय पेरुनीर्यमुनैत्तुरैवनै *
आयर्कुलत्तिनिल् तोन्नुमणिविळक्कै * तायैक्कुडल्विळक्कम् शेय्द दामोदरनै *
तूयोमाय् वन्दु नाम् तूमलर् तूवित्तोळुदु * वायिनाल्पाडि मनत्तिनाल् शिन्दिक्क *
पोय पिळैयुम् पुहुतरुवान्निन्नवुम् * तीयिनिल् तूशाहुम् शेप्पेलोरेम्बावाय् ॥ ५ ॥

अत्याश्चर्यैकनिलयम् अविच्छिन्नभगवत्सम्बन्धास्पदमथुरापुराधिनाथम् परमपवित्रमहापयःपूरभरितयमुनानदीविहाररसिकम् गोकुलसमुद्भूतमङ्गलदीपम् जननीजठरप्रख्यापनपटीयांसं च दामोदरं यदि वयं परिशुद्धास्सत्यः समीचीनानि पुष्पाणि समर्प्य प्रणम्य वाचा संकीर्त्य मनसा विचिन्तयेम तर्हि पूर्वाघान्युत्तराघानि च वह्निक्षिप्ततूलवत् क्षणेन प्रणश्येयुः; अतस्तमेव संकीर्तयेम॥ (इति मूलगाथाविवर्तः।)

व्रतानुष्ठानार्थं संमिलितासु गोपीषु काश्चिन्नीतिशास्त्रविदः; अपराः साहित्यशास्त्रविदः; इतरास्तु इतिहासपुराणज्ञाः; तास्ताः स्वस्वपरिचितेषु शास्त्रेषु किमपि स्मरन्त्यः 'अस्मदनुतिष्ठासितमिदं व्रतं कथमिव निष्प्रत्यूहमवसास्यति' इति विघ्नशङ्कामुदभावयन्। * श्रेयांसि बहुविघ्नानि भवन्ति महतामपि * इति स्मरन्तिस्म नीतिशास्त्रविदः। * रात्रि-

गमिष्यति भविष्यति सुप्रभातं भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः । इत्थं विचिन्तयति कोशगते द्विरेफे हाहन्त हन्त नलिनीं गज उज्जहार ॥ * इतिश्लोकं व्यचिन्तयन् साहित्यशास्त्रविदः । * रामे राज्यं पितुरभिमतं सम्मतं च प्रजानां माता वव्रे तदिह भरते सत्यवादी ददौ च । चिन्तातीतस्समजनि तदा पादुकाग्र्याभिषेकः दुर्विज्ञानस्व-हृदयमहो दैवमत्र प्रमाणम् * (पादुकासहस्रे) इति श्लोकं व्यभावयन्नितिहासपुराणविदः । श्रेयस्करकार्योपक्रमे प्रत्यूहसंभवात् श्रीरामभद्रयौवराज्याभिषेकप्रयत्नरूपशुभकार्यस्यापि विघ्नप्रतिहतत्वात् चिरादस्मत्कृतप्रबलपापराशिफलतया प्रस्तुतशुभकार्यस्यापि प्रत्यूहप्रविहति स्संभवितुमर्हति ; विघ्नपरिहारः कथमिव ? इति शङ्कामुदभावयन् काश्चित् । वेदान्तपरिचयशालिन्यो गोपिका अथ विघ्नशङ्कापरिहारमकुर्वत ; तदनया गाथया प्रतिपाद्यते । शुभकार्याणां निर्विघ्न-परिसमाप्त्यर्थम् आदौ विष्वक्सेनपूजाऽनुष्ठीयते जगति ; तस्या निर्विघ्नपरिसमाप्त्यर्थम् अनुष्ठानान्तरं नोपक्रम्यते ; तदेवानुष्ठानं स्वपरनिर्वाहकं भवतीति । तद्वदेव प्रकृतेऽपि कथ्यत इति प्रतिपत्तव्यम् । अत्याश्चर्यगुणगणैकतानम् मथुरापुर्यामवतीर्णम् यमुनानदीविहारलोलम् व्रजमण्डलमण्डनम् मातुर्यशोभिवर्धनविचक्षणं च दामोदरं भगवन्तं वयं मनोवाक्कायरूपत्रिकरणतश्च शुद्धाः परमपवित्रैः पुष्पैरभ्यर्च्य संकीर्तयेम यदि श्रेयःप्रत्यूहात्मकं सकलमपि दुरितं भस्मसाद्भवेदेवेति वेदान्तवासनाबलादभिधीयते ।

* तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् * इति शारीरकमीमांसासूत्रार्थ इह बोधितो वेदितव्यः । अधिगतब्रह्मविद्यस्य पुंसः उपनिषत्सु पूर्वाघविनाश उत्तराघाश्लेषश्च श्रूयेते— * एवं हास्य सर्वे पाप्मानः प्रदूयन्ते * एवंविदि पापं कर्म न श्लिष्यते * इति । अन्यत्र तु * नाभुक्तं क्षीयते कर्म कल्पकोटिश-तैरपीति पाप्मनामनुभवैकविनाश्यत्वं श्रूयते । तद्विरोधेन, पाप्मनामश्लेषविनाशश्रुतिः कथञ्चिद्विद्यास्तुत्यर्थतया नेयेति पूर्वपक्षे प्राप्ते सूत्रं तदिदं सिद्धान्तमवतारयति । कर्मणामनुभवैकविनाश्यत्वप्रतिपादकस्य शास्त्रस्य, तेषामश्लेषविनाश-प्रतिपादकस्य शास्त्रस्य च भिन्नविषयत्वेन मिथो विरोधप्रसक्तिरेव नास्ति । * नाभुक्तं क्षीयते कर्मेति शास्त्रं कर्मणां फलजननसामर्थ्यं द्रढयति । * एवं हास्य सर्वे पाप्मानः प्रदूयन्ते * एवंविदि पापं कर्म न श्लिष्यते * इत्यादिकं शास्त्रं तु ब्रह्मविद्यायाः कर्मगतफलजनन सामर्थ्यनिवारणशक्तिविषयकमिति भिन्नविषयत्वं वेदितव्यम् । यथा-कश्चिदग्निप्रभावं कथयन् तस्य दहनशक्तिद्रढिमानं ब्रूते ; अपरस्तु अपां प्रभावं ब्रुवन् तासां दहननिरोधशक्तिद्रढि-मानमाह ; कोऽत्र मिथो विरोधः ? न खलु कोऽपि । सलिलसन्निधानविरहितोऽनलो दहनशक्तः ; सलिलसन्निधि-युक्तो वह्निस्तु दहनशक्तिविकलः— इति हि प्रतीयेत । एवमेव, ब्रह्मविद्याविरहे सति कर्माणि अनुभवैकविनाश्यानि ; तत्समवधाने तु तानि विनश्यन्ति न श्लिष्यन्ति चेति सर्वमवदातम् ॥

श्रीवैकुण्ठपतिः श्रियःपतिरवाप्तसमस्तकामश्च सर्वेश्वरो भुवि कृष्णकिशोरात्मनाऽवतीर्य गोगोपानामपि सुलभस्सन् नवनीतचौर्यनगरक्षोभाद्युच्चावचकृत्यबृन्दैरत्याश्चर्यतया विरराजेत्ययमर्थोऽनुसन्धीयते [अत्याश्चर्यैकनि त्यम्] इत्यनेन प्रथमविशेषणेन । भगवान् यदा रामचन्द्रस्सन्नवततार तदा शंखचक्रादिदिव्यायुधविरहित एव जातः ; तथाऽपि रावणवधानन्तरं तमिमं दृष्टवती मन्दोदरी * तमसः परमो धाता शंखचक्रगदाधरः । श्रीवत्सवक्षा

नित्यश्री रजय्यः शाश्वतो ध्रुवः * इति स्तुवन्ती शंखचक्रपाणिमेव तुष्टाव। तदाकर्णितवान् रामचन्द्रो हन्त! शंखचक्रगदाधरत्वं नास्ति हि मयीदानीम्; इतः परमवतरणसमये अवश्यं भवानि शंखचक्रगदाधरः इति मनसि कलयामास। अथ च कृते कृष्णावतारे * जातोऽसि देवदेवेश! शंखचक्रगदाधर! * इति प्रशंसनार्हस्सन् अत्याश्चर्यमूर्तिराविर्बभूव। तदिदमभिधीयते [अत्याश्चर्यैकनिलयम्] इत्यनेन. इत्यपि वेदितव्यम्। श्रीपराङ्कुशमुनिः तिरुविरुत्ताभिधाने प्रथमप्रबन्धे * शूट्टुनन्मालैकळ्तूयनवेन्दि * इत्यस्यां गाथायां किमप्यद्भुतमभ्यधात्; तदप्यत्रानुसन्धातुं योग्यम्। तच्चैवम्—श्रीमति वैकुण्ठे दिव्यलोके नित्यसूरयो विमलमाल्यपाणयस्सन्तो भगवतः स्नानासनं समर्प्य धूपं समर्पयन्त आसन्। तदात्वे धूमेन मुखाच्छादनं भवति खलु भगवतः; अथ दीपसमर्पणकाले हि मुखप्रकाशो भविता। धूपदीपयोर्मध्ये प्रच्छन्नो भगवान् सहसा भुवि नवनीताशनलोलुपस्सन्नवतीर्य तदुपभुज्य नीलादेवीपाणिग्रहणाय सप्तर्षभमदध्वंसमपि विरचय्य अवतारं समाप्य गतः स्वं स्थानमुत्तममिति। एवंविधबह्वाश्चर्यकथानुसन्धानमिह प्राप्तम्।

[अविच्छिन्नभगवत्सम्बन्धास्पदमथुराधिनाथम्] मथुरा चिराद्भगवदास्पदभूता। वामनावतारे अत्रैव सिद्धाश्रमः परिकल्पित इति प्रथा। शत्रुघ्नोऽत्र चिरमाधिराज्यमवहदिति च। एवं नाम भगवत्संबन्धनैरन्तर्यमिह वेदितव्यम्। * मथुरा नाम नगरी पुण्या पापहरी शुभा। यस्यां जातो जगन्नाथः इत्यादिकमिह भाव्यम्।

अथ [परमपवित्रमहापयःपूरभरितयमुनानदीविहाररसिकम्] इति तृतीयं विशेषणम्। विभवमूर्त्या भगवान् यदायदाऽवतरति तदातदा विरजासरितोऽप्युत्कृष्टप्रभावशालिनीनां नदीनां तीरेष्ववतरति। श्रीरामावतारस्सरयूसरित्तटे संपन्नः। श्रीकृष्णावतारः कलिन्दनन्दिनीनदीतीरे संपन्नः। दाशरथिः सरयूसरित्तटे समवतीर्णोऽपि तस्यां सरिति विहृतवानिति नशृणुमः; कृष्णस्तु यमुनानदीं स्वकीयविविधविहरणविशेषैरन्यादृशधन्यताशालिनीमाततानेति प्रसिद्धम्। कालिन्दीरसिक इति नाम्ना च प्रथितः कृष्णः। * निकटेषु निशामयामि नित्यम्...... यमुनासाक्षिकयौवनं युवानम् * इति गोपालविंशत्यामाह च वेदान्तसूरिः। यमुनायां तत्कूले च कृष्णेन कृताः केलयो गिरां दूरे। तासु च यत्किञ्चिदनुसन्धानमात्रेण भक्ता निर्धूतनिखिलकिल्बिषा हि भवितारः। * मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैः नक्तं भीरुरयं त्वमेव तमिमं राधे! गृहं प्रापय। इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः॥ * इत्येकं श्लोकरत्नमिहानुसन्धाय वयमपि विहृतकल्मषा भवेम। यमुनायाः परमपवित्रपयःपूरभरितत्वविशेषणं सुष्ठुतरम्। गोदावरीव्यावृत्तये विशेषणमिदं विन्यस्तम्। * हंसकारण्डवाकीर्णां वन्दे गोदावरीं नदीम्। क्षिप्रं रामाय शंस त्वं सीतां हरति रावणः॥ * इति सीतादेव्या प्रार्थिताऽपि गोदावरी अस्थाने रावणभीतिमधिवहन्ती सती श्रीरामसविधे तमिमं संदेशं न समार्पिपत्। यमुना तावत् कंसराजधानीसन्निकर्षे प्रवहन्ती सत्यपि * यमुनां चातिगम्भीरां नानावर्तझषाकुलाम्। वसुदेवो वहन् कृष्णं जानुमात्रोदको ययौ * इति श्रीविष्णुपुराणोक्तरीत्या, * अकृतसेतुमनाकलितप्लवां जननसिन्धुहृढप्लवमुद्वहन्। रविसुतामतिलंघ्य रमापतिं सपदि घोषसमीपमुपानयत् * इति यादवाभ्युदयोक्तरीत्या च व्रजंप्रति कृष्ण-

शिशोः प्रापणस्य परममानुकूल्यमावहतिस्म । अत एव यमुनापयसः परमपवित्रता पप्रथ इति बोध्यम् । निरन्तर-कृष्णविहारास्पदत्वप्रयुक्ता पवित्रताऽप्यनुसन्धेया ।

अथ [गोकुलसमुद्भूतमङ्गलदीपम्] इति चतुर्थं विशेषणम् । लोके सूर्यप्रकाशप्राचुर्ये सति दीपो न शोभते ; अन्धतमसे हि स भृशं शोभते ; तद्वदेव श्रीमति वैकुण्ठे कुण्ठितशोभो भगवान् व्रजमासाद्यैव सत्यमकुण्ठितशोभः प्रचकाशे । भगवतः शोभा हि गुणतः ; दयावात्सल्यसौशील्यादय एव गुणेषु प्राधान्यमधिवहन्ति ; ते च परमपदे सर्वथा निर्विषयास्सन्तो वीतशोभा भवन्ति । कथम् ? दया दुःखिषु उपयुज्यते ; वात्सल्यं दोषयुक्तेषु ; सौशील्यं मन्देषु ; दिव्ये धाम्नि तत्र दुःखिनो वा दोषयुक्ता वा मन्दा वा नैव सन्ति ; * तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैतीत्युपनिषदाम्नातरीत्या तत्र स्वेन सह परमसाम्यमापन्ना एव हि सन्ति सर्वे ; तेषु दुःखदोषादिगन्धप्रसक्तिविरहेण दयादयो गुणा ह्यनवकाशपराहता भवन्ति । दुःखिनां दुष्टानां मन्दानां च क्षितावेवात्र भूयिष्ठत्वेन अत्रैव स्वगुणानां पूर्णकुक्षित्वं भवितुमलमिति धृताध्यवसायस्सन्नत्रावतीर्य तमोगृहे प्रदीपवदतितरां शुशुभे ; अत एव गोकुलसमुद्भूतमङ्गलदीपत्वेनाभ्यधायि ।

अथ [जननीजठरप्रख्यापनपटीयांसं दामोदरम्] इति । * दाम्ना चैवोदरे बध्वा प्रत्यबध्नादुलूखले * इत्युक्तरीत्या नवनीतचौर्याद्यपराधनिमित्तेन उदरे दामबन्धनं प्रापितोऽभूज्जनन्या—इति हेतुना खलु दामोदर इति व्यपदिश्यतेस्म । * त्वामन्यगोपगृहगव्यमुषं यशोदा गुर्वी त्वदीयमवमानममृष्यमाणा । प्रेम्णाऽथ दामपरिणामजुषा बबन्ध * [अतिमानुषस्तवे] इत्युक्तरीत्या च मातुर्बन्धनप्रहरणादियोग्योऽयमासीदित्यतो जननीजठरप्रख्यापनपटीयस्त्वं सुगमम् । सर्वथा मातृवश्यताम् अन्यच्च गुणजातं विलोकयन्तो जनाः “अहह ! इमं कुमारं प्रसूतवती किं वा तपस्तेपे !” इति मिथस्संबभाषिर इति विष्णुचित्तो मुनिवर आह ; तदनुसृत्यैव जननीजठरप्रख्यापनपटीयस्त्वमिहोच्यते । एवंविधगुणगणनिधिं भगवन्तं मुकुन्दं यदि वयं परिशुद्धास्सत्यः पुष्पैरभ्यर्च्य नत्वा स्तुत्वा ध्यायेम तर्हि सद्यो वीतकलुषा भवेम-इत्याचक्षते । गोपजातीयानामासां परिशुद्धिस्तु न दैहिकी, अपि तु मानसिकी । * मम चाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम् * इति विभीषणस्य शुद्धतां कथयन् सुग्रीवो न खलु दैहिकीं शुद्धिमभिप्रेयाय ; आत्मगतामेव हि तामाशिश्ये । सैव शुद्धिरत्रापि विवक्षितेति वेदितव्यम् ॥

अथ ध्वन्यर्थविवरणम् ॥ प्रणामसंकीर्तनध्यानानां भगवति करणं यथा सर्वपापनिबर्हणक्षमम् तथा तेषामाचार्यविषये करणमपि परमपावनत्वसंपादकमिति गाथयाऽनया प्रतिपाद्यते । अत्याश्चर्यैकनिलयमित्यादीनां विशेषणानाम् आचार्यविषये सुष्ठु समन्वयं निरूपयामः पश्यत । [अत्याश्चर्यैकनिलयम्] आचार्यसार्वभौमस्य आश्चर्यचेष्टितानि श्रीरामानुजनूत्तन्दादिदिव्यप्रबन्धे (५२. गाथायाम्) विशदयति श्रीरङ्गामृतकविः ; तदनुवादश्चेत्थम्—“भगवान् रामानुजः स्वकीयचक्षुर्विक्षेपमात्रेण षड्दर्शनानि शिथिलीचकार ; कृत्स्नामपि पृथिवीं स्वयशसा समावृणोत् ; क्षोदीयसो ममापि हृदयं प्रविश्य प्रबलपातकानि व्यनीनशत् ; श्रीरङ्गिणश्चरणद्वंद्वेन सह मम मूर्धानमयूयुजच्च ; सर्वमिदमस्मद्गुरोरस्यात्यद्भुतचेष्टितम्” इति । एवंविधानामाश्चर्यचेष्टितानां कर्ता ह्याचार्यः ।

नित्यसंसारिणश्चेतनस्य नित्यसूरिपरिषन्निवेशयोग्यतासंपादनमाचार्येण क्रियमाणम् अयसः कनकीकरणवदाश्चर्यमेव हि। अथ मथुरापुरावतीर्णत्वं यदुच्यते तदप्याचार्ये संगच्छते; मथुरापुरी तावत् * एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः। नागपर्यङ्कमुत्सृज्य ह्यागतो मथुरां पुरीम् * इत्युक्तरीत्या भगवन्तं क्षीरसागरे विरक्तमाकलय्य स्वस्मिन्ननुरक्तमकरोत्; तथा सेयं लीलाविभूतिः आचार्यं नित्यविभूतौ विरक्तमाकलय्य स्वस्मिन्ननुरक्तमाततान; ततश्च लीलाविभूतेर्मथुरासाम्यं निर्व्यूढम्; मथुरायां यथा भगवत्सम्बन्धो निरन्तर आसीत्तथा लीलाविभूत्यामपीति विभाव्यम्। तथाच भगवानिव स्वकीयं समुत्तुङ्गं स्थानं परित्यज्य हेयं स्थानमुपागतोऽयमाचार्य इति कथितं भवति। अथ यमुनानदीसन्निहितत्वमुच्यते कृष्णे भगवति। अत्रेदमवधेयम्। भगवान् सर्वत्र नदीविशेषरसिकः; तथा आचार्या अपि नदीतीरेष्वेव रासिक्यातिशयेन प्रादुर्भवन्ति; तदिदं श्रीभागवते एकादशस्कन्धे पञ्चमाध्याये (३८, ३९, ४० समेषु श्लोकेषु) स्पष्टमुच्यते; * कृतादिषु नरा राजन्! कलाविच्छन्ति संभवम्। कलौ खलु भविष्यन्ति नारायणपरायणाः॥ क्वचित्क्वचिन्महाभाग! द्रमिडेषु च भूरिशः। ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी। कावेरी च महापुण्या प्रतीची च महानदी .... * इत्यादयः श्लोका इहानुसन्धेयाः। अत्र निर्दिष्टानां ताम्रपर्णी-कृतमाला-क्षीरनदी-कावेरीसरितामेव हि सन्निकर्षे भूयशोऽवातरन् श्रीवैष्णवाचार्याः। गाथायामस्यां यमुनायाः कथनमुपलक्षणमिति मन्तव्यम्।

अथ [गोकुलसमुद्भूतमङ्गलदीपम्] इत्येतदपि विशेषणम् आचार्ये समन्वेति। मङ्गलदीपशब्दः प्रचुरप्रकाशशालिवस्तुबोधकस्सन् सूर्यार्थकोऽपि भवितुमर्हति। * ततोऽखिलजगत्पद्मबोधायाच्युतभानुना। देवकीपूर्वसंध्यायामाविर्भूतं महात्मना॥ * इति कृष्णो यथा भानुरिति पुराणरत्ने व्यपदिदिशे तथा अस्मदीया आचार्यसार्वभौमा अपि * तस्मै नमो वकुलभूषणभास्कराय * कलयामि कलिध्वंसं कविं लोकदिवाकरम् * श्रीमानाविरभूद्भूमौ रामानुजदिवाकरः * इत्यादिप्रमाणप्रक्रियया सूर्या एव हि प्रथन्ते। एते च गोकुलसमुद्भूता एव; कथम्? * ज्ञानेन हीनः पशुभिस्समानः * इति रीत्या पशुनिर्विशेषैर्जनैरध्युषिते स्थले ह्यवतीर्णा एते।

अथ जननीजठरप्रख्यापनपटीयांसश्चैते भवन्ति। कथम्? * गायत्रीच्छन्दसां माता * इतिश्रुतिप्रक्रियया जननीति गायत्री कथ्यते; तस्या जठरम्—मध्यभागः; * भर्गो देवस्य धीमहीति वाक्यमेव हि तस्यां मध्यभागः। तत्प्रख्यापनपटीयस्त्वम्—ब्रह्मवर्चसशालित्वमेव। किञ्च * कुलम् तरुम् शेल्वम् तन्दिडुम् * (குலந் தரும் செல்வம் தந்திடும்) इत्यादिश्रीपरकालसूरिदिव्यगाथायाम् * पेत्तत्तायिनुमायिन शेय्युम् * (பெற்றதாயினுமாயின செய்யும்) इत्येतद्वाक्यमनुसृत्य श्रीमदष्टाक्षरमहामन्त्रस्यापि जननीत्वेन ग्रहणं योग्यम्; कृष्णस्य देवकी यशोदा चेति द्वे मातरौ यथा स्तः तथा द्विजन्मनां भक्तानामपि गायत्री अष्टाक्षरी चेति द्वे मातरौ। कृष्णस्य यशोदैव यथा प्रधानमाता तथा श्रीवैष्णवानाम् अष्टाक्षरी हि प्रधानमाता भवति। अस्यां मध्यं नमःपदम्। तत्प्रख्यापनपटीयांस आचार्याः; गायत्र्यां * भर्गो देवस्य धीमहीति वाक्यं प्रधानम्; मूलमन्त्रे नमःपदं प्रधानम्; उभयोरनयोः प्रकाशकत्वमेव जननीजठरप्रख्यापकत्वमिति तदिदमाचार्ये सुष्ठु संगतम्। स्वरूप-

10

विरोधी उपायविरोधी प्राप्यविरोधीति त्रिविधानां विरोधिनां निरसनं हि नमसः कृत्यम् ; तादृशविरोधिवर्गनिरसनपूर्वकं स्वरूपांशे उपायांशे उपेयांशे च स्वयमुज्ज्वलाः परानप्युज्ज्वलान् कुर्वन्तो महान्तो जननीजठरप्रख्यापनपटीयांसो विभाव्याः ।

अथ दामोदरत्वं चाचार्ये समन्वेति। यशोदाबद्धां दामानमुदरे बिभ्राणः कृष्णो दामोदरसंज्ञामविन्दत ; आचार्योऽप्युदरे दामानं बिभर्ति ; कथम् ? भक्तिं दामत्वेन कथयन्ति हि महान्तः ; आशापाश इति व्यवहारोऽपि प्रथते खलु। सेयं भक्तिमयी दामा आचार्याणामुदरव्यापिनी जागर्ति ; हार्दभक्तिभरा अमी इति यावत्। प्रकारान्तरेणापि दामोदरत्वं सुनिरूपमाचार्ये। कृष्णस्य जातो दामबन्धो न कर्मकृतः अपि तु स्वेच्छाकृतः ; स च तस्य तेजस्करोऽपि बभूव। एवम् आचार्याणां बद्धसंसारिष्वन्यतमत्वेन भूमौ स्थितिर्न कर्मणा, अपितु भगवदिच्छया : बन्धोऽयममीषां तेजस्करश्चाभूदिति। एतादृशमाचार्यवर्यं समीचीनपुष्पसमर्पणपूर्वकं शुद्धभावेन ये ध्यायन्ति स्तुवन्ति च ते विधूताशेषकल्मषा भवन्ति। समीचीनानि पुष्पाणि नाम— * अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः। सर्वभूतदया पुष्पं क्षमा पुष्पं विशेषतः॥ ज्ञानं पुष्पं तपः पुष्पं ध्यानं पुष्पं तथैव च। सत्यमष्टविधं पुष्पं विष्णोः प्रीतिकरं भवेत्॥ * इतिश्लोकोक्तानि अहिंसेन्द्रियनिग्रहसर्वभूतदयाक्षमाज्ञानतपस्सत्यध्यानानीति वेदितव्यम्। एतान्याचार्यकटाक्षबलादेधन्तामित्याशंसनपूर्वकमुपसत्तिः कर्तव्येति सूचितं भवति॥

एतद्गाथातात्पर्यसंग्राहकः श्लोक एषः—

श्लो॥ अत्याश्चर्यैकतानं स्थिरतरमथुरावासिनं सूर्यकन्या-
क्रीडासक्तं व्रजेशं व्रजपतिदयिताभाग्यपाकं मुकुन्दम्।
अभ्यर्च्य प्राज्यपुष्पैस्त्रिकरणशुचयश्चेद्वयं कीर्तयेम
स्याद्भस्मैवान्तरायात्मकदुरितमिति प्रोचुषीं स्तौमि गोदाम्॥ ५॥

इति पञ्चमगाथाविवरणं समाप्तम्॥

---

६. षष्ठी गाथा—पुळ्ळुम् शिलम्बिन काण्॥

पुळ्ळुम् शिलम्बिनकाण् पुळ्ळरैयन्कोयिल् * वेळ्ळैविळिशङ्गिन् पेररवम् केट्टिलैयो *
पिळ्ळायेलुन्दिराय् पेयमुलै नञ्जुण्डु * कळ्ळचहडम् कलक्कळिय कालोच्चि *
वेळ्ळत्तरविल् तुयिलमर्न्द वित्तिनै * उळ्ळत्तुक्कोण्डु मुनिवर्हळुम् योगिहळुम् *
मेळ्ळवेलुन्दरियेन्न पेररवम् * उळ्ळम्पुहुन्दु कुळिर्न्देलोरेम्पावाय्॥ ६॥

अयि बालिके! पक्षिणोऽपि कलकलं वितेनुः ; पक्षिराजमन्दिरादुद्गतं शुद्धशंखस्य महान्तं ध्वनिमपि किं न शृणोषि? समुत्तिष्ठ भोः। पूतनाया विषदिग्धं स्तनं पीतवन्तम्, कृत्रिमशकटं चरणाघातेन शिथिली-

कृतवन्तम्, पयोनिधौ भोगिभोगशयनीयमधिशयानं च बीजभूतं भगवन्तं हृदि निदधाना मुनयो योगिनश्च शनैरुत्थाय हरिर्हरिरिति यत्कीर्तयन्ति, तद्ध्वनिविशेषोऽपि हृदयकुहरं प्रविश्य शिशिरयति ॥

(इति मूलगाथाविवर्तः ॥)

* नीलातुङ्गस्तनगिरितटीसुप्तमुद्बोध्य कृष्णमितिमुखपद्यानुसारेण कृष्णोद्बोधनैकतत्परेऽस्मिन् दिव्यप्रबन्धे अधस्तनं गाथापञ्चकमवतारिकारूपेण व्यतीतम्। अथ दशभिः पद्यैर्गोपीनां प्रबोधनं निबध्यते। इदानीं बहिस्संमिलिता गोप्यः काश्चित्। अन्तश्शयालवो गोप्यश्च काश्चित्। याः प्रबुद्धा बहिस्संमिलितास्तिष्ठन्ति, ता अन्तः शयने स्थिता गोपीः प्रतिबोधयन्ति। ननु व्रजे सर्वासामपि गोपीनां भगवति कृष्णे भक्तिर्निर्विशेषा; सा कासाञ्चिदधिका कासाञ्चित् न्यूना इति तावन्न सुवचम्। एवं च काश्चित्पुरस्तादेव प्रबुद्धास्सत्यः प्रबोधयन्ति; काश्चित्प्रबोधविरहिता अन्तश्शेरते रजस्तमोविवशा इति कथमिदं निबध्यत इतिचेत् नैवम्। प्रबुद्धानां वल्लवीनामधिकः कृष्णानुरागः, प्रबोध्यमानानां शयनस्थितानां गोपीनां मितस्स इति प्रतिपत्तेर्न मनागप्यवकाशः। भगवद्गुणाः खलु राघवबाणा इव काश्चिद्व्यामोहयन्ति, काश्चित्ससंभ्रमयन्ति। लोके सर्पदष्टानां जनानां मध्ये केचिन्मूर्च्छिता भवन्ति, केचिदार्तिभूम्ना आक्रोशपरा भवन्ति इत्यध्यक्षयामः। तद्वदेव भगवतो गुणा अनुसन्धीयमानाः केषाञ्चिज्जनानां मूर्च्छाहेतुभावं भजन्ति, अपरेषां जनानामाक्रन्दननिदानतामाप्नुवन्ति। अत एव कासाञ्चिद्वनितानां प्रबोधनकर्तृत्वम्, अपरासां च तत्कर्मत्वमिति नैतन्मनागपि व्याहन्यते।

अथ, याः प्रबुद्धास्ताः स्वयं व्रतानुष्ठानाय कुतो न गच्छन्ति? निद्राणानामपि प्रबोधनात्मके प्रयासे किमर्थं प्रवृत्ताः? इतिचेत् श्रूयताम्। * एकुस्स्वादु न भुञ्जीतेति हि स्थितम्। परमभोग्यभगवदनुभवो ह्यत्र व्रतानुष्ठानव्यपदेश्यः। अस्मिन् या या अनुरक्ताः ताभिस्सर्वाभिरपि मिलित्वाऽनुभोक्तव्यमिति तावदुत्कण्ठिताः प्रबोधने प्रवर्तन्ते।

किञ्च श्रीवैकुण्ठमूर्त्यपेक्षया विभवावतारमूर्तौ गुणाधिक्यमिति अप्रकम्प्यम्। तमेव वैकुण्ठनाथमनन्तकोटिसंख्या नित्यसूरयो भुञ्जते यदि, ततोऽप्यभ्यर्हितगुणशालिनं श्रीकृष्णं भगवन्तमनुभुञ्जाना जनाः कथमिव परिमिता भवितुमर्हन्ति; भुवि स्थितैस्सर्वैरपि जनैस्संमिलितैः खलु भोक्तव्यमिति चासामभिसन्धिः। किञ्च, भगवद्विषयो ह्यप्रमेयो महोदधिः। अत्र हि परिमितैर्जनैरवतरितुं न शक्यम्; अपरिमिता जना यद्यवतरन्ति ते मिथस्सहायभूता भवितुमर्हन्ति, निर्भयतयाऽवगाहनं संपद्येत इति चाभिसन्धिः।

किञ्च, भगवत्सन्निधिप्राप्त्यपेक्षयाऽपि भागवतमण्डल्यामन्वय एव परमः पुरुषार्थ इति सतां सिद्धान्तः। अत एव श्रीवत्साङ्कमिश्राः श्रीवैकुण्ठस्तवेऽनुजगृहुः—* कैङ्कर्यनित्यनिरतैर्भवदेकभोगैः नित्यैरनुक्षणनवीनरसार्द्रभावैः। नित्याभिवाञ्छितपरस्परनीचभावैः मद्दैवतैः परिजनैस्तव संगसीय * इति। तथाच परमपुरुषार्थभूतपरमभागवतगोष्ठीपौष्कल्यकांक्षणमिह युक्तरूपम्।

प्रधानतमस्सत्संप्रदायसारार्थस्तु— * उत्पपात गदापाणिश्चतुर्भिस्सह राक्षसैरित्युक्तरीत्या श्रीराघवपादारविन्दप्रेप्सया सपरिजनस्समुत्थितो विभीषणो द्वारपालप्रतिरोधादिनिर्बन्धगन्धरहितां श्रीराघवसन्निधानप्राप्तिं सहसा स्वयं कर्तुं प्रभवन्नपि * सर्वलोकशरण्याय राघवाय महात्मने । निवेदयत मां क्षिप्रं विभीषणमुपस्थितम् * इति वानरवीराणां सविधे सविनयमभ्यर्थयतेस्मेति स्थितं श्रीरामायणे । विवादप्रशमानन्तरं विभीषणं तं परिजिघृक्षन् भगवान् रामचन्द्रोऽपि स्वयं साक्षादनाह्वयन् * आनयैनं हरिश्रेष्ठ ! दत्तमस्याभयं मयेति भागवतोत्तम— [सुग्रीव] पुरस्कारेणैव पर्यगृह्णादिति प्रपश्यामः । तदवगतं सर्वथाऽपि भागवतपुरस्कारोऽत्यावश्यक इति । सएवात्रानुष्ठीयते गोपीभिरिति वेदितव्यम् । श्रीगोदादिव्यप्रबन्धो ह्ययं सकलशास्त्रार्थसारसर्वस्वसमुद्बोधनतत्परः । तथाहि प्राञ्चः प्राहुः- * वेदमनैत्तुक्कुम् वित्ताहुम् कोदैतमिळैयैन्दुमैन्दुम्—सकलवेदबीजभूतो गोदादिव्यप्रबन्धः * इति ।

पक्षिणोऽप्युत्थाय प्रणादं वितेनुः ; विहगेश्वरमन्दिरादुज्जृम्भमाणो महान् पाञ्चजन्यध्वनिरपि प्रसृमरः । दैत्यारेर्भगवतो ध्याने निरता योगिनोऽपि हरिर्हरिर्हरिरिति उच्चैस्संकीर्तयन्त उत्तिष्ठन्ति—इत्येवंविधानि प्रत्यूषकालोदयलक्षणानि कथयित्वा काञ्चन गोपबालिकां प्रावोधयन् पुरा गोप्यः; तत्तादात्म्यभावनया तथा कथयति गोदादेवी ॥

सर्वत्र प्रसृमरः पक्षिणां कलकलः प्रथममभिहितः । अथ पक्षिराजमन्दिरादुद्गतः शंखध्वनिः प्राभातिकलक्षणत्वेन प्रकीर्त्यते । पक्षिराजो गरुत्मान् ; तस्य मन्दिरम् । अथ वा, पक्षिशब्देनैव गरुत्मान् विवक्षितो भवितुमर्हति ; तस्य राजा—प्रभुः इति सर्वेश्वरो गृह्यताम् ; तस्य मन्दिरम् । ननु कृष्णकिशोरस्यैव प्राधान्यं सहमाने व्रजे तार्क्ष्यस्य तार्क्ष्यवाहनस्य वा मन्दिरं कथमिव भवेदिति मा स्म भूदाशङ्का ; रामावतारे भगवता रामेणापि सेव्यो नारायणो विरराजेति सुस्पष्टं प्रतीयते खलु ; यदाह महर्षिर्वाल्मीकिः * सह पत्न्या विशालाक्ष्या नारायणमुपागमत् * इति । स च नारायणः साक्षात् श्रीरङ्गनाथ एवेति श्रीभट्टपाददिव्यसूक्तिः स्फुटयति ; तथाच श्रीरङ्गराजस्तवपूर्वशतकावसाने * श्रीरङ्गेन्दोः पदकिसलये........हेमाम्भोजैर्निबिडनिकटे रामसीतोपनीतैः * इति । उपरिष्टादुत्तरशतके च— * मनुकुलमहीपाल........स्वयमथ विभो ! स्वेन श्रीरङ्गधामनि मैथिलीरमणवपुषा स्वार्हाण्याराधनान्यसि लम्भितः * इति । अर्चावतारविरहः कदाऽपि नेति वेदितव्यम् । व्रजे भगवदालयः अस्तु वा मा वा ; गोदादेवी स्वकीयदिव्यप्रबन्धे यदि भगवदालयप्रस्तावं न कुर्यात्तर्हि प्रबन्धस्यास्य प्राशस्त्यं न स्यादेवेति हृदि कलयन्ती असकृदालयप्रस्तावमिह करोति ; उपरिष्टाच्चतुर्दशी गाथाऽपि प्रेक्षणीया ।

अथ भगवद्ध्याननिरतानां महतां निद्रां विसृज्योत्तिष्ठतां हरिर्हरिर्हरिरिति संकीर्तनं सर्वतः प्रसृतमिति कथ्यते । तैर्महात्मभिः हृदि निहितो भगवान् पूतनावधं शकटभङ्गं च कृतवान् क्षीराब्धौ शेषशायी चेति कथ्यते । पूतनावधवृत्तान्त इत्थम् ;— कंसः स्वहननार्थमाविर्भूतः कृष्णो गुप्तस्सन् व्रजे वर्धत इति विदित्वा तद्व्यापादनाय बहूनुपायान् व्यचिन्तयत् ; * मनीषितं कैतवमानुषस्य श्रुत्वा भयक्रोधपरिप्लुतात्मा । कंसश्चिरं प्राग्भवकालनेमिश्चिन्तार्णवे मग्न इवावतस्थे ॥ स दुर्दमानासुरसत्त्वभेदान् नेता समाहूय नृशंसचेताः । प्रस्थापयामास परैरधृष्यं नन्दास्पदं नाथविहारगुप्तम् ॥ * इति यादवाभ्युदयोक्तरीत्या कृष्णहननाय बहूनासुरप्रकृतीन् व्रजं प्रजिघाय ।

पूतनानाम्नी काऽपि माया अर्धरात्रे व्रजमागत्य यशोदावेषधारिणी विषदिग्धपयोधरा डोलामधिशयानमच्युतशिशुं स्तन्यं पाययन्ती अथ विदितमायोदन्तेन तेन स्तन्यपानच्छलेनैव समाकृष्टप्राणा विलिल्ये—इति। अथ शकटभञ्जनकथा चैवम्। व्रजे कदाचिद्यशोदा कृष्णं स्वगृहद्वारे शकटस्याधस्ताच्छाययित्वा यमुनामयासीत्। अथ कृष्णजिघांसया कंसप्रेरितेष्वन्यतमः कृष्णाश्रयभूतं शकटमाविश्य निपत्य चोपरि हन्तुमयतत; तदात्वे कृष्णो भगवान् सर्वरक्षणदक्षिणेन स्वचरणेनैव स्वस्यापि रक्षां संपिपादयिषुः स्तन्यार्थं प्ररुदन्निव चरणमुन्नमय्य तदभिघातेन सासुरं शकटं शिथिलीचकारेति। शकटे असुरावेशस्समजनीति कथनं श्रीविष्णुपुराणादिसंमतं वेति विचारो मा भूत्; व्रजे सर्वत्राप्यसुरावेशस्समजनीति, अङ्कुरदोषधिमात्रमप्यासुरमेवेति च मङ्गलाशासनपराणां दिव्यसूरिवराणामभिसन्धिः। अत एव श्रीपराङ्कुशमुनीन्द्रप्रभृतयः * तळर्न्दुम् मुरिन्दुम् शकडवशुररुडल् वेराप्पिळन्दु वीय * (தளர்ந்தும் முறிந்தும் சகடவசுரருடல் வேறுப்பிளந்து வீய) इत्यादिगाथा अनुजगृहुः। इदानीमिह पूतनावृत्तान्तशकटोदन्तयोः प्रस्तावं कुर्वतीनां वल्लवीनामयमाशयः— कृष्णस्य विपत्संभवप्रस्तावे कृते सति अन्तश्शयाना गोपी भृशमुद्विग्ना सरभसमुत्थाय समागच्छेदिति। सा तु कृष्णविजयानुसन्धानेन निर्विचारा सती गुणानुभवैकनिष्णाताऽवर्ततेति रसिकसार्वभौमा आचार्यवर्या उल्लिखन्ति॥

अथ [पयोनिधौ भोगिभोगशयनीयमधिशयानम्] इति विशेषणेन क्षीरसागरे नागपर्यङ्कशयनोदन्तोऽनुसन्धीयते मनस्समाहितये। विरोधिप्रसङ्गविधुरो देशविशेषः क्षीराब्धिरिति, मङ्गलाशासनपरेष्वग्रेसर आदिशेष इति च हर्षप्रकर्ष आसाम्। शेषस्य मङ्गलाशासनपरत्वम् * आङ्गारवारमदु केट्टु अळ्लुमिलुम् पूङ्गाररवु * [ஆங்காரவாரமது கேட்டு அழலுமிழும் பூங்காரரவு] इत्यनया श्रीभक्तिसारमुनीन्द्रसूक्त्या वेदितव्यम्। बीजभूतमित्यनेन * यतो वा इमानि भूतानि जायन्ते * इत्यादिश्रुतिसिद्धं जगत्कारणत्वमनुसन्धीयते। क्षीराब्धेरवतारकन्दभूतत्वमपीह ध्येयम्। एतादृशं भगवन्तमन्तरङ्गे ध्यायन्ते मुनयो योगिनश्चेति भरतसधर्माणो लक्ष्मणसधर्माणश्चाभिधीयन्ते। भरतो गुणानुभवसक्तः; लक्ष्मणस्तु कैङ्कर्यनिरतः— इति भिदा। [शनैरुत्थाय] एते महान्तः सरभसं नोत्तिष्ठन्ति, अपितु अन्तर्वत्न्यो योषित इव मन्दमन्दमुत्तिष्ठन्तीति कथयन्त्या गोदादेव्या इदं हृदयम्; प्रह्लादमधिकृत्य श्रीविष्णुपुराणे कथ्यते— * ततस्तं चिक्षिपुस्सर्वे बालं दैतेयकिङ्कराः। पपात सोऽप्यधः क्षिप्तो हृदयेनोद्वहन् हरिम् * इति। हिरण्यकशिपुप्रेरितैः परुषैः पुरुषैः पर्वतशिखरान्निपातितः परमभक्तमणिः प्रह्लादः स्वेन हृदि धार्यमाणस्य भगवतः कोऽप्यपायो जायेत किमु! इत्यतिशङ्कमानो वक्षसि पाणितलं निदधानो मन्दमन्दं पतितस्मेव; तथैव प्रभाते शयनादुत्तिष्ठन्तो मुनयोऽपि 'सरभसमुत्थाने सति हृदि शयानस्य भगवतः कश्चिदपायो भविता किमु!' इत्यतिशङ्कया शनैरुत्तिष्ठन्तीति॥ * हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः। अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः॥ वाराणस्यां कुरुक्षेत्रे नैमिशारण्य एव च। दत्तं स्यात्तेन येनोक्तं हरिरित्यक्षरद्वयम् * इत्यादिप्रमाणप्रतिपत्तिभूम्ना हरिर्हरिरित्युद्घोषः प्रत्यूषे सुप्रथितः। एवमभिज्ञानत्रयमभिधाय बालिकां कामपि प्रतिबोधयामासुर्गोपिकाः॥

अथ ध्वन्यर्थविवरणम् । गाथायामस्यां बालिके ! इति व्यक्तिविशेषः संबोध्यते । ग्रहणधारणपोषणपटुर्बालः ॥ * पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् * इति श्रुत्युक्तं बाल्यं चात्र विवक्षितम् । स्त्रीलिङ्गेन पारतन्त्र्यं व्यज्यते । अथ प्राभातिकलक्षणानि त्रीणि कथ्यन्ते गाथायामस्याम् । पक्षिणः प्रबुद्धा अभूवन्निति प्रथमं लक्षणमुच्यते । ज्ञानानुष्ठानसंपन्नानां सतां श्रीवैष्णवानां प्रबोधः प्रोच्यत इति मन्तव्यम् । * उभाभ्यामेव पक्षाभ्यामाकाशे पक्षिणां गतिः । तथैव ज्ञानकर्मभ्यां प्राप्यते पुरुषोत्तमः * इति वदन्ति महान्तः । पक्षिणामुच्चैर्गतिसाधनं यथा पक्षद्वयं भवति तथा भक्तानामुत्तुङ्गस्थानप्राप्तिसाधनं ज्ञानमनुष्ठानं चेति द्वितयमेव हि भवति । ज्ञानहीनोऽनुष्ठानशीलः अन्धसधर्मा । अनुष्ठानहीनो ज्ञानी पङ्गुसमानः । उभयपरिकर्मितस्यैव निराबाधगमनं संभवितुमर्हति । तदेवं ज्ञानानुष्ठानसंपन्ना महान्तो भजनायोद्युक्ताः कोलाहलसमृद्धाास्सन्तीति सूचितं भवति । अत्र प्रथमतः पक्षिवृत्तान्तकथनम् वेदान्तगतमितिहासविशेषं स्मारयितुमिति मन्तव्यम् । तथाहि—शारीरकमीमांसायाम् * शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि * (१-३-३३) इति सूत्रश्रीभाष्ये "जानश्रुतिः किल पौत्रायणो बहुद्रव्यप्रदो बह्वन्नप्रदश्च बभूव ; तस्य धार्मिकाग्रेसरस्य धर्मेण प्रीतयोः कयोश्चिन्महात्मनोरस्य ब्रह्मजिज्ञासामुत्पिपादयिषतोः हंसरूपेण निशायामस्य अविदूरे गच्छतोरन्यतर इतरमुवाच" इत्युपक्रम्य औपनिषद इतिहासविशेष उपाख्यातः । ब्रह्मज्ञानविधुरस्य जानश्रुतेः रैक्कसविधे ब्रह्मज्ञानसंपादनं प्रति हंसरूपपक्षिविशेषप्रचोदनमेव निदानमभूदिति तदितिहाससर्वस्वम् । तत्स्मारणमिह क्रियमाणं ब्रह्मज्ञानसंपादनसमुत्कण्ठातिशयं प्रकाशयति ।

अथ पक्षिराजमन्दिरोद्गतशंखध्वनिविषयं विमृशामः । पक्षिराजमन्दिरमिति वेदोऽभिधीयते ; * सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुः * इत्यादिश्रुत्यनुसारेण, * वेदात्मा विहगेश्वरः * तार्क्ष्यः श्रुतीनां निधिः * इत्याद्याचार्यसूक्त्यनुसारेण च । तत उद्गतः शंखः— प्रणवः ; प्रणवस्य शंखाकारतायास्सुप्रसिद्धत्वात् । तस्य महान् ध्वनिर्नाम—महितध्वन्यर्थभूतं भागवतशेषत्वम् । प्रणवे हि भगवच्छेषत्वं कण्ठरवेण प्रतिपाद्यते, भागवतशेषत्वं ध्वनिमर्यादयेति मुमुक्षुप्पडिप्रभृतिपूर्वाचार्यग्रन्थरत्नावसेयम् । तथाच भागवतशेषत्वं विदित्वा भागवतगोष्ठीसहानुभूतिरेव समुचितेति प्रतिपद्य सत्वरमुत्थाय समायाहीति कथितं भवति ।

अथ तृतीयं प्राभातिकलक्षणम् हरिर्हरिरिति कीर्तनं सर्वतः प्रसमरमिति । हरिर्हरिरिति कीर्तयन्ति ये ते द्विविधाः प्रोक्ता इह "मुनयो योगिनश्चे" ति । गुणानुभवनिष्ठाः केचित्, कैङ्कर्यकुतूहलिनः केचिदिति भक्तवर्गा द्विविधा हि प्रेक्ष्यन्ते । श्रीवैकुण्ठेऽपीदृशी भिदा वर्तत इति प्रतिपद्यामहे । अत्र आचार्यगुणानुभवनिरता आचार्यकैङ्कर्यप्रवणाश्च स्वाचार्यं साक्षात् हरिमेवावधारयन्तः हरिर्हरिरिति प्रथयन्तीति भावः । सोऽयमाचार्यः कीदृश इति चेत् ; विशेषणचतुष्टयेन सोऽयं विशेष्यते । पूतनाया विषदिग्धं स्तनं पीतवान् न केवलं कृष्णः ; आचार्योऽपि । कथम् ? * कदाचिदन्तर्हितपूतनात्मा कंसप्रयुक्ता किल काऽपि माया । निद्रापराधीनजने निशीथे व्रजं यशोदाकृतिराविवेश ॥ स्तन्येन कृष्णः सह पूतनायाः .... यदद्भुतं भावगतां जनानां स्तनन्धयत्वं न पुनर्बभूव * इति यादवाभ्युदयश्लोकरत्नाभ्यां पूतनावधवृत्तान्तो वेदितव्यः ; काचन माया हि स्वस्मिन् भोग्यबुद्धिं जनयितुकामा

सती वधाय समुद्यता, तथा * स्वविषयायाश्च भोग्यबुद्धेर्जननीं दैवीं गुणमयीं मायाम् * इति शरणागतिगद्योक्त-रीत्या वस्तुतो विषमयी छलवृत्त्या भोग्यताबुद्धिजननी च माया इह पूतनास्थाने प्रतिपत्तव्या। तस्या वधमाचार्यः करोति; कथम्? * दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ * इति भगवद्गीतोक्तरीत्या मायाबन्धवैक्लव्यविमोचनं करोतीति यावत्। एवं च मायाबन्धवैदेशिको महान् कथितो भवति। अथ [कृत्रिमशकटं चरणाघातेन शिथिलीकृतवन्तम्] इत्येतदपि विशेषणमाचार्ये समन्वेति; शकटो नाम स्थलात् स्थलान्तरं प्रापयन् साधनविशेषः। अस्माल्लोकाल्लोकान्तरगमने साधनभूतः पन्था द्विविधो वर्तते साधुरसाधुश्चेति; तथा हि गीयते— * शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिम् अन्ययाऽऽवर्तते पुनः ॥ * इति। कृत्रिमशकटं कृष्णः पादाघातेन यथा जघान तथा पुनरावृत्तिसहनरकस्वर्गमार्गसङ्गं निहन्ति गुरुवरः स्वपादाब्जसंबन्धेन; अपुनरावृत्तिलक्षणमोक्षप्रापकपादाब्जो ह्याचार्यः। तथाच स्वपादाब्जसंबन्धविधूतदुर्मार्ग आचार्य इह विवक्षितः। अथ क्षीराब्धौ भोगिभोगशयनमधिशयानश्च भवत्याचार्यः। कथम्? भगवद्गुणामृतसागर एव क्षीराब्धिः; तस्मिन् अस्तमितान्यभावतया तदनुभवैकसङ्गेन महान्तमानन्दमनुभवति; सकलविधकैङ्कर्यकरणविषये आदिशेषमप्यधः करोति; स एव गुरुवरो मुक्तिबीजभूतश्च। तादृशं महानुभावं हृदि संचिन्तयन्तोऽन्तेवासिनः हरिर्हरिरिति व्याहरन्त उत्तिष्ठन्ति; अस्मदाचार्यस्साक्षात् हरिरेव, हरिरेव इति कथनमभिप्रेतम्। अथवा आचार्यमुखोल्लासाय हरिनाम संकीर्त्यत इति वा भवतु ॥

एतद्गाथार्थसंग्राहकः श्लोक एषः—

श्लो ॥ पक्षिव्रातप्रणादं खगपतिनिलयादुद्गतं शंखनादं
दैत्यारिध्यानयुक्तैर्हरिरिति मुहुरुद्घोषितं कीर्तनं च।
उक्त्वा प्रत्यूषकालोदयपिशुनतया बालिकां बोधयन्ती
गोदा गोपीतदात्मा विलसतु हृदये विष्णुचित्तात्मजा मे ॥ ६ ॥

इति षष्ठगाथाविवरणं समाप्तम् ॥

---

७. सप्तमीगाथा—कीशुकीशेन्नेङ्गुम् ॥

कीशुकीशेन्नेङ्गुमानैच्चात्तम् कलन्दु * पेशिन पेच्चरवम् केट्टिलैयो पेयूप्पेण्णे *
काशुम् पिरप्पुम् कलकलप्पक्कैपेर्त्तु * वाशनरुङ्गुळलाच्चियर् * मत्तिनाल्
ओशै पडुत्त तयिररवम् केट्टिलैयो *नायकप्पेण्पिळ्ळाय् नारायणन्मूर्ति *
केशवनै प्पाडवुम् नी केट्टे किडत्तियो * तेशमुडैयाय् तिरवेलोरेम्बावाय् * ॥ ७ ॥

अयि भो मुग्धबालिके! अस्मद्गोष्ठीनायकरत्नभूते!, सर्वत्र संमिलितानां भरद्वाजपक्षिणाम् 'कीशुकीशु' इति वाशितं कुर्वतां भाषणध्वनिं किं न शृणोषि? सुरभिचिकुरप्रकराणां जात्युचितभूषणालंकृतहस्तानां दधिमथन प्रवृत्तानां गोपीनां घलघलात्कारयुक्तमथनध्वनिं च किं नु नाकर्णयसि? भगवतो नारायणस्य

केशवस्य कीर्तने प्रवर्तमाने सत्यपि तदाकर्णनपरवशा सती किं ननु निद्रां कलयसि? अयि तेजस्विनि गोपिके! समुद्घाटय॥ (इति मूलगाथाविवर्तः)

द्राविडवाण्याम् "आनैच्चात्तम्" इति कथ्यमानानां भरद्वाजपक्षिणां कोलाहलम् दधिमथनसक्तानां गोपीनां मथनकालिककरभूषणचलनध्वनिम् मन्थघोषम् श्रीमन्नारायणगानं च प्राभातिकचिह्नतया कथयित्वा गोपीपरिषदि नायकमणित्वेन प्रथितां कामपि बालिकां समुद्बोधयन्ति गोप्य इति सेयं गाथा निबध्यते।

पक्षिणो हि कुलायतस्समुत्थाय जीवनार्थवस्तुसमार्जनाय नानादिशासु धावन्ति; तदात्वे परस्परं विरहस्संभवति; पुनरपि सायमेव सर्वेषाममीषां समागमो भविता; तावत्कालपर्यन्तं विरहव्यथासहनार्थं प्रातः प्रस्थानावसरे ते सर्वेऽपि संघशो मिलित्वा भूयांसं कोलाहलं कुर्वन्तीति तदिदमद्यापि दृश्यमानम्। एवंविधः कोलाहलः प्रभातसमय एव भवतीति प्राभातिकाभिज्ञानतया कथनमिह युज्यते। 'कीशुकीशु' इति तदीयशब्दानुकरणम्।

अथ जात्युचितभूषणालंकृतहस्तानां दधिमथनप्रवृत्तानां गोपीनां घलघलात्कारयुक्तमथनध्वनिश्च प्राभातिकाभिज्ञानतया प्रतिपाद्यते। अत्र गोपीनां करवलयजो घलघलात्कारध्वनिः गव्यमथनध्वनिश्चेति द्वितयमेव केवलं न विवक्षितम्; गोपीनां गानध्वनिरपि मध्ये विवक्षितः। * उद्गायतीनामरविन्दलोचनं व्रजाङ्गनानां दिवमस्पृशद्ध्वनिः। दध्नश्च निर्मन्थनशब्दमिश्रितो निरस्यते येन दिशाममङ्गलम् * इति श्रीभागवतोक्तरीत्या गोपाङ्गना अरविन्दलोचनं कृष्णकिशोरमुच्चैर्गायन्त्यः खलु दधि मथ्नन्ति। * विक्रेतुकामा किल गोपकन्या मुरारिपादार्पितचित्तवृत्तिः। दध्यादिकम्, मोहवशादवोचत् गोविन्द दामोदर माधवेति * इत्युक्तरीत्या रथ्यासु गव्यविक्रयकालेऽपि कृष्णकीर्तनपरा गोप्यः कथमिव सदनाभ्यन्तरे कृष्णगानविरहिता वर्तेरन्? कृष्णगानसनाथा एव गव्यमथनमारचयेयुः। तथाच स गानध्वनिरप्यत्र कथितप्रायः प्रतिपत्तव्यः। एवमभिज्ञानकथनं श्रुतवती अन्तःशयाना गोपी कथयामास—अयि भोस्सख्यः! नैव प्रभातमधुना; व्रजे कृष्णावतारसमनन्तरं गव्यानामतिमात्रमभिवृद्ध्या तन्मथनमहर्निशमनारतं कार्यं भवति; गोप्यश्च निद्रां विहाय सततमेव कृष्णं गायन्ति; नैतत् प्राभातिकलक्षणं भवितुमर्हतीति; अथ कथयन्ति बहिस्स्थिता गोपिकाः—भगवतो नारायणस्य केशवस्य कीर्तने भवत्या भवनद्वारि अस्माभिर्भूयसीभिः क्रियमाणे सति एतत्कीर्तनगोष्ठ्यां सहसा प्रविष्टया खलु भवितव्यं भवत्या; हन्त कथं त्वं निद्रापरवशाऽसि? भुवि कथाश्रवणं केषाञ्चिज्जनानां निद्रावैवश्यं जनयतीति पश्यामः; तथा किं त्वमपि अस्माभिः क्रियमाणस्य कीर्तनस्य श्रवणत एव निद्रासुखमनुभवसि? इत्याहुः। तदनु ताम् अन्तस्स्थितां गोपीं जालकरन्ध्राध्वना निरीक्ष्य तस्या वपुषि भगवन्नामनिशमनजनितं तेजोविशेषमवलोक्य "तेजस्विनि!" इति संबोध्य, समुद्घाटयेत्याचक्षते। वाचमुद्घाटय; स्ववपुषि धृतमाच्छादनवस्त्रमुद्घाटय; कवाटमुद्घाटय—इति त्रेधा विवक्षा वेदितव्या॥

अथ ध्वन्यर्थविवरणम्॥ "अस्मद्गोष्ठीनायकरत्नभूते!" इति संबोधनेन गुरुपरम्परायां नायकमणिभूत आचार्यसार्वभौमस्समुद्बोध्यत इति प्रतिपत्तव्यम्; * अमुना तपनातिशायिभूम्ना यतिराजेन निबद्धनायक-

श्रीः । महती गुरुपङ्क्तिहारयष्टिर्विबुधानां हृदयंगमा विभाति * इति यतिराजसप्ततिसूक्तिरिहानुसन्धेया। गुरुपरम्परां सुष्ठु संशोभयितुमर्हो भगवद्रामानुजसधर्मा श्रेयान् व्यक्तिविशेषस्समुद्बोध्यत इति गृह्यताम्। द्राविडभाषायाम् 'आनैच्चात्तम्' इति व्यवह्रियमाणा पक्षिजातिः संस्कृतवाचि भरद्वाजाभिधयाऽभिधीयते; तज्जातीयाः खलु पक्षिणो नयनसौन्दर्यभूम्नि सुप्रसिद्धाः; तेषामिह कथनेन * चक्षुष्मत्ता तु शास्त्रेण * इत्युक्तरीत्या शास्त्रतो द्रष्टारो महान्तोऽत्र सुभगचक्षुषो विवक्षिता इति विज्ञायते। अन्यदप्यत्रावगन्तव्यम्; काठकश्रुत्याम् * भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास * इत्युपक्रम्य भरद्वाजमहर्षेस्सर्ववेदाध्ययनशालित्वरूपं प्रभावविशेषं प्रकाशयदुपाख्यानमेकमाम्नातम्; तद्रीत्या (भरद्वाजमहर्षिसधर्माणः) सर्वविद्यासारार्थवेदिनो विद्वज्जनाः ग्रहीतव्याः। "भारद्वाजपक्षिणः परस्परं सम्मिलितांस्सन्तः कीशुकीसिति श्राव्यस्वरविशेषतो यत्संभाषन्ते तस्य संभाषणस्य ध्वनिः किं त्वया न श्रूयते?" इति स्थितम्। अत्र बहवो विषयाः स्वादीयांसोऽवधानार्हा विभान्ति। तैत्तिरीयसंहितायां द्वितीयकाण्डपञ्चमप्रपाठके * यत्क्रौञ्चमन्वाह आसुरं तत्, यन्मन्द्रं मानुषं तत्, यदन्तरा तत्सदेवम्, अन्तराऽनूच्यं सदेवत्वाय * इति शिक्षितरीत्या संश्रवे मधुरतरेण मध्यमस्वरेण भगवत्कीर्तनादिषु निरतानां भक्तानां मुनिवाहनदिव्यसूरिजयदेवमहाकविसधर्मणां सुभगः कण्ठनादोऽस्माकं श्राव्य इति। यथोक्तम्—* माश्रौषं श्राव्यबन्धं तव चरितमपास्यान्यदाख्यानजातमिति। "परस्परं संमिलितास्सन्तो भाषन्ते" इति कथनेन अस्मदीयाः पूर्वाचार्या स्सर्वेऽपि * भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यास्संचिक्षिपुः, तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते * इति श्रीभाष्यानुगृहीतरीत्या परस्परविरोधकथावकाशमन्तरेण समकण्ठमेव शास्त्रार्थतत्त्वप्रकथनपरा इति, तथाविधास्सूक्तय एव श्राव्या इति च सूचितं भवति। भगवता बादरायणेन गुरुणा * अथातो ब्रह्मजिज्ञासेत्युपक्रान्तं स्वकीयं मीमांसाशास्त्रम्। तच्छिष्येण जैमिनिना तु * अथातो धर्मजिज्ञासेत्युपाक्रम्यत स्वकीयं मीमांसाशास्त्रम्। "सेश्वरवादी गुरुः, निरीश्वरवादी शिष्यः" इति काचिदपप्रथा जगति पप्रथे। यद्यप्यान्यपर्यवादादिभिस्तत्परिहारः क्रियते शास्त्रविद्भिः, तथाऽपि प्रक्षालनाद्धीतिन्यायेन विरोधप्रसङ्गस्याप्यनवकाशवैधुर्येण भाषणमेव हि वरम्। तादृशे परमपावनभाषणे प्रावण्येन प्रावीण्येन चैककण्ठ्यमाविष्कृतवन्तोऽस्मदीयाचार्यपरम्परालल्लामभूता स्सर्वेऽपि गुरुचरणा इति स्कीर्यते। तादृशमेव खलु भाषणं श्रवणेन्द्रियसाफल्याय श्राव्यम्।

"भाषणं किं त्वया न श्रूयते?" इत्यभिधातव्ये "भाषणस्य ध्वनिः किं त्वया न श्रूयते" इति कथनेन—ध्वन्यर्थप्रधानतयैव भाषन्ते महान्तः; वाचनिकादर्थादपि व्यंग्यार्थ एव साभिनिवेशं ग्राह्य इति ग्राहितं भवति। अत एव ह्यस्मदाचार्याः प्रणवे शब्दार्थतया प्रतिपन्नं भगवच्छेषतारूपमर्थमधरीकृत्य व्यंग्यार्थविशेषभूते भागवतशेषत्वे स्पृहातिशयशालिनो विलसन्ति। अन्वग्राहि हि श्रीपरकालमुनीन्द्रैः—(* मत्तेल्लाम्पेशिलुम् निन् तिरुवैट्टेळुत्तुम् कत्तु नान्—उत्तदुमुन्नडियार्क्कडिमै *) "श्रीमत्कृष्णपुराधिनाथ! भवदीयाष्टाक्षराभ्यासतः त्वद्भक्तप्रवणत्वमेव भगवन्नग्राहि नान्यन्मया" इति। अथ गव्यमन्थे सक्तानां वल्लवीनां करवलयरवेणान्वितं मन्थघोषं किं त्वं न शृणोषीति तावदुच्यतेऽत्र। मथनेन सारभूतं लभ्यत इति साक्षात्कुर्मः। एवं * निर्मथ्य श्रुतिसागरादित्युक्तरीत्या वेदाब्धिमथनेन अतिसुभगसारार्थग्राहिणो महान्त इह विवक्षिताः। मुमुक्षुप्पडिनाम्नि रहस्यत्रयार्थविवृति-

दिव्यग्रन्थे * मून्रुताळियिले तयिरै निरैत्तुकडैन्दु वेण्णेय् तिरट्टिनाप्पोले मून्रुवेदत्तिलुम् मून्रक्षरत्तैयुमेडुत्तदु * इत्युक्तरीत्या वेदत्रयसारत्वेन निर्मथनोद्धृतानां स्वरूपानुरूपसकलार्थप्रतिपादनक्षमाणां त्रयाणामप्यक्षराणाम् (प्रणवस्य) अर्थविशेषा यदि न श्रुतास्तर्हि तच्छ्रवणमत्यावश्यकम्, क्षिप्रमुत्थाय समागम्यतामित्याह्वानमिहावधेयम्। (भूषणालंकृतहस्तानाम्) इति कथनेन चैतत् स्फोर्यते— हस्तयोर्भूषणमञ्जलिरेवेति भक्तिधनानां विदुषां सिद्धान्तः; तथा ह्याहुः * कृष्णांघ्रितुलसी मौलिः पट्टं कृष्णाभिवन्दनम्। कुण्डले कृष्णचरितश्रवणं कङ्कणोऽञ्जलिरिति। तादृशभूषाविशेषस्य घलघलेतिशब्दितत्वं सर्वजनोदितप्रशंसावाक्यपात्रत्वमेव। * नित्याञ्जलिपुटा हृष्टा नमइत्येव वादिनः * इति श्वेतद्वीपवासिनो महापुरुषा यथा प्रशस्यन्ते तथा विनयसंपत्तिसनाथं वेदाब्धिमथनसामर्थ्यपर्यवसायिविद्यावैदुष्यातिशयमधिकृत्य जगति प्रशंसागिरः प्रवर्धन्त इत्युक्तं भवति। तथाविधप्रशंसापात्रभूतपरमाचार्यसकाशात् सारार्थश्रवणं किं न कर्तव्यम्? कर्तव्यमेव ह्यवश्यम्; तदायाहि तूर्णमिति समुद्बोध्यते।

मथननिरतानां सुगन्धिकुन्तलवत्त्वविशेषणं स्थितम्। * तच्छिरो यत्प्रणमति * नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिमित्याद्युक्तरीत्या प्रणतिशालित्वमेव हि शिरसस्सौरभम्। तथाच अवलेपदुर्गन्धविरहिता एवात्र विवक्षिता इति बोध्यम्।

अथान्ततः "भगवतो नारायणस्य केशवस्य कीर्तने प्रवर्तमाने सत्यपि तदाकर्णनपरवशा सती किं ननु निद्रां कलयसि?" इति कथनेन * पुरुषार्थोऽयमेवैको यत्कथाश्रवणं हरेः * ऋषिर्हि दीर्घश्रुत्तमः * इत्याद्युक्तप्रक्रियया श्रीमन्नारायणस्य तत्पर्यायभूतस्याचार्यस्य वा गुणगणश्रवणमेव श्रवणेन्द्रियपरमानन्दकन्दमिति सूचितं भवति। परमानन्दानुभव एव निद्राशब्दाभिलप्य इति पुनरुक्तमेतत्। अथ तेजस्विनि! इति संबोधनम् ब्रह्मवित्त्वप्रयुक्ततेजोविशेषविशिष्टतां व्यनक्ति। * रूपमेवास्यैतन्महिमानं व्याचष्टे * ब्रह्मविद इव ते सोम्य! मुखं भाति * इत्यादिकमिह भाव्यम्। "समुद्घाटय" इत्यनेन—कैवल्यानुभवरुचिं विहाय सर्वैस्सह मिलित्वा क्रियतामनुभव इति कथितं भवति ॥

एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ भारद्वाजाभिधानां कलकलमधिकं पक्षिणाम्, गव्यमन्थे
सक्तानां वल्लवीनां करवलयरवेणान्वितं मन्थघोषम्।
श्रीमन्नारायणस्य प्रचुरगुणगणोत्कीर्तनं चाभिधाय
श्रेष्ठामुद्बोधयन्ती कलयतु कुशलं वल्लवीतुल्यगोदा ॥ ७ ॥

इति सप्तमगाथाविवरणं समाप्तम् ॥

८. अष्टमी गाथा—कीऴ्वानम् वेऴ्ळेन्नु.

कीऴ्वानम् वेऴ्ळेन्नु एरुमै शिरुवीडु * मेयूवान् परन्दनकाण् मिक्कुळ्ळ पिळ्ळैहळुम् *
पोवान् पोहिन्नारै प्पोहामल् कातु * उन्नैक्कूवुवान् वन्दु निन्नोम् * कोदुहलमुडैय
पावायेऴुन्दिराय् पाडिप्परैकोण्डु * मावाय् पिळन्दानै मल्लरै माट्टिय *
देवादिदेवनै च्चेन्नु नाम शेवित्ताल् * आवावेन्नारायुन्दरुळेलोरेम्बावाय् ॥ ८ ॥

प्राच्यां दिशि सूर्यप्रकाशतः शौक्ल्यदर्शनात्प्रभातसमय उदित इत्यवगम्यते, तुहिनशिशिरघासजग्धिनिमित्तं महिष्यो विनिर्गताः; व्रतस्नानार्थं प्रस्थितानां वल्लवीनां गच्छन्तीनां भूयसीनां गमनं प्रतिषिध्य, त्वामाकारयितुमागतास्स्मो वयम्। केशिहन्तारं चाणूरमुष्टिकाख्यमल्लवधविशारदं च देवाधिदेवं यदि वयं गत्वा सेवेमहि तर्हि स भगवान् हाहेति स्वनिर्वेदं प्रकाश्य कुशलप्रश्नादि कुर्यात्, तद्वयं गच्छेम, आयातुमुत्तिष्ठ हे कुतूहलवति गोपिके! (इति मूलगाथाविवर्तः।)

परमपावने धनुर्मासि सूर्यप्रकाशोदयपर्यन्तमपि काचन भक्ता प्रबोधयितव्या सती शय्यामधिशिश्य इति नैतत्संभावनार्हमिति केचिन्मन्येरन्। तमोगुणप्राचुर्यनिबन्धननिद्रापारवश्यं नैवात्राभिधीयत इति प्रतिपादितचरं तैः प्रतिपत्तव्यम्। अन्तश्शयाना गोपिका हि स्वानुभूयमानभगवद्गुणविद्धैव सती तल्पं विहायोत्थातुं न प्रभवतीति पुनरुक्तमेतत्। प्राच्यां सूर्यप्रकाशोदयकथनमिदं किमभिप्रायकमिति अनुपदमेव विशदीकरिष्यते। "तुहिनशिशिरघासजग्धिनिमित्तं महिष्यो विनिर्गता" इति द्वितीयमभिज्ञानमभिधीयते। महिषीणां गवां च घासग्रासार्थं बन्धान्मोक्षणेन निर्गमनं द्विर्भवति। गृहनिष्कुट एव ऐदम्पर्येण संवर्धितानां तृणानामदनार्थं निर्गमनं पुरस्तात्। वनेषु यदृच्छया संवृद्धानां तृणानां खादनार्थं निर्गमनं परस्तात्। महिषीणां प्राथमिको निर्गमोऽत्राभिधीयत इति मूलस्थशब्दसंनिवेशसुगमम्। स खलु प्रत्यूषकालिकः।

भवतीमेकाकिनीं विना अन्यास्सर्वा अपि सुभ्रुवो व्रतानुष्ठाननिलयप्राप्तये प्रयाता इति बहिरवस्थिताभिर्गोपीभिरभिहितं श्रुतवती शयनस्था वनिता 'कथमहो मां विहाय ताः प्रययुः? कुतो मय्येतावती तासामभूदलक्ष्यताधीः?' इति पृष्टवती। अथ प्रत्युक्तं बहिस्स्थिताभिः—यद्यपि तास्सुदूरं गमनाय सरभसं प्रस्थिताः, तथाऽपि भवतीसनाथानामेवास्माकं गमनं समुचितमिति औचित्यं प्रतिपाद्य प्रतिषिद्धं तासां गमनमस्माभिः; अथ ताश्च स्थिता एव विरतगतय इति। सर्वाभिरस्माभिस्संमिलिताभिः किमथ कर्तव्यमिति शयनस्थिताया अनुयोगस्समजनि। तत्र प्रतिवचनम्—[केशिहन्तारमित्यादि]। कंसः स्वजिघांसया वसुदेवसूनुः कृष्णो नन्दनन्दनस्सन् व्रजमधिवसति गुप्त इति विदित्वा कृष्णस्य तस्य हननार्थमासुरवर्गाननेकान् प्रजिघाय खलु व्रजंप्रति। प्रेषितास्ते सर्वेऽपि क्षणमात्रे कृष्णकिशोरेण विनिहता इति प्रसिद्धम्। तेष्वन्यतमः केशिनामा दैत्यः। अयं बृहत्तरं वाजिवपुः परिगृह्य कृष्णजिघांसया व्रजं गतो भगवता तेन व्यापादितोऽभूदिति * केशिहननवृत्तान्तः। अथ धनुर्यागप्रेक्षणार्थच्छलेन अक्रूरद्वारा कंसेन मथुरां प्रति व्रजादानीतौ बलरामरामानुजौ हन्तुमुदयुञ्जातामुभौ मल्लौ चाणूरमुष्टिकनामानौ कंसभवनगोपुरद्वारावस्थितौ। तावपि केशवेन क्षणमात्रे विध्वस्ताविति * मल्लवधकथा विज्ञेया। पाण्डवदूतस्सन् यदा

दुर्योधनसभामगात्कृष्णः, तदा तत्र क्षितितलविवरकुहरे स्थापितानां कृत्रिमासनादधस्स्थितानामायुधपाणीनां मल्लानां वधो बभूवेति साऽपि कथाऽत्रानुसन्धेया।

अथ 'देवदेवसकाशं यदि वयं गत्वा तं सेवेमहि तर्हि स भगवान् हाहाहाहेति स्वनिर्वेदं प्रदर्शयेत्' इति वचनविन्यासो वर्तते। * पद्भ्यामभिगमाच्चैव स्नेहसंदर्शनेन चेत्याद्युक्तप्रकारेण गत्वा यदि तं सेवेमहि अथ स भगवानस्मदीयं क्लेशमनुसंदधानो भृशमसहमानो दूयमानमनाश्च सन् परदुःखदुःखित्वरूपस्वकरुणाभूम्ना हाहाकारं कुर्वन् आः! बालिशा यूयं किमित्येवमकाले किसलयसुकुमारचरणान् क्लेशयन्त्यस्समागताः! हा मदर्थे महान् खलु क्लेशो युष्माभिरनुभावि, हा प्रसीदन्तु भवत्यो मे, ह्रीरेषा हि ममातुला-इत्यादि कथयिष्यति; तथा-विधैरौपचारिकैर्मधुरमधुरैर्द्राक्षाभिक्षेपदक्षैस्तदीयवाग्भरैः प्रकाशं नीयमानं कारुण्यगुणमत्यद्भुतमनुभवेम-इति हृदय-मिहावसेयम्।

"हे कुतूहलशालिनि गोपिके!" इति संबोधिता प्रक्रान्तगाथया प्रतिबोध्यमाना गोपी। कुतूहलवत्त्वं च द्वेधा संभवति—भगवद्विषयकस्वकर्तृककुतूहलवत्त्वमेकम्। स्वविषयकभगवत्कर्तृककुतूहलवत्त्वमपरम्, * प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इति गीतोक्तरीत्या उभय्यपि प्रीतिस्साधीयसी ननु। भक्तजनेषु भगवतः प्रीतिरधिका वा? भगवति भक्तजनानां प्रीतिरधिका वेति विकल्पयितव्यं खलु भवति। तथाच निरुक्तोभयविध-कुतूहलवत्त्वमपि गोपिकायामस्यां सुवचमिति विज्ञेयम्।

अथ ध्वन्यर्थविवरणम्। आचार्यपादसेवार्थमायाहीति प्रतिबोधनमस्या अपि गाथायाः परमार्थः। केशिहन्तारमित्यादीनि सर्वाण्यपि विशेषणानि आचार्यवर्ये सुभगान्वयानीत्युपपाद्यते। तुरगरूपेणाभिभवितुमागतस्यो-द्धतस्य दैत्यस्य हनने पटुः कृष्णः। * इन्द्रियाणि हयानाहुरित्युपनिषदाम्नातरीत्या बाधकाग्रेसराणां विषयवीथीषु सरभसधावनव्यग्राणामिन्द्रियरूपवाजिनां विनेता गुरुवरः। * श्रीमान्पराङ्कुशमुनिर्जीयाद्यज्जल्पमुद्रया। नेन्द्रियाश्व-युजो नृणां नित्यं विषयवीथय इत्युक्तरीत्या इन्द्रियदौष्ट्यनिवर्तननिपुणः खलु जितेन्द्रियाग्रणीराचार्यः। अथ मल्लयोः प्रबलयोर्जेता कृष्णः। मल्लाधिकबलशालिनोर्महाघातुकयोः कामक्रोधयोरभिभावुक आचार्यः। गीतायां चतुर्थाध्याये * द्वंद्वातीतो विमत्सर इति, सप्तमाध्याये * द्वंद्वमोहेन भारतेति, पञ्चदशाध्याये * द्वंद्वैर्विमुक्तास्सु-खदुःखसंज्ञैरिति चोक्तरीत्या द्वंद्वपदाभिलप्ययोः सुखदुःखयोरहङ्कारममकारयोः पुण्यपापयोरपि विध्वंसको गुरुवर इति वेदितव्यम्।

अथ "हाहेति स्वनिर्वेदं प्रकाश्य" इत्यत्र इदमवधेयम्। बन्धमोक्षोभयसाधारणशास्त्रप्रवर्तकभगवद-पेक्षयाऽपि मोक्षैकसाधनशास्त्रोपदेष्टा, शिष्यप्रार्थनामप्यनपेक्ष्य स्वयंप्रयोजनतया सप्रेमभरमुपदिशंश्च गुरुवर एव हि निरुपधिकरुणः। अनुवृत्तिप्रसन्नाचार्यो नात्र विवक्षितः अपितु कृपामात्रप्रसन्नाचार्य एवेति कथितं भवति। (देवाधि-देवम्) देवस्य भगवतोऽपि अधिदेवः खल्वाचार्यः। यदाह भगवान् स्वयमेव— * ज्ञानी त्वात्मैव मे मतमिति। आचार्यानेव हि ज्ञानिपदेन व्यपदिशति गीताचार्यः। तान् स्वस्य आत्मपदे निदधानो भगवान् स्वयं शरीरपदे खलु तिष्ठासति। "यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं तच्छेषतैकस्वरूपं तत्तस्य

शरीरम् " इति खलु शरीरलक्षणमामनन्ति। ज्ञानिनामाचार्याणां नियाम्यः शेषभूतश्च भवन् भगवान् तेषां देवाधिदेवपदं सामोदमेव हि बहुमन्यते। * आचार्यादिह देवतां समधिकामन्यां न मन्यामहे * इतीयमागमान्ताचार्यसूक्तिरप्यत्र ध्येया।

प्राच्यां सूर्योदयोऽभूदिति यत्कथितमिह, तदिदम् * आशंसायां भूतवच्चेति दिशा निर्वाह्यम्। निरुक्तगुणगणाभिराम गुरुवरचरणनलिनोपसेवने कृते ज्ञानसूर्यप्रकाशोऽस्माकमचिरभावीत्युक्तं भवति। * प्राची सन्ध्या काचिदन्तर्निशायाः प्रज्ञादृष्टेरञ्जनश्रीरपूर्वा। वक्त्री वेदान् भातु मे वाजिवक्त्रा वागीशाख्या वासुदेवस्य मूर्तिः * इत्येषा हयग्रीवस्तोत्रसूक्तिरिहानुसन्धेया। श्लोकेऽस्मिन् प्रथमपादः प्राधान्येनावधेयः। आचार्याणां दिव्यमङ्गलमूर्तिरेव हि नः प्राची संन्ध्या। सा शुद्धसत्त्वमयी नित्यावदाता सततसंसेव्येत्यपि सूचितं भवति।

* घासजग्धिनिमित्तं महिष्यो निर्गता इति कथितस्य चायमभिप्रायः ;—तमोगुणमयव्यक्तिविशेषा मुमुक्षुत्वगन्धविरहिता महिषत्वेन महिषीत्वेन चाभिधीयन्ते। * नीलतया स्थूलतया दूरतया दानलोलुपैर्मधुपैः। धावितमिभराजधिया हन्तासीदन्ततो महिषः * इत्युक्तरीत्या उत्तुङ्गपुरुषा अमी इति भ्रमजनकास्सन्तस्ते मुमुक्षुभिर्महात्मभिस्सह संमिलिता आसन्। " कूळाळ्पट्टुनिन्नीर्हेळै एङ्गळ् कुलुविनिल् पुहुदलोट्टोम् " (छाया=बुभुक्षून् वयमस्मदीयगोष्ठ्यां प्रवेशयेम) इति मङ्गलाशासनदिव्यप्रबन्धोक्तरीत्या ते परमकारुणिकैरप्याचार्यवर्यैर्विनेतुमशक्यास्साधुगोष्ठीबहिष्कृतास्सन्तो बुभुक्षापिपासाप्रशमनकृते क्षुद्रविषयघस्मरा निर्गता इति निगद्यते। एतेन, तामसान् जनानुत्सार्य सात्विकाननुग्रहीतुं प्रतीक्षमाण आचार्यः अस्माभिस्त्वरमुपसर्पणीय इत्युक्तं भवति।

अथवा, तमोगुण एवात्र महिषीत्वेनाभिधीयते। स तावत् क्षोदीयस्सु विषयेषु व्यापृतोऽभूत् ; अधुना शुद्धसत्त्वोन्मेषकालस्य समुपस्थितत्वात् अस्माभिः शुद्धसत्वार्जनसमुत्सुकैर्भवितव्यमिति कथितं भवति॥ स्नानार्थं प्रस्थितानां व्रजतां [illegible] पथि निरोधाभिधानस्यायमाशयः ; आचार्यसन्निधाववगाहनार्थं सरभसं ये गताः तान्प्रति " समुचितपुरुषकारपुरस्कारमन्तराऽस्माकं स्वैरं गमनं न कार्यकारि भविष्णु " इति तत्त्वार्थः कथितः ; तदाकर्णनेन ते स्तम्भितगतयोऽभूवन्निति। अनयोक्त्या, प्रबोध्यमानव्यक्तिविशेषस्य समुत्कर्षस्सूचितो भवति। यस्य महतः पुरस्कारमन्तरेण न प्रसीदेदाचार्यस्स एव हि महानत्र संप्रार्थ्यते। तस्य च कुतूहलाढ्यत्वकथनाच्च समुत्कर्षातिशयः सुष्ठु सिध्यति। आचार्यसेवायां कुतूहलाढ्यत्वम् अन्येषामप्याचार्यसकाशप्रापणे कुतूहलाढ्यत्वं च विवक्षितमिह ॥ ८ ॥ ....

अथैतद्गाथार्थसंग्राहकः श्लोक एषः—

श्लो ॥ प्राच्यां सूर्यप्रकाशोदयमथ महिषीनिर्गमं घासजग्ध्यै
स्नानार्थं प्रस्थितानां पथि बहुसुदतीनां निरोधं च वक्त्री।
केशिघ्नं मल्लजैत्रं निरुपधिकरुणं सेवितुं देवदेवं
द्रागायाहीति कौतूहलभरभरितां बोधयन्ती गतिः श्रीः ॥ ८ ॥

इत्यष्टमगाथाविवरणं समाप्तम् ॥

९. नवमी गाथा— तूमणिमाडत्तु ।

तूमणि माडत्तु शुत्तुम् विळक्केरिय * तूपम् कमळ तुयिलणैमेल् कणूवळरुम् *
मामान्महळे मणिक्कदवम् ताळ्तिरवाय् * मामीरवळै येळुप्पीरो * उन्महळ्तान्
ऊमैयो अन्निचेविडो अनन्दलो * एमप्पेरुन्तुयिल् मन्दिरप्पट्टाळो *
मामायन्मादवन् वैकुन्दनेन्नेन्नु * नामम् पलवुम् नविन्नेलोरेम्पावाय् ॥ ९ ॥

अत्यन्तदीप्तियुक्तमणिगणप्रचुरे रम्ये हर्म्ये समन्ततश्च दीपज्वालाभिरामे दिव्यागरुसौगन्ध्यसंभृते दिव्यशयनीये शयाने हे मातुलपुत्रि ! दिव्यकवाटिकामुद्घाटयेथाः । (इत्युक्त्वा प्रतिवचनालाभेन अथ तस्या मातरमुद्दिश्याह) भगवति मातुलानि ! तां ते दुहितरं प्रतिबोधयेथाः; किं नु ते तनया वाग्व्यवहारयोग्यताविकला? किमाहो बाधिर्यभरिता? उताहो तन्द्रासमृद्धा? किं हेममयदिव्यशय्यायां मन्त्रबद्धाऽभूत्? महामायो माधवो वैकुण्ठइत्यादीनि भगवद्दिव्यनामानि बहूनि संकीर्त्य समुद्बोधयैनाम्। (इति मूलगाथाविवर्तः।)

हे मातुलपुत्रि ! इति संबोधनेन गोदादेव्या व्रजस्थिताभिर्वल्लवीभिस्सह देहबन्धुता काचन कांक्षिता भवतिस्मेत्याचार्यचरणा उपवर्णयन्ति। ननु कथमिदं संगच्छते? गोपीभावनयैव हि गोदा प्रबन्धं निरमिमीत। तदात्वे गोपीभिर्यदुक्तम्, तदनुवादमात्रमेव हि गोदादेव्या क्रियते। हे मातुलपुत्रीति यदत्र दृश्यते संबोधनम्; तत् तदात्वे गोपीभिरेव खलु कृतम्। वस्तुतस्तासां बन्धुभावो ह्यव्याहतः। स्थितस्य हि कथनं स्थितम्, गोदादेवी व्रजे वल्लवीभिस्सह बान्धवं कांक्षतीति कथनं कथमिदमुपपद्यते? इति शङ्का समुत्तिष्ठतीह। परिहारस्त्वेवम्। गोपीभावनयैव केवलं नानुभवति गोदादेवी। तथा सति हि कृष्णचरितं व्रजे यद्यावत्समपद्यत तत्तावदेवात्र कथितं भवेत्। व्रजाद्विनिर्गमानन्तरं मथुरायां यद्यदभूत् कुवलयापीडभञ्जन-मल्लघात-कंसवधादिकं, तत्तदपि खलु कथयित्वा कृष्णानुभवः क्रियतेऽत्र प्रबन्धे। गोपिकानां गिरा न खल्वेतत्संकीर्तनं संभवि। ततश्च गोदाया गोपिकाभूमिकाधारणेन सह स्वात्मना चानुभवोऽपि बलवान् वर्तत इति नूनमवर्जनीयाभ्युपगमम्। एवञ्च, हे मातुलपुत्रीत्यनया कृतं संबोधनं व्रजे स्वस्य बन्धुभावकांक्षयेति कथनमनवद्यम्।

अथान्या च शङ्का समुन्मिषति काचन। 'देहबन्धव उपेक्षणीयाः; आत्मबन्धव एवापेक्षणीया इति हि तत्त्वार्थविदामध्यवसाय उपदेशश्च। मातुलपुत्रीति देहबान्धवप्रतिपादकगिरा संबोधनमिह कथमिव घटतामिति। अत्रोच्यते। देहबन्धवस्सर्वथा समुपेक्षणीया इति न शास्त्रतत्त्वविदां सिद्धान्तः। * भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति * इत्युपनिषद्गिरा भृगुः पितृसकाश एव ब्रह्मोपदेशमलभतेति सुस्पष्टमवगम्यते। * पितामहं नाथमुनिं विलोक्येति भगवद्यमुनाचार्यफणितिः। भगवान् रामानुजो यतिराजः स्वकीयभ्रातृभागिनेयादिषु त्याज्यताधियं नोद्वहतिस्मेति, यतिर्भूत्वाऽपि तैस्सहैव कालं चिक्षेपेति च तच्चरित्रामृतसेवया संविद्महे। श्रीपराशरभट्टार्यः श्रीवत्साङ्कसुत इत्युपश्लोक्यते। भगवान् लोकाचार्यः कृष्णपादसूनुरित्युपश्लोक्यते। निगमान्तदेशिकसूनुर्वरदाचार्यवर्यः * पित्रे ब्रह्मोपदेष्ट्रे मे गुरवे....मङ्गलम् * इति पितृत्वरूपदेहबन्धुतामपि

निबबन्ध। एवमेवं सुबहूदाहर्तव्यं हि वर्तते। भगवद्भागवतपरिचर्याविरोधिनो देहबन्धव एव त्याज्याः, त एव बान्धवाभासशब्दवाच्याः। ये नाम भगवद्भागवतसेवायां सर्वथाऽप्यानुकूल्यमावहन्ति; तेष्वात्मबन्धुषु देहबन्धुत्वमपि यदि घटते तत्सत्यं सौवर्णकमलस्य सौरभोन्मेषः। अस्तु। अथ गाथाव्याख्यानेऽवतरामः।

"अत्यन्तदीप्तियुक्तमणिगणप्रचुरे रम्ये हर्म्ये........शयाने" इति संबोधनं साकूतम्। कृष्णविरहे एतादृशं विशालविमलश्लक्ष्णतुङ्गतूलासनोज्ज्वलं समग्रसौरभोद्गारनिरन्तरदिगन्तरं सोपधानं सुकुमारं वरासनं कथमधिशेते भवतीत्युपालम्भगर्भमुच्यत इव। भोग्यभोगोपकरणभोगस्थानेषु सर्वेष्वपि जुगुप्सामुत्पादयति सुदुस्सहेऽस्मिन्नपि विरहसमये हैहन्त कथमेवं सुखशायिकामधिशेते भवतीत्यधिक्षेपस्सौहार्दनिबन्धनः। परमभागवतानां दिव्यभव्यभवनस्य रामणीयकानुभवो भक्तानामत्यन्तमुद्देश्य इति बोधनं परमार्थः।

एवमुद्बोधने कृतेऽपि सा गोपी नैव कवाटिकामुदघाटयत्; नापि किमपि प्रत्युत्तरवचोऽपि प्रत्यपादयत्; अथ तस्या जननीं संबोध्य "किमेषा तव सुता वाचिकव्यवहारयोग्यताविकला? उत श्रवणेन्द्रियदरिद्रा? आहोस्वित्तन्द्रालुः? अथवा "शयनीयादियं नैवोत्थातुमर्हतीति" केनचिन्मन्त्रणेन कीलिता? इत्येवं कथनस्य हार्दो भावः अनुपदमेवोपपादयिष्यते।

महामायो माधवो वैकुण्ठपतिरिति नामत्रयानुसन्धानपूर्वकमत्र भगवतः केचन शुभगुणा अनुभूयन्ते। (महामायः) * अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया * (गीता) इत्यादिस्थलेषूदाहृतम् * माया वयुनं ज्ञानम् * इत्येतन्निघण्टुवचनम्। संकल्परूपं ज्ञानमेव मायाशब्दाभिलप्यं वेदान्तिनाम्। * सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽतप्यत। स तपस्तप्त्वा। इदं सर्वमसृजत। यदिदं किंच * इति तैत्तिरीयोपनिषदाम्नातरीत्या संकल्पमात्रेण सुमहत्तरजगत्सृष्ट्यादिरूपसर्वकार्यबृन्दनिर्वाहकस्सत्यसंकल्पो यः स एवाधुनाऽत्र कृष्णकिशोरमूर्त्या समवतीर्णः; स एवास्माकमधुना सेव्य इति हृदयम्। अथवा, * दैवी ह्येषा गुणमयी मम माया दुरत्यया * इति गीतोक्तरीत्या दैवीं गुणमयीं मायां यो निबबन्ध, स एव महामायः। तादृशमायाबन्धस्य तच्चरणारविन्दप्रपदनेनैव छेदनीयता तत्रैव गीतायां * मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते * इत्यनेनोच्यते। अतोऽस्माभिस्तत्पादाम्बुजद्वयप्रपदनाय प्रस्थातव्यमिति सूचितं भवति। यद्वा महामायत्वं नाम अत्याश्चर्यचेष्टितवत्त्वम्। * घुंघुमिति किं भ्रमति अम्ब! दधिमध्ये डिम्भ! ननु भूतमिह दूरमपयाहि। अम्ब! नवनीतमिति संगदति कृष्णे मन्दहसितं जयति मातुरतिरम्यम् * अन्तर्गृहे कृष्णमवेक्ष्य चोरं बध्वा कवाटं जननी गतैका। उलूखले दामनि बद्धमेनं तत्रापि दृष्ट्वा स्तिमिता बभूव * इत्याद्यनेकपद्योपबृंहितमायाचेष्टितकर्तृत्वमिहानुसन्धेयम्।

(माधवः) लक्ष्मीपतिरिति यावत्। यस्मिन्पुंसि लक्ष्मीसंबन्धो नास्ति स नैव दैवतमिति परमैकांतिनां मतम्। यदाहुर्भट्टपादाः श्रीगुणरत्नकोशे * वेदान्तास्तत्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्ति * इति। श्रीभक्ति-

सारयोगीन्द्रा अपि द्राविडगाथयाऽनुजगृहुः—* तिरुविल्लाचेवरै तेरेन्मिन् तेवु * (छाया—लक्ष्मीयोगदरिद्र-दैवमयि भो दैवं न मान्यं हृदा) इति। स एव श्रियःपतिर्देवदेवो भगवान् नन्दनन्दनात्मनाऽवतीर्णो विहरति; सएवास्माकं सेव्य इति सूचितं भवति।

(वैकुण्ठः) * वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः। आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैस्सह * इत्याद्युक्तरीत्या वैकुण्ठाख्यधामवासी यः, भक्तेभ्यस्तादृशं वैकुण्ठधाम प्रददाति च यः, स एव वसुदेवसुतस्सन्नवततार, स एव परात्परो भगवानिहास्माकमुपसेव्य इति सूचितं भवति। इत्येवमेवं बहूनि भगवन्नामानि वयं कीर्तयामः; हे मातुलानि! भवती च नामानीमानि संकीर्त्य स्वकीयां तनयामुद्बोधयतु—इत्युक्तं भवति ॥

अथ ध्वन्यर्थविवरणम् ॥ अस्यां गाथायां ध्वनिमर्यादया बहवो ह्यर्थविशेषाः प्रतीयन्ते। निष्कलङ्करत्नखचिते प्रासादे परमभागवतव्यक्तिविशेषस्य शयनं यदस्यां गाथायां निबद्धम्, तत्रेदं तात्पर्यम्। यत् स्थानमधिरुह्य पश्यन्तः सर्वमपि वस्तुजातं सुखेन पश्यन्ति, तदेव स्थानं लोके प्रासादशब्देनाभिलप्यते। प्रज्ञैव प्रासादो वेदांतिनाम्। * प्रज्ञाप्रासादमारुह्य.......प्राज्ञः प्रपश्यति * इति महर्षयोऽप्याहुः। तादृशस्य प्रज्ञाप्रासादस्य निरवद्यरत्नखचितत्वं प्रोच्यतेऽत्र। रत्नानि तु नवेति प्रसिद्धम्। धनिकानां महतामुत्तुङ्गं रम्यं हर्म्यं यथा नवरत्नखचितं शोभते, तथा वेदान्तिनां प्रज्ञा नवरत्नापरपर्यायभूत—नवविधसंबन्धज्ञानजनित परमशोभाविभासुरा। * पिताच रक्षकः शेषी भर्ता ज्ञेयो रमापतिः। स्वाम्याधारो ममात्मा च भोक्ता चाद्यमनूदितः * इति पद्यरत्नतोऽवसेयास्ते नवविधास्संबन्धाः; १. पितृपुत्रभावः, २. रक्ष्यरक्षकभावः, ३. शेषशेषिभावः, ४. भर्तृभार्याभावः, ५. ज्ञातृज्ञेय भावः, ६. स्वस्वामि भावः, ७. आधाराधेय भावः, ८. शरीरात्म भावः, ९. भोक्तृभोग्य भावः—इत्येवंविधा नव हि संबन्धा जीवात्म परमात्मनोः श्रीमदष्टाक्षरमहामन्त्रवेद्याः। एतादृशसंबन्धज्ञानमेव हि प्रज्ञायाः परमं प्रयोजनम्। * यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः। तेन चेदविवादस्ते मा गंगां मा कुरून् गमः * इति ह्याहुर्महर्षयः। * त्वं मेऽहम्मे * इति भट्टपाददिव्यसूक्तिप्रोक्तरीत्या भगवता सह ये विवदं कुर्वन्ति, ते खलु संबन्धज्ञानदरिद्राः। सम्बन्धज्ञानसमुन्मेषे सतिहि स विवादो विलीयते। एवंच तथा नाम विहाय विवादं 'भगवता सह न केवलमेक एव संबन्धोऽस्माकमस्ति, अपि तु नव सम्बन्धाः परमविलक्षणास्सन्ति" इति विज्ञानेन ये हर्षप्रकर्षमनुभवन्ति, तादृशा अधिकारिणोऽत्र विवक्षिताः ॥

(समन्ततश्च दीपज्वालाभिरामे) इति विशेषणेन नानाशास्त्रविज्ञानवैचक्षण्यमभिधीयते। * हर्तुं तमः सदसती च विवेक्तुमीशो मानं प्रदीपमिव कारुणिको ददाति * इति भट्टपादश्रीसूक्त्या प्रमाणरूपाणां शास्त्राणां प्रदीपत्वमवसीयते। बाह्यान्धकारमात्रक्षपणक्षमाः प्रदीपाः; आभ्यन्तरान्धकार (अज्ञानतमः) क्षपणक्षमाणि शास्त्राणि। तैस्संजातमौज्ज्वल्यमिह विवक्षितम्।

(दिव्यागरुसौगन्ध्यसंभृते) ज्ञानस्य सौगन्ध्यमनुष्ठानतः। ज्ञानहीना अनुष्ठातारः, अनुष्ठानहीनाः ज्ञातारश्च न शोभन्ते। * उभाभ्यामेव पक्षाभ्यामाकाशे पक्षिणां गतिः। तथैव ज्ञानकर्मभ्यां प्राप्यते पुरुषोत्तमः *

इति ह्यामनन्ति महर्षयः। अन्धोऽपि संचरितुं न प्रभवति, तथा पंगुरपि न। अन्धो जनो नेत्रपाटवशालिजनसाहाय्यमवलम्ब्यैव चरितुं शक्नोति। पङ्गुर्जनश्चरणपाटवशालिजनसाहाय्यमवलम्ब्यैव। अन्धो ज्ञानहीन इव। पङ्गुरनुष्ठानविकल इव। अनुष्ठानेनैव ज्ञानस्य सौरभं संपाद्यमिति महागुरव उपदिशन्ति। तदेवात्र * दिव्यागरुसौगन्ध्यसंभृतत्वविशेषणेन स्फोर्यत इति प्रतिपत्तव्यम्।

(दिव्यशयनीये शयाने!) इति संबोधनस्य चायमाशयः—लोके जना ईतस्ततो बहिस्संचरन्तो नानाविधेषु कार्येषु प्रवृत्ताश्च सन्तः परिश्रमभूम्ना दुःखिता भवन्ति। यदा तु ते दिव्यशयनीयमधिशेरते तदा आयासरूपसर्वकार्यनिवृत्ताः श्रमापनोदनसुखानुभवशालिनः प्रहृष्यन्ति—ईतीदं सुष्ठु पश्यामः। एवमेव प्रवृत्तिमार्गविरता निवृत्तिमार्गनिष्णाता अत एव विलक्षणब्रह्मानन्दभागिनश्चाधिकारिविशेषा इह विवक्षिता इति। * उरोविन्यस्तहस्तास्ते निद्रायन्ते निरन्तरम्। गुरुपादाम्बुजन्यस्तस्वात्मरक्षाभरा हि ये॥ * इत्येतत्प्रमाणरत्नमिहानुसन्धेयम्।

(दिव्यकवाटिकामुद्घाटयेथाः) लोके भगवदनुभवनिष्ठा द्विविधा भवन्ति। * विविक्तदेशे च सुखासनस्थ इत्युक्तरीत्या निर्जने स्थले रहसि स्थित्वा कवाटिकां च घट्टयित्वा स्वात्महृदयैकवेद्यमनुभवन्ति भगवन्तं केचित्। इतरे तु * कैङ्कर्यनित्यनिरतैर्भवदेकभोगैर्नित्यैरनुक्षणनवीनरसार्द्रभावैः। नित्याभिवाञ्छितपरस्परनीचभावैः मद्दैवतैः परिजनैस्तव संगसीय॥ * (श्रीवैकुण्ठस्तवे) इत्युक्तरीत्या रहस्यानुभवे तृप्तिलेशविधुरास्सन्तः अनुभवरसिकैः परमभागवतैस्सह संमिलिता एव सन्तो मुक्तकण्ठमनुभवन्तः संप्रहृष्यन्ति। एवंविधो द्वितीयोऽनुभवप्रकारः प्रार्थ्यतेऽत्र कवाटिकोद्घाटनप्रार्थनापदेशेन। सर्वे वयं संमिलिता अनुभवेमेत्युक्तं भवति॥ .... ९.

एतद्गाथार्थसंग्राहकः श्लोक एषः—

श्लो॥ काङ्क्षन्ती बन्धुभावं व्रजयुवतिगणे, दिव्यतल्पे शयानां
काञ्चित्संबोध्य तस्याः प्रतिवचनमनासाद्य, तन्मातरं च।
सोपालम्भं प्रबोध्य श्रितजनसुलभे माधवे दिव्यपुंसि
स्वीयं गाढानुरागं स्फुटममिदधती पातु मां दिव्यगोदा॥ ९॥

इति नवमगाथाविवरणं समाप्तम्॥

---

१०. दशमी गाथा—नोत्तुच्चुवर्कम्॥

नोत्तुच्चुवर्कम् पुहुहिन्र वम्मनाय् * मात्तमुम् तारारो वाशल् तिरवादार् *
नात्तत्तुळाय् मुडि नारायणन् * नम्माल् पोत्त प्परैतरुम् पुण्णियनाल् * पण्डोरुनाळ्
कूत्तत्तिन् वायूवीळ्न्द कुम्बकरणनुम् * तोत्तुमुनक्के पेरुन्तुयिल् तान् तन्दानो *
आत्तवनन्दलुडैयायरुङ्कलमे * तेत्तमाय् वन्दु तिरवेलोरेम्बावाय्॥ १०॥

व्रतानुष्ठानं परिसमाप्य परमानन्दानुभवं कुर्वाणे ! कृतकृत्ये भो सखि ! माभून्नाम कवाटोद्घाटनम्, किमहो वाच उद्घाटनमपि दुष्करम् ? सुरभितुलसीस्रगलंकृतमकुटेन, अस्मादृशामपि जनानां स्तुत्या प्रसन्नतामवाप्य काङ्क्षितं प्रयच्छता. परमपुण्यात्मना च भगवता नारायणेन पुरा कदाचिन्मृत्युमुखं प्रापितः कुम्भकर्णोऽपि पराजितो भूत्वा स्वकीयामपि महानिद्रां किं तुभ्यमेव प्रायच्छत् ? अत्यन्तं तन्द्रापरवशे ! उत्तमाभरणभूते भो गोपिके ! सुप्रसन्नतया समागत्य कवाटमुद्घाटय ॥ [इति मूलगाथाविवर्तः ।]

गाथायामस्यां समुद्बोध्यमाना गोपी समापितव्रतानुष्ठाना कृतकृत्या कथ्यते। अत्र च आपातत एकोऽभिप्रायः ; हार्दोऽभिप्रायश्चान्यः। सखि ! एवं नाम निद्रापरवशया त्वया हन्त व्रतानुष्ठानं सम्यगेव समापितं भवेत् ; कृतकृत्यता च सम्यगेव प्राप्ता स्यात् इति परिहसनमापाततो लभ्यते। व्रतानुष्ठानोपक्रम एव कृतकृत्यो जन इव निद्रासि त्वम् ; नैतदुचितम् इत्युक्तं भवति। हार्दाभिप्रायस्तावदेवम् ;— [गाथायामस्यां ध्वन्यर्थप्रणाल्या लम्भयितव्यः शास्त्रार्थ एव सुबहु प्रवेशितः ; अतश्च तादृगर्थप्रत्यायनमिह प्राधान्येन कुर्मः ।]

* विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये तेषां राजन् सर्वयज्ञास्समाप्ताः * इति, * प्रायो ह्यकृतकृत्यत्वान्मृत्योरुद्विजते जनः। कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्॥ *इति चोक्तरीत्या शास्त्रेषु कृतकृत्या इति कृतिन इति च ये प्रशस्यन्ते प्रकृष्टाधिकारिणः ते खलु समापितव्रता इति व्यपदिश्यन्ते। तादृशानामेवोत्तमाधिकारिणां व्रतसमाप्तिरिह कथितेति वेदितव्यम्। साध्योपायेषु निष्ठां विहाय सिद्धोपायपरिग्रहभूम्ना आनन्दनिर्भराः कतिचन सन्ति खलु विशिष्टाधिकारिणः, तेषां प्रशंसने तात्पर्यमिह। द्राविडगाथास्थ संबोधने ' स्वर्गानुभवकारिणि हे बालिके ! ' इत्युच्यते। * यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना *(श्रीरामायणे) इति वैदेहीवचनप्रक्रियया अविच्छिन्नभगवदनुभवरूप आनन्द एवात्र स्वर्गशब्दाभिलप्यो वेदितव्यः।

अथ कथ्यते—त्वं कवाटोद्घाटनं न करोषिचेन्माकुरु तावत् ; तल्पादेव प्रत्युत्तरप्रदानमपि तव कथं दुष्करं जातमिति। एतेन, कवाटोद्घाटनमप्यकृत्वा प्रत्युत्तरमप्यनुक्त्वा जोषमास्ते सेयं गोपिकेति लभ्यते। * प्रहर्षेणावरुद्धा सा व्याजहार न किञ्चनेति सीता स्थिता खलु। तथैव इयमपि गोपी सिद्धसाधनपरिग्रहप्रयुक्तहर्षप्रकर्षेण जोषमास्ते इत्युक्तं भवति। भगवद्गुणानुभवकर्तृष्वधिकारिषु द्वैविध्यं वर्तते, केचिदानन्दमन्तर्निगूहितुमशक्तास्सन्तो मधुवनभञ्जकवानरवर्गनीत्या वीथीषु ससंभ्रमनृत्तकोलाहलादिकरणप्रवणा भवन्ति। केचित्तु * स्तब्धोऽस्युत तमादेशमप्राक्ष्यइत्युपनिषदाम्नातरीत्या अङ्गपरिस्पन्दमपि कर्तुमशक्ततया स्तिमिता भवन्ति। इह च बहिः स्थित्वा समुद्बोधयन्त्यो गोप्यः प्रथमश्रेणिनिविष्टाः ; अन्तश्शयाना समुद्बोध्यमाना गोपी द्वितीयश्रेणिनिविष्टा— इति सम्यगवगम्यते।

अथ च अन्तःशयानाया गोप्या उपालम्भोऽपि क्रियते निद्रायां सुप्रसिद्धं कुम्भकर्णं ह्यपि खलु जित्वा भवती स्वपितीति। निद्रादैर्घ्यविषये कुम्भकर्णस्य महती खलु प्रथा वर्तते। तस्य च अस्याश्च पणबन्धो जातः ; किमिति ? आवाभ्यामुभाभ्यामपि गाढनिद्रा कर्तव्या ; आवयोर्मध्ये या व्यक्तिः पुरस्तादुद्बुध्यते सा पराजितैव

भवति ; ततःपरं तया व्यक्त्या नैव निद्रा कर्तव्या ; सा स्वकीयामपि निद्रां विजयशालिन्यै व्यक्तये वितरेदिति। एवंनाम पणबन्धमारचय्य कुम्भकर्णश्च इयं गोपिका च शयाते स्म। कुम्भकर्णस्तु पुरस्तादेव निद्रां विहाय प्रबुध्यते स्म। ततश्च स पराजितोऽभूत्। प्रक्लृप्तपणबन्धरीत्या तदनु स स्वकीयामपि निद्रामस्यै गोपिकायै समर्पितवानिवेति विलक्षणवाग्विन्यासः क्रियतेऽत्र। तथा च मूलगाथास्थशब्दसन्दर्भ एवम्—सौरभसंभृततुलसीमालिकाञ्चितमौलिना, आस्मादृशां मितमतीनामपि जनानां स्तुतिवचनैः प्रसीदता परमपुण्यभूतेन च नारायणेन दाशरथिना पुराकदाचिन्मृत्युलोकं प्रापितस्य कुम्भकर्णोऽपि पराजितस्सन् किमहो तुभ्यमेव स्वकीयमहनिद्रामपि दिशतिस्म—इति। एवं निद्रायामतिशयकथनेन कीदृशो वेदान्तार्थः प्रकाश्यत इति चेत्; अवधीयताम्। * या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥ * इति गीताद्वितीयाध्यायोक्तरीत्या लौकिकजनानां निरन्तरभोग्यभूतेषु विषयान्तरेषु नित्यं निमीलितलोचन एव वर्ततेऽयमुत्तमाधिकारीत्युक्तं भवति।

द्राविडभाषामय्यां मूलगाथायां कुम्भकर्ण इति शब्दसंनिवेशो नास्ति ; अपितु तद्भाषानुगुण्येन कुम्भकरण इत्येव वर्तते। स च शब्दः कुम्भकर्णमिव कुम्भसंभवं योगिवर्यमप्यभिधातुं प्रभवति। कुम्भः करणं यस्येति व्युत्पत्त्या कुम्भयोनिरगस्त्यो मुनिवरो ध्वन्यर्थप्रणाल्यां विवक्षितः। सहि मुनिवरो द्राविडभाषाप्रवर्तकः। द्राविडभाषाया आगस्त्यत्वप्रथा च सर्वविदिता। स मुनिः पराजित इति कथनेन ततोऽप्यतिशयः अस्मिन्नधिकारिणि प्रोक्तो भवति। कस्मिन्नंशे पराजय इति चेत् महत्तरनिद्रांशे पराजय इति मूले स्पष्टमुक्तम्। कुम्भकर्णस्य निद्रालुताप्रसिद्धिरस्ति नाम। कुम्भसंभवमुनेस्तदभावात् तस्य मुनेरत्र प्रत्यभिज्ञापनं विफलमेव खल्विति काचिदाशङ्का जायेत। अत्रोच्यते। परमभागवतानां निद्रा नाम तमोगुणकार्यभूतलौकिकनिद्रा न भवति। लोके निद्रापरवशा जना बाह्यविषयव्यासङ्गवैमुख्यतोऽपरिमितमानन्दमनुभवन्तीति सर्वविदितमिदम्। सुखमहमस्वाप्समिति हि सुप्तोत्थितस्य जनस्य प्रत्यवमर्शः ; तथाच विलक्षणानन्दानुभव एव निद्राशब्दलम्भितोऽर्थः। अगस्त्यमुनेर्यः खलु विलक्षणानन्दानुभवः तद्विषये स पराजितोऽभूदिति कथनमिह चारुतरमेव। पादुकासहस्रे * विन्ध्यस्तम्भादविहतगतेर्विष्वगाचान्तसिन्धोः कुम्भीसूनोरसुरकबलग्रासिनः * इत्यनेन श्लोकखण्डेन अगस्त्यमुनेः प्रभावत्रितयं प्रोच्यते—विन्ध्याचलस्तम्भयितृत्वम्, अपांनिधेराचमनेन अन्तःप्रवेशयितृत्वम्, इल्वलवातापिनामकासुरकबलीकर्तृत्वमिति ; एवमन्ये च बहवः प्रभावास्सन्ति मुनिवरस्यास्य ; इतोऽप्यतिशयितप्रभावशालिता व्यक्तिविशेषेऽस्मिन्ननुसंहिता भवतीति वेदितव्यम्। "मृत्युमुखं प्रापितः" इति विशेषणं कुम्भकर्णे खलु संगच्छेत ; अगस्त्यमुनौ कथमहो समन्वियादिति चेत् ; दक्षिणा दिशा हि यमस्य दिशा ; तां प्राप्तोऽयं मुनिरिति ग्राह्यम्। * दक्षिणा दिक्कृता येन शरण्या पुण्यकर्मणा * इति श्रीरामायणश्लोकोऽप्यत्रानुसन्धेयः।

अथ—अत्यन्तं तन्द्राविवशे! उत्तमाभरणभूते! इति संबोधनद्वयं वर्तते। सुदर्शनशतके * हन्तु तन्द्रालुतां वः * इति हेयतया कथ्यमानं तन्द्रालुत्वं कथमिह श्रेष्ठाधिकारिणि कथ्यते? इतिचेत् श्रूयताम्। लोके तन्द्रालुर्जनः कर्तव्यानि कृत्यानि विसृजतीति पश्यामः। कर्तव्यकृत्यत्यागनिबन्धन एव हि तन्द्रालुव्यपदेशः।

व्रतानुष्ठानं परिसमाप्य परमानन्दानुभवं कुर्वाणे! कृतकृत्ये भो सखि! माभून्नाम कवाटोद्घाटनम्, किमहो वाच उद्घाटनमपि दुष्करम्? सुरभितुलसीस्रगलंकृतमकुटेन, अस्मादृशामपि जनानां स्तुत्या प्रसन्नतामवाप्य काङ्क्षितं प्रयच्छता परमपुण्यात्मना च भगवता नारायणेन पुरा कदाचिन्मृत्युमुखं प्रापितः कुम्भकर्णोऽपि पराजितो भूत्वा स्वकीयामपि महानिद्रां किं तुभ्यमेव प्रायच्छत्? अत्यन्तं तन्द्रापरवशे! उत्तमाभरणभूते भो गोपिके! सुप्रसन्नतया समागत्य कवाटमुद्घाटय ॥ [इति मूलगाथाविवर्तः।]

गाथायामस्यां समुद्बोध्यमाना गोपी समापितव्रतानुष्ठाना कृतकृत्या कथ्यते। अत्र च आपातत एकोऽभिप्रायः; हार्दोऽभिप्रायश्चान्यः। सखि! एवं नाम निद्रापरवशया त्वया हन्त व्रतानुष्ठानं सम्यगेव समापितं भवेत्; कृतकृत्यता च सम्यगेव प्राप्ता स्यात् इति परिहसनमापाततो लभ्यते। व्रतानुष्ठानोपक्रम एव कृतकृत्यो जन इव निद्रासि त्वम्; नैतदुचितम् इत्युक्तं भवति। हार्दाभिप्रायस्तावदेवम्;— [गाथायामस्यां ध्वन्यर्थप्रणाल्या लम्भयितव्यः शास्त्रार्थ एव सुबहु प्रवेशितः; अतश्च तादृगर्थप्रत्यायनमिह प्राधान्येन कुर्मः।]

* विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये तेषां राजन् सर्वयज्ञास्समाप्ताः * इति, * प्रायो ह्यकृतकृत्यत्वान्मृत्योरुद्विजते जनः। कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्॥ *इति चोक्तरीत्या शास्त्रेषु कृतकृत्या इति कृतिन इति च ये प्रशस्यन्ते प्रकृष्टाधिकारिणः ते खलु समापितव्रता इति व्यपदिश्यन्ते। तादृशानामेवोत्तमाधिकारिणां व्रतसमाप्तिरिह कथितेति वेदितव्यम्। साध्योपायेषु निष्ठां विहाय सिद्धोपायपरिग्रहभूम्ना आनन्दनिर्भराः कतिचन सन्ति खलु विशिष्टाधिकारिणः, तेषां प्रशंसने तात्पर्यमिह। द्राविडगाथास्थ संबोधने 'स्वर्गानुभवकारिणि हे बालिके!' इत्युच्यते। * यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना *(श्रीरामायणे) इति वैदेहीवचनप्रक्रियया अविच्छिन्नभगवदनुभवरूप आनन्द एवात्र स्वर्गशब्दाभिलप्यो वेदितव्यः।

अथ कथ्यते—त्वं कवाटोद्घाटनं न करोषिचेन्माकुरु तावत्; तल्पादेव प्रत्युत्तरप्रदानमपि तव कथं दुष्करं जातमिति। एतेन, कवाटोद्घाटनमप्यकृत्वा प्रत्युत्तरमप्यनुक्त्वा जोषमास्ते सेयं गोपिकेति लभ्यते। * प्रहर्षेणावरुद्धा सा व्याजहार न किञ्चनेति सीता स्थिता खलु। तथैव इयमपि गोपी सिद्धसाधनपरिग्रहप्रयुक्तहर्षप्रकर्षेण जोषमास्ते इत्युक्तं भवति। भगवद्गुणानुभवकर्तृष्वधिकारिषु द्वैविध्यं वर्तते, केचिदानन्दमन्तर्निगूहितुमशक्तास्सन्तो मधुवनभञ्जकवानरवर्गनीत्या वीथीषु ससंभ्रमनृत्तकोलाहलादिकरणप्रवणा भवन्ति। केचित्तु * स्तब्धोऽस्युत तमादेशमप्राक्ष्य इत्युपनिषदाम्नातरीत्या अङ्गपरिस्पन्दमपि कर्तुमशक्ततया स्तिमिता भवन्ति। इह च बहिः स्थित्वा समुद्बोधयन्त्यो गोप्यः प्रथमश्रेणिनिविष्टाः; अन्तश्शयाना समुद्बोध्यमाना गोपी द्वितीयश्रेणिनिविष्टा—इति सम्यगवगम्यते।

अथ च अन्तःशयानाया गोप्या उपालम्भोऽपि क्रियते निद्रायां सुप्रसिद्धं कुम्भकर्णं ह्यपि खलु जित्वा भवती स्वपितीति। निद्रादैर्घ्यविषये कुम्भकर्णस्य महती खलु प्रथा वर्तते। तस्य च अस्याश्च पणबन्धो जातः; किमिति? आवाभ्यामुभाभ्यामपि गाढनिद्रा कर्तव्या; आवयोर्मध्ये या व्यक्तिः पुरस्तादुद्बुध्यते सा पराजितैव

भवति ; ततःपरं तया व्यक्त्या नैव निद्रा कर्तव्या ; सा स्वकीयामपि निद्रां विजयशालिन्यै व्यक्तये वितरेदिति। एवंनाम पणबन्धमारचय्य कुम्भकर्णश्च इयं गोपिका च शयाते स्म। कुम्भकर्णस्तु पुरस्तादेव निद्रां विहाय प्रबुध्यते स्म। ततश्च स पराजितोऽभूत्। प्रकृतपणबन्धरीत्या तदनु स स्वकीयामपि निद्रामस्यै गोपिकायै समर्पितवानिवेति विलक्षणवाग्विन्यासः क्रियतेऽत्र। तथा च मूलगाथास्थशब्दसन्दर्भ एवम्—सौरभसंभृततुलसीमालिकाञ्चितमौलिना, आस्मादृशां मितमतीनामपि जनानां स्तुतिवचनैः प्रसीदता परमपुण्यभूतेन च नारायणेन दाशरथिना पुराकदाचिन्मृत्युलोकं प्रापितस्स कुम्भकर्णोऽपि पराजितस्सन् किमहो तुभ्यमेव स्वकीयमहनिद्रामपि दिशतिस्म—इति। एवं निद्रायामतिशयकथनेन कीदृशो वेदान्तार्थः प्रकाश्यत इति चेत्; अवधीयताम्। * या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥ * इति गीताद्वितीयाध्यायोक्तरीत्या लौकिकजनानां निरन्तरभोग्यभूतेषु विषयान्तरेषु नित्यं निमीलितलोचन एव वर्ततेऽयमुत्तमाधिकारीत्युक्तं भवति।

द्राविडभाषामय्यां मूलगाथायां कुम्भकर्ण इति शब्दसंनिवेशो नास्ति ; अपितु तद्भाषानुगुण्येन कुम्भकरण इत्येव वर्तते। स च शब्दः कुम्भकर्णमिव कुम्भसंभवं योगिवर्यमप्यभिधातुं प्रभवति। कुम्भः करणं यस्येति व्युत्पत्त्या कुम्भयोनिरगस्त्यो मुनिवरो ध्वन्यर्थप्रणाल्यां विवक्षितः। सहि मुनिवरो द्राविडभाषाप्रवर्तकः। द्राविडभाषाया आगस्त्यत्वप्रथा च सर्वविदिता। स मुनिः पराजित इति कथनेन ततोऽप्यतिशयः अस्मिन्नधिकारिणि प्रोक्तो भवति। कस्मिन्नंशे पराजय इति चेत् महत्तरनिद्रांशे पराजय इति मूले स्पष्टमुक्तम्। कुम्भकर्णस्य निद्रालुताप्रसिद्धिरस्ति नाम। कुम्भसंभवमुनेस्तदभावात् तस्य मुनेरत्र प्रत्यभिज्ञापनं विफलमेव खल्विति काचिदाशङ्का जायेत। अत्रोच्यते। परमभागवतानां निद्रा नाम तमोगुणकार्यभूतलौकिकनिद्रा न भवति। लोके निद्रापरवशा जना बाह्यविषयव्यासङ्गवैमुख्यतोऽपरिमितमानन्दमनुभवन्तीति सर्वविदितमिदम्। सुखमहमस्वाप्समिति हि सुप्तोत्थितस्य जनस्य प्रत्यवमर्शः ; तथाच विलक्षणानन्दानुभव एव निद्राशब्दलम्भितोऽर्थः। अगस्त्यमुनेर्यः खलु विलक्षणानन्दानुभवः तद्विषये स पराजितोऽभूदिति कथनमिह चारुतरमेव। पादुकासहस्रे * विन्ध्यस्तम्भादविहतगतेर्विष्वगाचान्तसिन्धोः कुम्भीसूनोरसुरकबलग्रासिनः * इत्यनेन श्लोकखण्डेन अगस्त्यमुनेः प्रभावत्रितयं प्रोच्यते—विन्ध्याचलस्तम्भयितृत्वम्, अपांनिधेराचमनेन अन्तःप्रवेशयितृत्वम्, इल्वलवातापिनामकासुरकबलीकर्तृत्वमिति ; एवमन्ये च बहवः प्रभावास्सन्ति मुनिवरस्यास्य ; इतोऽप्यतिशयितप्रभावशालिता व्यक्तिविशेषेऽस्मिन्ननुसंहिता भवतीति वेदितव्यम्। "मृत्युमुखं प्रापितः" इति विशेषणं कुम्भकर्णे खलु संगच्छेत ; अगस्त्यमुनौ कथमहो समन्वियादिति चेत् ; दक्षिणा दिशा हि यमस्य दिशा ; तां प्राप्तोऽयं मुनिरिति ग्राह्यम्। * दक्षिणा दिक्कृता येन शरण्या पुण्यकर्मणा * इति श्रीरामायणश्लोकोऽप्यत्रानुसन्धेयः।

अथ—अत्यन्तं तन्द्राविवशे! उत्तमाभरणभूते! इति संबोधनद्वयं वर्तते। सुदर्शनशतके * हन्तु तन्द्रालुतां वः * इति हेयतया कथ्यमानं तन्द्रालुत्वं कथमिह श्रेष्ठाधिकारिणि कथ्यते ? इतिचेत् श्रूयताम्। लोके तन्द्रालुर्जनः कर्तव्यानि कृत्यानि विसृजतीति पश्यामः। कर्तव्यकृत्यत्यागनिबन्धन एव हि तन्द्रालुव्यपदेशः।

* नित्यं काम्यं परमपि कतिचित् त्वय्यध्यात्मस्वमतिभिरममाः । न्यस्यासङ्गा विदधति विहितं श्रीरङ्गेन्दो ! विदधति न च ते * इति श्रीरङ्गराजस्तवोत्तरशतकोक्तरीत्या "विदधति न च ते" इति वक्तव्यतां ये बिभ्रति ते तावदिह विवक्षिताः । नैतत्तन्द्रालुत्वं दूषणमर्हति ; उपायत्वधिया कर्मज्ञानभक्त्याद्यनुष्ठानं ये न कुर्वन्ति, तादृशां कर्मत्यागिनां तन्द्रालुत्वव्यपदेशो भूषणमेवेति सत्संप्रदायरस्यरहस्यविदो विदन्ति । साधनत्वाकारेणानुष्ठानमपहाय कैङ्कर्यरूपेणानुष्ठानम् अननुष्ठाने हि पर्यवस्यति । उत्तमाभरणभूते ! इति संबोधनम् श्रीवैष्णवगोष्ठीप्रधानपरिगणितत्वाभिप्रायकम् ॥

अथ—सुप्रसन्नतया समागत्य कवाटमुद्घाटयेत्यभिधीयते । एतेन सानन्दमुपदेष्टृत्वमभ्यर्थितं भवति । अनुवृत्तिप्रसन्नाचार्या हि निर्बन्धभूम्ना किमप्युपदिशन्ति वैरस्येन ; तद्व्यावर्तनमिह सुगमम् ॥

एतद्गाथासारसंग्राहकः श्लोक एषः—

श्लो ॥ काञ्चित्सिद्धोपभोगां प्रतिवचनकलामप्यविश्राणयन्तीम्
जित्वा तं कुम्भकर्णं ह्यपि खलु भवती शेत इत्युद्गृणाना ।
सौरभ्याच्च तुलस्या सुरुचिरशिरसं श्रीपतिं भक्तभोग्यं
स्तोतुं जागृह्युपेहीत्यभिहितवचना पातु गोदा स्वभक्तान् ॥ १० ॥

इति दशमगाथाविवरणं समाप्तम् ॥

---

११. एकादशी गाथा—कत्तुक्करवै ॥

कत्तुक्करवै कणङ्गळ् पल करन्दु * शेत्तार्तिरलळिय चेन्नु शेरुचेय्युम् *
कुत्तमोन्निल्लाद कोवलर्तम् पोर्कोडिये * पुत्तरवल्हुल् पुनमयिले पोदराय् *
शुत्तत्तु तोळिमारेल्लारुम् वन्दु * निन्मुत्तं पुहुन्दु मुहिल्वण्णन् पेर्पाड *
शित्तादे पेशादे शेल्वप्पेण्डाट्टि * नीयेत्तुक्कुरङ्गुम्पोरुळेलोरेम्बावाय् ॥ ११ ॥

सवत्सगोगणानां बहूनां दोहनं कुर्वताम्, शत्रुविक्रमविनाशनार्थं रणभूमिं प्रविश्य युद्धं निर्वहतां निरवद्यगन्धानां च गोपालानां कुले सौवर्णलतानिर्विशेषं समुत्पन्ने ! वल्मीकान्तः प्रविष्टफणिनिभकृशताभासुरमध्यप्रदेशशालिनि ! स्वस्थानविहाररसिकमयूरीसदृशि ! संपत्समृद्धे हे गोपिके ! समायाहि । बान्धवजनेषु सखीजनेषु च सर्वेषु संघीभूय त्वद्गृहाङ्गणे नीलमेघनिभस्य भगवतो नामानि गायत्सु सत्स्वपि हन्त त्वं शरीरस्पन्दमप्यकुर्वती वाचमप्यनुद्घाटयन्ती कुतो नु निद्रामनुभवसि ? (इति मूलगाथाविवर्तः ।)

गाथायामस्यां स्त्रीसौन्दर्यं स्त्रिय एव वर्णयन्तीति स्थितम् । लोके स्त्रीणां सौन्दर्ये पुंसां विस्मयः, पुंसां सौन्दर्ये स्त्रीणां विस्मयश्च औत्सर्गिकः । एतद्विपर्ययो यदि कुत्रचिद् दृश्यते तत्र भूरितरो विशेषो नूनमवश्यमेव स्यात् । भगवन्तं रामचन्द्रमुद्दिश्य कथयन् वल्मीकजन्मा महर्षिः * रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम् *

इति कथयति। अत्र पुंसामिति किमर्थं निवेशितम्? सर्वेषामिति खलु निवेशनीयम्। तथा अनिवेश्य पुंसां दृष्टिचित्तापहारिणमिति निवेशनेन स्त्रीणां दृष्टिचित्तापहारं रामचन्द्रो न करोतीति केचिदरसिका अर्थवर्णनव्यग्रा भवन्ति। न तथा। दण्डापूपिकान्यायसिद्धं किलात्र स्त्रीजनदृष्टिचित्तापहरणम्। स्वयं पुमान् भूत्वा पुंसां मोहनरूपो भवतीति विस्मयसीमा खल्वेतत्। महाभारतेऽपि * पाञ्चाल्याः पद्मपत्राक्ष्याः स्नायन्त्या जघनं घनम्। याः स्त्रियो दृष्टवत्यस्ताः पुम्भावं मनसा ययुः॥ * इति पठामः। एतेन च द्रौपद्यास्सौन्दर्यातिशयः सजातीयललनाजनस्यापि मोहजनक इति तदतिशायनमवगम्यते। तद्वदत्रापि समुद्बोधयन्त्यो गोपिकाः समुद्बोध्यमानाया गोपिकाया अवयवसौन्दर्यवर्णने व्यग्रा अभूवन्निति दर्शनेन सजातीयानामपि विस्मयावहमाभिरूप्यं बिभ्रत् कोऽपि विलक्षणाधिकारी गाथायामस्यां प्रतिबोध्यत इति प्रतीयते। अत एव प्रोक्तमनुवादपद्ये मदीये * स्त्रीणामप्याशु पुंस्त्वं दददनवधिकं बिभ्रतीं सुन्दरत्वं काञ्चिद्गोपीं प्रतीति॥

ध्वन्यर्थप्रणाल्यामिह किञ्चिदुच्यते। 'आचार्यः शिष्याणामात्मयात्रायामवहितस्स्यात्; शिष्यास्तावदाचार्यस्य देहयात्रायामवहितास्स्युः' इति श्रीवचनभूषणदिव्यशास्त्रसिद्धान्तः। आचार्यदिव्यमङ्गलविग्रहसौन्दर्यमेव शिष्यसंततेः संततमनुसंधेयमिति शास्त्रार्थो गाथायामस्यां प्रधानसंबोधनप्रक्रियया व्यञ्जितो भवति।

सौवर्णलतिके! इति संबोधनस्य चायमभिप्रायः; लता तावत् उपघ्नं विना नाभिवर्धेत। तेन च सर्वथा पारतन्त्र्यं स्फोर्यते। श्रीगुणरत्नकोशे * अनुकलतनुकाण्डालिङ्गनारम्भशुम्भत्प्रतिदिशभुजशाखश्रीसखानोकहर्द्धिः। स्तननयनगुलुच्छस्फारपुष्पद्विरेफा रचयतु मयि लक्ष्मीकल्पवल्ली कटाक्षान्॥ * इति श्लोके लक्ष्म्याः कल्पवल्लीत्वेन रूपणं कृतवतामाचार्याणामपि स्वातन्त्र्यगन्धविरहितपारतन्त्र्यप्रतिपादनमेव ह्यभिसंहितम्, तदेवात्रापि विवक्षितमिति वेदितव्यम्।

इयं सौवर्णलतिका कुत्र समुत्पन्नेतिचेत् गोपालानां कुले समुत्पन्नेत्यभिधीयते। ते च गोपालाः त्रिभिर्विशेषणैर्विशेष्यन्ते। बहुगोगणदोहनकर्तृत्वं प्रथमविशेषणम्। बहूनां गोगणानां दोहनं गोपाः कुर्वन्तीति नैतद्विस्मयनीयम्। किमर्थमिदमत्रोच्यत इति चेत्, उद्बोध्यमानस्योत्तमाधिकारिणो बहुश्रुतत्वं प्रतिपाद्यत इति प्रतिपत्तव्यम्। यथा * गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश, तथा चतुर्दश विद्याः स्वोदराभ्यन्तरे निगूहन्तो महागुरवोऽत्र विवक्षिताः। तत्सविधे दोहनं नाम क्षीरनिर्विशेषसदर्थग्रहणमेव। *ऋषिर्हि दीर्घश्रुत्तमः * इति तैत्तिरियारण्यकाम्नातरीत्या बहुभ्यो बहुधा बहुश्रुतवन्तो महान्त इह सूचिता भवन्ति। * सवत्सगोगणानाम * इति गवां सवत्सत्वकथनेन बालशिष्यसमन्वितत्वमुक्तं भवति। मूलगाथायां वर्तमानं द्राविडपदं "वत्सात्मकगोगणानाम्" इत्यप्यनुवादं सहते। व्रजे वर्तमाना गावो न घासतोयादिभिरभिवर्धन्ते; घासादिग्रहणं व्याजमात्रमेव; कृष्णकिशोरकरस्पर्शत एव वस्तुतो वर्धन्ते। तथाच नित्यं पञ्चविंशतिवार्षिकमुक्तात्मवत् व्रजस्था गावस्सदाऽपि वत्सनिर्विशेषा एव विराजन्त इति ग्रहीतुं योग्यम्। ध्वन्यर्थप्रणाल्यां तु * पाण्डित्यं निर्विद्य बाल्येन तिष्ठतां महतां स्थितिरुच्यत इति बोध्यम्।

15

अथ, शत्रुविक्रमविध्वंसनाय रणभूमिं प्रविश्य युद्धं निर्वहन्ति गोपाला इति द्वितीयविशेषणेनोच्यते। के ते शत्रव इति चेत्; भगवद्वैभवासहिष्णवो भगवति बद्धवैरा आसुरप्रकृतयो भागवतैः स्वशत्रुत्वेन भाव्यन्ते। भागवतद्रोहिणो दुर्जना भगवता स्वशत्रुत्वेन भाव्यन्ते इतितावच्छास्त्रार्थतत्त्वम्। तथाच भगवद्भागवतविरोधिन एवात्र शत्रुपदविवक्षिताः। ते च कंससधर्माणः कंसप्रेरितनानाविधदैत्यसधर्माणश्च। तेषां विनाशने अमी गोपालाः स्वत एव संभृतोत्साहा इत्युक्तं भवति। भगवद्भागवतविरोधिजननिर्मूलनबद्धश्रद्धत्वमपि उत्तमाधिकारिणामुत्कर्षेषु मुख्यतमं खलु। एतेन, पाषण्डमायावादिप्रभृतिदुर्मतप्रवर्तकानां निरसनार्थं तत्रतत्र गत्वा वादयुद्धं निर्वर्त्य विजयश्रियं विन्दतामाचार्याणां वाग्वैभवं व्याहृतं भवति।

अथच निरवद्यगन्धानामिति तृतीयविशेषणेन—युद्धकाले संभावितानामवद्यानामस्पृष्टिः कथिता भवति गोपालेषु। दुर्वादिविधूननाय वादयुद्धं प्रवर्तयतामाचार्याणां निरवद्यगन्धत्वं नाम—* गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः। श्मशाने जायते वृक्षः कङ्कगृध्रादिसेवितः ॥ * इत्यादिशास्त्रविश्वासमूम्ना स्वयं साक्षाद्वादयुद्धमकृत्वा समर्थशिष्यद्वारा [दाशरथिपुरस्कर्तृविश्वामित्रनयेन] तत्संपादनमिति बोध्यम्॥ अस्मदीये सभाभुजङ्गीसर्वस्वे विस्तरोऽनुसंधेयः। गोपालशब्दो वल्लवानिव वाचस्पतीनपि व्याचष्टे। नानार्थकस्य गोशब्दस्य वागर्थकत्वमप्यनपायमिति।

(वल्मीकान्तः प्रविष्टफणितुल्यकृशताभासुरमध्यप्रदेशशालिनि!) इति हि प्रधानं संबोधनं विराजते गाथायामस्याम्। फणिनो हि बहिस्सञ्चारकाले पृथुभोगास्सन्तोऽपि वल्मीकान्तःप्रवेशकाले (सूक्ष्मरन्ध्रान्तः प्रवेशकृते) कृशभोगा भवन्तीति प्रत्यक्षलक्ष्यमिदम्। तथा कृशमध्यमेति कथनेन स्त्रीणां वर्णनीयमुदरकार्श्यं वर्णितं भवति। मध्यसौष्ठवकथनेन ज्ञानभक्तिविरक्तिषु मध्यमभूताया भक्तेः प्रशंसा प्रोक्ता भवतीति बोध्यम्।

अथ, मयूरसदृशीति संबोधनेन अलकभारसौन्दर्यमुपवर्णितं भवति। मयूरसकाशे क्षुद्रविषजन्तवो यथा नोपसर्पन्ति तथा * यत्राष्टाक्षरसंसिद्धो महाभागो महीयते। न तत्र संचरिष्यन्ति व्याधिदुर्भिक्षतस्कराः ॥ * इत्युक्तरीत्या व्याध्यादिवैदेशिकत्वमुत्तमाधिकारिण्युक्तं भवति। किञ्च, मयूरः अतिमात्रविपुलामपि बर्हच्छटाम् अन्तर्निगुह्य संतोषकालेषु यथा विस्तार्य प्रदर्शयति तथा महान्तोऽपि स्वकीयं सकलविद्यापारंगतत्वं परैरदृश्यं कुर्वाणाः समयविशेषेषु हर्षप्रकर्षतः प्रकाशयन्तीति ननु पश्यामः। बर्हिणां बर्हं भगवतोऽपि मूर्धानमलङ्करोति यथा तथा भगवताऽप्यवतंसनीयवाग्गरिमाणो मान्या महान्त इति स्फोरितं भवति। मयूरो नीलमेघमवलोक्य ससंभ्रमं नृत्यति। तथा महत्तरभक्तियुक्ता गुरवोऽपि नीलमेघनिभमच्युममनुभूय हर्षप्रकर्षविवशा नृत्यन्ति। एवमेवं मयूरसादृश्यं महत्सु द्रष्टव्यम्।

अथ, बान्धवजनास्सखीजनाश्च सर्वे संघीभूय भगवन्नामानि गायन्तीति कथ्यते। देहबन्धव आत्मबन्धवश्चेत्युभयेऽपि भगवद्गुणानुभवनिष्णातास्सन्तीत्युक्तं भवति। उत्तमाधिकारिभिः आत्मबन्धव इव देहबन्धवोऽपि

भगवद्भक्तिभूमनिमित्तेन निर्विशेषमाद्रियन्ते न तावदुपेक्ष्यन्ते इति सूचितं भवति। तदिदमधस्तान्नवमगाथाविवरणे सुविशदम् ॥ ....

अन्ततः, शरीरस्पन्दमप्यकुर्वती वाचमप्यनुद्घाटयन्ती स्वपितीति कथनेन—भगवद्गुणगणश्रवणकाले भक्तानां निष्पन्दस्तिमितावस्था संजायत इत्युक्तं भवति। कृष्णकिशोरकृतवेणुगानकाले तच्छ्रवणनिरतानां हरिणानां दशामीदृशीमेव खलु वर्णयति गोदादेवीजनको भट्टनाथसूरिः ॥ ११ ॥

एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो ॥ स्त्रीणामप्याशु पुंस्त्वं दददनवधिकं बिभ्रतीं सुन्दरत्वं
काञ्चिद्गोपीं प्रति त्वद्गृह इह सकला स्सख्य आगस्य कृष्णम् ।
गायन्ति, त्वं कुतो वा स्वपिषि ? किमुचितं मौनमेवंविधं ते ?
द्रागाशाहीति वक्त्री हरतु मम तमो मानसं मंक्षु गोदा ॥ ११ ॥

इत्येकादशगाथाविवरणं समाप्तम् ॥

---

१२. द्वादशीगाथा—कनैत्तिळङ्कत्तेरुमै.

कनैत्तिळङ्कत्तेरुमै कन्नुक्किरङ्गि * निनैत्तु मुलैवळिये निन्नु पाल्शोर *
ननैत्तिल्लम् शेराक्कुम् नर्चेल्वन्तङ्गाय् * पनित्तलै वीळ निन्वाशल् कडैपत्ति *
शिनत्तिनाल् तेन्निलङ्कैक्कोमानैच्चेत्त * मनत्तुक्किनियानैप्पाडवुम् नी वायूतिरवाय् *
इनित्तानेळुन्दिरायीदेन्न पेरुरक्कम् * अनैत्तिल्लत्तारुमरिन्देलोरेम्बावाय् ॥ १२ ॥

बालवत्सवती महिषी वत्समनुचिन्त्य आक्रुश्य दयमानहृदया 'वत्सस्सन्निहित' इति भावनाप्रकर्षेण ध्यायन्ती सती स्तनमार्गेण प्रस्नुतपयस्का यस्य भवनमखिलं जम्बालसंकुलमाकलयति तस्य महत्तरसंपदाढ्यस्य अनुजे! हिमधारासिक्तमस्तका वयं त्वदीयगृहद्वारवर्तिपटलदण्डिकामवलम्ब्य, क्रोधवैभवेन विध्वस्तलङ्केश्वरं मनोभिरामं रामं गायन्त्यो वर्तामहे। अथापि त्वं किमपि प्रतिवचनमपि न ददासि हन्त। इतःपरमपि वा समुत्तिष्ठ भोः; हन्त! केयं महती निद्रा। त्वद्भवनद्वारि वयमेवमवसीदाम इत्ययमंशः सर्वजनविदितो बभूत्.

(इति मूलगाथाविवर्तः।)

व्रजे महत्तरसंपदाढ्य इति कश्चन गोपकुमारः प्रथितः। तस्य स्वसा समुद्बोध्यते गाथयाऽनया। अस्या अग्रजस्य महत्तरसंपदाढ्यता कीदृशीतिचेत् तत्तु मूलगाथायामस्यामत्यद्भुतप्रणाल्या प्रतिपाद्यते। उपरिष्टाद्विवरणेन तत् सुगमं भविष्यति।

महिषी स्वकीयस्तनाध्वना दुग्धधारां प्रस्राव्य भवनमखिलं जम्बालसंकुलं कलयतीति यत्कथितं तस्य गहनतरमतिगभीरं तात्पर्यमुन्नेयम्। पूर्वाचार्याणां व्याख्यानमेवात्र शरणम्। श्रूयताम्। वनान्तेषु घासान् जग्ध्वा

सायं गृहं प्रत्यावर्तमानां महिषीम् गोष्ठे यथास्थानं प्रापय्य वत्सं पाययित्वा दोहनकर्म कर्तुमर्हति गृहस्वामी। स तु तत्कर्म न कृतवान्। [कुतो न कृतवानितिचेत् तत् अनुपदमेव वक्ष्यते।] स्वस्य गोष्ठप्रापणबन्धनादिकृत्याकरणेन खिन्ना महिषी मध्येऽङ्गणं तस्थुषी वत्समनुचिन्त्य कलिताक्रोशा, वत्स उपसृत्य स्तनन्धयो भवतीति ध्यानेन ऊधसः पयःप्रवाहं प्रजनयति। तेन च तद्भवनमशेषं पङ्किलमजनीति गम्यते। इह च गृहस्वामी स्वकृत्यमकृत्वा कुत्र गतः किं करोतीति विवेचनीयम्। विवेचने कृते अयमर्थो निष्पद्यते; सौमित्रिर्यथा क्षणमात्रमपि रामचन्द्रानुसरणमविसृजन् विविधवरिवस्याविरचनवैयग्र्येण तमेवानुसरन्नासीत् तथा एतद्गृहस्वामी (समुद्बोध्यमानाया गोप्या अग्रजः) सततं कृष्णमेवानुसरन् तत्साहित्येनैव कालं क्षिपन् स्वजात्युचितकृत्यवर्गमपि व्यजहात्। अत एव तद्गृहस्थितिरीदृशी जातेति। इदमुच्यते अस्मदीये अनुवादपद्ये—"नित्यं कृष्णानुसृत्या व्रजभुवि बहुमान्यस्य कस्यापि पुंसो धन्यां मान्यां स्वसारं प्रति" इति।

पूर्वगाथायां गोदोहनात्मककृत्यकरणं कण्ठरवेण कथितम्। अस्यां गाथायां तदकरणम् अर्थात्प्रत्यायितम्। अनयोरुभयोरपि विषययोर्गाढविमर्शे कृते अयं शास्त्रार्थः फलति—नित्यकर्माद्यनुष्ठानमावश्यकमवर्जनीयं केषांचिदधिकारिणाम्; अथ तदकरणमपि युज्यते कतिपयाधिकारिणामिति। भगवानप्याह भगवच्छास्त्रे— * मत्कर्म कुर्वतां पुंसां कर्मलोपो भवेद्यदि। तत्कर्म कुर्वते नित्यं तिस्रः कोट्यो महर्षयः॥ * इति। आचार्यहृदये चानुगृहीतमाद्ये प्रकरणे—यथा जात्याश्रमदीक्षासु धर्मा भिद्यन्ते तथा अविच्छिन्नकैङ्कर्ये सामान्यधर्मप्रच्युतिर्भवेदिति। पुरुषार्थाधिकरणश्रीभाष्यसूक्तिविशेषा अप्यत्रानुसंधेयाः। एवंविधशास्त्रार्थप्रत्यायनमेव गाथाया अस्याः पूर्वार्धतात्पर्यसर्वस्वम्।

ननु अनया गाथया प्रबोध्यमानाया गोप्याः पितरं गृहस्वामिपदे निधाय तत्पुत्रिकात्वेन अस्यास्संबोधनं कुतो न कृतम्? वस्तुतः पितैव खलु गृहस्वामी भवितुमर्हति। तं विहाय तत्पुत्रं गृहस्वामिनं कृत्वा तदीयस्वसृत्वेन अस्यास्संबोधने को वा विशेष इति चेत्, श्रूयताम्। कृष्णेन साकमविच्छिन्नसहवासं कुर्वतो व्यक्तिविशेषस्य हि अत्र महत्तरसंपदाढ्यत्वेन प्रशंसा चिकीर्षिता; स तु वृद्धो वा युवा वा न भवितुमर्हति। अपितु कृष्णकिशोरसमवयस्क एव भवितुमर्हति। गोदादेव्याः पिता विष्णुचित्तापरनामधेयो भट्टनाथसूरिः स्वसूक्ते [पेरियाऴ्वार्तिरुमोऴिद्दिव्यप्रबन्धे] तृतीयशतकचतुर्थदशकीयतृतीयगाथायाम् [* शुरिहैयुम् तेरिविल्लुम्......ओरु कैयालोरुत्तन् तोळै यून्त्रि * इत्यस्याम्] धन्यजन्मानं तं पुमांसं निर्दिशति यःपुनरस्यां गाथायां गोदादेव्या महत्तरसंपदाढ्यपदेन निर्दिश्यते। तस्या भट्टनाथसूरिगाथाया अनुवादभागश्चैवम्—

> "कृष्णस्य सखायो बालकाः छुरिकां धनुर्लतां लीलायष्टिम् उत्तरीयं च अपेक्षासमयेषु कृष्णाय दातुं हस्ते धारयन्तस्सन्तोऽनुसरन्ति। कृष्णस्तु स्वकीयेनैकेन पाणिना प्राणनिर्विशेषस्य कस्यचिद्वयस्यस्य भुजमवलम्बमानः अन्येन पाणिना गोवृन्दाह्वानसाधनं शंखं गृह्णन् व्रजं प्रति निवर्तते ...." इति।

इदमप्यवधेयम्। उत्तरमथुराक्षेत्रात् गोकुलाद्वा उपदशक्रोशदूरवर्तिनि नन्दगामसमाख्ये क्षेत्रे (शिलोच्चये) विराजमाने भगवन्मन्दिरे नन्दगोपयशोदाकृष्णबलरामविग्रहैस्सह कृष्णानुचरस्य वयस्यस्यापि विग्रहः प्रतिष्ठापितो विभ्राजते। सोऽयं सन्निवेशः प्रेक्षणीयो भक्तैः। अस्तु। कृष्णकिशोरसमवयस्कताप्रतीत्यर्थमेव अत्र प्रतिबोध्यमानाया गोप्या अग्रज एव गृहस्वामी निर्दिष्टः। पितुर्निर्देशे सति स्वारस्यगन्धोऽपि नास्तीति।

दुग्धप्रवाहप्रस्नावणेन गृहं पङ्किलं कुर्वती व्यक्तिः धेनुरिति न कथितम्; अपितु महिषीति कथितम्। अत्र ध्वन्यर्थपरिशीलने (लक्षितलक्षणावृत्त्याश्रयणेन) महिषीपदस्य राजपत्नीवाचकत्वं प्रतिपत्तव्यम्। देवदेवदिव्यमहिषीमखिलजगन्मातरमस्मन्मातरं महालक्ष्मीं प्रत्यभिज्ञापयति महिषीपदम्। आचार्यस्तावत् पुरुषकारकृत्ये महालक्ष्म्याः स्थानमलङ्करोतीति संप्रदायविदां मतम्। स आचार्योऽत्र ग्राह्यः। शिष्यास्सन्तिचेत्तदा महार्थोपदेष्टारः केचित्; शिष्योपस्थितिविरहेऽपि स्वात्मधारणाय (कः पठति? कालः पठतीति काशीपण्डितव्यवहारस्मारकतया) दुग्धनिर्विशेषानर्थानुपदिशन्तो गुरवोऽपि सन्ति कतिपये। तथाविधस्याचार्यस्य चर्यामत्र प्रतिपद्यध्वम्। बालशिष्यसमुद्बोधनव्यग्र आचार्यः अन्तेवासिनामुपस्थितिविरहेऽपि स्वयं भगवद्गुणकीर्तनमकृत्वा स्थातुमशक्नुवन् क्षीरवत् धारकान् पोषकान् भोग्यान् दिव्यार्थान् प्रवर्षति।

[स्तनाध्वना प्रवर्षतीति यत्कथितं तत्रेदं बोध्यम्।] धेनोर्महिष्याश्च पयोनिस्सरणद्वारभूताःस्तनाश्चत्वारः प्रथिताः। तथा आचार्योऽपि चतुर्भिर्द्वारैः (निमित्तैः) अर्थानुद्घाटयति। कानि तानि चत्वारि निमित्तानीतिचेत्; १. भगवदाज्ञा। २. शिष्यप्रार्थना। ३. शिष्यदुर्गत्यसहिष्णुता। ४. उपदेशं विना स्वात्मधारणासमर्थता—इति। भूतलं गत्वा शिष्यानुपदेशैस्समुज्जीवयेति भगवानाज्ञाप्य खलु श्रीवैकुण्ठात् प्राहैषीदाचार्यम्। तादृशी भगवदाज्ञा प्रथमं निमित्तम्। * तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् * तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः * इत्यादिविधिबलात्समुपसृप्य शिष्याः प्रार्थयन्ते यदि सा प्रार्थना द्वितीयं द्वारम्। शिष्येषु प्रार्थनाहीनेषु सत्स्वपि तेषां दुर्गतिमवेक्ष्य जोषं स्थातुमशक्तता या भवति सा तृतीयं निमित्तम्। भगवदाज्ञाऽपि माभूत्; शिष्यप्रार्थनाऽपि मा भूत्। शिष्यदुर्गत्यसहिष्णुताऽपि मा भूत्। स्वात्मधारणान्यथानुपपत्तिर्या भवति सा चतुर्थं निमित्तम्। एतदेव प्रधानं द्वारमत्राभिधीयते। भवनस्य पङ्किलत्वकरणम् आचार्यवर्येष्वप्यनपायम्। कथमिति चेत्; * आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान्। सदा परगुणाविष्टो द्रष्टव्य स्सर्वदेहिभिः * इत्युक्तरीत्या भगवद्गुणानुभवजनितहर्षप्रकर्षमूलकैरश्रुपूरैः परिसरं सर्वमपि पङ्किलं कुर्वन्ति परमभागवता इति हि प्रसिद्धम्। तमिममर्थं श्रीकुलशेखरसूरिः स्वसूक्ते द्वितीये दशके तृतीयगाथायामतिसुन्दरमाचचक्षे। * पङ्कदिग्धस्तु जटिलो भरतस्त्वां प्रतीक्षते * (श्रीरामायणे) इति भरद्वाजमहर्षिफणितौ पङ्कदिग्धत्वोक्तिहृदयमप्येतदेव हि। ईदृशी हि दशा भागवतोत्तमानां महत्तरसंपदाढ्यता।

अथ [हिमधारासिक्तमस्तका वयमित्यादि।] धनुर्मासे वीथीषु स्थितानामासां बल्लवीनां हिमहतशिरस्कत्वं संभावितम्। आचार्यकुले तिष्ठतामन्तेवासिनां हिमहतशिरस्कत्वं नाम—सर्वविधतापहरसदर्थश्रवणेन

16

शिशिरोत्तमाङ्गत्वम् । स्वरूपानुरूपसदर्थसार्थश्रवणेन अहङ्कारममकारादिव्यपगमतः शिरसो नम्रत्वमेव तत् । (क्रोधभूम्ना निहतलङ्केश्वरं मनोभिरामं रामं संकीर्तयन्त्यो वयं वर्तामहे ; अथापि भवती प्रत्युत्तरं न ददातीति) मूलगाथायां पञ्चमषष्ठपादाभ्यामुच्यते । रामश्च कृष्णश्च अभिन्नमूर्ती इत्यभिसन्धिना एवमुच्यते । भगवान् दाशरथिः लङ्काधिनाथं रावणं व्यापादितवानित्ययमंशः सुप्रसिद्धः ; अत्र क्रोधभूम्नेति हेतुकथनं किमर्थम् ; सततं सुप्रसन्नमुखारविन्दस्य रामचन्द्रस्य किमहो क्रोधोऽपि वर्तेत इति काचन शङ्का जायेत । संक्षेपरामायणे नारदं महर्षिम्प्रति * को न्वस्मिन् साम्प्रतं लोके गुणवान् कश्च वीर्यवानित्युपक्रम्य प्रश्नमालिकाः कुर्वन् वाल्मीकिमुनिः 'जितक्रोधः कः' इत्यनुयुज्य, अनन्तरम् 'कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे ?' इत्यपि अन्तिममनुयोगमकार्षीत् । आश्रितभक्तजनविरोधिविषये क्रोधाभावो हि महती न्यूनता स्यात् अनन्तकल्याणगुणगणशेवधेरपि भगवतः । तादृशन्यूनतापरिहारार्थमेवोक्तम्—क्रोधभूम्नेति । लङ्केश्वरहननविषये रामस्य मनोभिरामत्वं किं नामेतिचेत् ; अतिमानुषस्तवे * यत्त्वं कृतागसमरिं रघुवीर ! वीक्ष्य विश्रम्यतामिति मुमोचिथ मुग्धमाजौ । कोऽयं गुणः कतरकोटिगतः कियान् वा कस्य स्तुतेः पदमहो बत कस्य भूमिः ! * इति श्रीवत्साङ्कमिश्रैरनुगृहीतरीत्या * गच्छानुजानामि रणार्दितस्त्वं प्रविश्य रात्रिञ्चरराज ! लङ्काम् । आश्वास्य निर्याहि * इत्यतिमात्रानुकम्पाप्रकाशनपूर्वकं तादृशतीव्रापराधमपि दशाननं विसृष्टवानिति यत्तदेवेति वेदितव्यम् ।

ध्वन्यर्थप्रणाल्यामिह वेदितव्यमेतत् ; संकल्पसूर्योदये * दर्पोदग्रदशेन्द्रियाननमनोनक्तञ्चराधिष्ठिते देहेऽस्मिन् भवसिन्धुना परिवृते दीनां दशामास्थितः । अद्यत्वे हनुमत्समेन गुरुणा संबोधितार्थस्सुधीः लङ्कारुद्धविदेहराजतनयान्यायेन लालप्यते ॥ * इत्युक्तरीत्या, संसारार्णवपरिवृतदेहरूपलङ्कायां दशेन्द्रियात्मकवदनदशकविशिष्टक्रूरमनोरूपरावणेन भगवत्पादारविन्दसन्निधानाद्वियोज्य विनिहितं सीतात्मकमात्मानं जितेन्द्रियत्वसकलविद्याभिज्ञत्वरूपविशेषविशिष्टहनुमत्सधर्मा आचार्य एव हि विरोधिनिरसनपूर्वकं भगवदन्तिकं प्रापयति ; तथाच स एवाचार्यवर इह लङ्केश्वरहन्तृमनोभिरामत्वेनापदिश्यत इति वेदितव्यम् । आचार्यकृतमहोपकारविशेषान् वयं कीर्तयामः ; त्वमप्यस्माभिस्सह तान् कीर्तयितुमागत्य संगच्छस्वेत्याहूतं भवति ।

अथ (कास्विदियं महती निद्रा ? इतः परमुत्तिष्ठ) इति कथ्यते । * अनादिमायया सुप्तानामस्मादृशां प्रतिबोधनाय आचार्यवरे अवतीर्णे सत्यपि हन्त का नाम मायास्वापप्रसक्तिः ? प्रबोधफलं सर्वैरप्यनुभोक्तव्यमित्युक्तं भवति । अथाष्टमपादस्य द्राविडगाथासन्निवेशे द्वेधा तात्पर्यं भवति । अस्मिन् व्रजे त्वद्व्यतिरिक्तास्सर्वा अपि प्रतिबुद्धास्समागता इति एकोऽर्थः । त्वद्गृहद्वारि वयमवतिष्ठमाना एवं सीदाम इति विषयोऽयं व्रजेऽस्मिन् सुप्रसिद्धोऽभूदित्यपरोऽर्थः ॥ १२

एतद्गाथार्थसंग्राहकः श्लोक एषः—

श्लो ॥ नित्यं कृष्णानुसृत्या व्रजभुवि बहुमान्यस्य कस्यापि पुंसो
धन्यां मान्यां स्वसारं प्रति, सखि! दशवक्त्रान्तकं चित्तभोग्यम्।
गायन्तीश्चापि नास्मान् हिमहतशिरसो वीक्षसे गाढनिद्रा
द्रागायाहि प्रबुध्येत्युदितवचनया गोदयाऽहं सुधन्यः ॥ १२ ॥

इति द्वादशगाथाविवरणं समाप्तम् ॥

---

१३. त्रयोदशीगाथा—पुळ्ळिन्वायुकीण्डानै.

पुळ्ळिन्वाय् कीण्डानै पोल्लावरक्कनै * किळ्ळिक्कळैन्दानै कीर्तिमै पाडिप्पोय् *
पिळ्ळैहळेल्लारुम् पावैक्कळम् पुक्कार् * वेळ्ळियेळुन्दु वियाळमुरङ्गित्तु *
पुळ्ळुम् शिलम्बिनकाण् पोदरिक्कण्णिनाय् * कुळ्ळक्कुळिर क्कुडैन्दु नीराडादे *
पळ्ळिक्किडत्तियो पावाय् नी नन्नाळाल् * कळ्ळम् तविर्न्दु कलन्देलोरेम्बावाय् ॥ १३ ॥

अयि कमलकुसुमनिषण्णभ्रमरोपमेयलोचने! प्रतिमोपमेये!, बकासुरवक्त्रविदारणकारिणः दुष्टराक्षसेश्वरमवलीलया विनाशितवतश्च भगवतः कीर्तिं गायन्त्यो गत्वा सर्वाअपि गोपबालिका व्रतानुष्ठानस्थलीं प्राविशन्। शुक्र उदैत्; गुरुरस्तमैत्। पक्षिणश्च प्रणेदुः। प्रत्यूषे सुशिशिरजलाशयविगाहनमकृत्वा हन्त कुतश्शयानाऽसि? परमसात्विकः खलु कालोऽयम्। प्रत्येकानुभवरूपं चौर्यमुत्सृज्य अस्माभिस्सर्वाभिस्सह मिलित्वाऽनुभवितुमागच्छ भोः ॥ (इति मूलगाथाविवर्तः।)

अधस्तनगाथायां कृष्णभगवत्संकीर्तनगन्धमन्तरेण श्रीरामचन्द्रभगवत्कीर्तनमकारि। तत्रापि स एव मनोभिराम इति विशेषितश्चाभूत्। एतेन व्रजे महान् विवादकोलाहलस्समजनि। आः कथं कृष्णकिशोरस्यैकान्तिकविहारास्पदे व्रजे देवतान्तरपर्यायभूतस्य रामचन्द्रस्य कथा कथ्यते? कथं वा कृष्णापेक्षया तस्य मनोभिरामता च निगद्यते? किमिदमन्याय्यं नाम! अयोध्यायां यः कोऽपि कृष्णनाम कथयतिचेत् अथ तत्रत्याः किं नु जोषमवतिष्ठेरन्? व्रजेऽस्मिन् रामकथाकीर्तनं यद्यभिलष्यते तर्हि कामं बलरामकथाकीर्तनं क्रियताम्; लङ्काध्वंसिरामकथाकीर्तनमत्र कथमुपपद्यताम्? अथ च विमृशेम, रामः कथंनु मनोऽभिरामो भवितुमर्हति। आत्मगुणैर्देहगुणैश्च खलु मनोभिरामता वक्तव्या। एतैरुभयैश्च गुणैः अस्मदीयः कृष्ण एव राममतिशेते। दूतकृत्यकरणपर्यन्तसौलभ्यसौशील्यादिकं गीताशास्त्रोपदेशकत्वंच रामे नैव खलु लब्धावकाशम्। अथ च * मणिविडम्बिनि तस्य मनोहरे वपुषि मग्नमना मुनिमण्डली। जपममुञ्चत होममममुञ्चत व्रतममुञ्चत वेदममुञ्चत ॥ * याथर्हं केशवे वृत्तिमवशाः प्रतिपेदिरे * इत्यादिभिः प्रथितं दिव्यसौन्दर्यलावण्यादिकं च रामे दुर्निरूपम्। अथवा राम एव कामं भवतु मनोभिरामः; स्वकीयः पतिः कुरूपी मूर्खश्चेति किमहो सुन्दरो मेधावी च परपुरुषः स्पृहणीयो भवेत् कुलवनितानाम्? * यो वै स्वां देवता-

मतियजते प्र स्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान् भवति * इति खलु श्रुतिश्चाम्नासीत्.........इत्येवमुच्चावचानि स्पर्धावचांसि हंहो ! उद्वेलं विजजृम्भिरे। रामश्च कृष्णश्च व्यक्तिभेदशालिनावपि धर्म्यैक्यविभासुरौ अत एव सुतरामभिन्नावित्यमुमर्थं सम्यगवधारितवत्यो वृद्धगोपिकास्सरभसमुपसृत्य " हन्त कोऽयं शुष्कविवाद: ! रामः कः, कृष्णः कः ? उभावप्येकमेव खलु दैवतम्। * रामो नाम बभूव हुम् तदबला सीतेति हुम् तौ पितुर्वाचा पञ्चवटीवने विहरतस्तामाहरद्रावणः। निद्रार्थं जननीमुखादिति कथां कृष्णस्य संशृण्वतः सौमित्रे क्वधनुर्धनुर्धनुरिति व्यग्रा गिरः पान्तु नः॥ * इति श्लोककीर्तितां कृष्णस्य शैशवचर्याम् किंतु विस्मृतवत्यो भवत्यः ? अलम् अतिमात्रपरिहास्येनानेन शुष्कविवादेन। असकृत् कृष्णकिशोरमाह्वयन्ती यशोदादेवी च " वामनमूर्ते अत्रागच्छ; काकुत्स्थ भगवन् अत्रायाहि; गोपालकृष्ण ! इह समायाहि " इति खल्वाह्वयति। तदेतदखिलं विस्मृत्य किमित्यकाण्डे विवादं विवर्धयध्वे ? नैतन्मनागप्युचितं नाम " इति परमार्थं प्रकाश्य सर्वासां मनसि समाधानमुदपादयन्। अथ रामकृष्णयोरुभयोरपि दिव्यमूर्त्योर्वैभवकीर्तनं कर्तव्यमिति संकल्पस्समजायत गोपीनाम्। व्रजोऽयं कृष्णेन भगवता धन्योऽभूदिति हेतुना तस्य कृष्णस्य यशसां प्रथमतो गानं कर्तव्यम्; अथ च रामगुणगानं कर्तव्यमिति च व्यवस्था व्यधायि। सद्य एव गोष्ठीद्वयं विभक्तम्। पुरस्तादेका सुमहती गोष्ठी कृष्णचरितकीर्तनपरा गच्छति। पश्चादपरा गोष्ठी रामचरितकीर्तनपरा प्रयाति। मूलगाथायां प्रथमतः पादद्वयेन तदिदमुच्यते।

बकासुरवक्त्रच्छेत्तारं कृष्णकिशोरं गायन्ति भूयस्यः। दशकन्धरध्वंसनपटीयसो रामचन्द्रस्य कीर्तिम् गायन्ति बह्व्यः। तासां गानप्रणाली च निबध्यतेऽस्माभिरत्र भक्तजननित्यानुसन्धानाय:—

श्रीकृष्ण कीर्तनपरा एवं नाम गायन्ति।—

१. अतिमधुर निनदभर मुरलिधर कृष्ण
२. मनुजतनु परिकलन कुतुकधर कृष्ण
३. मुदिरसम ललितनिज तनुसुषम कृष्ण
४. जलजसम नयनयुग सुभगतर कृष्ण
५. कटितटग कनकमय शुभवसन कृष्ण
६. कृतसुकृत जनहृदय शुभनिलय कृष्ण
७. कटुहृदय दितिजकुल हतिचटुल कृष्ण
८. प्रणतजन मुखकमल विकसनद कृष्ण
९. अतिविपुल धरणिभर परिहरण कृष्ण
१०. सकलमुनिजनविनुत शुभचरित कृष्ण

....

११. देवकीजठरधन्यताकरण भावनाविवश माधव
१२. दुग्धवारिनिधि सद्मवासरुचि हीनमानसक माधव
१३. धन्यकृत्य वसुदेवकौतुक भरप्रपूर्तिकर माधव
१४. पुण्यलभ्य मथुरापुरीवरनिषेवणादरण माधव
१५. शङ्खचक्रमुख दिव्यहेतितति दर्शितस्वगुण माधव
१६. दिव्यभव्य वपुरीक्षणोन्मुदित तातमातृनुत माधव
१७. हेतितल्लज निगूहनार्थिपितृ शासनप्रवण माधव
१८. क्षीणभाग्य वसुदेवमस्तधृत नीतगोपकुल माधव
१९. भव्यभाग्यनिधि भोगिराजफण वाटिकानिलय माधव
२०. हन्त हन्त बत हावतेति वसुदेवखेदपद माधव
२१. अस्तु भद्रततिरस्तु भद्रतति रित्यमर्त्यनुत माधव
२२. निस्समाभ्यधिक हर्षसागर निमग्ननन्दसुत माधव
२३. नन्दनन्दन विनोदवल्लव विहारमानुष रमाधव
२४. रुक्मिणीरमणरुक्मिणीरमणरुक्मिणीरमण माधव!

अथ श्रीरामकीर्तनपरा एवं नाम गायन्ति—

(रघुतिलक रघुतिलक रघुतिलक रामा !)

१. दशवदन भयविवश सुरशरण राम
२. दिवसकर महितकुल कृतजनन राम
३. सुदशरथ कृततुरग सवनफल राम
४. भरतमुख सहजवर सहचरित राम
५. कुशिकसुत मुनिसवन रिपुहनन राम
६. मुनिकथित विदितबहु चरितगण राम
७. चरणरज उपजनित मुनिदयित राम
८. जनकनृप दुहितृकुच तटमुदित राम
९. मदभरित परशुमुनि परिभवद राम
१०. निजनगर कृतवसति जनविनुत राम
११. अनृत भयचकितपितृ वचनवश राम
१२. विपिनतट विहृतिरुचि भरभरित राम
१३. परिचरण रुचिविवश सहजनुत राम
१४. क्षितिदुहितृ हृदयभय परिहरण राम
१५. सचिववर समुपहृत रथचलित राम
१६. अनुचलित पुरजनहृगतिपतित राम
१७. परमसख पदनिहित गुहसहित राम
१८. पितृनिधन निशमनज परितपन राम
१९. नतभरत शिरसिकृत पदमकुट राम
२०. अयचरित नतवलिभुगवनकर राम

(राम राघव राम राघव राम राघव राघवा !)

२१. चित्रकूट विहारहर्षित योगिमंडल राघव
२२. अत्र चित्रमनुग्रहं मयि दर्शयन् स्थित राघव
२३. रावणेरित राक्षसार्दित योगिवन्दित राघव
२४. दुस्सहाघ विराधमर्दन त्रिश्रुतप्रथ राघव
२५. धन्यहृच्छरभङ्गयोगि निरीक्षणोत्सुक राघव
२६. कुम्भसंभव योगिदर्शित हेतिभूषित राघव
२७. धन्यलक्ष्मण निर्मितोटज वासहर्षित राघव
२८. गृध्रराज जटायुवीक्षणहृष्टमानस राघव
२९. काममोहित राक्षसीमुख भङ्गशामन राघव
३०. दुष्टहृत्खर दूषणादि वधोदितप्रथ राघव
३१. हैमदुर्मृग लिप्सुभूमि सुतामनोरम राघव
३२. दूरगत्वर कृत्रिमक्रिय मायिमारण राघव
३३. राक्षसेश हृतप्रियाविरहोदितश्रम राघव
३४. दुर्वचश्रम दुस्सहामित दुःखनिर्भर राघव
३५. धन्यजन्म जटायुसंस्कृति पुण्यभाजन राघव
३६. मुक्तशाप कवन्धदत्त वचःप्रहर्षित राघव
३७. भक्तियुक्त शबर्युपाहृत सत्फलाशन राघव
३८. मत्तहंस मयूरदर्शन दूनमानस राघव

(रघुनन्दन रघुनन्दन रघुनन्दन रामा !)

३९. भयविह्वल दिनकृत्सुत कपिवीक्षित राम
४०. सविधागत हनुमद्वच उपहर्षित राम
४१. कपिदर्शित वरभूषण कृतवेदन राम
४२. शुचिसाक्षिक कृतसौहृद कपिराट्प्रिय राम
४३. कृतदुन्दुभि तनुधर्षण पदपङ्कज राम
४४. त्रिचतुस्तरु परिवेधन पटुसायक राम
४५. मघवत्सुत कपिमर्दन कुतुकोज्ज्वल राम
४६. कृतलक्षण कपियोधन कपिमारण राम
४७. अभिषेचित दिनकृत्सुत कपिसेवित राम
४८. गिरिगह्वर कृतलक्ष्मण वरिवस्यन राम
४९. अवबोधित शरदागम कपिवन्दित राम
५०. हनुमन्मुख कपितल्लज परिचोदक राम
५१. स्वशुभाङ्गुलि वरभूषण परिदायक राम
५२ दयिताशुभ वचनागम समयेक्षक राम

(रघुतिलक रघुतिलक रघुतिलक रामा!)

५३. बृहदुदधि तरणपटु कपिविनुत राम
५४. हृतसुरस पवनसुत नुतिमुदित राम
५५. रजनिचर नगरगत कपि विनुत राम
५६. क्षितिदुहितृ निलयगत कपिशरण राम
५७. धरणिरुह दलपिहित कपिविनुत राम
५८. महिदुहितृ सुखजनक कपिसुखद राम
५९. तरुनिवह दलनपटु कपिशरण राम
६०. दशवदन विदितबल कपिविनुत राम
६१. अभिभवितृ रिपुहनन कपिविनुत राम
६२. असुरपुर दहनपटु कपिमुदित राम
६३. कपिनिवह सविधगत कपिविनुत राम
६४. मधुवनग कपिचरित भृशमुदित राम

(राम राघव राम राघव राम राघव राघवा)

६५. दृष्टभूसुत हृष्टमर्कट दृष्टिहर्षित राघव
६६. तत्प्रदर्शित मस्तभूषण वीक्षणोज्ज्वल राघव
६७. जीवितप्रद मारुतिप्रिय गात्रमर्दन राघव
६८. सद्विभीषण संश्रयोदित हर्षपुष्कल राघव
६९. स्वप्रपत्ति पराङ्मुखोदधि शोषणोद्यत राघव
७०. प्रार्थितक्षम सागरोदित सेतुबन्धन राघव
७१. कीशबृन्द समाकुलास्रप पत्तनागत राघव
७२. इन्द्रजिद्वध दक्षलक्ष्मण नित्यसेवित राघव
७३. कुम्भकर्ण मुखामिताशरहन्तृसायक राघव
७४. लोककण्टक रावणेक्षित सत्यविक्रम राघव
७५. तद्भ्रूगल भङ्गसूत्र विसर्जनक्षम राघव
७६. सद्विभीषण सात्कृताशर राज्यपालन राघव
७७. वह्निशोधित मैथिलीपरिरम्भणोत्सुक राघव
७८. आर्तसङ्गरतार्तिहृद्दृढगात्रमर्दन राघव
७९. दिव्यपीठनिषण्णभूमिसुतासमन्वित राघव
८०. भ्रातृवर्ग समन्वयोज्ज्वल दिव्यदर्शन राघव
८१. पुण्यतीर्थ कृताभिषेचन हृष्टमानस राघव
८२. भक्तसत्कृति दर्शितामित चातुरीभर राघव
८३. शिष्टरक्षण दुष्टशिक्षण नित्यदक्षिण राघव
८४. वादिभीकर वंशसंभव दासकीर्तित राघव॥

पुनरपि कृष्णकीर्तनपरा एवं गायन्ति—

मधुरवेणुप्रणादन महितवेषप्रकाशन जलदसच्छायविग्रह जडजनस्वान्तदुर्ग्रह।
सुभगपीताम्बरोज्ज्वल सुकृतिचित्तस्थलाचल जयजय श्रीयदूद्वह जयजय श्रीश केशव॥ १॥
कलितदेवक्यनुग्रह गलितदुग्धाब्धिसद्ग्रह सुवसुदेवात्मसंभव सुमथुरापुर्युपागत।
करलसच्छङ्खचक्रक सुररिपुच्छेदिविक्रम जयजय श्रीयदूद्वह जयजय श्रीश केशव॥ २॥
स्वपितृकारागृहोद्भव सवितृजैत्राननप्रभ धरणिभारक्षयोदय सुरजनप्रोल्लसद्धृदय।
प्रथितरोहिण्युद्धृदय कथितवाक्पालनव्रत जयजय श्रीयदूद्वह जयजय श्रीश केशव॥ ३॥
अशरणत्राणदीक्षित पृथुरणत्रातपाण्डव हरविधीन्द्राद्यभिष्टुत चकितमातापितृस्तुत।
व्रजविहाराधिकोत्सुक निजमनोभीष्टवत्सक जयजय श्रीयदूद्वह जयजय श्रीश केशव॥ ४॥
घनतमोरात्रिनिर्गत फणिफणस्तोमरक्षित पटुयशोदास्तनन्धय कटुमनःकंसवञ्चक।
सुभगनन्दालयप्रिय सुकृतिचेतोहरक्रिय जयजय श्रीयदूद्वह जयजय श्रीश केशव॥ ५॥

अतुलसौन्दर्यमन्दिर विपुललावण्यसुन्दर दलितजीमूतडम्भक जलधिडिम्भाल्यडिम्भक।
सकलचित्तापहारक विनतहृत्तापहारक जयजय श्रीयदूद्वह जयजय श्रीश केशव ॥ ६ ॥
सुभगगोपालबालक सकलभक्तौघपालक सतनुसाहस्रमन्मथ सुतनुचित्तैकमन्मथ।
सुरगणप्रत्नभूषण सुरुचिरस्वादुभाषण जयजय श्रीयदूद्वह जयजय श्रीश केशव ॥ ७ ॥
कुटिलहृत्पूतनावधपटुरिति प्राप्तकीर्तिक शकटदैतेयभञ्जनचरणपङ्केरुहद्वय।
कटुतृणावर्तमारण चटुलभूयःपराक्रम जयजय श्रीयदूद्वह जयजय श्रीश केशव ॥ ८ ॥
कलितमृद्भक्षणानन नियतसद्रक्षणादर वदनसंदर्शिताखिल बहुलमायाविचेष्टित।
अमितलीलाविनोदक सकलतापापनोदक जयजय श्रीयदूद्वह जयजय श्रीश केशव ॥ ९ ॥
यमलवृक्षावमर्दन धनदपुत्राघमोचन फलदगोपीमनोहर वनफलादानसादर।
मसृणबर्हावतंसक सुतनुगर्हार्हचेष्टित जयजय श्रीयदूद्वह जयजय श्रीश केशव ॥ १० ॥
मुषितहैयङ्गवीनक मुषितगोपीदुकूलक धृतबृहद्दामबन्धन कृतमहच्चित्तबन्धन।
अमितसौलभ्यसागर बहुलसौशील्यमन्दिर जयजय श्रीयदूद्वह जयजय श्रीश केशव ॥ ११ ॥
प्रतिगृहख्याततस्कर नतभयध्वान्तभास्कर मधुरचाञ्चिमोहन महितगोबृन्ददोहन।
मधुपबृन्दाभकुन्तल सकलसंतापकृन्तन जयजय श्रीयदूद्वह जयजय श्रीश केशव ॥ १२ ॥
विपुलबृन्दावनस्थलविहरणानन्दतुन्दिल ललितहृद्यौवतप्रिय सुतनुवासोहृतिप्रिय।
अपयशस्स्तोमकीर्तिक शुभयशस्स्तोममूर्तिक जयजय श्रीयदूद्वह जयजय श्रीश केशव ॥ १३ ॥

पुनरपि रामकीर्तनपरा एवं गायन्ति—

दिविषदभ्यर्थितोदय भुवि समुद्गीतवैभव महितवाल्मीकिकीर्तित महितलख्यातकीर्तिक।
अहितरक्षोवधोद्यत नियतसद्रक्षणव्रत जयजय श्रीरघूद्वह जयजय श्रीरघूत्तम ॥ १ ॥
दशरथानन्दवर्धन दशमुखध्वान्तभास्कर कुशिकपुत्राध्वरावन पिशितभुग्वर्गनाशन।
जनकजाचित्तहर्षण परशुरामप्रधर्षण जयजय श्रीरघूद्वह जयजय श्रीरघूत्तम ॥ २ ॥
अखिलसंस्तुत्यसद्गुण मुकुटभूषार्हमस्तक पितृवचःपालनोत्सुक विपिनयात्रासमुत्सुक।
सहजसौमित्रिसेवित जनकपुत्रीसमन्वित जयजय श्रीरघूद्वह जयजय श्रीरघूत्तम ॥ ३ ॥
गुहसुहृत्प्रेमहर्षित मुनिभरद्वाजपूजित सुभगसच्चित्रकूटग भरतविन्यस्तपादुक।
बलिभुजि क्षिप्तसायक तदनु तत्प्राणदायक जयजय श्रीरघूद्वह जयजय श्रीरघूत्तम ॥ ४ ॥
मुनिजनस्तोमसंस्तुत कृतविराधोपमर्दन सुशरभङ्गावलोकित सुदृढसत्यप्रतिश्रव।
विमलगोदावरीतटविहरणोत्साहसंभृत जयजय श्रीरघूद्वह जयजय श्रीरघूत्तम ॥ ५ ॥
कलितगृध्रेशदर्शन मुदितसौमित्रिकिंकृत विकृतरक्षोवधूस्तुत खरवधख्यातविक्रम।

कुमतिमारीचघातुक विहगसंस्कारकारक जयजय श्रीरघूद्वह जयजय श्रीरघूत्तम ॥ ६ ॥
दनुकबन्धस्तुतिप्रिय नतशबर्याप्तसत्फल विपुलपम्पासरित्तट कलितवातात्मजेक्षण ।
चकितसुग्रीवहर्षण कलिततद्वैरिधर्षण जयजय श्रीरघूद्वह जयजय श्रीरघूत्तम ॥ ७ ॥
हनुमदुक्तिप्रहर्षित हनुमदाश्लेषणोत्सुक दशमुखभ्रातृवन्दित जलनिधिप्रार्थनप्रिय ।
उदधिसेतुप्रचारक निखिलरक्षःप्रणाशक जयजय श्रीरघूद्वह जयजय श्रीरघूत्तम ॥ ८ ॥
दशमुखध्वंसिसायक तदनुजानुग्रहोज्ज्वल भरतसंमोदवर्धन मकुटभूषाविभूषित ।
सकलसत्कारकारक कुशलवश्रावितप्रथ जयजय श्रीरघूद्वह जयजय श्रीरघूत्तम ॥ ९ ॥
प्रथितवादीन्द्रभीकरगुरुकुलोत्पत्तिशालिना विलसदण्णङ्गराह्वयविबुधदासेन निर्मिताम् ।
रघुवरानुग्रहोदितनुतिमिमां नित्यमुद्गृणन् सपदि पश्यन् रघूद्वहमनिशमानन्दमाप्नुयात् ॥ १० ॥

एवमेवमत्याश्चर्यगानं कुर्वत्यो गोपाललना व्यूहद्वयात्मना गच्छन्तीति गाथायामस्यां पादत्रयेण कथ्यते ।

कृष्णजिघांसया कंसप्रेरितेषु दैत्येष्वेको बकरूपधारी सन् जलप्रान्तेष्वशनगवेषणतत्परबकेष्वन्यतम इव सन् कृष्णद्रोहबुद्धया समुपस्थितः । तस्य तत्त्वं विदन् कृष्णस्तदास्यं विदार्य तं प्राणैर्वियोजयामासेति बकासुरवधकथासंक्षेपः । अत्रायं यादवाभ्युदयश्लोकोऽनुसन्धेयः— * सपक्षकैलासनिभस्य गोपा बकस्य पक्षानभितो बबन्धुः । वने तदन्यानपि घोरवृत्तीन् क्षेप्तुं प्रवृत्ता इव केतुमालाः * इति । श्रीकृष्णकृतेष्वतिमानुषचेष्टितेषु भूयस्सु सत्सु बकवधात्मकमिदं लघिष्ठं कर्म कुतः कीर्त्यत इति शङ्का माभूत्; भगवतश्चेष्टितेषु लघिष्ठगरिष्ठविचारं भक्ता नैव कुर्वन्ति ; * इङ्गितं निमिषितं च तावकं रम्यमद्भुतमतिप्रियंकरम् । तेन कंसमुखकीटशासनं सुन्दराल्पकमपि प्रशस्यते ॥ * इति सुन्दरबाहुस्तवे श्रीकूरनाथगुरुवरोक्तरीत्या कृष्णेन कृतं कर्म यद्वा तद्वा भवतु ; तत्कृतत्वेनैव हेतुना तदीयचेष्टितानि सर्वाण्यपि निर्विशेषमाद्रियन्ते भक्तजनैरिति वस्तुस्थितिः । कृष्णकृतो बकवधो रामकृतरावणवधापेक्षयाऽत्यन्तं लघीयानिति बहवो भावयेयुः । वस्तुतस्तु अप्रमेयशौर्यवीर्यपराक्रमनिधेर्भगवतो रावणवधो वा बकवधो वा कंसवधो वा कीटनिबर्हणमात्रमेवेति ध्येयम् । अत एवात्र गाथायां द्वितीयपादे "दुष्टराक्षसेश्वरमवलीलया विनाशितवतः" इति कथितम् ।

ननु रावणस्य अवलीलया विनाशितत्वकथनं कथमिव युज्यते ? रावणवधे महान्तः प्रयासा रामचन्द्रेणानुभूता इति हि श्रीरामायणतोऽवगम्यते ; अगस्त्यमहर्षिसकाशादादित्यहृदयोपदेशग्रहणपर्यन्ताः खलु प्रयासा अन्वभूयन्त । तथा नाम प्रयासभूम्ना कृते रावणवधे अवलीलया कृतत्वकथनं न युज्यते हीति शङ्का माभूत्, विभीषणप्रतिग्रहकाले * पिशाचान् दानवान् यक्षान् पृथिव्यां चैव राक्षसान् । अङ्गुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर ! * इत्युक्तवता, अथच * अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः .... निशास्तिस्रोऽतिचक्रमुः * इत्युक्तरीत्या त्रिरात्रव्यापिनि सागरोपवेशने कृते सत्यपि अनुपस्थितां सागरदेवतामुद्दिश्य प्रकुपितेन * चापमानय सौमित्रे शरांश्चाशीविषोपमान् । सागरं शोषयिष्यामि पद्भ्यां यान्तु प्लवंगमाः ॥ * इति परुषमूचुषा समनन्तरमेव सुप्र-

सत्त्वेन सागरदेवताप्रार्थनया * कूलेऽब्धेः किल दक्षिणस्य निवसन् दूरोत्तराम्भोधिगान् दैत्यान् एकपतत्रिणाऽच्छिन इतीयं किंवदन्ती श्रुता * इति (सुन्दरबाहुस्तवे) श्रीकूरनाथगुरुवरोक्तरीत्या समुद्रराजशत्रुगणनिलयभूत द्रुमकुल्य-नामकं बहुयोजनदूरवर्तिनं स्थानविशेषमुद्दिश्य शरमेकं प्रयुज्य तत्रस्थितान् दैत्यान् क्षणमात्रे निषूदितवता च राम-चन्द्रेण लङ्कांप्रति बाणस्यैकस्यैव तस्मादेव देशात्प्रयोगतः क्षणमात्रे कृत्स्ननिशाचरनिवहनिषूदनस्य कर्तुं शक्यत्वेऽपि तथानाम अकरणम् प्रयासशतानुभवनंच स्वकीयभूयस्तरगुणविशेषप्रपञ्चनार्थमेवेति वेदितव्यम् ॥ * आनयैनं हरि-श्रेष्ठ ! दत्तमस्याभयं मया। विभीषणो वा सुग्रीव ! यदिवा रावणस्स्वयम् ॥ * इत्युक्तवतो रामचन्द्रस्य रावणे जिघांसा नासीत्, अपि तु भृशमनुजिघृक्षैवासीदिति सुगमम्। * यो वज्रपाताशनिसंनिपातान्न चुक्षुभे नापि चचाल राजा। स रामबाणाभिहतो भृशार्तश्चचाल चापं च मुमोच वीरः ॥ * इत्युक्तियोग्यायां दशायां स्थिते सति रावणे * गच्छानुजानामि रणार्दितस्त्वं प्रविश्य रात्रिञ्चरराज ! लङ्काम्। आश्वास्य निर्याहि * इत्यनुगृह्य मुक्तवता रामचन्द्रेण प्रकाशितो गुणविशेष एक एव ह्यलमनुभवरसिकानां यावज्जीवमनुभवितुम्। * यत्तादृशागसमरिं रघुवीर ! वीक्ष्य विश्रम्यतामिति मुमोचिथ मुग्धमाजौ। कोऽयं गुणः कतरकोटिगतः कियान् वा कस्य स्तुतेः पदमहो बत कस्य भूमिः ॥ * [अतिमानुषस्तवे] इति खलु गुणविद्वा महान्तोऽनुसंदधते। तत्तादृशानेकगुणगण-प्रदर्शनार्थमेव कृतावतारस्य भगवतो रामचन्द्रस्य रावणादिवधे कृतमालस्यं न तदीयशौर्यवीर्यपराक्रमन्यूनताशङ्कावहं भवितुमर्हतीति अलं पल्लवितेन ॥

कृष्णस्य रामस्य च कीर्तिं गायन्त्यो गोपालबालिका अखिला अपि व्रतानुष्ठानौपयिकं साङ्केतिकस्थल-विशेषं प्रविष्टा इति बहिस्स्थिताभिर्गोपीभिरुक्तं श्रुतवती अन्तस्स्थिता गोपी प्राह—' यद्यपि बालिकास्ता यथायथं कालस्यानवबोधेन अकाले गतास्स्युः, तथाऽपि विवेकिनीभिरस्माभिस्तथा न गन्तव्यमकाले ; समुचिते काले गच्छेम ; शुक्रोदय आसीत्किमु ? पश्यत ' इति। अथ गोपिकाः प्राहुः नक्षत्रमण्डले दैत्यगुरोरुदितत्वम् देवगुरोरस्तमितत्वं च ॥ अत्र केचिद्विचारमारचयन्ति—धनुर्मासे शुक्रस्योदयः कदा ? गुरोरस्तमयः कदेति। वस्तुतो व्यर्थोऽयं विचारः ; लौकिकाः खलु जनास्तत्रतत्र शुक्रोदयस्य प्राभातिकलक्षणत्वं कथयन्तीत्येतावन्मात्रं जानन्त्यो गोपाङ्गना इदमूचुरिति ग्रहीतव्यम्। नक्षत्रताराग्रहचारविशेषान् वयमेव यथावन्न जानीम इति स्थिते का कथा वामदक्षिणभुजमिदानभि-ज्ञानां व्रजयोषिताम्।

अथ पक्षिणां प्रणादं द्वितीयाभिज्ञानत्वेन कथयन्ति। गोपीनां प्रबोधनोपक्रमे (षष्ठगाथायाम्) कथित-मिदमभिज्ञानं कथमिव पुनरपि कथ्यत इति शङ्का माभूत्, वृक्षषण्डस्थकुलायेषु जातः पक्षिणां प्रणादः पुरा प्रोक्तः ; इह तु अशनार्जनकामनया बहिः विशीर्णानां विहगानां कलकलः कथ्यत इति ग्रहीतुं योग्यम्। एवमुक्ते सत्यपि सहसा समुत्थाय अनागतां तां प्रति कथयन्ति गोपिकाः—भूयसीष्वस्मासु बोधयन्तीषु सतीष्वपि अन्तरेव जोषमव-तिष्ठसे त्वम्, तदिदं स्वकीयनयनसौन्दर्याभिमानभूम्ना खलु ; सत्यमेतादृशसौन्दर्यमस्ति तावत् त्वयि ; अनेन सौन्दर्येण भगवन्तं वशीकृत्य तस्यास्माभिरप्यनुभोक्तव्यतासंपादनमेव हि युक्तम्, परमपावनोऽयं समयविशेष इत्यपि

हन्त त्वया नावहितम्; जलाशये शिशिरे गाढमवगाह्य स्नातुं योग्ये समयविशेषेऽप्यस्मिन् अहह तल्पमधिशेषे; 'इदानीं त्वया निद्रा नैव क्रियेत, अपि तु भगवद्गुणानुभव एव क्रियेत' इति तु वयं जानीमः; अस्माभिस्सह मिलित्वा कर्तव्यस्य गुणानुभवस्य रहसि प्रत्येकशः करणं चौर्यप्रायमेव खलु; अनुचितमिदमह्नाय विहाय क्षिप्रमस्माभिस्सह संमिलिता भवेति॥

अथ ध्वन्यर्थविवरणम्॥ गाथायामस्यां संबोधनद्वितयं वर्तते नयनसौन्दर्यबोधकं पातिव्रत्यावबोधकं च। एतेन सदाचार्यस्य ज्ञानसम्पत्समृद्धत्वं पारमैकान्त्यं च प्रतिपादितं भवति; अनन्यदैवत्वमेव हि पातिव्रत्यम्, तदेव च पारमैकान्त्यम्, भगवद्विस्मरणे सत्यपि देवतान्तरस्मरणवैधुर्यपर्यवसितम्। तथाचैतादृशगुणद्वयाभिरामस्सदाचार्यस्संबोध्यत इति सिद्धम्। कृष्णकथां रामकथां च कीर्तयन्तो भक्तजना व्रतस्थलीं प्रविविशुरिति कथनेन—श्रीविष्णुपुराण श्रीभागवत श्रीरामायणादि प्रवचनश्रवणकुतूहलिनस्सच्छिष्याः प्रवचनार्थपरिकल्पितमास्थानमण्डपमध्यासत इत्युक्तं भवति। उभयवेदान्तरहस्यग्रन्थप्रवचनस्थलस्य "पावैक्कळम्" इति साङ्केतिकं नामधेयम्। अथ असुरगुरोरुन्नतेः सुरगुरोरवनतेश्च कथनेन—* भविष्यत्यधरोत्तरमित्युक्तिसाफल्यावहे एतादृशे कलिसाम्राज्यकाले हे आचार्यमणे! भवदुपदेशोऽत्यावश्यक इत्युक्तं भवति। पक्षिणां कोलाहलस्य प्रत्यभिज्ञापनेन उच्चैर्गतिप्रेप्साशालिनां सच्छिष्याणां मनोरथानामतटाः प्रवाहा स्समेधन्त इति सूचितं भवति। "शिशिरे जलाशये गाढावगाहनमकृत्वा किं ननु शेषे?" इति कथनेन प्रवचनावश्यकता सूचिता भवति; प्रवचनमकुर्वन्तो ये स्वयं ग्रन्थावलोकनं कुर्वते तेषां तावत् ग्रन्थेषु गाढावगाहनं न सिध्यति; प्रवचनार्थे तदवलोकनप्रवृत्तौ तु गाढावगाहनस्यावर्जनीयता भवति; यतो ह्याक्षेपसमाधानादिषु परिपूर्णसामर्थ्यसंपादनाय टीकाटूकादीनमपि परिशीलनं कृतं भवेत्। तथाच. शिष्येभ्यः प्रवचने रुचिं विहाय किमर्थं स्वानुभवमात्रव्यग्रता क्रियते? इत्युक्तं भवति। समीचीनोऽयं समय इति कथनेन—* वक्ता श्रोता च दुर्लभ इत्युक्तरीत्या वक्तुः श्रोतुश्च दौर्लभ्यमादधाने कालेऽस्मिन् तादृशदौर्लभ्यव्यपगमोऽधुना संजात इति हेतोः कालस्यास्य अलभ्यलाभता प्रोक्ता भवति। समुत्कण्ठितैः शिष्यैस्सहानुभवं विहाय स्वात्मनैव केवलमनुभूयत इत्येतत् चौर्यम्; तन्माभूदित्युपसंहृतम्॥ .... (१३)

एतद्गाथासारसंग्राहकः श्लोक एषः—

श्लो॥ सर्वं स्त्रैणं प्रयातं व्रतभुवि बकवक्त्रच्छिदं पङ्क्तिवक्त्र-
च्छेत्तारं कीर्तयत्तत् समुदित उशना अस्तमैद्गीष्पतिश्च।
निष्क्रान्ताः पक्षिणोऽपि प्रियसखि! न कथं बुध्यसे शीतभीता
स्नातुं द्रागेहि पुण्ये दिन इति गृणती पातु गोदा धरित्रीम्॥ १३॥

इति त्रयोदशगाथाविवरणं समाप्तम्॥

१४. चतुर्दशीगाथा—उङ्गळ्पुळैक्कडै

उङ्गळ् पुळैक्कडै तोट्टत्तु वावियुळ् * शेङ्कळुनीर्वाय्नेहिळ्न्दाम्बल्वाय् कूम्बिन काण् *
शेङ्गल् पोडिक्कूरै वेण्पल् तवत्तवर् * तङ्गळ् तिरुक्कोयिल् शङ्गिडुवान् पोहिन्नारु *
एङ्गळै मुन्नमेळुप्पुवान् वाय्पेशुम् * नङ्गायेळुन्दिराय् नाणादाय् नावुडैयाय् *
शङ्गोडु शक्करमेन्दुम् तडक्कैयन् * पङ्गयक्कण्णानै प्पाडेलोरेम्बावाय् ॥ १४ ॥

पुरस्तादेवाहमुत्थाय युष्मान् प्रबोधयेयमिति कृतप्रतिज्ञे देवि ! युष्मदीयनिष्कुटोद्यानस्थवापिकायां कल्हाराणि विकसितान्यभूवन् ; काषायाम्बरधारिणः शुभ्रदन्तपङ्क्तयस्तापसाः स्वकीयदेवालयसमुद्घाटनाय कुञ्चिकाहस्ताः प्रयान्ति। अयि निर्लज्जे ! हे वाग्वैभवशालिनि ! शंखचक्रधरदिव्यपाणितलं पङ्कजविलोचनं भगवन्तं कीर्तयितुमुत्तिष्ठ तावत् ॥ (इति मूलगाथाविवर्तः)

'अहमेव पुरस्तात्प्रबुध्य समागत्य सर्वा अपि गोपीः प्रबोधयिष्ये' इति पूर्वेद्युः स्वात्मना कृतां प्रतिज्ञां विस्मृत्य निद्राविवशां कामपि गोपिकां प्रतिबोधयन्ति गाथयाऽनया। प्राभातिकान्यभिज्ञानानि कतिपयानि कथ्यन्तेऽत्र। कल्हारपुष्पाणां विकसितत्वं कुमुदकुसुमानां मुकुलितत्वं च प्रभातचिह्नतया प्रथमतो निगद्यते। सर्वत्र वापिकासु ईदृशी परिस्थितिरिति तावद्वक्तव्यम् ; वस्तुतः प्रभातकालिकं कार्यं सर्वत्रापि हि समरूपं भवति। अधस्तात्सप्तमगाथायां भरद्वाजपक्षिणां सार्वत्रिकः कलकलः किं न श्रुत इति कथितम् ; उपरिष्टाच्च अष्टादश्यां गाथायां "सर्वत्रापि कुक्कुटास्समागत्य कूजन्ति" इति वक्ष्यते। एवमत्रापि सर्वत्रेति वक्तव्ये तथाऽनुक्त्वा "युष्मदीयनिष्कुटोद्यानस्थवापिकायाम्" इति कथनं कथमिव युज्यते? गृहान्तःप्रवेशमलभमाना द्वारि क्लिश्यमानाश्चैता गोप्यः स्वप्रतिबोध्यमानगोपिकागृहनिष्कुटस्थोद्यानसन्निवेशं कथमिव द्रष्टुं प्रभवन्ति? असंभवपराहतं ह्येतत् ; कथमिदमुच्यते? इतितावच्छङ्का संजायते। अत्रोच्यते। "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" इति वाचस्पतिमिश्रोक्तरीत्या प्रमाणेषु अनुमानस्यैव प्राधान्यमिच्छन्ति तार्किकाः। "प्रत्यक्षमेकं चार्वाका" इत्युक्तरीत्या चार्वाकास्तु प्रत्यक्षस्यैव प्रामाण्यमिच्छन्ति। वैदिकदर्शनधुरन्धरास्तु प्रत्यक्षस्य अनुमानस्य शास्त्रस्य च प्रामाण्यमभ्युपयन्ति। यद्यपि शास्त्रतुल्यप्रामाण्यं प्रत्यक्षानुमानयोर्नाङ्गीकुर्वन्ति, तथाऽपि प्रबलप्रमाणान्तरजन्योपमर्दरूपबाधविरहितस्थलेषु प्रत्यक्षानुमानयोरपि प्रामाण्यस्वीकारः स्थितः। अस्यां गाथायां प्रत्यक्षानुमानशब्दानां प्रामाण्यस्वीकारो द्योत्यते। दिव्यप्रबन्धस्यास्य शास्त्ररूपत्वादपि विषयस्यास्यात्र विनिवेशनमुचितमेव हि॥ 'पुरस्तादेवाहं युष्मान् प्रबोधयेयमिति प्रतिश्रुतवती सेयं गोपिका' इति प्रकाशनेन शब्दप्रामाण्यं प्रास्तावि ; आप्तोच्चरितवाक्यं हि शब्दः॥ "काषायाम्बरधारिणो यतयः प्रयान्ति" इति प्रदर्शनेन प्रत्यक्षप्रामाण्यं प्रास्तूयत। परिशिष्टोऽनुमानप्रामाण्यप्रस्तावः "युष्मदीयनिष्कुटोद्यानस्थवापिकायाम्" इत्यादिना क्रियते। सार्वत्रिकबाह्योद्यानगतकल्हारोन्मीलनकुमुदनिमीलनरूपहेतुना अदसीयनिष्कुटोद्यानगतकल्हारोन्मीलनकुमुदनिमीलनसाधनं क्रियत इति वेदितव्यम्। तथाचानुमानिकतयैवैतदभिधीयत इति सिद्धम्॥ एवमभिधानस्य प्रयोजनं शास्त्रार्थविशेषसमुद्बोधनमिति च सिद्धम्॥

कथितमिदं प्राथमिकं प्राभातिकलक्षणं श्रुतवती अन्तस्स्थिता गोपिका 'बहिरेवावतिष्ठमानानां युष्माकमस्मदीयनिष्कुटोद्यानीयसन्निवेशस्य दुर्गमत्वात् वितथमिदमभिज्ञानमिति असिद्धिमुक्तवती। अथ चाभिज्ञानान्तरमाहुः—काषायाम्बरधारिणो यतयः कैङ्कर्यपराः कुञ्चिकाहस्तास्सन्तो देवालयं व्रजन्तीति। * माठपत्यं यतिः कुर्याद्विष्णुपूजाभिवृद्धये * इति विष्णुतिलकसंहितोक्तरीत्या तत्रतत्र दिव्यदेशेषु भगवदाराधनकर्मणि अन्यान्येषु च कैङ्कर्येषु साक्षाद्वा परम्परया वा यतयो नियुक्तास्सन्तीति श्रीरङ्गवेङ्कटाद्रिवनाद्रितोताद्रितिरुक्कुरुङ्गुडिकुरुकापुरीप्रभृतिषु दिव्यस्थलेष्वद्यापि ननु प्रात्यक्षिकमेतत्; गोदादेव्याः कालेऽप्येषा पद्धतिः सुभिक्षसमृद्धाऽऽसीदिति सम्यगवगम्यते। श्रीभक्तिसारमुनीन्द्रोऽपि स्वकीये तिरुच्चन्दविरुत्ताख्यदिव्यप्रबन्धे श्रीरङ्गदिव्यदेशप्रशंसनपरायामेकस्याम् [* शितैयित्तु मुत्तलमूक्किलमून्नुतण्डरोन्निनर्—अत्तपत्तरुशुत्तिवाक्लुमन्दणीररङ्गमे * इति] गाथायां त्रिदण्डियतिततिसमृद्धिरभिहिताऽत्र स्मर्तव्या। 'भिक्षेति शिष्यजनरक्षणदक्षिणेति शाटीति शाश्वतमठोपधिकल्पनेति। ग्रन्थोपसंग्रहणमूल्यमिति ब्रुवाणाः संन्यासिनोऽपि दधते महतीं धनाशाम्"॥ इति संकल्पसूर्योदयोदितरीत्या न खलु सर्वेऽपि यतयो गर्हणीयचारित्रा भवन्ति। अतथाविधाः शिष्टगरिष्ठा यतयश्च सन्ति खलु तत्रतत्र विरलाः। तादृशां तापसानाम् स्वाधिकारलक्ष्यभूतदेवालयकवाटोद्घाटनाय कुञ्चिकाघलघलात्कारमुखरं गमनमिह निगदितं चारुतरम्। दिव्यदेशेषु भृशमुपलाल्यमाने दिव्यप्रबन्धेऽस्मिन् एतादृशप्राभातिकलक्षणप्रकथनमत्यावश्यकं च।

तदिदमभिज्ञानकथनं श्रुतवती गोपिका प्राह—यतयः खलु ते; * सततं कीर्तयन्तो मामिति गीतोक्तया रीत्या तेषामेतत्कार्यं सार्वदिकमेव न तु कालविशेषनियतम्; ततश्च नैतत् प्राभातिकलक्षणं भवितुमर्हतीति। अथ गोप्यः आचक्षते-अस्मदुक्तिः काममप्रमाणं भवतु; सर्वा अपि गोपीरहमेव पुरस्तात्प्रबोधयानीति भवत्या कथितं वचनमपि किं न प्रमाणमिति। इदमाकर्ण्य सा किमपि प्रतिवक्तुमशक्नुवन्ती जोषमास्त। तदा कथयन्तीमाः "अयि निर्लज्जे!" इति। * प्रसीदन्तु भवन्तो मे ह्रीरेषा हि ममातुला। यदीदृशैरहं विप्रैरुपस्थेयैरुपस्थितः॥ * इति महतां सविधे स्वलज्जानिवेदनतः प्रकाशितनिजदिव्यगुणविशेषेण रामचन्द्रेण सह वासविरहात् तदीयदिव्यवैभवश्रवणभाग्यविरहात् निर्लज्जकृष्णसंसर्गातिशयवशाच्च खलु त्वम् एवं लज्जां विधूय निद्राविवशाऽसि-इत्याहुरिव।

अथ सा पृच्छतिस्म—निशीथे समागत्य निर्लज्जे! इति मामधिक्षिपथ; निर्लज्जया मया सह सङ्गो युष्माकं वर्जनीय एव खलु। तथाऽपि किमिति मद्गृहद्वारे स्थित्वा क्लिश्यध्वे? इति। तदुत्तरतया प्राहुः—हे वाग्वैभवशालिनि! इति। तव वाग्वैभवमन्यादृशमिति वयं जानीमः; कृष्णसकाशे तव पुरस्कारेण वयं यदि गच्छेम, तर्हि स तव वाग्वैदग्ध्यविवशीकृतस्सन् सर्वास्वस्मासु सुप्रसन्नो भवितेति प्रत्याशयैव वयं त्वां प्रतिपालयाम इत्युक्तं भवति। एतादृशीं प्रशंसामाकर्ण्य निर्लज्जत्वोक्तिप्रयुक्तममर्षं विधूय हर्षप्रकर्षविवशा सती 'अयि भोस्सख्यः! अहमधुनैव समागच्छामि, कथयत, सर्वाभिरस्माभिस्संमिलिताभिः किं कर्तव्यम्?' इत्यनुयुयुजे; तत्रोत्तरमाहुः—शंखचक्रधरदिव्यपाणितलं पङ्कजविलोचनं भगवन्तं कीर्तयितुमुत्तिष्ठ तावदिति॥ यद्यपि * जातोऽसि देवदेवेश! शंखचक्रगदाधर! * इत्युक्तरीत्या कृष्णो भगवान् दिव्यहेतितितिधारी समवततार; तथाऽपि सद्य

एव * उपसंहर विश्वात्मन् रूपमेतच्चतुर्भुजमिति पित्रोः प्रार्थनया दिव्यहेतिवर्ग मुपसंजहारेति स्थितम्; तथाच दिव्यायुधविरहितं तं कथमिमा गोपकन्यकाः शंखचक्रधारिणं जानन्तीति काचिदाशङ्काऽत्र भवितुमर्हति। अत्रोच्यते; दिव्यहेत्युपसंहारप्रार्थनावसरे * जानातु माऽवतारं ते कंसोऽयं दितिजन्मजः * इति कथनात् आसुरप्रकृतीनामेव चक्षुरगोचरतया कृतं दिव्यायुधवैशिष्ट्यम्; प्राणनिर्विशेषप्रेयसीनामासां तदवलोकनमव्याहतमेवेति बोध्यम्। श्रीभट्टनाथसूक्ते द्वितीयशतकप्रथमदशकव्याख्यानावतारिकायामस्मदीयायाम् अमुमेव विषयमधिकृत्य चारुतरैतिह्यविन्यसनपूर्वकं यदस्ति लिखितम् (४२ तमे पुटे), तदपीह कटाक्षणीयम्॥

(ध्वन्यर्थविवरणम्) * अनादिमायया सुप्तो यदा जीवः प्रबुध्यते * इत्युक्तरीत्या अनादिमायया स्वपतां संसारिणां प्रतिबोधनाय [समुज्जीवनाय] पुरस्तादेव पौराणिकसूचितस्वावतार आचार्यसार्वभौम उद्बोधनमभ्यर्थ्यते। * कलौ खलु भविष्यन्ति नारायणपरायणाः। क्वचित्क्वचिन्महाभाग! द्रविडेषु च भूरिशः॥ कलौ कश्चिद्भविष्यति * इत्यादिपुराणवचांसि आचार्यसार्वभौमावतारं पुरस्तादेव आवेदयन्तिस्म हि। तादृशावेदनलक्ष्यभूत आचार्य इह विवक्षितः। निर्लज्जत्वकथनमाचार्यविषये दूषणं न, अपि तु भूषणमेव। लज्जाप्रसक्त्यभावपरमिदं वचनम्। शिष्याणां कृते उपदेशादीनाम् अकरणे सति लज्जा भवित्री; यथावत् स्वकृत्यकरणात् लज्जाप्रसक्तिर्नास्तीति तात्पर्येण निर्लज्जत्वमुक्तमिति बोध्यम्, अकृत्यकरणे कृत्याकरणे वा सक्तानामेव हि लज्जाप्रसक्तिः॥

अथ वाग्वैभवशालित्वकथनमाचार्ये सूपपन्नम्; * नानृग्वेदविनीतस्य नायजुर्वेदधारिणः। नासामवेदविदुषः शक्यमेवं प्रभाषितुम्॥ नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्। बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्॥ * इति सुविस्मितरामचन्द्रसंश्लाघितहनुमत्साधर्म्यं बिभर्ति यः खलु वैदुष्यविषये, स एव ह्याचार्यः। [युष्मदीयनिष्कुटोद्यानस्थवापिकायां कल्हाराणि विकचानीत्यादिना] * दहं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम् * भक्तानां यद्वपुषि दहरं पण्डितं पुण्डरीकम् * इत्यादिप्रतिपादितं हार्दपुण्डरीकं सततविकस्वरं वः; अज्ञानतिमिरगन्धोऽपि नास्तीत्युक्तं भवति। काषायाम्बरधारिण इत्यादिना उपस्थितानां शिष्याणां वैभवमुच्यते। काषायाम्बरधारिण इत्यनेन विरक्ताग्रेसरत्वमुच्यते। [शुभ्रदन्तपंक्तयः] * एको मुक्तातपत्रेत्यादि श्रीगुणरत्नकोशसूक्तौ * यत्तस्मै विष्ठतेऽन्यः कृपणमशरणो दर्शयन् दन्त पङ्क्ती * इत्युक्तरीत्या क्षुद्रनरेन्द्रसकाशे ये न प्रदर्शयन्ति दन्तपङ्क्ती, ते खलु शुभ्रदन्तपङ्क्तयः। * काचाय नीचं कमनीयवाचा मोचाफलस्वादमुचा न याचे * इत्येवंविधदृढाध्यवसायशालिनः तृणीकृतविरिञ्चादिनिरङ्कुशविभूतयो महात्मान इति कथितं भवति॥ तापसा इत्यनेन शरणागतिनिष्ठा इत्युक्तं भवति; * तस्मान्न्यासमेषां तपसामतिरिक्तमाहुरित्युपनिषदा न्यासस्य विलक्षणतपस्त्वेनाम्नानात्॥ स्वदेवालयसमुद्घाटनार्थं गता इत्यनेन—जन्मान्तरशतसहस्रसुकृतैकलभ्यमर्चावतारप्रावण्यमुक्तं भवति॥ शंखचक्रधरदिव्यपाणितलमित्यनेन—शिष्याणां बाहुमूलपरिचिह्नितशंखचक्रत्वरूपसंस्कारविशेषसंस्करणाय सुदर्शनपाञ्चजन्यशालित्वमुक्तं भवति गुरुवरे॥ पङ्कजविलोचनमित्यनेन—* न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः। ते पुनन्त्युरुकालेन दर्शनादेव साधवः * इत्युक्तरीत्या कटाक्षवीक्षामात्रेण पापिनामपि पवित्रीकरणचणनयनारविन्दशालिता कथिता भवतीत्यलम्॥ १४

एतद्गाथासारसंग्राहकः श्लोक एषः—

श्लो ॥ प्रत्यूषेऽशेषयोषा अहमिह सहसोत्थापयेयं पुरस्तात्
इत्युक्त्वा किं नु शेषे? सखि! तव सदने निष्कुटे दीर्घिकायाम्,
कल्हारं फुल्लमासीत्, यतय उपगताः किङ्कराः कुञ्चिकाढ्याः
किं ते व्रीडाऽपि नोदैदिति कथितवती भातु मे वाचि गोदा ॥ १४ ॥

इति चतुर्दशगाथाविवरणं समाप्तम् ॥

---

१५. पञ्चदशीगाथा—एल्लेयिळङ्किळिये!

एल्लेयिळङ्किळिये इन्नमुरङ्गुदियो * शिल्लेन्नळैयेन्मिन् नङ्गैमीर् पोदर्हिन्रेन् *
वल्लैयुन् कट्टुरैहळ् पण्डे युन्वायरिदुम् * वल्लीर्हळ् नीङ्गळे नानेतानायिडुह *
ओल्लै नीपोदायुनक्केन्न वेरुडैयै * एल्लारुम् पोन्दारो पोन्दार् पोन्देण्णिक्कोळ् *
वल्लानै कोन्नानै मात्तारै मात्तळिक्क वल्लानै * मायनैप्पाडेलोरेम्बावाय् ॥ १५ ॥

अयि शुकशावोपमेये गोपिके! किमद्यापि निद्रासि? हन्त किमेतत्? (इति बहिर्गोप्यः कथयन्ति।) अयि भोः पूर्णा गोप्यः! मा नाम कोपहेतुशब्दप्रयोगं कुरुत, इयमहमागच्छामि। (इति अन्तर्गोपी कथयति।) त्वं तावदतीव कठिना; त्वदुक्तिकाठिन्यं चिरादेव वयं विद्मः (इति बहिर्गोप्यः।) कठिना नाहम्, यूयमेव; (अथ वा) अहमेव भवानि, (इति अन्तर्गोपी.) क्षिप्रं समायाहि; त्वं पार्थक्येन किमनुभवसि? (इति बहिर्गोप्यः) सर्वाश्च गोप्यः किं ननु संगताः? (इति अन्तर्गोपी) संगता एव सर्वाः; त्वं बहिरागत्य ताः परिगणय। कंसप्रेरितपरुषवेतण्डदण्डनपण्डितं वैरिव्रातसमूलोन्मूलनविचक्षणम् आश्चर्यचर्यानिरतं च कृष्णं गायेम. (इति बहिर्गोप्यः) ॥

सर्वासामपि भागवतीनां वृन्दमवेक्षितुमुत्सुका काचन परमभागवती प्रतिबोध्यतेऽनया गाथया। अन्तश्शयानायाः गोपिकाया बहिस्तिष्ठन्तीनां गोपिकानां च मिथस्संभाषणं सुस्पष्टमेव गाथायामस्यां निबद्धम्। द्राविड्यां मूलगाथायाम् प्रथमश्चरणो बहिस्स्थितवल्लवीनां वचः। द्वितीयश्चरणः अन्तश्शयानायाः। तृतीयश्चरणो बहिस्स्थितानाम्। चतुर्थश्चरणः अन्तश्शयानायाः। पञ्चमश्चरणो बहिस्स्थितानाम्। षष्ठचरणस्य पूर्वभागः अन्तश्शयानायाः। उपरिष्टादवशिष्टं बहिःस्थितानाम् ॥ एवं संवादात्मना पद्यविन्यसनस्य किं प्रयोजनमिति चेत्; अस्ति परमं प्रयोजनम्। अपूर्वस्य कस्यचिच्छास्त्रार्थस्य आविष्करणमेव तत्। संवादेऽस्मिन् चतुर्थवाक्ये, "कठिना नाहम्, यूयमेव" इति पूर्वमभिधाय, अनुपदमेव "अहमेव तादृशी भवानी" ति यदुक्तम् तदेकमेव गाथाया अस्याः प्राणनाडी। न केवलं गाथाया अस्याः; त्रिंशद्गाथात्मकस्य कृत्स्नस्याप्यस्य दिव्यप्रबन्धस्येत्यपि पूर्वाचार्या अशेरते।

लोके तावदपराधकरणं सर्वेषामपि जनानां प्रकृतिसिद्धम्, कृतापराधा बहवो जनाः प्रायः स्वापराधमपलपन्ति, केचित्तु कृतमपराधमभ्युपगच्छन्ति, यद्यपि कृतस्यापराधस्य निह्नवापेक्षया अभ्युपगमः श्रेयानेव ; ततोऽप्युत्तुङ्गतरा काचन कक्ष्या वर्तते—अपराधः स्वेन कृतो वा भवतु मावा ; स्वस्मिन् दोषः अस्तु वा मा वा ; दोषवानसि त्वमिति परैः कथिते सति, दोषवत्त्वारोपणमात्रमेवैतदिति वस्तुतत्त्वे स्थितेऽपि 'सत्यं दोषवानेवाहमस्मि, गुणदरिद्र एवाहमस्मि' इति हार्दमङ्गीकरणं यत् तदिदम् असमाभ्यधिका उत्तुङ्गकक्ष्या। * रूक्षाक्षराणि शृण्वन्वै तथा भागवतेरितान्। प्रणामपूर्वकं क्षान्त्या यो वदेद्वैष्णवो हि सः॥ * इति प्रमाणरत्नं विराजते ; एतद्रीत्या सर्वथाऽपि स्वस्य दुष्टत्वाङ्गीकरणं श्रीवैष्णवत्वसीमेति शास्त्रघण्टापथः। * ये कण्ठलग्नतुलसीनलिनाक्षमाला ये बाहुमूलपरिचिह्नितशंखचक्राः। ये वा ललाटफलके लसदूर्ध्वपुण्ड्रास्ते वैष्णवा भुवनमाशु पवित्रयन्ति॥ * इत्यादिवचनप्रतिपन्नं श्रीवैष्णवत्वं तावत् बाह्यवेषमात्रे तिष्ठति। आत्मगुणसंपत्तिरेव प्रधानंश्रीवैष्णवता। सचात्मगुणः स्वस्मिन् सतोऽप्यसतोऽपि दुष्टत्वस्य मनागप्यनिषेधेन हार्दमङ्गीकरणमेव। * न मन्थराया न च मातुरस्या दोषो न राज्ञो न च राघवस्य। मत्पापमेवात्र निमित्तमासीद्वनप्रवेशे रघुनन्दनस्य॥ * इत्यनुसंहितवन्तं भरतं महात्मानं स्वात्मना तुलयितुं क्षमः पुरुषतल्लजो दुर्लभः खलु लोके।

पश्यत; महतीषु परिषत्सु उपन्यासकपदवीमधितिष्ठन्तः पंडितप्रवरा उपन्यासोपक्रमे "सर्वात्मनाऽप्यहमज्ञः' न किमपि शास्त्रं पर्यचैषम्, गुरुकुलं नैव समसेविषि ; तथाऽपि महतामाज्ञामुल्लङ्घयितुमशक्तः साहसेन किमपि प्रवक्तुमारभे ; महात्मभिस्सर्वथा शिक्षणीयोऽहमस्मि" इत्यतिमात्रनैच्यमाविष्कुर्वन्तो भाषन्ते। एवमुपन्यासान्तेऽपि किमपि भाषमाणा उपसंहरन्ति। अनन्तरं यः कोऽपि पुमान् "अयमज्ञानामग्रणीः, असंबद्धमेव किमपि किमपि प्रलपितवान् महासभायाम्, महदिदं साहसम्" इति कथयति चेत्, तदाकर्णनमात्र एव सोऽयं प्रवक्ता रोषकषायिताक्षस्सन् किमात्थ रे धूर्तेति तं प्रहर्तुं परिनिन्दितुं वा परिकरमाबध्नाति ; "भगवन्! सत्यमेव भवतोच्यते, मयाऽप्युक्तमेव खल्वेतत्" इति सानुमोदनं सविनयं च तदुक्तिमभिनन्दितुमुत्कण्ठितो जनो नैकोऽप्युपलभ्येत भुवि। अज्ञमितज्ञबहुज्ञविभागमन्तरेण सर्वोऽपि जन एतादृश एव प्रायः। सत्यं सुदुर्लभो ह्येतादृगधिकारपरिपाकः। एतस्य श्रैष्ठ्यं प्रकाशयितुमेव मिथस्संवादरूपेण सेयं गाथा निबद्धा। संवादविन्यसनमन्तरेण परमार्थस्यास्य प्रतिपादनं किमु दुष्करमितिचेत्, दुष्करमेवेति वक्तव्यम्। * कालिन्दि! ब्रूहि कुंभोद्भव! जलधिरहम् * भिक्षार्थी स क्व यातस्सुतनु बलिमखे * इत्यादिभिस्संवादात्मकपद्यरत्नैर्योऽर्थः प्रत्याय्यते स प्रकारान्तरेण प्रत्याययितुमशक्य एव हि। कथञ्चित्प्रत्यायितोऽपि रसपुष्टिं न धत्ते। परमार्थस्यास्य परोपदेशमुखेन प्रकाशनापेक्षया स्वानुष्ठानमुखेन प्रकाशन हि वरम्; तच्च एवंविधसंवादग्रथनमन्तरा न सुशकमित्याशयानया गोदादेव्या चारुतरं निबद्धा सेयं गाथा।

अथ संवादं विवृणुमः; "अयि शुकशात्रोपमेये गोपिके! किमद्यापि निद्रासि?" इति बहिस्स्थिताभिर्गोपीभिरुक्तम्; इदं वाक्यमाकर्ण्य अन्तश्शयानया "अयि भोः पूर्णा गोप्यः! मा नाम कोपजनकशब्दप्रयोगं कुरुत' इति कथितम्। प्रथमवाक्ये कोपहेतुः शब्दः को नाम प्रयुक्तोऽस्तीति विचिन्तनीयम्। लोके तावत् वृथा

स्तुतिकरणेन केषाञ्चिद्भवति कोपः ; अपरेषां तु अधिक्षेपेणे स भवति। इह तु प्रथमवाक्ये स्तुतिश्च वर्तते अधिक्षेपश्च वर्तते। "अयि शुकशाबोपमेये गोपिके!" इति संबोधनं स्तुतिरूपम्; "किमद्यापि निद्रासि" इतिवचस्तु अधिक्षेपरूपम्। तदिदं श्रुतवत्या अन्तश्शयानाया गोप्याः कोपस्तु जात इति तदीयेन (द्वितीयेन) वाक्येन विज्ञायते। तदिदं कोपजन्म स्तुतिप्रयुक्तं वा भवतु, अधिक्षेपप्रयुक्तं वा भवतु; कुपितां तां प्रति बहिस्स्थिता आहुः [त्वं तावदतीव कठिना; त्वदुक्तिकाठिन्यं चिरादेव वयं विद्मः] इति। तस्या वचसि कीदृशं काठिन्यमस्तीति चेत्; "अयि भोस्सख्यः!" इति वक्तव्ये "अयि भोः पूर्णा गोप्यः!" इति यत्कथितं तत् कठिनमेव। सखीकथितं मर्षणीयमेवेत्यगृहीत्वा [मा नाम कोपजनकशब्दप्रयोगं कुरुत] इति यदुक्तं तदपि कठिनमेव। अतश्च [त्वं तावदतीव कठिना; त्वदुक्तिकाठिन्यं चिरादेव वयं विद्मः] इति बहिस्स्थिताभिरुक्तमुपपद्यते। अथ चावादीदन्तश्शयाना [कठिना नाहम्, यूयमेव] इति। इतःपरं क्रमशो वाक्कलहेन भृशमभिवृद्धेन भवितव्यम्; अभिवृद्धेस्त्ववकाशमप्रदाय "अहमेव तादृशी भवानि" इति अन्तश्शयानाया उक्तिविन्यसनं यदिह समभूत्तदिदमतिचारु। दोषस्य स्वनिष्ठत्वाङ्गीकरणेन वाक्कलहप्रशमनं क्षणेन कृतम्; उत्तमश्रीवैष्णवलक्षणभूतमात्मगुणपौष्कल्यं च प्रकाशितम्॥ दोषस्य स्वनिष्ठतयाऽङ्गीकारो यद्यपि बहिस्स्थितानां गोपीनां वचसाऽपि प्रकाशयितुं शक्यः, तथाऽपि अन्तश्शयानाया वचसा प्रकाशनात् एवंविधो विलक्षण उत्तमाधिकारी भूमावेक एव लभ्येत, न तु बहव इति व्यञ्जनं सिध्यति॥

अहमेव तादृशी भवानीति वचसो निशमनानन्तरं विवादस्य प्रशान्तत्वात् पुनरपि विवादोत्थापनं नैव युक्तम्। तथाऽपि बहिस्स्थिता गोप्यो विवादं पुनरुत्थापयन्त्य इव क्षिप्रं समायाहीत्येतावन्मात्रमनुक्त्वा [त्वं पार्थक्येन किमनुभवसि?] इति पप्रच्छुः। अयुक्तोऽप्ययमनुयोगः किमर्थं कृत इति चेत्, 'पुनरप्येषा विस्मृतस्वस्वरूपा सती किं विवदितुमारभेत?' इति परीक्षार्थमेव। सा तु सुदृढस्वरूपबोधा नैव परीक्षायां भङ्गमवाप। "सर्वाश्च गोप्यः किं ननु संगताः?' इति प्रश्नतः स्वकीयं भागवतबृन्दसेवाहेवाकमेव प्रकाशितवती। अथाहुर्बहिस्स्थिताः [संगता एव सर्वाः, त्वं बहिरागत्य परिगणय] इति। एवं नाम कथनस्य हृदयं किमिति चेत्; गणनावसरे प्रतिव्यक्ति चाङ्गुलिस्पर्शस्य कटाक्षवीक्षणस्य च संभवेन * यं यं स्पृशति पाणिभ्यां यं यं पश्यति चक्षुषा। स्थावराण्यपि मुच्यन्ते किं पुनर्बान्धवा जनाः॥ * इत्युक्तरीत्या निस्तुलस्य श्रेयसः प्राप्तिरवश्यं भाविनीति सूचनमेव हृदयम्।

अथ [कंसप्रेरितपरुषवेतण्डदण्डनपण्डितम्] इत्यादिना, सर्वासां संमिलितानां गानगोचरत्वेन कृष्णचर्याविशेषाः केचिदभिधीयन्ते। कंसः कृष्णबलरामावक्रूरद्वारा मथुरापुरीमानाय्य कुवलयापीडाख्यस्वकीयमत्तमातङ्गमुखेन कृष्णं मारयितुमैच्छत्; तेन च मत्तगजेनास्कन्दितो नन्दनन्दनः * सख्यः पश्यत कृष्णस्य मुखमत्यरुणेक्षणम्। गजयुद्धकृतायासस्वेदाम्बुकणिकाचितम्॥ * इति कथयन्तीनां मथुरावासयोषितां मनांस्यानन्दयन्नेव हस्तिनं तम् आधोरणेन सहैव सद्यो व्यापादितवानिति वेतण्डदण्डनपाण्डित्यकथा॥ अथ, "वैरिव्रातसमूलोन्मूलनविचक्षणम्" इत्यनेन राघवाद्व्यावृत्तिरभिव्यज्यते। राघवस्तु विश्वामित्रयज्ञरक्षणकाले मारीचं यदि निरवशेषं

व्यापादितवान् स्यात् अथ तज्जनितानर्थभागी न स्यात्। यदि च वा शूर्पणखां ताटकावत् नामावशेषितां कृतवान् स्यात् तदाऽपि सीतावियोगदुःखभागो न स्यात्। * शत्रुशेषं न शेषयेदिति शास्त्रं विस्मृत्य शत्रूणां सशेषमवस्थापनेनैव रामचन्द्रो भूरितरक्लेशभाजनं बभूवेति मन्यमानश्चतुरः कृष्णः स्वयं शत्रून् समूलमुन्मूलितवानिति॥ अथ आश्चर्यचर्यानिरतमित्यत्र * घुंघुमिति किं भ्रमति अम्ब! दधिमध्ये डिम्भ! ननु भूतमिह दूरमपयाहि। अम्ब! नवनीतमिति संवदति कृष्णे मन्दहसितं जयति मातु रतिरम्यम्॥ * इत्येतपद्यरत्नमनुसन्धेयम्॥

अस्या गाथाया ध्वन्यर्थविवरणप्रयासोऽनपेक्षितः; सच्छिष्यप्रधानलक्षणविशेषप्रपञ्चनस्यैव गाथापरमतात्पर्यत्वेन विवृतत्वात्। अथापि पुनः किञ्चिदिव विवरणं वितन्यते। "अयि शुकशावोपमेये!" इति संबोधनेन—शुकशावो यथा शिक्षितानि वचनानि अन्यूनानतिरिक्तमनुवदति तथा पूर्वाचार्यशिक्षितसूक्त्यनुविधायिवचसा भवितव्यं सच्छिष्येणेति सूचितं भवति। कृष्णो यथा दुष्टं दन्तावलं जघान, तथा आचार्योऽपि पञ्चेन्द्रियरूपमत्तमातङ्गमदविनाशनविशारद इति बोध्यम्॥ आचार्यस्य वैरिव्रातसमूलोन्मूलनं नाम शाक्योलूक्यादिदुर्मतानां सर्वात्मना विध्वंसनमेव। कामक्रोधलोभमोहमदमात्सर्यादिदुर्गुणदूरीकरणं वा॥ अथ च आश्चर्यचर्यानिरतत्वम्—नित्यसंसारिणामपि नित्यसूरिपरिषन्निवेशनात्मकं वेदितव्यम्॥ १५

एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ अद्यापि स्वापसक्तिः कथमयि! सखि! ते कीरशावोपमेये!
किं ब्रूषे निष्ठुरोक्तिं चिरपरिचितमेवोदितं कर्कशं ते।
क्षन्तव्याऽहं झटित्येवखिलमुपगतं स्त्रैणमुद्घातुमीशम्
मातङ्गघ्नं रिपुघ्नं न पृथगनुभवेश्यूचुषी श्रीः शरण्या॥ १५॥

इति पञ्चदशगाथाविवरणं समाप्तम्॥

---

१६. षोडशी गाथा—नायहनाय्निन्र॥

नायकनाय्निन्र नन्दगोपनुडैय कोयिल् काप्पाने * कोडि तोन्नुम् तोरण
वाशल् काप्पाने * मणिक्कदवम् ताळ्तिरवाय् * आयर्शिरुमियरोमुक्कु * अरैपरै
मायन्मणिवण्णन् नेन्नले वाय्नेर्न्दान् * तूयोमाय् वन्दोम् तुयिलेळप्पाडुवान् *
वायाल् मुन्नमुन्नम् माचादेयम्मा * नी नेशनिलैक्कदवम् नीक्केलोरेम्बावाय्॥ १६॥

नायकतया स्थितस्य नन्दगोपस्य भवनद्वारपालक भोः! पताकालंकृततोरणद्वारपालक भोः! रत्नमयकवाटबन्धमुन्मोचयेथाः। गोपालबालिकानामस्माकम् आश्चर्यचेष्टितो मणिनिभगात्रो भगवान् पूर्वेद्युरेवासदपेक्षितपुरुषार्थप्रदानं प्रतिश्रुतवान्। तस्य शयनादुत्थापनगाथानां कीर्तनार्थमिह वयं परमपावन्यः समागताः स्मः।

स्वामिन्! परोपकारार्थया वाचा प्रप्रथममस्माकं प्रतिरोधं मास्म कार्षीः ; भगवति प्रेमबन्धबन्धुरं कवाटं कृपया समुद्घाटयतु भवान्॥ (इति मूलगाथाविवर्तः।)

अधस्तात् षष्ठगाथाप्रभृतिषु दशसु गाथासु दशानां भागवतीनां गोपीनामुद्बोधनं 'यन्निबद्धम् तत् पञ्चलक्षसंख्याक-गोपीसमुद्बोधनपर्यायभूतं मन्तव्यम्! अस्मदीयश्रीवैष्णवसंप्रदायधुरन्धराः श्रीसरोयोगिप्रभृतिश्रीपरकालसूरिपर्यन्ता दिव्यसूरिवरा दश दशभिर्गाथाभिस्समुद्बोधिता इति निर्वाहश्चारुतरः। गाथासु मूलस्थशब्दसंनिवेशैस्तदिदं निस्संश-यविपर्ययमवगम्यत इति विपुलविवरणं कृतमस्मदीयायां द्राविडभाषामय्यां विस्तृतव्याख्यायाम्। तदभिज्ञास्तदनुभ-वरसिकास्सन्तः प्रमोदन्ते। तदास्तां नाम॥

प्रथमतस्समुद्बुद्धा गोप्यः प्रतिसदनमन्तस्तल्पमधिशयाना अपि गोपीः प्रबोध्य ताभिस्सर्वाभिस्साकं श्रीनन्दगोपभवनद्वारमुपासेदुः। तत्र बहिर्द्वारपालकम् अन्तर्द्वारपालकं च प्रतिबोधयन्त्यः स्वात्मनामन्तःप्रवेशनप्रार्थनां विरचयन्ति गाथयाऽनया। इदमत्र विमर्शनीयम्। व्रजे नन्दगोपस्तावदितरैर्गोपालैस्समधर्मा खलु विराजते; श्रीकृष्णस्य पिता बभूव सोऽयमिति कश्चिद्विशेष आस्तां नाम। गोपालानामध्यक्षोऽयमासीदिति च तिष्ठतु नाम। अस्य भवनं बहिर्द्वारपालकाधिष्ठितमन्तर्द्वारपालकाधिष्ठितं चासीदिति नैतत्संभावनार्हम्। इतरेषां गोपालानामिव अस्यापि सदनं साधारणं स्यादिति संभाव्यते। एवं स्थिते, द्वारपालकादिसद्भावं कल्पयित्वा किमर्थमेवमुपवर्ण्यत इति काचिदा-शङ्का जायेत। अत्रोच्यते। गोदादेव्या निबद्धोऽयं दिव्यप्रबन्धो विभवावतारकालिकानुभवप्रकाशकोऽपि सन् अर्चावतारदिव्यस्थलेष्वनुभवायैव सुतरां कल्पत इति प्रात्यक्षिकमेतत्। तथाच दिव्यदेशसेवाहेवाकिभिर्यथायथाऽनु-सन्धानं कर्तव्यं शास्त्रीयसरण्या, तथातथा गाथानिबन्धनमिह संपद्यत इति वेदितव्यम्। दिव्यदेशप्रवेशसमये भक्तैर-नुसन्धेयप्रकारस्तावत् श्रीरङ्गराजस्तवे प्रदर्शितः खलु—* स्मेराननाक्षिकमलैर्नमतः पुनानान् दंष्ट्रागदाभ्रुकुटिभिर्द्विषतो धुनानान्। चण्डप्रचण्डमुखतः प्रणमामि रङ्गद्वारावलीषु चतसृष्वधिकारभाजः॥ * इत्यादिभिः कतिपयैः पद्यैः। सैव प्रणाली अत्राप्यनुसन्धेया। विभवावतारानुभवसंवलितार्चावतारानुभवपरत्वेनैव श्रीविष्णुचित्तसूरिगोदादेव्योस्सूक्तीनामु-त्कर्षातिशय इति ध्येयम्।

अथ गाथार्थविवरणम्॥ भगवान् कृष्ण एव सर्वेषां नायक इति वस्तुतत्त्वं संविदाना अपीमा गोप्यः [नायकतया स्थितस्य नन्देगोपस्य] इति कुतः कथयन्तीति चेत्; भगवान् कृष्णो नन्दसूनुत्वमेव स्वस्य भृशम-भ्यर्हितं मन्यमानो नन्दगोपमेव स्वस्यापि नायकं यतः प्रतिपेदे, तत एव गोप्य इमा इत्थमभिदधतीति प्रतिपत्तव्यम्। लङ्कायां विजयं प्राप्य पुष्पकविमाने सह सीतया प्रतिनिवर्तमानो रामचन्द्र आह—* एषा सा दृश्यते सीते! राजधानी पितुर्मम * इति। दशरथे पितरि चतुर्दशवर्षतः पूर्वं दिवं गते सत्यपि अयोध्यायास्तत्संबन्धेन समादर-णमेव युक्तमिति धिया खलु रामो "राजधानी पितुर्मम" इति बभाषे। सैव रीतिरत्राप्युपपद्यते।

[रत्नमयकवाटबन्धमुन्मोचयेथाः] इत्येतद्वाक्यमुभयत्रान्वेतुमलम्; बहिर्द्वारपालकसकाशे अन्तर्द्वार-पालकसकाशे च कवाटबन्धोन्मोचनप्रार्थना सेयं क्रियत इति बोध्यम्। तथाच क्रियानुषङ्गः। अत्र संबोधनद्वितय-

सत्त्वेऽपि एकैव द्वारपालकव्यक्तिर्वाक्यद्वयेनापि प्रतिबोधितेति ग्रहणमपि युज्यते ; व्यक्तिद्वयप्रतिबोधनमेव गृह्यतां नाम । प्रार्थनया प्रसन्नो बहिर्द्वारपालकः कृपार्द्रदृष्टिपातप्रसारणेन गोपीनामन्तः प्रवेशमनुमेने । अन्तः प्रविष्टा अथ अन्तर्द्वारपालकं संबोध्य प्रार्थयन्ते [पताकालंकृततोरणद्वारपालक भो इत्यादिना ।] व्रजे सर्वाण्यपि भवनानि समरूपाणि सन्ति ; निशीथे ससंभ्रमं समागच्छन्तीनां वल्लवीनां व्यामोहो मा भूदिति पताकालङ्करणेन चिह्नसमर्पणं कृतमिव । निदाघकाले तत्रतत्र प्रपां परिकल्पयन्तो धार्मिकाः पिपासितानां जनानां प्रतिबोधनाय प्रपामुखे यथा पताकाप्रतिष्ठापनमारचयन्ति तद्वदेतत् । * धन्वन्निव प्रपा असि * इति श्रुत्युक्तरीत्या भगवानपि प्रपा भवति खलु । * एष ब्रह्म प्रविष्टोऽस्मि ग्रीष्मे शीतमिव ह्रदम् * इत्युक्तप्रकारेण संतप्ताः खलु सरभसमायान्ति तापशान्त्यै " करचरणसरोजे कान्तिमन्नेत्रमीने श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे । हरिसरसि विगाह्यापीय तेजोजलौघं भवमरुपरिखिन्नः खेदमद्य त्यजामि "— इत्यनुसन्दधानाः ॥

कवाटोद्घाटनाय प्रार्थितोऽयं द्वारपालक आसां गोपालबालिकानां वचस्सुधां पिपासुः किमपि किमप्याह ; गोप्यश्च प्रत्याहुः ; स संवादप्रकारः संक्षेपेण गाथारूढो मनागिवात्र विव्रियते ।

द्वारपालकः—सर्वथा भीतेरेवास्पदेऽस्मिन् व्रजे अकाले समागत्य कवाटमुद्घाटयेति कथयन् जनः कोनाम ?

गोप्यः—* भयं भयानामपहारिणि स्थिते मनस्यनन्ते मम कुत्र तिष्ठति * इति किं ननु भो न श्रुतं भवता ? भयनाशनस्य भगवतस्सविधे को नाम भीतिप्रसङ्गः ?

द्वारपालः—श्रीरामावतारकाले तु कृतयुगसन्निहितत्रेतायुगस्थितिः , अतश्च कालः सुसमीचीनः ; तातस्तु शम्बरान्तकः पङ्क्तिरथः ; पुत्राश्च पुरुषव्याघ्रा महावीरधीरधौरेया अनीतिपथविदूरगाश्च ; नगरी च नाम्ना अयोध्या [योद्धुमशक्येत्यर्थः] ; नियन्तारश्च वसिष्ठप्रमुखा महाज्ञानिनः ; नगरस्थाश्च सर्वे जनाः * स्त्रियो वृद्धास्तरुण्यश्च प्रातस्सायं समाहिताः । सर्वान् देवान्नमस्यन्ति रामस्यार्थे यशस्विनः ॥ * इच्छामो हि महाबाहुं रघुवीरं महाबलम् । गजेन महता यान्तं रामं छत्रावृताननम् * इत्याद्युक्तरीत्या परमप्रेमशालिनः ; अचेतनतृणप्रभृतयोऽपि तदात्वे * विषये ते महाराज ! रामव्यसनकर्शिताः । अपि वृक्षाः परिम्लानाः सपुष्पाङ्कुरकोरकाः * इत्युक्तरीत्या प्रेमैकनिरूपणीया आसन् ; अत एव रामावतारे भयप्रसक्तिर्नासीत् । अधुना किं तथा हंहो । श्रूयताम् । कलियुगशिरस्कद्वापरान्तस्समयः । तातस्तु नन्दः परमसाधुः पिपीलिकोपमर्दनेऽप्यकुशलः । पुत्रकस्तु धूर्तचेष्टितानुष्ठानसन्ततसमुत्सुकस्वान्तः । देशश्च अविवेकिभिरध्युषिता आभीरपल्ली, परमदारुणकंसवशंवदा । अङ्कुरदोषधिमात्रमपि आसुरं हन्त । ईदृशी हि कृष्णावतारकालदेशादिपरिस्थितिः । भयं विना किमन्यदत्रावकाशं लभते ?

गोप्यः—महात्मन् ! असत्सकाशात् किमु भेतव्यम् ? वयं वनिता खलु ; अबलाभ्य. का नाम भीतिः ?

द्वार—सत्यम् ; शूर्पणखाऽप्यबलैव ननु ; द्वारस्य द्वारपालकस्य च पञ्चवट्यामभावादेव हि सा वाचामगोचरमनर्थमसूत ।

गोप्यः—सा खलु निशाचरी ; वयं तु गोप्यः ; तया सहास्माकं परिगणना किमु युज्यते ? कथय महानुभाव !

द्वार—राक्षसी गोपिकेति जातौ को वा विशेषः ? पूतनाऽपि गोपीवेषधारिणी खलु समाययौ ; “ कदाचिदन्तर्हितपूतनात्मा कंसप्रयुक्ता किल काऽपि माया । निद्रापराधीनजने निशीथे व्रजं यशोदाकृतिराविवेश ॥ ” (यादवाभ्युदये) इति किं न जानथ यूयम् ?

गोप्यः—महाप्रभो ! सा खलु पूतना परिणतवयस्का ; वयं तु, पश्य बालिकास्स्मः ! छलं न किमपि विद्मः ।

द्वार—वत्सासुरकथा किं न श्रुता युष्माभिः ? सोऽपि ननु वयसा कनीयानेव समायातः ।

गोप्यः—महात्मन् ! मैवं वादीः । ते ते नृशंसाः प्रत्येकशो जिघांसयैव रहस्समायाताः ; वयंतु न तथा ; बृन्दबृन्दशः खलु समागता वयम् ; भास्वांश्च उदयशिखरिशिखरमवजगाहे । नास्मत्तो भयप्रसक्तिरीषदपि ; तद्वयस्व भोः ॥

द्वार—प्रत्येकशस्समागच्छतो जनादपि बृन्दबृन्दशस्समागच्छन्तीभ्यो जनताभ्य एवहि भूरि भेतव्यम् ; * चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् । एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति * इति खलु भीतभीता बभूवुर्महान्तोऽपि वैरिबृन्दमवलोक्य । तदस्तु नाम ; किमर्थमद्यात्र समागता यूयम् ? तत् कथयत ।

गोप्यः—महानुभाव ! तत् पृच्छ तावत् ; सुशोभनोऽयं प्रश्नः ; प्रत्युत्तरं च नस्सादरमाकर्णय, पुरुषार्थविशेषप्राप्तये समागतास्स्मः ; ह्य एव भगवान्नन्दनन्दनः प्रत्यजानादस्मदपेक्षितपुरुषार्थप्रदानम् ; अस्माभिः दृष्टमात्र एव स कांक्षितं प्रदास्यति ध्रुवम् ।

द्वार—स भगवान्मत्सकाशे किमपि न प्रोक्तवान् ; अहं तु द्वारपालनकर्मणि नियुक्तः । आगन्तुकान् जनान् यथेच्छमन्तः प्रवेशयितुं किमहमत्र निवेशितोऽस्मि ? साधु साधु । युष्माकमन्तःकरणशुद्धिमजानन्नहं न वः प्रवेशयेयमन्तः ।

गोप्यः—अयि भो महात्मन् महात्मन् ! न वयं नवीनतया श्रीमता शोधनीया जनाः ; सर्वथाऽपि वयं परमपरिशुद्धास्स्मः । उपायान्तरप्रावण्यमुपेयान्तरप्रावण्यं वा नास्मासु किञ्चिदपि लब्धावकाशम् , मङ्गलाशासननिरतत्वमेवास्माकं परमा शुद्धिः ।

द्वार—सत्यं वदत ; अन्तः प्रविश्य किं करिष्यथ ? परमपुरुषार्थप्रदानं ह्य एव प्रतिश्रुतवान् कृष्ण इति खलु युष्माभिरुक्तम् ; परमपुरुषार्थशब्दाभिलप्यं वस्तु किं तदिति जिज्ञासमानाय मह्यं मनागिव कथयत ।

गोप्यः—* भो कृष्ण भो माधव भो मुकुन्द भो नन्दसूनो भगवन् मुरारे । भोगीन्द्रभोगात्मकतल्पतस्त्वम् उत्तिष्ठ जागृह्यनुकम्पमानः ॥ * इत्येवं गास्यामः । सुप्रभातसंकीर्तनं ह्येतत् । एष एव हि नः परमपुरुषार्थः

पुरा भगवान् विश्वामित्रोऽपि * कौसल्यासुप्रजा राम! पूर्वा सन्ध्या प्रवर्तते। उत्तिष्ठ नरशार्दूल!" इति शयनादुत्थाप्य खलु कृतकृत्यो बभूव॥

द्वार—आस्सम्यगुक्तं युष्माभिः; शयनकाले अन्तः प्रवेशनमेव महदकृत्यम्; प्रविश्य शयनादुत्थापनं तु ततोऽपि महत्तरमकृत्यम्। पुरा चित्रकूटे वायसेनार्दिता वैदेही शयानं भर्तारमुत्थाप्य * स मया बोधितः श्रीमान् सुखसुप्तः परन्तपः * इति तदुत्थापनकृते भृशमन्वतप्यतेति किं न श्रुतं युष्माभिः? श्रीरामायणं समग्रं न श्रुतं युष्माभिरिति मन्ये। शयनकालिकमाभिरूप्यमनुभोक्तुमन्तः प्रविशाम इति यद्युक्तं स्याद्युष्माभिस्तर्हि कथञ्चिदन्तः प्रवेशमनुमन्तुमवकाशः स्यादपि; स्वपन्तमुत्थापयितुं प्रविशाम इति कथयन्त्यो यूयम् इहावस्थातुमपि नार्हथ; अपसरत क्षिप्रमपसरत।

गोप्यः—महात्मन्! वाचा धर्ममवाप्नुहि; काममन्तः प्रविशतेति वाक्कणिकाविन्यसनेन सुमहत्तरसुकृतार्जनं हि ते कर्तव्यम्; तदुपेक्ष्य किमित्यस्मान् वृथा प्रतिषेधसि? * अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् *—इत्यपि न जानासीव। विजहीहि विजहीहि प्रतिषेधाक्षराणि—इति तत्पादयोः प्रणिपेतुस्सर्वा अपि।

अथ स दयमानमनाः 'भो गोप्यः! काममन्तः प्रविशत, नाहं युष्मान् प्रतिषेधामि; स्वहस्तत एव कवाटबन्धनमुन्मोच्य गच्छतेत्याह। तदाकर्ण्य गोप्य आहुः—नैतत्कार्यं वयमनुतिष्ठेम; तत्रभवानेव स्वयमुद्घाटयतादिति। घटकाः साभिनिवेशं स्वयं प्रवेशयन्तिचेत्तदेव स्वरूपानुरूपमिति हृदयम्। प्रतिषिद्धवतो हस्तत एव प्रवेशनसम्पादनं स्वादुतरं च; विभीषणशरणागतिसमये तदङ्गीकारस्य प्रतिषेद्धा सुग्रीवः; अनुमन्ता तु मारुतिः; अथचाङ्गीकारे निर्धारिते भगवान् रामचन्द्रो विभीषणानयनाय तस्मिन् स्निग्धं हनुमन्तं नादिदेश; अपि तु कृतप्रतिरोधं सुग्रीवमेव समादिदेश "आनयैनं हरिश्रेष्ठ" इति। प्रतिषेधकमुखेनैव स्वीकरणं रसवत्तरमिति तदभिप्रायः। सैव सरणिरत्रापीति ध्येयम्॥

(अथ ध्वन्यर्थविवरणम्।) नायकतया स्थितस्य नन्दगोपस्य भवनद्वारपालकेति संबोधनं भगवद्रामानुजमुनीन्द्रपादोपजीविनः कस्यचिदन्तरङ्गशिष्यस्य समुद्बोधनपरम्। * अमुना तपनातिशायिभूम्ना यतिराजेन निबद्धनायकश्रीः। महती गुरुपङ्क्तिहारयष्टिर्विबुधानां हृदयंगमा विभाति॥ * (यतिराजसप्ततौ) इत्युक्तरीत्या गुरुपरम्परायां नायकमणिस्थानं भगवान् रामानुज एव ह्यलङ्करोति। स एव नन्दगोपशब्दाभिलप्यश्च; नन्दो यथा भगवन्तं यदुकुलनाथं पुत्रत्वेन स्वीकृतवान् तथा रामानुजमुनीन्द्रोऽपि भगवन्तं यदुगिरिपतिं पुत्रतया स्वीचकार खलु; यतिराजसंपत्कुमारेति हि स भगवानाहूयते। आचार्यभवनद्वारसेवनमेव प्रधानं शिष्यकृत्यमिति संबुद्धिशब्दभूम्ना द्योत्यते। अथ * पताकालंकृततोरणद्वारपालकेति भगवान् रामानुज एव साक्षात्संबोध्यते। वैकुण्ठद्वारपालकेति यावत्। अदसीयामनुमतिमन्तरेण दिव्यधामान्तःप्रवेशो न सुलभ इति भावः। * दत्ते रङ्गी निजमपि पदं देशिकादेशकाङ्क्षी * इति हि न्यासतिलकदिव्यसूक्तिः॥ अथ रत्नमयकवाटोद्घाटनमिह काङ्क्ष्यते। रत्नानि नवेति प्रसिद्धिः; भगवद्रामानुजप्रणीतानि ग्रन्थरत्नानि च नवैव—श्रीभाष्यम् वेदान्तदीपो वेदान्तसारो वेदार्थसंग्रहो गीताभाष्यं शरणागतिगद्यं श्रीरङ्गगद्यं श्रीवैकुण्ठगद्यं नित्यग्रन्थ इति। तद्गर्भितमहार्थप्रकाशनमेवेह कवाटोद्घाटना-

भ्यर्थनापदेशेन प्रार्थितं भवति॥ अथ [गोपालबालिकानामस्माकम्] इत्यनेन, प्रार्थयितॄणां विद्यार्थिनामज्ञत्वं बालत्वं स्त्रीतुल्यपारतन्त्र्याश्रितत्वं च प्रकटयते। अथ च भगवान् प्रागेव प्रतिश्रुतवानिति वचसा—* तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः * इत्येषा गीतासूक्तिः प्रत्यभिज्ञाप्यते। * अनन्तः प्रथमं रूपं लक्ष्मणस्तु ततः परम्। बलभद्रस्तृतीयस्तु कलौ (रामानुजः स्मृतः) कश्चिद्भविष्यति * इत्येतद्वचनं वा भवतु। [परमपवित्रा वयमिहागतास्स्मः] इत्यनेन—आचार्यवर्यै भगवन्निर्विशेषताप्रतिपत्तिशालिनो वयमित्युक्तं भवति; एवंविधप्रतिपत्तिवैशिष्ट्यमेव हि शिष्याणां परमपवित्रत्वम्। * मम चाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम् * इत्यत्रेव शुद्धिरिहावसेया। भावदोषाभाव एव शुद्धिः॥ अवशिष्टं स्पष्टम्॥

तथाचैतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ असन्नाथाग्रयनन्दप्रभुवरनिलयद्वारपालौ! दयेथाम्
ह्यः प्रत्यश्रावि सेवावितरणमनुकम्पात्मना नोऽच्युतेन।
बालाः शुद्धान्तरङ्गा वयमिह शयनोत्थापनायागतास्स्मः
नो रोद्धव्याः कृपार्हा इति कथितवती भातु गोदा मदन्तः॥ १६॥

इति षोडशगाथाविवरणं समाप्तम्॥

---

१७. सप्तदशी गाथा—अम्बरमेतण्णीरे॥

अम्बरमे तण्णीरे शोरेयरम् शेय्युम् * एम्बेरुमान्नन्दगोपालावेलुन्दिराय् *
कोम्बनार्केल्लाम् कोलुन्दे कुलविळक्के * एम्बेरुमाट्टि यशोदायरिवुराय् *
अम्बरमूडरुत्तोङ्गि युलहळन्द * उम्बर्होमाने उरङ्गादेलुन्दिराय् *
शेम्बोर्कळलडि च्चेल्वा बलदेवा * उम्बियुम् नीयुमुरङ्गेलोरेम्बावाय्॥ १७॥

वासस एव पानीयस्यैव ओदनस्यैव दानं धर्मबुद्ध्या कुर्वाण भो नन्दगोपालप्रभो समुत्तिष्ठ। कृशोदरीणां ललनानां मध्ये समुत्तुङ्गे कुलदीपिके स्वामिनि यशोदे! जागृहि। नभोरन्ध्रनिर्यत्समुत्तुङ्गपादाब्जविक्रान्तभुवन! देवाधिदेव! निद्रां विसृज्य समुत्तिष्ठ। सकलसम्पत्कन्दभूतदिव्यभूषाढ्यपादारविन्द! भगवन् बलभद्र! स्वानुजेन सह भवान् जागर्तु॥ (इति मूलगाथाविवर्तः)

अस्यां गाथायां नन्दगोपो यशोदा श्रीकृष्णो बलभद्र इति चतस्रो व्यक्तयः प्रतिबोध्यन्ते। नन्दगोपस्य महत्तरमौदार्यं प्रशस्यते तद्विशेषणमुखतः। दिव्यप्रबन्धेऽस्मिन् नन्दगोपस्य प्रस्तावः पञ्चसु गाथासु (१, १६, १७, १८, २१) क्रियते। प्रथमगाथायां तस्य मङ्गलाशासनपरत्वरूपः प्रभावः प्रोक्तः। पूर्वगाथायां तस्य व्रजनायकत्वरूपो महिमा कथितः। अस्यां तु गाथायाम् अतिशयितौदार्यरूपं वैभवमुच्यते। उपरिष्टाद्गाथाद्वये निरतिशयबलाढ्यत्वगोसमृद्धिशालित्वरूपं महिमद्वयं वक्ष्यते। तदस्तु नाम। वस्त्रान्नादिदातृत्वरूपं यद्वैभवमिहोच्यते तत्रेयं विचिकित्सा भवति—

एतादृशमौदार्यं नन्दगोपस्य कदा कुत्र प्रसिद्धमिति। श्रीकृष्णजननमहोत्सवसमये संतोषभूम्ना भूरितरवस्तुविश्राणनतत्परोऽभून्नन्द इति पुराणेषु प्रोच्यते; * अधिचकार वदान्यमणेः श्रियं व्यधित कल्पतरोरनुकल्पताम् * इति यादवाभ्युदयेऽपि कथ्यते; तदिदमौदार्यमत्र प्रस्तूयत इति कथनं न शोभनम्। नैमित्तिकानि दानानि कृपणानामकिञ्चनानामपि भवन्ति प्रायः समयविशेषेषु; तत्कथनेन स्तुतिः कथमिव भवितुमर्हति। नैव भवितुमर्हति। तर्हि कथमत्र वस्त्रदातृत्वं तीर्थदातृत्वमन्नदातृत्वं च प्रोच्य स्तूयते नन्दगोप इति चेत्; श्रूयताम्। प्रस्तुतत्रितयदातृत्वं नन्दनन्दने भगवति कृष्णे प्रसिद्धम्; "कारणगुणाः कार्ये संक्रामन्ति" इति न्यायात् कारणभूतनन्दगोपादेव दातृत्वमिदं कृष्णे संक्रान्तमिति ग्रहणमौचित्यमश्नुते! अतश्च वस्त्राद्यादिदातृत्वकथनं नन्दगोपे युज्यत इति। कृष्णस्य वस्त्रदातृत्वं द्रौपद्यां प्रथितम्। पानीयदातृत्वं तु गोदाया अस्या जनको भट्टनाथसूरिः स्वसूक्ते (४-२-७) * मन्नर्मरुह * इत्यस्यां गाथायां वक्ति—भारतयुद्धाय कुरुक्षेत्रं प्रति प्रयाणकाले पाण्डवरथाश्वेषु भृशं पिपासितेषु वारुणास्त्रप्रयोगतो महीतलात् पयःपूरमनवधिकमुद्भाव्य पिपासां प्रशमितवानिति। अथ च कृष्णकृतमन्नदानम् अस्या एव गोदादेव्याः सूक्ते (१२—६.) * कार्त्तण्मुहिलुम् करुविळैयुम् * इत्यस्या गाथाया उत्तरार्धेऽभिव्यञ्जितम्—(तथाहि) वृन्दावनप्रान्ते भक्तविलोचनमिति पुण्यस्थलं प्रथितम्; श्रीभागवतदशमस्कन्धे त्रयोविंशाध्याये तदेतत् स्थलमधिकृत्य प्रोक्तमस्ति; कदाचित् कृष्णो बलभद्रश्च गोपालैस्सह यमुनासरित्तटे भृशं श्रान्ताविव क्वचन निषण्णावास्ताम्; तदात्वे गोपालडिम्भास्सर्वेऽपि कृष्णबलभद्रयोस्सविधे स्वकीयक्षुद्बाधातिशयं विज्ञापयामासुः; तदा कृष्णेनोक्तम्—नातिदूरे आङ्गिरसाख्यमध्वरविशेषमनुतिष्ठतां महर्षीणामन्तिकमुपेत्य याचध्वमिति। ते च बालकास्सहसा तत्र गत्वा रामरामानुजयोर्नाम प्रोच्य अन्नमयाचन्त; ते तु महर्षयः स्वकार्यैकनिरता उपैक्षन्त। अथ विषण्णा व्रीडिताश्च बालकाः कृष्णान्तिकमागत्य सनिर्वेदं तदिदं न्यवेदयन्। तदा कृष्णः प्राह सस्मितमेवम्-महर्षिपत्नीनां सविधमुपेत्य साग्रजस्य मम अत्रावस्थितिमावेद्य याचध्वमन्नमिति। अथ तथैव याचिता मुनिपत्न्यः कृष्णनामश्रवणमात्रेण परमानन्दकन्दलितस्वान्ताः पुलकाङ्कितदेहाश्च सत्यः सद्यो भक्ष्यभोज्यलेह्यचोष्यवर्गसम्भरणपूर्वकं गुरूणां प्रतिरोधमप्यवधीर्य परमभक्तिभूम्ना रामरामानुजयोरन्तिकमुपेत्य सानन्दं समार्पिपन्नन्नवर्गम्; ता मुनिललना एवं प्रत्यहमुपाहरन्; उपाहृतमन्नवर्गं कृष्णः सर्वेभ्योऽपि गोपालकेभ्यो नित्यं वितरन् प्रमुमुदे—इत्यनया कथया कृष्णस्यान्नदातृत्वं सुगमम्। एवं नाम श्रीकृष्णे प्रसिद्धमेव वदान्यत्वं पितरि नन्दगोपेऽतिदिश्य कथ्यतेऽत्रेति वक्तुं योग्यम्। नन्दः स्वभावत एवैवं वदान्य आसीदिति वा गृह्यताम्। गोपीनां सर्वस्वभूतं कृष्णं यद्ददौ नन्दः तत एवैवं दातृत्वमुच्यत इत्यपि सुवचम्।

"वासस एव पानीयस्यैव ओदनस्यैव दानम्" इति प्रत्येकमेवकारप्रयोगो (मूले) किमर्थमिति चेत्; वस्त्रदानकाले वस्त्राण्येव दातुमयं शक्त इति प्रतिभायात्; पयोदानकाले पय एव दातुमयं प्रभवेदिति प्रतिभायात्; अन्नदानकालेऽपि तथा। एतेन पुष्कलदानं प्रतिपन्नं भवति। एवंविधनिरतिशयौदार्यशालिन् नन्दगोप! समुत्तिष्ठेति तं प्रतिबोध्य, अनन्तरं तद्दयितां यशोदां प्रतिबोधयन्ति [कृशोदरीणां ललनानां मध्ये समुत्तुङ्गे! कुलदीपिके! स्वामिनि! यशोदे! जागृहि] इति। अत्र यशोदायास्सर्वललनासमुत्तुङ्गत्वं यदाभधीयते तदिदं सर्वगोपाङ्गनामध्ये

समुत्कृष्टतामभिप्रेत्य परं नावतीर्णम्; अपि तु भगवज्जननीत्वेन याया ललनाः प्रसिद्धाः ताभ्यस्सर्वाभ्योऽप्युत्कृष्टा सेयमेकैवेत्यभिप्रेत्य प्रयुक्तम्। श्रीरामचन्द्रजननीत्वेन प्रसिद्धा कौसल्या निरन्तररामानुभवभाग्यशालिनी नाभूत्; कृष्णस्य साक्षाज्जननी देवकी च प्रसवसमनन्तरमेव कृष्णमन्यत्र प्रापय्य शैशवबाल्यलीलादिकं मनागप्यननुभूय नक्तंदिवं प्रलापविलापैरेव जीवितं व्यपोहतिस्मेत्यवगमात् साऽपि शोचनीया संवृत्ता। सेयं यशोदा तु कृष्णकिशोरं सर्वात्मना पुष्कलमनुभूय परमानन्दसीम्नि स्थितेति अस्या भगवज्जननीष्वद्वितीयत्वमप्रकम्प्यम्। अथ "कुलदीपिके!" इति संबोधनं चास्या युक्तरूपम्। अतिजघन्यमपि गोपालकुलं कृष्णजनन्या अनयैव हि समुत्कर्षसंपादनेन समुद्दीपितम्।

अथ भगवान् यशोदानन्दनमस्समुद्बोध्यते [नभोरन्ध्रनिर्यत्समुत्तुङ्गपादाब्जविक्रान्तभुवन!] इति। हे नन्दसूनो समुत्तिष्ठेति वा, हे नारायण समुत्तिष्ठेति वा अनुक्त्वा त्रैविक्रमक्रमकृताक्रमणत्रिलोकेतिसंबोधने कोऽभिप्राय इति चेत्; शंखरथाङ्गकल्पकध्वजारविन्दाङ्कुशवज्रलाञ्छनं स्वचरणाम्बुजम् अपेक्षानिरपेक्षमेव सर्वेषां जनानां वसिष्ठचण्डालविभागविरहितानां शिरसि निधाय स्वकीयसौशील्यसौलभ्यादिगुणपौष्कल्यं यथा हि त्रिविक्रमो भगवान् प्राचीकशत् तथैव सोऽयं कृष्णोऽपि प्रकाशयतीति हेतुना तत्साधर्म्यमस्मिन् सर्वदाऽप्यनुसंदधते भक्ताः; तादृशेनैवानुसन्धानेनात्र त्रैविक्रमक्रमकथनमारचयन्ति गोप्य इति बोध्यम्। एतद्दिव्यप्रबन्धोपक्रमे तृतीयगाथायामपि त्रिविक्रमकीर्तनपूर्वकं व्रतानुष्ठानकुतूहलं प्राकाश्यत। उपरिष्टादपि मङ्गलाशासनगाथायां (२४) त्रिविक्रमपादाब्जमङ्गलाशासनमेव पुरस्तात् क्रियते। अतश्च सुदृढमवधार्यते भगवति कृष्णे गोपीनां त्रिविक्रमतादात्म्यानुसन्धानं गाढरूढमस्तीति।

एवमुद्बोधितोऽपि कृष्णकिशोरो न वाचं व्यसृजत्; ज्यायसो बलभद्रस्य समुद्बोधनमकृत्वा किमिति कनीयसो मम समुद्बोधनं पुरस्तात् क्रियत इति तदभिप्राय इवेत्युन्नीय तदनु बलभद्रमुद्बोधयन्ति गोप्यः। बलदेवस्यास्य पादारविन्दसौष्ठववर्णनं क्रियते यदत्र गोपीभिः तदिदमतिचारु। देवकीगर्भसंभूतस्य कृष्णस्य अग्रजाः षट् शिशवः कंसेन व्यापादिता व्यलीयन्त; एवं कृष्णस्य यथा न काचिदपि विपदभूत् तथा नाम बलभद्रः स्वपादारविन्दं पुरस्तात् भुवि संचारयामासेति तस्मिन् कृतज्ञतानुसन्धानं क्रियत इति रुचिरतरमनुजगृहुराचार्याः। लोके तावत्कथयन्ति श्वश्रूश्वशुरादयः—'अस्मदीया स्नुषा यदा नस्सद्मनि पादन्यासमकरोत्ततः प्रभृति अनुक्षणमस्माकं सम्पत्समेधते' इति। संपद्विपर्यये सति च 'यदा तावदियं दुर्भगा स्नुषा नः कुले पदं न्यधत्त ततः प्रभृति नित्यं विपद एव' इति वदन्ति। तथाच सम्पदां विपदां वा कस्यचिज्जनस्य पादन्यासं हेतुत्वेन कथयन्तीति लोकानुभवस्सिद्धः। अत्र गोकुले समिन्धानायास्सम्पदो निदानं प्रथमतो बलभद्रकृतः पादन्यास एवेति वक्तुकामा इव गोप्यस्तदीयपादसंपदुपवर्णने प्रवृत्ता इति विभाव्यम्। बलभद्रं संबोध्य अनुजेन सह त्वं वीतनिद्रो भूया इति कथयन्ति। अनुजस्याच्युतस्य कृपोत्तम्भने भवान् श्रद्धालुर्भूयादिति प्रार्थनैवात्र तात्पर्यविषयभूता। वस्तुतो बलभद्रे वाक्चातुर्यभूमा विश्रुतो विराजते। तथाहि; * मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति। नगरस्त्रीकलालापमधु श्रोत्रेण

पास्यति * इति गोपीनां मुखान्निर्वेदवचनमुद्गमय्य व्रजाद्विनिर्गतो गोपालकृष्णो मथुरां प्रयातो बहुतिथात्कालादनन्तरं कदाचिद्गोपीरनुस्मृत्य तासां निर्वेदातिशयं चानुसन्धाय तास्समाश्वासयितुमग्रजं बलरामं प्राहैषीत्; स च व्रजमुपेत्य * संदेशैस्साममधुरैः प्रेमगर्भैरगर्वितैः। रामेणाश्वासिता गोप्यः * इत्युक्तरीत्या साममधुरैः प्रेमगर्भैर्वाग्भिरैस्तास्समाश्वासयतिस्मेति प्रसिद्धं ननु। प्रकृत्यैवायं साममधुरप्रेमगर्भवाग्भरविन्यसनविचक्षण इति गोपीभिस्सर्वाभिरवधारितं चास्ति। अत एवात्र 'बलभद्र! त्वमुत्तिष्ठ' इत्येतावन्मात्रमनुक्त्वा अधिकमुक्तमिति वेदितव्यम्।

(अथ ध्वन्यर्थविवरणम्।) गाथायामस्यां नन्दगोपो यशोदा कृष्णो बलभद्रश्चेति चतस्रो व्यक्तयस्समुद्बोधिताः खलु; क्रमेण, आचार्यः मन्त्रः मन्त्रार्थः मन्त्रार्थसारश्चेति चतुर्णामुद्बोधनमिह क्रियत इति बोध्यम्। क्रमशो विवृणुमः। आचार्यस्य नन्दगोपाल इति नाम सर्वथा युज्यते। नन्दतीति नन्दः; गाः पालयतीति गोपालः; नन्दश्चासौ गोपालश्चेति नन्दगोपाल इति खलु विग्रहः। * न बोधादपरं सुखमित्युक्तेः ज्ञानसाम्राज्यप्रयुक्तपरमानन्दशालीति नन्दः। ज्ञानं चात्र भगवत्स्वरूपरूपगुणविभूतिचेष्टितादिविषयकमिति एतादृशज्ञानमूलक आनन्दस्सत्यमसमाभ्यधिकः। गोपालपदं पूर्वाचार्यदिव्यसूक्तिसंरक्षकार्थकम्; नानार्थवाचिनो गोशब्दस्यात्र वागर्थकत्वमवसेयम्। पूर्वाचार्यवाचो वाक्पदविवक्षिताः। अधीतिबोधाचरणप्रचारणव्याख्यानादिमुखेन पूर्वाचार्यदिव्यसूक्तिपरिपालक!, अत एव परमानन्दसंदोहमूर्ते! इति संबोधितमिति सिध्यति। अयमाचार्यः अम्बरस्य सलिलस्य अन्नस्य च प्रदातेत्येतदपि सुष्ठु संगच्छते। कथम्। * व्योम पुष्करमम्बरमिति कोशात् [मूलगाथायां प्रयुक्तः] अम्बरशब्द आकाशवाची। परमाकाशशब्दवाच्यो वैकुण्ठो विवक्षितः। सलिलशब्देन विरजा नाम सीमान्तसिन्धुर्विवक्षिता। अन्नशब्देन * अहमन्नादोऽहमन्नादोऽहमन्नादः * इत्युपनिषद्वाक्यगतान्नशब्दार्थभूतं परं ब्रह्म विवक्षितम्। तथाच सीमान्तसिन्ध्वाप्लवं दिव्यधामप्राप्तिं परिपूर्णब्रह्मानुभवं च प्रयच्छन् परमधार्मिकोऽयमाचार्य इत्युक्तं भवति।

अथ यशोदासमुद्बोधनम् श्रीमदष्टाक्षरमहामन्त्रसमुद्बोधनं मन्तव्यम्। * मन्त्रो माता गुरुः पितेति ह्याहुः। माता यथा शिशुं स्वगर्भे बिभर्ति तथा मन्त्रोऽपि भगवन्तं गर्भे बिभर्तीति हेतुना मन्त्रस्य मातृस्थानीयता समुपपन्ना। यशोदा यथा हि भगवन्मातृवर्गेषु सुप्रशस्ता, तथा भगवन्मन्त्रेषु परमं प्राधान्यमश्नुते मूलमन्त्रः। तथाचानुगृहीतं भगवता लोकाचार्येण मुमुक्षुप्पडिनाम्नि दिव्यरहस्यग्रन्थे— "भगवन्मन्त्रास्तावदनेके; ते च व्यापका अव्यापका इति वर्गद्वयात्मना विभज्यन्ते। अव्यापकापेक्षया व्यापकास्त्रयः श्रेष्ठाः। एषु च मध्ये श्रीमदष्टाक्षरमहामन्त्रः प्रधानतमः" इति। अथ मन्त्रराजस्यास्य कुलप्रदीपकत्वं यदिहोक्तं तदपि सुष्ठु संगच्छते। तत्तु श्रीपरकालदिव्यसूरिसूक्तिसुगमम्। स तावदष्टाक्षरमहामन्त्रप्रदीयमानफलराशीन् प्रतिपादयन् "कुलन्तरुम् शेल्वम् तन्दिडुम्" [कुलं ददाति सम्पदं ददाति] इत्यनया गाथया कुलप्रदानरूपं फलं हि प्रथमतोऽस्य प्रतिपादयति। गायत्री तावत् ब्राह्मणकुलप्रसवित्री; श्रीमदष्टाक्षरी तावत् श्रीवैष्णवकुलप्रसवित्रीति अस्मदाचार्यपरम्पराभिरनुसन्धीयते। ब्राह्मण्यं तावच्छरीरमात्रनिष्ठम्; श्रीवैष्णवत्वं तु आत्मानुबन्धीति तदेवोत्कृष्यते। तादृगुत्कृष्टकुलसंपादकत्वकथनमुखेन तत्प्रशंसा कृता भवति। आचार्यकृपया मन्त्रराजो मे अर्थप्रकाशको भूयादित्याशंसनमेव मन्त्रसमुद्बोधनमिति बोध्यम्॥

22

अथ समुद्बुद्धमन्त्रार्थप्रतिपादनं क्रियते त्रैविक्रमक्रमकृताक्रमणत्रिलोककृष्णसमुद्बोधनापदेशेन । श्रीमन्नारायणाष्टक्षरी, विष्णुषडक्षरी, भगवद्वासुदेवद्वादशाक्षरी इति व्यापकमन्त्रास्त्रयः ; तेषु श्रीमन्नारायणाष्टाक्षर्या एव प्राधान्यमित्युक्तमुपात्तपूर्वभगवल्लोकाचार्यश्रीसूक्तितः । अत्र किं कारणमिति चेत्, श्रूयताम् ; भगवतस्सर्वव्यापकतां ये मन्त्राः प्रतिपादयन्ति ते हि व्यापकमन्त्रत्वेन व्यपदिश्यन्ते ; तच्च व्यापकत्वम् अस्मिन्नेव मन्त्रराजे पौष्कल्येन प्रतिपाद्यत इति हेतोरस्य प्रशस्तिरभ्युपगता । तादृशं व्यापकत्वं भगवता त्रैविक्रमापदाने सुष्ठु प्रकाशितमिति सर्वे संविदते । अत्र च तदपदानानुसन्धानमुखेन मन्त्रार्थसर्वस्वं प्रकाशितं भवतीति वेदितव्यम् । दिव्यसूरयश्च मूलमन्त्रानुसन्धानप्रकरणेषु प्रायस्तदर्थत्वेन त्रिविक्रमापदानमनुसंदधत इति दिव्यप्रबन्धसिन्धुगाढावगाढा विज्ञानन्ति । नात्र तद्विस्तरः ॥

अथ बलभद्रप्रबोधनापदेशेन मन्त्रार्थसारस्याप्यनुसन्धानं कृतं भवति । श्रीपरकालसूरिप्रवरो भागवतशेषत्वमेव मन्त्रार्थसारभूतमिति निश्चिनोति ; तथाच तत्सूक्तिः—" निन्तिरुवेट्टेलुत्तुम् कत्तु नान्—उत्तदुमुन्नडियार्क्कडिमै " इति । अस्या अर्थः— भगवन् भवदीयाष्टाक्षरमहामन्त्राध्ययनतो मया गृहीतोऽर्थो भागवतशेषत्वम्—इति । बलरामोऽत्र भागवतत्वेन विवक्षितः । आदिशेषस्तावद्रामावतारे [सौमित्रिरूप] अनुजत्वेनावतीर्य यादृशं भगवद्रक्षणं विदधे, तादृशमेव स कृष्णावतारेऽस्मिन् [बलभद्ररूप] अग्रजत्वेनावतीर्य व्यररचदित्याचार्या अनुगृह्णन्ति । * एकदा तु विना रामं कृष्णो बृन्दावनं ययौ * इत्यादिपुराणरत्नसूक्तिमनुसृत्य श्रीपराशरभट्टार्या अनुगृह्णन्ति बलभद्रस्तुतिपरे श्रीरङ्गराजस्तवीये श्लोके— * यद्विश्लेषलवोऽपि कालियभुवे कोलाहलायाभवत् * इति । तथाच भगवतः कृष्णस्य परिरक्षणार्थमेवायमवतीर्णो बलभद्र इति स्फुटतरं प्रतिपत्तेः भागवतगोष्ठ्यामस्य परिगणनं सूपपन्नम् । अस्य प्रबोधनं यत्कृतमत्र तदेतद्भागवतशेषत्वानुसन्धानान्नातिरिच्यत इति बोद्धव्यम् । " त्वदनुजेन सह त्वमुद्बुध्यस्व " इति कथनं चात्र सुतरां चारु ; भागवतशेषत्वं तावत् भगवच्छेषत्वान्नातिरिक्तम् ; काष्ठापन्नं भगवच्छेषत्वमेव हि भागवतशेषत्वशब्दाभिलप्यमिति । भगवच्छेषत्वं च भागवतशेषत्वपर्यवसायि सदेव शोभते इति हि परमार्थः । उभयोश्च अविनाभूतत्वमत्र मूलसूक्तिस्वारस्यसिद्धमिति रस्यमिदं रहस्यम् । बलभद्रस्य ज्येष्ठत्वं कृष्णस्य कनिष्ठत्वं च —भागवतशेषत्वरूपस्यार्थस्य ज्यायस्त्वम् भगवच्छेषत्वरूपस्यार्थस्य अवरत्वं च द्योतयतीति सर्वं समञ्जसम् ॥ १७

एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो ॥ सर्वस्वोदार ! नन्दप्रभुवर ! भगवन् ! जागृहि, स्वामिनि ! श्री-
रत्न ! श्रीमद्यशोदे ! त्यज शयनरुचिं लोकविक्रान्तपाद ! ।
स्वामिन् देवाधिदेव ! त्यज शयनरुचिं, रौहिणेय ! प्रसिध्य-
त्सौभाग्योत्तिष्ठ तूर्णं सममनुजनुषेत्यूचुषीं नौमि गोदाम् ॥ १७ ॥

इति सप्तदशगाथाविवरणं समाप्तम् ॥

---

१८. अष्टादशी गाथा—उन्दुमदकळित्तन् ॥

उन्दु मदकळित्तन् ओडाद तोळ्वलियन् * नन्दगोपालन्मरुमहळे नप्पिन्नाय् *
कन्दङ्कमऴुम् कुऴली कडैतिरवाय् * वन्देङ्गुम कोऴियऴैत्तन काणू * मादवि
प्पन्दल्मेल् पल्काल् कुयिलिनङ्गळ् कूविनकाण् * पन्दार्विरलियुन्मैत्तुनन्पेर्पाड *
शेन्दामरैक्कैयाल् शीरार्वळैयोलिप्प * वन्दुतिरवाय् महिऴ्न्देलोरेम्बावाय् ॥ १८ ॥

मदजलस्रुतियुक्तमातङ्गसंपन्नस्य (अथवा) मत्तमातङ्गजैत्रस्य (यद्वा) मत्तमातङ्गोपमेयस्य स्नुषे ! नीला-देवि ! सौगन्ध्यसंभृतचिकुरबन्धे ! कवाटबन्धमुन्मोचयेथाः । कुक्कुटास्तावत् सर्वत्र प्रसृमराः कूजन्ति । माधवीलतिनिषण्णाः कोकिलगणाश्चासकृन्निजकण्ठनादं प्रदर्शयन्ति । अयि कन्दुकाञ्चितपाणितले नीले ! युष्मद्वल्लभवैभवसंकीर्तनार्थमस्मानन्तः प्रवेशयितुं सौवर्णकरवलयततिनिनदेन सह समागत्य सरसिजोपमेयपाणितलेन सानन्दं समुद्घाटय कवाटिकाम् ॥ (इति मूलगाथाविवर्तः ।)

कन्यकासत्त्वाहमन्तरेण पाणिग्रहणकल्याणोत्सवकोलाहलोपबृंहणवत् कृष्णावतारे प्रधानमहिषीपदवीमलङ्कुर्वाणाया नीलादेव्याः प्रतिबोधनरूपा प्रार्थना हन्त न कृता खल्वस्माभिरिति प्रबुद्धा गोप्योऽथ नीलादेवीं प्रतिबोधयन्ति गाथयाऽनया । अत्रेदं विवक्षितमस्माकम् ॥ * चित्तहृङ्मोहनाङ्गाय श्रीमते नन्दसूनवे । रुक्मिणीसत्यभामाभ्यां नित्ययुक्ताय मङ्गलम् ॥ * इत्यादिषु वचनसहस्रेषु यद्यपि कृष्णस्य रुक्मिणीसत्यभामावल्लभत्वं प्रतिपाद्यते, अर्चावतारेषु च तद्देवीद्वितयसाहित्यमेव दृश्यते, तथाऽपि दिव्यसूरिवरा नीलादेवीवल्लभत्वमेवास्य विशेषतोऽनुसंदधते । चतुस्सहस्रगाथात्मके कृत्स्नेऽपि दिव्यप्रबन्धे रुक्मिणीदेव्याः प्रस्तावः त्रिचतुरेष्वेव स्थलेषु दृश्यते । नीलादेव्याः प्रस्तावस्तु परश्शतेषु स्थलेषु । अत्र तु कारणं श्रीकूरनाथगुरुवराः प्रदर्शयन्ति सुन्दरबाहुस्तवे * नीला कुलेन सदृशी किलेति । श्रीभक्तिसारमुनीन्द्रश्च स्वकीये तिरुच्चन्दविरुत्तामिधे दिव्यप्रबन्धे * आयनाहि आयर्मङ्गै वेयतोळ् विरुम्बिनाय् * इत्यनया गाथया गोपकन्यकाया नीलादेव्याः पाणिग्रहणार्थमेव कृष्णो गोपकुलं प्राविशदिति रसघनमूचे । तदनुसृत्यैव श्रीकूरनाथगुरुभिरुक्तम् । श्रीवैष्णवव्यतिरिक्ताः कवयो भक्ता वा नीलादेवीं नैवाभिजानन्ति । यतस्तेषां ग्रन्थेषु अस्याः प्रस्तावगन्धोऽपि नास्ति तत एवैतदवधार्यते । अस्तु । सेयं नीलादेवी द्राविडभाषया * नप्पिन्नैप्पिराट्टि * इति व्यपदिष्टा । यशोदायास्सोदरस्य कुम्भनाम्नो गोपस्य दुहिता सेयमिति, अत्युद्धतानां सप्तानामृषभाणाम् अवलेपलोपनेन सेयं कृष्णेन परिणीतेति च इतिहासः प्रथते । श्रीदेवीभूदेवीसहपठिताया नीलादेव्या इयमंशभूतेति हेतुना तन्नाम्ना व्यवहृताऽभूदिति वेदितव्यम् । एतद्दिव्यप्रबन्धमुखपद्ये * नीलातुङ्गस्तनगिरितटीसुप्तम् * इति हि श्रीपराशरभट्टार्यैरनुगृहीतम् । ततश्चावधार्यते देव्या अस्या नीलानामकत्वम् । यद्यप्यस्याः कथा श्रीविष्णुपुराणे श्रीभागवते वा नोपलभ्यते, तथाऽपि हरिवंशे कीर्तितेति यादवाभ्युदयव्याख्यायां दीक्षिता विलिलिखुः । कथा च तैर्विव्रियतेस्म । अत्र बहुवक्तव्यमस्मदीयग्रन्थान्तरेषु सुबह्वक्तमिति नात्र विस्तरः ॥ कृष्णस्य व्रजवासकाले सेयमनुरूपा अभिमता च जाया विरराजेति हेतुना अस्मदीया दिव्यसूरिवरा इमामेव क्रियासमभिहारेण प्रशंसन्ति । तामेव पद्धतिमनुसरति गोदादेव्यपि ॥

नन्दगोपस्य स्नुषे ! इतितावत्सेयं संबोध्यते । "कुम्भस्य पुत्रिके !" इति पितृसंबन्धनिर्देशं विहाय कुत एवमुच्यते ? इति चेत्; स्त्रीणां पाणिग्रहणोत्सवसम्पत्तिसमनन्तरं पितृकुलापेक्षया पतिकुल एव परमोद्देश्यताधीः प्रथते । हनुमतस्सविधे [शिंशुपातरोर्मूले] स्वात्मानमभिज्ञापयन्ती सीतादेवी * स्नुषा दशरथस्याहं शत्रुसैन्यप्रतापिनः * इति प्रथमतो दशरथस्नुषात्वमभिधायैव परस्तात् * दुहिता जनकस्याहं वैदेहस्य महात्मनः * इति विदेहराजदुहितृत्वं प्रस्तौतिस्म । भर्तृगृहे सीमापन्नदारिद्र्यसत्त्वेऽपि पितृगृहे कुबेरैश्वर्यसम्पत्तिसद्भावेऽपि पतिकुले केवलं प्रेमभूमा भवति ललनानामिति कविवराः कथयन्ति । एवञ्च नन्दस्नुषे ! इति संबोधनमेवात्र सर्वथाऽप्युपपद्यत इत्यास्थेयम् । अस्याश्च श्वशुरो नन्दगोपो विशेषणद्वितयमिह लम्भितोऽस्ति । मूलगाथायाम् * उन्दुमदकळित्तन् *, इति प्राथमिकं विशेषणपदम् । तच्च द्राविडपदं त्रिविधमर्थं सहते; १. मदजलस्रुतियुतमातङ्गसम्पन्नत्वमेकोऽर्थः । अस्मिन्नर्थे किञ्चिद्विचारणीयमस्ति; मदजलस्रुतिवैशिष्ट्यं मातङ्गानां स्वाभाविकमिति न तत्र कोऽपि विचारः; मत्तमातङ्गसंपन्नत्वं नन्दे कथं संभवति ? गवां महिषाणामजानां च समृद्धिरस्मिन्नस्ति नाम; गजसमृद्धिरस्यास्तीति कुत्रापि नोक्तं खलु; तत्कथमुच्यते साऽस्येति शङ्का जायेत । अत्र नानाविधास्सन्ति समाहितयः; एका तावदिहोच्यते; व्रजे कृष्ण एव मत्तेभनिर्विशेषो विहरतीति गोदादेव्या जनको भट्टनाथसूरिरसकृत्प्रतिपादयति; तदनुसारेण कृष्ण एवात्र मत्तमातङ्गत्वेनापदिश्यते । उपरितने श्रीगोदासूक्तदिव्यप्रबन्धेऽपि [नाच्चियार्तिरुमोळि] कृष्णस्य मत्तमातङ्गत्वमसकृदभिधीयतेऽनयैव गोदया । एवञ्च मत्तमातङ्गसंपन्नत्वं नन्दे निरपायं निध्येयम् । कृष्णस्य करिणा साम्यं बहुभिः प्रकारैः निरूप्यते; तद्विस्तरस्तावदुपरिष्टात् ।

अथ मत्तमातङ्गजैत्रत्वम् मत्तमातङ्गोपमेयत्वं च नन्दे द्वितीयतृतीयार्थत्वेन कथ्येते । एतदर्थद्वयमपि अभिन्नतात्पर्यकमेव । कमलजैत्रविलोचनः कमलाभविलोचन इतिपदयोर्यथा समानतात्पर्यकत्वं तथा ह्येतत् । मत्तमातङ्गतुल्यबलाढ्योऽयं नन्द इत्युक्तं भवति । * य आत्मदा बलदा इति श्रुत्या भगवतो बलप्रदायकत्वमाम्नायते । अतिक्षुद्रविषयानुभवोत्सुकानां जनानां तदनुगुणं बलमावश्यकमिति स्थिते सर्वोत्तुङ्गभगवद्विषयानुभवकुतूहलिनां तदनुरूपं बलमत्यावश्यकमित्यत्र को विवादः ? तादृशं बलं स एव भगवान् प्रयच्छतीति श्रुतिराम्नासीत् । तादृशा बलेन भरितस्सोऽयं नन्दगोप इत्युक्तं भवति । अथ विलक्षणभुजबलशालित्वरूपद्वितीयविशेषणेन च इदमेव विवृतं भवति ।

एतादृशस्य नन्दगोपस्य स्नुषे ! इति (नामनिर्देशमन्तरा) संबोधयन्ति स्म प्रथमतो गोप्यः; तदाकर्ण्य सा 'व्रजे सर्वा अपि ललना नन्दस्य स्नुषा एव हि; सजातीयान् पुरुषान् वृद्धनारीः शिशूंश्च वर्जयित्वा अवशिष्टा सर्वाऽपि जनता नन्दस्नुषैव ननु' इति मत्वा प्रत्युत्तरमनभिधाय जोषमास्त । अथ कथयन्ति गोप्यः भो नीलादेवि ! इति नाम निर्दिश्य । केवलं कृष्णप्रेमपात्रभूता नन्दस्नुषास्सन्तु नाम; शास्त्रीयपद्धत्या परिणीतां भवतीमेव वयं संबोधयाम इत्यचकथन् । अथ सा नीला कृष्णपार्श्वे स्वस्यावस्थितिमपलपितुकामा सती, नीला नात्रास्तीत्यन्यवाचा प्रोवाच । तदनु संबोधयन्ति [सौगन्ध्यसंभृतचिकुरबन्धे !] इति; * न हि कस्तूरिकामोदः शपथेन निवार्यते * इति जानीहि नीले !; त्वदलकनिहितकुसुमसौरभमेव हि तव अन्तः स्थितिं पिशुनयति; वृथाऽपलापेन किं ते फलं

सेत्स्यतीत्युक्तं भवति। अधस्तात् द्वितीयगाथायाम् प्रकृतव्रतसमाप्तिपर्यन्तं पुष्पधारणादिकमस्माभिर्वर्जनीयमिति यत्संकल्पितं सर्वाभिः, तद्विरोधेन एकाकिन्या भवत्या क्रियमाणं कुसुमधारणं किं ननु युज्यते? महदवद्यं खल्वेतत् इति क्षेपश्चात्र गम्यः॥

अथ नीला स्वस्य अन्तरवस्थाननिह्नवप्रयत्नो विफल एवेति मत्वा 'अयि भो सख्यः! निशीथः खल्विदानीम्, अकाले किमिति समागतास्स्थ?' इति पप्रच्छ; तत्रोत्तरमुदीरयन्ति गोप्यः। [कुक्कुटास्तावत् सर्वत्र प्रसमराः कूजन्ति; माधवीततिनिषण्णाः कोकिलाश्च अस्कूलितकण्ठनादं प्रदर्शयन्ति] इति। अनेन प्राभातिकाभिज्ञानद्वितयं कथितं भवति। तदिदमाकर्ण्य सा अश्रुतिमभिनीयावतस्थे; अथ पुनरपि तामुद्बोधयन्ति—[अयि कन्दुकाञ्चितपाणितले!] इति। कृष्णेन सह चिरं कन्दुकताडनक्रीडां विरचय्य परिश्रान्ता अधुनैव तल्पमधिशयितवती किमु? इति पृच्छन्तीव। अथ किं चिकीर्षितमधुना युष्माकमिति पृष्टवत्यास्तस्या उत्तरमाहुः— [युष्मद्वल्लभवैभवसंकीर्तनार्थमिति।] त्वदेकवल्लभस्य कृष्णस्य सौशील्यसौलभ्यादिगुणजातं त्वया सह संमिलितास्सत्यो गातुमुत्कण्ठितास्स्म इत्यर्थः। अथ नीला निजगाद "कवाटं न कीलितमस्ति; युष्माकमुद्घाटनार्हमेव वर्तते: स्वयमुद्घाट्य काममन्तः प्रविशत" इति। अथ गोप्य आचक्षते— [सौवर्णकरवलयततिनिनदेन सह त्वं समागत्य त्वत्पाणिपद्मेन कवाटमुद्घाट्य अस्मानन्तः प्रवेशय] इति। अयि सखि! अस्माकमन्तः प्रवेशमात्रं न काङ्क्षितम्; त्वदीयकरवलयविततिनिनदश्रवणेन श्रोत्रानन्दं लभेमहि; त्वद्गतिसौन्दर्यावलोकनेन नयनानन्दं च विन्देमहि—इति भावः।

इयं गाथा विशिष्य भगवद्रामानुजमुनेरादरातिशयपात्रभूतेति संप्रदायविदः। तिरुप्पावैजीयरित्येव हि भगवद्रामानुजदिव्यनामप्रथा। भिक्षापर्यटनवसरेषु तमिमं दिव्यप्रबन्धमुपांशु कथयन्नेव पर्यटन् एकस्मिन्दिने स्वाचार्यस्य महापूर्णस्य दिव्यभवनोपसर्पणसमये क्रमप्राप्तामिमां गाथामनुसंदधानः कवाटोद्घाटनाय समुपागतामाचार्यदुहितरम् अत्तुळाय्नाम्नीमवेक्ष्य प्रकृतगाथार्थानुगुण्यं च संचिन्त्य तामेव कन्यकां नीलादेवीं मन्यमानो व्यामुह्यतिस्मेति। अस्मिन्नैतिह्ये महापूर्णगुरुस्थाने अन्यमाचार्यं केचित्कथयन्ति॥

(अथ ध्वन्यर्थविवरणम्।) नन्दगोपस्य स्नुषा ह्यत्र प्रबोध्यते; नन्दगोपपदमाचार्यापदेशेन प्रयुक्तमिति पूर्वगाथायां सुष्ठु विवृतम्; तदिहाप्यनुसन्धेयम्; तस्यान्तरङ्गप्रियशिष्यः स्नुषात्वेन कथ्यत इति वेदितव्यम्। प्रथमत आचार्यस्य प्रभावातिशयो विशेषणद्वितयेन प्रकीर्त्यते। महागजसंपन्नत्वं महागजजेतृत्वं महागजोपमेयत्वं चेति त्रितयं प्रथमविशेषणार्थ इति प्रत्यपादयाम; तदिदं त्रितयमप्याचार्ये सुष्ठु संगच्छते। महागजसंपन्नत्वं पुरस्तादुपपाद्यते। दिव्यसूरिवरैस्तत्रतत्र भगवन्तं प्रति प्रयुज्यमानेषु संबोधनेषु "हे मत्तमातङ्ग!" इति संबोधनमसकृद्वीक्ष्यते? १. मातङ्गो यथा बलीयानपि सन् आलानबद्धो भवति तथा परमशक्तियुक्तोऽपि भगवान् उलूखले दाम्ना निबद्धो भवति। २. वेतण्डः स्वात्मबन्धनार्थशृंखलिकामाधोरणाय यथा स्वयमेव ददाति, भगवानपि तथा स्वात्मनियन्त्रणोपयुक्तं भक्तिपाशं भक्तजनाय स्वयमेव वितरति। ३. गजो यथा स्वात्मानमधिरोढुमिच्छतां जनानां स्वचरणमेव आरोहणसाधनतया प्रदर्शयति, तथा भगवानपि स्वात्मानं प्रेप्सतां सतां स्वपादारविन्दमेव साधनतया निर्दिशति।

४. हस्ती यथा आधोरणानुज्ञामन्तरेण प्राप्तं जनं धिक्करोति तथा भगवानपि आचार्यादेशमन्तरा स्वसविधमागतं जनमुपेक्षते। ५. कलभो यथा स्वकीयस्थितिगमनशयनादिकम् आधोरणाज्ञानुसारेणैव स्वीकरोति, तथा भगवानपि स्वान्तरङ्गभक्तजनाधीनस्थितिशयनगमनादिको भवति; तदिदं भक्तिसारमुनीन्द्रदिव्यचरितेऽनुसन्धेयम्; काञ्च्यां वेगासेतुर्भगवान् यथोक्तकारीत्येव हि नाम बिभर्ति। ६. करी यथा स्नापितोऽपि क्षणमात्रे परागलिप्तगात्र एव भवति, तथा भगवानपि उभयवेदसूक्तसंशोधितदिव्यात्मस्वरूपोऽपि सन् अस्मादृशामपि कापुरुषाणां दुर्वचोभिरात्मानं मलिनीकरोति; अत्र * स्वं संस्कृतद्राविडवेदसूक्तैर्भान्तं मदुक्तैर्मलिनीकरोति। श्रीरङ्गकमत्र; कलभं क एव स्नात्वाऽपि धूलीरसिकं निषेद्धा॥ * इत्येषा श्रीरङ्गराजस्तवसूक्तिरनुसन्धेया। ७. इभो यथा पर्वतवासेषु परमां रुचिं धत्ते तथा भगवानपि श्रीवेङ्कटाद्रि-करिगिरि-काननाद्रिप्रभृतिपर्वतविशेषवसतिरसिको विराजते। ८. यथा नाग एकेनैव हस्तेन युक्तः, तथा भगवानपि * दद्यान्न प्रतिगृह्णीयादित्युक्तरीत्या औदार्यभूषितमेकमेव हस्तं बिभर्ति। महाबलिप्रभृतिकतिपयव्यक्तिसविधे कृता याच्ञाऽपि सत्यमौदार्यसीमाभूमिरेवेति मन्तव्यम्। ९. द्विपो यथा स्वेन लब्धं घनमाधोरणाय ददाति तथा भगवानप्यर्चासु स्वात्मनोपार्ज्यमानमर्थजातम् अर्चकपरिचारकादिभ्यः प्रयच्छति। १०. दन्ती स्वयमतिशयितबलाढ्योऽपि सन् यथा ह्रस्पतरादङ्कुशाद्बिभेति, तथा भगवानपि भक्तिक्रीतस्सन् भक्तेभ्यो भीतभीत इवावतिष्ठते। इत्येवमादयो गजसाम्यनिर्वाहकप्रकारा अनुसन्धेयाः। तथाच मदहस्तिनिर्विशेषेण भगवता संपन्न आचार्य इति बोध्यम्। मत्तमातङ्गजेतृत्वमप्यक्षतमाचार्ये; इन्द्रियरूपमत्तगजावलेपनिरासकत्वात्।

अथ इभनिभत्वमप्याचार्ये सूपपादम्; ऐतिह्यविशेषविलेखनमुखेन तदिदमुपपाद्यते। पुरा कदाचिद्भगवान् भाष्यकारः सह शिष्यवर्गैः श्रीवेङ्कटाद्रिमधिजगाम; तदात्वे तत्र स्थिता महान्तः पादारविन्दयोः प्रणिपत्य कांश्चिदर्थविशेषानुपदेष्टुमर्थयन्ते स्म। प्रार्थनां च तामुररीकृत्य गुरुवरो यतिराजो द्वयाख्यस्य मन्त्ररत्नस्यार्थविशेषान् प्राधान्येनोपदिशन् मूलमन्त्रचरमश्लोकयोरप्यर्थं समगृह्णात्। अवसिते चास्मिन् मधुरललितोपदेशे, श्रोतृष्वन्यतमोऽनन्तार्यः [अनन्दाळ्वान्स्वामी] समुत्थाय "द्राविडाम्नायेषु श्रीभूतयोगिनाऽनुगृहीते द्वितीयान्तादिदिव्यप्रबन्धे * पेरुहुमदवेळम् * इत्युपक्रमशालिनी या गाथा विराजते तस्या हार्दमाशयमद्यैव वयमवगन्तुं भाग्यमलभामहि" इति विज्ञाप्य, तस्या भूतयोगिसूक्तेरर्थं सुविशदमुपन्यास्थत। तस्या द्राविडगाथायाः संस्कृतविवर्तपद्यमस्मदीयमिदम्: श्लो॥ स्रवन्मदजलः करी स्वदयितां पुरस्कृत्य सन् द्विपर्वसहितं मृदुं मधुरवेणुदण्डाङ्कुरम्। प्रगृह्य सविधस्थिते मधुनि मेलयित्वाऽथ तां प्रभोजयति यत्र वै स खलु वेङ्कटाद्रिर्हरेः॥ इति। तत्रतत्र शैलेषु चरन्तः करिणः करिण्यां प्रेमभूम्ना (पर्वद्वयविशिष्टम्) वेणुदण्डाङ्कुरमुत्खाय तं मधुना सह मिश्रमाकलय्य करिणीं प्राशयन्तीति वस्तुस्थितिः। स्वभावोक्तिरियम्। एवमेव श्रीवेङ्कटाद्रिवर्णनेऽत्र श्रीभूतयोगिनाऽन्वग्राहि। अन्यापदेशगाथा सेयमिति महतां महामतीनां प्रतिपत्तिः। भगवद्रामानुजमुनिरेवात्र करिवरत्वेन कथ्यते। अभिमता शिष्यमण्डली करिणीत्वेनापदिश्यते। खण्डद्वयात्मकं मन्त्ररत्नं [द्वयमन्त्रः] पर्वद्वययुक्तमृदुमधुरवेणुदण्डाङ्कुरत्वेनाभिधीयते। मूलमन्त्रः चरमश्लोकश्च सविधस्थितमधुत्वेनोपवर्ण्यते। वस्तुतः श्रीमन्नारायणवदनारविन्दविनिर्गलितं मधु खलु तद्द्वितयम्। द्वयमन्त्रस्य तस्मिन्मधुनि संमेलनं नाम—मूलमन्त्रचरमश्लोकार्थसंवलितद्वयार्थवर्णनमेव। एवं भगवान् भाष्यकृदत्रागत्य मधुर-

तरार्थवर्णनेनास्माननुग्रहीष्यतीति पुरैव प्रत्यग्दृशा समीक्ष्य भूतयोगी बभाषे—इति तावदनन्दाळ्वान्स्वामिनामुपन्यासर्वस्वम्। एतेन च मत्तवारणत्वमाचार्यवर्ये सूपपन्नं वेदितव्यम्॥

अथ [द्वितीयविशेषणं] विलक्षणभुजबलशालित्वमप्याचार्यवर्ये सुष्ठु निर्वोढुं शक्यम्; * यद्वा न मे भुजबलं तव पादपद्मलाभे * इति श्रीगुणरत्नकोशे कथनात् शिष्या भगवत्पादारविन्दप्राप्त्यौपयिकभुजबलदरिद्रा इत्यवगम्यते। आचार्यो हि तथाविधभुजबलसमृद्धः। जननपदवीजङ्घालानामस्मादृशां मुहुरितस्ततः पलायनं परासितुं प्रभवता भुजबलेन सुशोभित आचार्य इत्युक्तं भवति। एतादृशस्याचार्यसार्वभौमस्य परमप्रीतिपात्रभूत भो अन्तेवासिवर्य! इति संबोधितं भवति। [सौगन्ध्यसंभृतचिकुरबन्धे!] इत्यनेन * नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिमित्युक्तरीत्या विनयावनतशिरस्कत्वरूपः सौरभातिशयः कथितो भवति। [कवाटबन्धमुन्मोचयेथाः] इत्यनेन आचार्यसार्वभौमपरिसरमस्मान् प्रापयेत्युक्तं भवति। [कुक्कुटास्तावत् सर्वत्र प्रसमराः कूजन्ति] इति प्रत्यूषे निद्रां विसृज्य स्वयं प्रबुध्यमानो जन्तुविशेषः कुक्कुटः; तथा नाम प्रबुद्धा अनलसा अन्तेवासिन इह विवक्षिताः। किञ्च कुक्कुटा अवकरे निगूढमपि रत्नादिकं श्रेष्ठवस्तु चञ्चुपुटेन क्षणमात्रे निस्सारयन्तीति प्रसिद्धिः। तथा नाम सारग्राहिणः शिष्या इह विवक्षिताः। ते सर्वतो गत्वा अलब्धावलम्बास्सन्तोऽत्र समागत्य उच्चैः प्रार्थयन्ते इत्युक्तं भवति। अथ कोकिलकण्ठनादकथने अमी अर्थविशेषा अवबोद्धव्याः; १. कोकिलाः प्रायः पुन्नागवृक्षवासिनो भवन्तीति गोदासूक्ततः श्रीपराङ्कुशमुनीन्द्रसूक्ततश्चावगम्यते; श्रीरङ्गराजस्तवे * पुन्नागतल्लजमजस्रसहस्रगीतिसेकोत्थदिव्यनिजसौरभमामनामः * इति श्लोकरत्नेन सविशेषमभिष्टुतस्य (श्रीरङ्गे चन्द्रपुष्करिणीसमीपस्थस्य) पुन्नागवृक्षवरस्य च्छायायां निषद्य ये बहुश्रुता अभूवन् ते तावदत्र विवक्षिताः। २. कोकिलानां परभृतत्वं प्रसिद्धम्; तथा आचार्याधीनपोषणाः शिष्या इह विवक्षिताः। ३. कोकिलाः प्रथमतश्चूतकिसलयखादनेन कषायितवदनास्सन्तः अथ पनसफलमधुररसचूषणेन तृप्ता भवन्तीति श्रीपरकालमुनीन्द्रः स्वकीयदिव्यगाथासु (पेरियतिरुमोळि ५-३-४.) कथयति। एवं प्रथमतः काव्यनाटकादिग्रन्थेषु सामान्यशास्त्रेषु च निष्ठया कषायितहृदया भूत्वा, अथ वेदान्तशास्त्रव्यासङ्गेन हृष्यन्तोऽधिकारिविशेषा इह विवक्षिताः। ४. * वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः * इति कवयोऽपि ननु कथयन्ति; वसन्तर्तौ पिका विशेषतः स्वकण्ठनादं प्रदर्शयन्ति यथा, तथा समयविशेषेष्वतिमधुरगभीरविमलवाग्विभवप्रपञ्चनेन रसिकजनहृदयान्यावर्जयन्तो वाग्मिन इह विवक्षिताः। ५. * पिकः कूजति पञ्चमम् * इत्यभिधानात् पिककूजितं पञ्चमध्वनिरिति व्यपदिश्यते; एवं येषां वाग्वितितिश्चतुर्वेदतोऽप्यभ्यधिका सती "किमयं पञ्चमवेदप्रादुर्भावविशेषः!" इत्युल्लेखयोग्या विजृम्भते, ते विवक्षिता इह। एतादृशा अधिकारिणश्चात्र सन्निहितास्सन्तीति प्रोक्तं भवति। एतेषां कलकण्ठानां माधवीनिष्ठत्वं मूले कथ्यते; * माधवीं माधवप्रियामितिश्रीसूक्तरीत्या माधव्याः श्रीमहालक्ष्म्या एते रक्ष्यभूता इति सूचितं भवति।

[अयि कन्दुकाञ्चितपाणितले!] इत्यत्रैतदवगन्तव्यम्; * त्वं न्यञ्चद्भिरुदञ्चद्भिः कर्मसूत्रोपपादितैः। हरे विहरसि क्रीडाकन्दुकैरिव जन्तुभिः * इत्युक्तरीत्या प्रपञ्चनिर्वहणमेव कन्दुकक्रीडाभिलप्यम्। भगवानिव भागवता अपि प्रपञ्चनिर्वहणे अधिकृता एव; तस्य तु तत् स्वाभाविकम्; अमीषां तु तदाज्ञाधीनमिति इयान् विशेषः।

[सौवर्णकरवलयततिनिनदेन सह समागत्य] इति। सर्वेऽपि शास्त्रार्था येषां करस्थास्सन्तः सन्ततमपि मुखरास्सन्ति तादृशाः खलु प्रबोध्यन्तेऽत्र। युष्मत्करस्थसर्वार्थध्वनिविशेषा अपि अस्माकं कर्णानन्ददायका भूयासुरिति प्रार्थितं भवति। [सरसिजोपमेयपाणितलेन समुद्घाटय] इत्यत्र, * उद्गृह्णतीमुपनिषत्सु निगूढमर्थं चित्ते निवेशयितुमल्पधियां स्वयं नः। पश्येम लक्ष्मणमुनेः प्रतिपन्नहस्ताम् उन्निद्रपद्मसुभगामुपदेशमुद्राम् * इति यतिराजसप्ततिसूक्तिः, *. नमज्जनस्य चित्तभित्तिभक्तिचित्रतूलिका भवाहिवीर्यभञ्जने नरेन्द्रमन्त्रयन्त्रणा। प्रपन्नलोककैरवप्रसन्नचारुचन्द्रिका शठारिहस्तमुद्रिका हठाद्धुनोतु मे तमः * इति नक्षत्रमालिकासूक्तिश्च स्मर्तव्ये॥ १८

तथाचैतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ नीले! नन्दस्नुषे भोः! सुरभिकचभरे! कन्दुकोल्लासिहस्ते
कूजन्तः कुक्कुटास्सन्त्यथ च पिकगणो माधवीपुञ्जवासी।
शश्वत्कूजत्यहो त्वं निजकरवलयान्नादयन्ती कवाटं
हस्तेनोद्घाटयेथाः स्वपतिनुतय इत्यूचुषीं स्तौमि गोदाम्॥ १८॥

इति अष्टादशगाथाविवरणं समाप्तम्॥

---

१९. एकोनविंशी गाथा—कुत्तुविळक्केरिय॥

कुत्तुविळक्केरिय कोट्टुक्काल् कट्टिल्मेल् * मेत्तेन्न पञ्चशयनत्तिन्मेलेरि *
कोत्तलर्पूङ्कुळल् नप्पिन्नै कोङ्गैमेल् * वैत्तुक्किडन्द मलर्मार्पा वाय्तिरवाय् *
मैत्तडङ्कण्णिनाय् नीयुन्मणाळनै * एत्तनैपोदुम् तुयिलेळ वोट्टाय् काण् *
एत्तनैयेलुम् पिरिवात्त किल्लायाल् * तत्तुवमन्नु तहवेलोरेम्बावाय्॥ १९॥

पञ्चमुखप्रदीपज्वालायां ज्वलन्त्याम् दन्तिदन्तनिर्मितचरणविशिष्टखट्वायां सुकुमारतरं पञ्चशयनमधिरुह्य समुत्फुल्लकुसुमस्तबकालंकृतकेशपाशाञ्चितनीलादेवीस्तनतटीसंश्लेषविकस्वरवक्षस्स्थल भोः कृष्ण! वाचमपि न ददासि हन्त। अयि अञ्जनाञ्चितपृथुनयने नीले! त्वं तावदात्मनो वल्लभं क्षणमात्रमपि शयनादुत्थितं न सहसे; न कथञ्चिदपि तद्विश्लेषं च सहसे; सत्यं बलवती तव निर्घृणता॥ (इति मूलगाथाविवर्तः)

अधस्तनगाथायामुद्बोधिता नीलादेवी 'गोप्य इमा अनुग्राह्या एवे' त्यवधार्य परमकृपया कवाटमुद्घाटयितुकामा शयनादुदतिष्ठत; तस्यास्सकुतूहलमुत्थानमवलोकयन् कृष्णो भगवान् 'मदाश्रितानां जनानां कार्यं मयैव खलु कर्तव्यम्; किमिति तत्कार्यमेषा कर्तुमुत्सहते; तदिदं प्रतिरोद्धव्यमेव मया' इत्याशयानः स्वयं सरभसमुत्थाय कवाटोद्घाटनव्यग्रां देवीं समाकृष्य हठात्कारेण तल्पे निपातयामास। निपतिताऽपि सा सखीजनानुग्रहश्रद्धया पुनरपि जवेनोत्थातुमयतत। सर्वथा तस्या उत्थानं प्रतिरोद्धुकामः कृष्णस्तस्या वक्षसि स्वयं निपत्य तद्दिव्यमङ्गलविग्रहसंश्लेषजनितसुखातिशयेन व्यामुग्धस्सन् अस्तमितान्यभावः शयान एवावतस्थे। तदिदं जालकरन्ध्रेण वीक्षमाणा

गोपाङ्गनाः कृष्णं प्रति नीलां प्रति च सनिर्वेदं यत्कथयामासुः तदनया गाथया निबध्यते। दिव्यप्रबन्धस्यास्य मुखपद्ये श्रीपराशरभट्टार्यप्रणीते * नीलातुङ्गस्तनगिरितटीसुप्तमुद्बोध्य कृष्णम् * इति योऽयं प्रथमपादो विराजते स तावदिमां गाथामनुसृत्यैवावतीर्ण इति वेदितव्यम्। 'नीलादेवीस्तनतटसुप्त!' इति संबोधनं कृष्णस्य परमानन्दसंदोहसंदायकं भवितुमलम् इत्यभिसन्धिनैव एवं नाम संबोध्यते। वचोविन्यासेऽस्मिन् गोपीनामीर्ष्याऽपि महती प्रस्फुरति। "वयं तावत् कृष्णोपभोगार्थं तिमिरघनप्रदेशगवेषणनिरतास्स्मः; तमालद्रुमैः श्यामासु वनावलीषु अश्मखण्डैः कण्टकसञ्चयैश्च दन्तुरेषु भूतलेष्वेव शयितव्यं भवत्यस्माकम्; प्रायश्च विप्रलम्भमेव कुर्वतः कृष्णस्य वचसि विस्रम्भेण यमुनासैकतेषु हिमहततनुभिरस्माभिराप्रभातं चकितचकितं प्रतीक्ष्यैव खेदोदर्कया कालो यापनीयो भवति च। हंहो ईदृशी नः परिस्थितिः। जन्मान्तरेषु सुचिरमाराधितदैवताया अस्या नीलायास्तु अहो कीदृशोऽयं भाग्यपरिपाकः! जाज्वल्यमानदीपप्रकाशे हि सेयमुपभुङ्क्ते स्वैरं कृष्णम्। खट्वायां तुङ्गतूलासनोज्ज्वलसोपधानसुकुमारतल्पे हि सुमुखं शेते। भयलेशविवर्जितं ह्यनारतं सहशयनम्। अहह! कीदृश्य इमास्सौभाग्यपरम्पराः! धिग्धिगस्मदीयं दौर्भाग्यभूमानम्! इत्येवमीर्ष्यारोषकषायितो ह्येष वचोविन्यासः। दिव्यदम्पत्योर्युवयोरेवं नाम परमभोगे संपद्यमाने पादसंवाहनादीनि कैङ्कर्याणि कर्तुं परिचारिका अपेक्षिताः खलु। तत्पदवी च किमस्माकं दुर्लभा! इति निर्वेदोऽपि स्फुरति तावदत्र।

[सुकुमारतरं पञ्चशयनमधिरुह्य] इति कथितम्; पञ्चविधगुणोपेतं शयनं पञ्चशयनमित्युच्यते। शैत्यमार्दवसौरभधावल्यविस्तृतत्वानि शयनीयस्य पञ्च गुणाः। पञ्चस्वेतेष्वन्यतमस्यापि मार्दवस्य पृथग्विशेषणेन पुनः कीर्तनात् मार्दवमत्र भृशमतिशयितो गुण इति द्योत्यते। "कुसुमस्तबकालंकृतकेशपाशाञ्चितनीलादेवी" ति कथनमिदं श्रीविष्णुपुराणश्लोकरत्नमेकं स्मारयतीव; तत्र हि * अत्रोपविश्य सा तेन काऽपि पुष्पैरलंकृता। अन्यजन्मनि सर्वात्मा विष्णुरभ्यर्चितो यया॥ * (५-१३-३५.) इति कीर्तिता गोपी प्राय इयमेव स्यात्। [नीलादेवीस्तनतटीसंश्लेषविकस्वरवक्षस्स्थल!] इति कथ्यते; नीलास्तनतटसंश्लेषेण कृष्णवक्षस्स्थलस्य विकस्वरत्वमुच्यते; * अविकाराय शुद्धाय * सदैकरूपरूपाय * इत्यादिप्रमाणसिद्धं संकोचविकासराहित्यं तावत् कर्मनिबन्धनसंकोचविकासाभाववत्त्वमेव; प्रणयनिबन्धनतया भगवदवयवानां जायमानो विकासो हन्त केन प्रमाणेन प्रतिरोद्धुं शक्यः? दामोदरस्य कृष्णस्य वक्षस्स्थलं यशोदाकृतदामबन्धनेन विकस्वरमभूदिति श्रीपराङ्कुशमुनीन्द्रैः तिरुविरुत्ताख्ये दिव्यप्रबन्धेऽभिधीयते; दामबन्धेन विकस्वरतां विन्दतो वक्षसः कथं नु देवीस्तनतटसंश्लेषेण विकासो न स्यादिति रसघनमुल्लिखन्त्याचार्याः।

"देवीस्तनतटीसंश्लेषविकस्वरवक्षस्स्थल भोः उत्तिष्ठ" इत्यनभिधाय "भो हन्त वाचं न ददासी" ति कथनेन—दिव्यदम्पत्योः संश्लेषविघातकरणे स्वात्मनां रुचिर्नास्तीति, केवलमभयवाग्दानश्रवणमात्रतः स्वात्मनां परमतृप्तिस्स्यादिति च स्फोर्यते। भोः कृष्ण! त्वदीयं वक्षस्स्थलं कामं प्रदीयतां नीलायै; न वयं तत्सापेक्षाः; वाङ्मात्रमस्मभ्यं दीयताम्—इति कथयन्तीव। एवमुक्तवतीनां गोपीनामतिमात्रमवसादं हृदि कलयन् कृष्णः कारुण्य-

विवशस्सन् वाचा किमपि वक्तुमुत्कण्ठितो वाचमुद्घाटयितुमुपचक्रमे ; नीला तदवगत्य 'पूर्वं मदीयां प्रवृत्तिं प्रतिरुद्धवतोऽस्य प्रवृत्तिः मयाऽपि प्रतिरोद्धव्यैव खलु' इत्याशय्य रोषाविला सती तर्जनीमुद्रया तस्य वाच उद्घाटनं निषेधतिस्म । जालकरन्ध्रेण तदिदमवलोकितवत्यो गोप्य आहुः [अयि अञ्जनाञ्चितपृथुनयने नीले !] इत्यादि ॥ सर्वाभिरस्माभिः प्रथमतः कृतं संकल्पम् (द्वितीयगाथायां स्थितम्) अतिक्रम्य नयनयोरञ्जनालङ्करणं यत्कृतं त्वया तदेव प्राथमिकमवद्यम् ; ततश्चोपरि त्वया क्रियमाणस्तदीयकारुण्यनिरोधोऽपि महत्तरमवद्यं ननु— इत्युक्तं भवति। अशरण्यशरण्येति प्रसिद्धा त्वमपि हन्त संप्रति निर्घृणा हि भवसि ; इदृशं नैर्घृण्यं न तेऽनुरूपम् इत्याचचक्षिरे ॥

(अथ ध्वन्यर्थविवरणम् ।) गाथाया अस्याः पूर्वार्धेन गुरुसार्वभौमस्संप्रार्थ्यते ; उत्तरार्धेन तु तदन्तरङ्गप्रियशिष्यः। भगवान् रामानुजमुनीन्द्रः स्वस्य भूयस्सु शिष्येषु विराजमानेष्वपि श्रीकूरनाथगुरुवरे अपरिमितप्रेमशाली विरेजे तदीयज्ञानभक्तिविरक्तिसाम्राज्यदृष्ट्या ; एवं जगति सर्वेऽपि गुरवः भूयसां स्वशिष्याणां मध्ये एकमन्तरङ्गशिष्यमतितरामनुगृह्णातीति संप्रदायः। सैव प्रणाली इहानुसन्धेया। कृष्णो नीलादेव्याः स्तनयुगे निजं वक्षो निक्षिपति ; तथा गुरुवरः स्वान्तरङ्गशिष्यस्य ज्ञानभक्तिसाम्राज्यातिशये निजं हृदयं निदधातीति ज्ञेयम्। 'अहो ! कीदृशमस्य ज्ञानम्! कीदृशीचास्य भक्तिः!' इति विस्मयहर्षविवशो भवतीति भावः। पञ्चमुखप्रदीपज्वालाज्वलनं यदुच्यते मूले, तत्रेदमवधेयम्; १. श्रुतिषु २. स्मृतिषु ३. इतिहासपुराणेषु ४. पाञ्चरात्रशास्त्रेषु ५. सदाचार्यदिव्यसूक्तिषु च सर्वतोमुखं यद्विज्ञानं विजृम्भते तदुक्तं भवति। अथ चरणचतुष्टयधार्यमाणायां खट्वायां शयनं यत्कथ्यते तत्रेदमवगन्तव्यम्। खट्वा तावत् सर्वायासनिवृत्तिपूर्वकनिरतिशयसुखानुभवाधिकरणभूतं स्थानम्। ज्ञानिनां सांसारिकसकलक्लेशविस्मरणपूर्वकब्रह्मानन्दानुभवः शास्त्रेष्वेव खलु ; तथाच शास्त्रमेवात्र खट्वापदविवक्षितम् ; अस्य चरणचतुष्टयधार्यमाणत्वम्— "चतुर्विधदेहवर्णाश्रमाधिकारफलमोक्षसाधनगतियुगधर्मव्यूहरूपक्रियादी" त्याद्याचार्यहृदयसूक्त्यनुसारेण चतुर्विधनानार्थभरितत्वमेव। तदिदं मनागुपपादयामः ; देवमनुष्यतिर्यक्स्थावराकारेण देहश्चतुर्विधः ; ब्राह्मणक्षत्रियवैश्यशूद्ररूपेण वर्णश्चतुर्विधः। ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासात्मकतया आश्रमश्चतुर्विधः ; * आर्तो जिज्ञासुरर्थार्थी ज्ञानी * इति गीतोक्तरीत्या अधिकारश्चतुर्विधः ; धर्मार्थकाममोक्षरूपेण पुरुषार्थश्चतुर्विधः ; सालोक्यसामीप्यसारूप्यसायुज्यभेदेन मोक्षश्चतुर्विधः ; कर्मज्ञानभक्तिप्रपत्तिभेदेन साधनं चतुर्विधम् ; पञ्चाग्निविद्योक्तप्रकारेण संभवन्ती गतिश्च गर्भगति — याम्यगति — धूमादिगति — अर्चिरादिगत्यात्मना चतुर्विधा ; कृतत्रेताद्वापरकलिरूपेण युगचातुर्विध्यम् ; * ध्यायन् कृते यजन् यज्ञैस्त्रेतायां, द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥ * इत्युक्तरीत्या ध्यानयजनार्चनसंकीर्तनरूपेण युगधर्मचातुर्विध्यम् ; वासुदेवसंकर्षणप्रद्युम्नानिरुद्धरूपेण व्यूहचातुर्विध्यम् ; सितपीतश्यामनीलतया युगक्रमेण भगवद्विग्रहरूपचातुर्विध्यम् ; सृष्टिस्थितिसंहारमोक्षप्रदत्वात्मना भगवत्क्रियाचातुर्विध्यम् ; आमोदप्रमोदसंमोदवैकुण्ठरूपेण व्यूहस्थानचातुर्विध्यम् । एवं नाम चतुर्विधत्वेन परिगणनीया भूयांसस्सन्ति हि शास्त्रार्थाः। शास्त्ररूपखट्वाधारकाश्चत्वारश्चरणा अमी इति वेदितव्यम्।

खट्वायां चोपरि पञ्चशयनारोहणं नाम— * प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः। प्राप्त्युपायं फलं प्राप्तेस्तथा प्राप्तिविरोधि च। वदन्ति सकला वेदाः सेतिहासपुराणकाः। मुनयश्च महात्मानो वेदवेदान्तपारगाः॥ * इत्युक्त-अर्थपञ्चकज्ञानैकनिष्णातत्वम्। काममधीयन्तां नाम भूरितराणि शास्त्राणि; तेषु प्राप्यस्य ब्रह्मणः स्वरूपम्, प्राप्तुरात्मनः स्वरूपम्, प्राप्तिसाधनस्य स्वरूपम्, प्राप्तिसमनन्तरानुभाव्यस्य फलस्य स्वरूपम्, प्राप्तिप्रतिबन्धकस्य स्वरूपम्— इत्येतानि पञ्चैव खलु ज्ञातव्यानि; नैतदतिरिक्तमेकमप्यस्ति नाम ज्ञेयत्वेन; एतेषामेवचार्थपञ्चकव्यपदेशः। तथाचैवंविधार्थपञ्चकज्ञाननिष्ठा कथिता भवत्याचार्यस्य शिष्यस्य च; उभयोरिह सामानाधिकरण्यवर्णनात्।

नीळायाः सुरभिकुसुमाञ्चितशिरस्कत्वं मूले कथितमस्ति। * विद्या ह्यद्याऽपि सावद्या विना विनयसम्पदम् * इत्युक्तेः अवद्यावहं दुर्विनयं विहाय परमशोभाजनकं विनयं परिगृह्य सर्वाभिनन्द्यतां प्राप्तवानयं शिष्य इत्युक्तं भवति। लोके दुर्विनीतो जनः पूतिगन्धिशिरस्कोऽयमिति खलु गर्ह्यते। विपर्यये तु सुरभिशिरस्कत्वमेव हि सिध्यति। एतादृशे विद्याविनयसंपन्ने एकस्मिन्नेव शिष्ये दिव्यानुग्रहकारक गुरुसार्वभौम! स्वकीयं वागमृतमस्मास्वपि प्रसारयेति प्रार्थितं भवति। अथ सोऽयमन्तेवासिवर्योऽपि क्षेपापदेशेन अनुग्रहं प्रार्थ्यते। [अयि अञ्जनाञ्चितपृथुनयने नीले!] इत्यत्र बोध्यमिदम्; * ये तु त्वदंघ्रिसरसीरुहभक्तिहीनास्तेषाममीभिरपि नैव यथार्थबोधः। पित्तभ्रमञ्जनमनापुषि जातु नेत्रे नैव प्रभाभिरपि शंखसितत्वबुद्धिः॥ * इति श्रीकूरनाथगुरुवराः। * मनसि विलसताऽक्ष्णा भक्तिसिद्धाञ्जनेन * इति भट्टपादाः। * नित्यं करीश! तिमिराविलदृष्टयोऽपि सिद्धाञ्जनेन भवतैव विभूषिताक्षाः। पश्यन्त्युपर्युपरि संचरतामदृश्यं मायानिगूढमनपायमहानिधिं त्वाम्॥ * इति निगमान्तसूरयः। लोके सिद्धाञ्जनविभूषितविलोचना जना यथा निगूढमपि निधिं सुखेन साक्षात्कुर्वते, तथा भक्तिभूमभूषितान्तःकरणा एव सन्तो निगूढतरं शास्त्रतत्त्वमवबुध्यन्त इति निश्चप्रचमेतत्। एवंविधो विशिष्टाधिकारी सोऽयमित्युक्तं भवति॥ अये सर्वोत्तुङ्ग सब्रह्मचारिन् (अथवा) सतीर्थ्य! गुरुवरं भवान् स्वात्मन्येव सदाऽभिमुखं कुरुते; युवयोरेव सततमविच्छेदेनानुभवो भवति; नैतदानृशंस्यानुरूपम्; * एकस्स्वादु न भुञ्जीत * इति शास्त्रतत्त्वं न ज्ञायत इव तत्रभवता इति क्षेपमुखेन, सर्वे वयं संमिलितास्सन्तः सदुपदेशानधिगच्छेम यथा, तथा नाम दयेथा इति प्रार्थितं भवति॥ १९

तथाच एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ प्रज्वाल्योत्तुङ्गदीपं मृदुतरतलिमे दन्तिदन्तोत्थखट्वा-
संस्तीर्णे दिव्यनीलाकुचतटकलिताश्लेषवक्षस्स्थलेश।
वाचं नैव प्रदत्से बतबत सहसे नैव नीले! क्षणार्धं
विश्लेषं चापि हाहा किमिदमिति वदन्त्यस्तु मे वाचि गोदा॥ १९॥

इति एकोनविंशगाथाविवरणं समाप्तम्॥

२०. विंशी गाथा—मुप्पत्तुमूवरमर्कु ॥

मुप्पत्तुमूवरमर्कु मुन्शेन्नु * कप्पन्तविर्कुम् कलिये तुयिलेळाय् *
शेप्पमुडैयाय् तिरलुडैयाय् * शेत्तार्कु वेप्पम् कोडुक्कुम् विमला तुयिलेळाय् *
शेप्पन्नमेन्मुलै च्चेव्वाय् शिरुमरुङ्गुल * नप्पिन्नै नङ्गाय् तिरुवे तुयिलेळाय् *
उक्कमुन्तट्टोळियुम् तन्दुन्मणाळनै * इप्पोदेयेम्मै नीराट्टेलोरेम्बावाय् ॥ २० ॥

त्रयस्त्रिंशदमराणां पुरस्तादुपेत्य तदीयविविधविपदपोहनप्रगल्भ! भगवन्! शयनादुत्तिष्ठ। आर्जवगुणनिधे महाबलाढ्य! रिपूणां भयज्वरप्रदायक! विमल! स्वामिन्! जागृहि। सौवर्णकलशसच्छायपयोधरे! बिम्बफलप्रतिमाधरे तनुमध्ये! हे श्रीः! नीलादेवि! तल्पादुत्तिष्ठ। उत्थाय व्यजनमुकुरादिव्रतोपकरणप्रदानपूर्वकमस्मान् त्वद्वल्लभेन सह संयोज्यास्मदीयं स्नानव्रतं समापयेथाः ॥ (इति मूलगाथाविवर्तः)

अधस्तनगाथायां यद्यपि नीलादेव्या निर्घृणत्वमुदघोषि, तथाऽपि सा समुचितं समयविशेषं प्राप्य कृष्णसकाशे निवेदयितुकामा जोषमवतस्थे। विलम्बासहिष्णुतया पुनरपि गोप्यः कृष्णमेव कतिपयप्रभावविज्ञापनपूर्वकं समुद्बोधयन्ति; नीलादेवीं च तदीयसौन्दर्यलावण्यप्रशंसनपूर्वकं पुनरुद्बोधयन्ति। तथाच पूर्वगाथायामिवास्यामपि गाथायां दिव्यदम्पत्योरुद्बोधनं प्रशंसनं च संपद्यत इति बोध्यम् ॥

वेदेषु "त्रयस्त्रिंशद्वै देवाः" इति मुहुराम्नायते। अष्टौ वसवः, एकादश रुद्राः; द्वादशादित्याः, उभौ भिषजावश्विनौ—इति त्रयस्त्रिंशद्देवविवरणं च क्रमधीयते। मुख्यतमानामेषां त्रयस्त्रिंशद्देवानां कथनम् इतरेषां भूयसाममराणामुपलक्षणं मन्तव्यम्। ज्ञानशक्त्यादिषु मनुष्यापेक्षया भृशमुत्तुङ्गा अपि देवाः स्वात्मनां संभवन्तीर्विपदः स्वयं निवर्तयितुमशक्तास्सन्तो देवाधिदेवं भगवन्तमच्युतमेव शरणं प्रपद्य विध्वस्तविपदो भवन्तीति इतिहासपुराणतः प्रसिद्धमेतत्। अत एव भगवद्यामुनार्यैः स्तोत्ररत्नेऽनुगृहीतम् * वेदापहारगुरुपातकदैत्यपीडाद्यापद्विमोचनमहिष्ठफलप्रदानैः। कोऽन्यः प्रजापशुपती परिपाति? * इति। [त्रयस्त्रिंशदमराणां पुरस्तादुपेत्य तदीयविविधविपदपोहनप्रगल्भ!] इति प्रथमं संबोधनम्। पुरस्तादुपेत्य-आपदस्संभवात्पूर्वमेवोपस्थितो भूत्वेत्यर्थः। एतेन तदीयविपदुद्धारणे सन्ततदत्तावधानत्वमुक्तं भवति। अथ वा, रणाङ्गणेष्वग्रिमप्रदेशे स्थितिरवबोध्या। युद्धभीताः खलु वीरान् पुरतोऽवस्थाप्य तेषां पृष्ठभागेष्ववतिष्ठेरन्; पार्थसारथित्वेनावस्थाय भगदत्तप्रयुक्तमस्त्रमुरसा प्रतिगृहीतवतो वासुदेवस्य रणाङ्गणेष्वग्रिमप्रदेशोपस्थितौ को नु विस्मयः?

अमराणां विविधविपदपोहनप्रगल्भेति संबोधयन्तीनां गोपीनामिह वचसि बहवोऽर्था विवक्षिताः। १. हे कृष्ण! त्रयस्त्रिंशद्देवानामेव विपदमहमपाकुर्याम्, पञ्चलक्षसंख्याकगोपीनां क्लेशं नाहमपनुदेयमिति किं त्वया संकल्पितम्? २. पुंसामेव विपदो विनिवर्तयेयम् न तु स्त्रीणामिति किं व्रतमास्थितम्? ३. प्रबलानामेव क्लेशान् निरस्येयम् नत्वबलानामिति किमध्यवसितम्? ४. सोऽहमित्यहंकुर्वाणानामेव संकटमुद्धरेयम्, न तु दासोऽहमिति स्थितानां जनानामिति किमवधारितम्? ५. क्षुद्रपुरुषार्थलिप्सूनामेवाहमुपकारको भवेयम्; न पुनः परमपुरुषार्थलि-

प्सूनामिति किं मनीषितम् ? ६. * जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नताः। किं कनिष्ठाः किमु ज्येष्ठा घटीयन्त्रस्य दुर्जनाः * इत्युक्तरीत्या प्रार्थनाकाले पादयोः प्रणिपत्य, प्रार्थितार्थसिद्ध्यनन्तरं वैरिभावमास्थाय युद्धे सन्नद्धतामेवाहं कार्यकर्ता भवेयम्, न पुनस्सन्ततमपि पादाब्जसेवैकनिरतात्मनामिति किमभिसंहितम् ? ७. मदीयदिव्यमङ्गलविग्रहक्लेशसंपादनेन स्वकार्यसिद्धिं प्रेप्सतामेवाहं साहाय्यसंविधाता भवेयम् न पुनर्मङ्गलाशासनैकनिरतात्मनामिति किमाशयितम् ? ८. नश्वरशरीरसंबन्धिविपद्विनिवर्तनकामुकानामेवाहं हस्तावलम्बप्रदो भवेयम् नपुनः शाश्वतिकात्मसंबन्धिविपन्निवारणकांक्षिणां जनानामिति किमवधृतम् ? .... इत्येवमेवमुच्चावचा अनुयोगा आसामत्र वचसि गर्भिता इति वेदितव्यम्। अवलानामस्माकमवधीरणे कृते सति देवतावर्गसंरक्षणजनिता त्वदीया भूयसी प्रथा वितथा खलु भवित्री इत्यपि विवक्षितं स्यादिव।

अथ [आर्जवगुणनिधे !] इति द्वितीयं संबोधनम्। मनोवाक्कायानामैकरूप्यमार्जवम्। पञ्चवटीमागतया शूर्पणखया पृष्टो रामः कौटिल्येन किमप्यनभिधाय आर्जवेनैव प्रत्युत्तरमदादिति प्रकाशयन् प्राचेतसो मुनिवरः * ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे * इत्याह खलु ; तादृशमार्जवं यद्यपि कितवाग्रगण्ये कृष्णे दुर्लभम् तथाऽपि तदिहाधिरोप्य कथ्यत इति वा, धर्म्यैक्यधिया कथ्यत इति वा बोध्यम्। प्रतिज्ञातार्थप्रपूरकत्वं वा आर्जवम् ; तत् कृष्णेऽपि भगवति निरपायम्। * द्यौः पतेत् पृथिवी शीर्येत हिमवान् शकलीभवेत्। शुष्येत्तोयनिधिः कृष्णे ! न मे मोघं वचो भवेत् ॥ * इति द्रौपदीं प्रति कथितवताऽनेन प्रयासशतसहस्रैरपि खलु तन्निर्वर्तनमकारि ॥ अथ महाबलाढ्य ! इति तृतीयं संबोधनम्। ज्ञानशक्तिबलैश्वर्यवीर्यतेजसां षण्णां गुणानां मध्ये यत्पठ्यते बलमिति, तस्यार्थः श्रीपराशरभट्टपादैरेवमुपावर्णि श्रीरङ्गराजस्तवोत्तरशतके— * स्वमहिमस्थितिरीश ! भृशक्रियोऽप्यकलितश्रम एव बिभर्षि यत्। वपुरिव स्वमशेषमिदं बलम् * इति। निखिलानामपि चेतनाचेतनानां स्वशरीरत्वेन अनायासभरणमेव भगवतो बलम्। अवतारेषु गोवर्धनोद्धरणादिभिरतिमानुषकृत्यविशेषैस्तत्प्रकाशनं भवति च। अथ [रिपूणां भयज्वरप्रदायक !] इति चतुर्थं संबोधनम्। * समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः * देवानां दानवानां च सामान्यमधिदैवतम् * इत्याद्युक्तप्रकारेण सर्वजनवत्सलभावमुररीकृतवतो भगवतो रिपुरिति न कोऽपि वर्तते। आश्रितानां भक्तानां विषये ये प्रातिकूल्यं वहन्ति, द्रोहं च कुर्वते ते हि भगवतो रिपवः। तेषां भयज्वरसमुत्पादकेति यावत्। अथ विमलेति पञ्चमं संबोधनम्। हेयप्रतिभटेत्यर्थः। केषाञ्चिन्निरसनस्य तद्दौर्जन्यमूलकत्वात् तेन भगवतः किमप्यवद्यं नोपजायत इति भावः। * वैषम्यनैर्घृण्ये न सापेक्षत्वादित्यादिकमिह भाव्यम् ॥

अथ नीलादेवीमुद्बोधयन्ति स्तुतिपूर्वकम्। पयोधर-अधरादिसौन्दर्यवर्णनमत्र किमर्थं कृतमिति चेत् ; पुरुषकारकृत्ये निष्णाता श्रीमहालक्ष्मीर्यदा स्वकीयैरुपदेशशतैरपि भगवन्तं स्वाभिप्रायानुकूलं नावेक्षते तदा स्वकीयदिव्यावयवसौन्दर्यलावण्यप्रदर्शनेन तं व्यामोह्य विवशयतीति प्रसिद्धमेतत्। श्रीगुणरत्नकोशे * पितेव त्वत्प्रेयान् जननि ! परिपूर्णागसि जने * इत्यादिके श्लोके * त्वमुचितैरुपायैर्विस्मार्येति कथितवतामाचार्याणामिदमेव ह्यभिसंहितम्। नीलादेव्यप्येषा लक्ष्म्या एव ह्यंशभूता। सेयमपि भक्तजनानुकम्पार्थं भगवतो व्यामोहनायैव अधरपयोध-

राद्यवयवसौन्दर्यं बिभर्तीति प्रतिपत्त्या [सौवर्णकलशसच्छायपयोधरे! बिम्बफलप्रतिमाधरे! तनुमध्ये!] इति संबोध्यते। किमपेक्षितं युष्माकमिति तया पृष्टा इमाः कथयन्ति [व्यजनमुकुरादित्रतोपकरणप्रदानपूर्वकमस्मान् त्वद्वल्लभेन सह संयोज्यास्मदीयं स्नानव्रतं समापयेथाः] इति। भगवत्परिचर्यायां व्यजनमुकुरयोरुपकरणत्वं शास्त्रसिद्धं प्रात्यक्षिकं च। मार्गशीर्षस्नानव्रतसमापनप्रार्थनं भगवत्संश्लेषसंपादनप्रार्थनान्नातिरिक्तमिति मन्तव्यम्। तथाच, त्वन्निर्विशेषं वयमपि यथा भगवन्नित्यसंश्लेषभाग्यभाजो भवेम तथा दयेथा इत्युक्तं भवति॥

(अथ ध्वन्यर्थविवरणम्।) अत्रत्यैस्संबोधनपदैस्सर्वैरपि आचार्य एव तत्प्रभावप्रपञ्चनपूर्वकमुद्बोध्यते। भगवान् बहूनाममराणां विपद्विनाशनपूर्वकं संपत्प्रदानं यथा करोति, तथैव ह्याचार्योऽपि। * अजरामरवत्प्राज्ञो विद्यामर्थं च साधयेत् * इत्युक्त्यनुसारेण विद्यासाधनार्थं ये तावदमरम्मन्या नक्तंदिवं प्रयतन्ते तेऽत्र अमरपदेन विवक्षिताः। तेषां प्रार्थनामन्तरेणैव उपदेशार्थमुपस्थितो भवत्ययमाचार्यः। इदमेव पुरस्तादुपगमनम्। तेषां विविधविपदपोहनं नाम—देहात्मभ्रम—अन्यशेषत्वभ्रमाद्यापद्विमोचनम्। आपन्निवारणानन्तरं संपत्प्रदानस्य च प्राप्तत्वात् शेषत्वपारतन्त्र्यादिरूपमहिष्ठफलप्रदानं चार्थसिद्धम्। अथ आर्जवनिधित्वं नाम— * करणत्रयसारूप्यमिति सौख्यरसायनमित्याचार्यवर्यसूक्तिश्रद्धया * मनस्यन्यद्वचस्यन्यत् कर्मण्यन्यद्दुरात्मनामित्युक्तदौरात्म्यप्रहाणेन * मनस्येकं वचस्येकं कर्मण्येकं महात्मनामित्युक्तमहात्मभावस्वीकरणमेव। अथ महाबलाढ्यत्वं नाम— * अधोऽधः पापात्मा शरणद! निमज्जामि तमसीत्युक्तरीत्या संसारतिमिरान्धकूपे प्रपतिताना मुद्धरणोपयुक्तधीबलशालित्वमेव। * कुदृष्टिकुहनामुखे निपततः परब्रह्मणः करग्रहविचक्षणो जयति लक्ष्मणोऽयं मुनिरित्युक्तरीत्या कुदृष्टिकुहनान्धकूपनिपतितपरब्रह्मसमुद्धरणोपयुक्तप्रज्ञाबलशालित्वमपि सुवचम्। अथ रिपूणां भयज्वरप्रदायकत्वं नाम— * श्रुतिस्स्मृतिर्ममैवाज्ञा यस्तामुल्लंघ्य वर्तते। आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः॥ * इति भगवता धिक्कृतानां सच्छास्त्रसरणिपरिपन्थिनां भयानकत्वमेव। श्रुतिस्मृतिचोदितनित्यनैमित्तिककर्मानुष्ठानानुष्ठापनादिमुखेन सच्छास्त्रपद्धतिसंरक्षणैकदीक्षिते सदाचार्ये तदिदं निरपायं खलु। अथ विमलत्वं नाम— संसारिजनवदाचार्यस्य च प्रकृतिमण्डलेऽवस्थितस्यापि पाञ्चभौतिकदेहपिण्डपरिग्रहशालिनोऽपि अन्नपानादिकमनुजुञ्जतोऽपि * साक्षान्नारायणो देवः कृत्वा मर्त्यमयीं तनूम्; मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना * इत्याद्युक्तरीत्या भगवन्निर्विशेषताप्रयुक्तहेयप्रत्यनीकत्वमेव। अथ सौवर्णकलशसच्छायपयोधराद्यवयवसौन्दर्यवर्णनपूर्वकं प्रतिबोध्यमाना व्यक्तिः कास्विदिति चेत्; महाचार्यप्रसादजनकः सर्वथा तद्विधेय आचार्यतुल्यश्च कश्चन व्यक्तिविशेषः। स्त्रीणां पयोधरद्वंद्वं यथा भर्तृभोगविवर्धकं तथा पुंसां ज्ञानभक्ती आचार्यप्रेमविवर्धनक्षमे इति ग्राह्यम्। अधरशोभया यथा ललना पतिं विवशयति तथा विपश्चिदपश्चिम आचार्योऽपि निजवाग्विलसितेन स्वगुरुं स्वाधीनयतीति बोध्यम्। [तनुमध्ये! इति।] वनितानां कृशोदरत्वं सुष्ठु लक्षणम्। अपरिमितभोज्यवर्गभोजनेन मांसलदेहवत्त्वमनवाप्य दर्शनीयदिव्यमङ्गलविग्रहविशिष्टता आचार्याणां शोभावहा वेदितव्या। यदाहुः "आकारो ह्रस्वः कीर्तिश्च महती" इति॥ नीलादेवी यथा ह्यन्यगोपाङ्गनापेक्षयाऽपि भगवतः प्रियतमा तथा इतरविद्वज्जनापेक्षया आचार्यस्य भृशमभिमतः कश्चन व्यक्तिविशेष इह विवक्षित इति प्रोक्तचरम्। हे श्रीरिति संबोधनेन श्रियो यथा घटककृत्यमेव

प्रधानम् तथा व्यक्तिविशेषस्यास्यापि तदेव नियतमिति ज्ञाप्यते। श्रीस्तु भगवद्विषये घटिका; इयं व्यक्तिस्तावदाचार्यविषये इति विशेषः। नीलादेवीसविधे व्यजनमुकुरयोरपेक्षा हि प्रदर्शिता। व्यजनमुकुरयोः स्थाने मूलमन्त्रमन्त्ररत्नयोर्ग्रहणमुपपद्यते। मुकुरो यथा स्वात्मानं यथायथं प्रकाशयति तथा मूलमन्त्रः स्वस्वरूपयाथात्म्यप्रकाशक इति तस्य मुकुरत्वाभिमानो युक्तरूपः। अत एव श्रीमन्निगमान्तसूरिभी रहस्यत्रयसारे * आधेयत्वप्रभृतिनियमैरित्यादिके पद्ये व्यापकादर्शपदेन मूलमन्त्रो निर्दिष्ट इति बोध्यम्। अथ व्यजनपदेन द्वयाख्यमन्त्ररत्नविवक्षणं च सूपपन्नम्; तापतप्तस्य जनस्य यथा व्यजनं सततमपेक्षितम् तथा संसारतापसंतप्तानां मुमुक्षूणां सततमनुसन्धेयं मन्त्ररत्नमेवेति। अत एव भगवान् रामानुजः श्रीमता रङ्गनाथेनानुशिष्टः * द्वयमर्थानुसन्धानेन सह सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्व * इति। श्रीमद्वरवरमुनिदिनचर्यायां चानुसन्धीयते * मन्त्ररत्नानुसन्धानसन्ततस्फुरिताधरम्। तदर्थतत्त्वनिध्यानसन्नद्धपुलकोद्गमम् * इति। अन्ते स्नानव्रतसमापनकाङ्क्षणं तु स्वस्य निर्मलत्वप्रापणप्रार्थनायां पर्यवस्यति ॥ २०

तथाच एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ सर्वेषां निर्जराणां विपदमपहरन् जागृहि प्रौढशूर!
प्रध्वस्ताशेषविद्विड्गण! विमल हरे! मुञ्च निद्रां मुकुन्द।
नीले! सर्वाङ्गरम्ये! व्यजनमुकुरमुख्यं व्रताङ्गं वितीर्य
स्नानं निर्वर्तयेथा इति कथितवती पातु गोदा सदा नः ॥ २० ॥

इति विंशगाथाविवरणं समाप्तम् ॥

---

२१. एकविंशी गाथा—एत्तकलङ्गळेदिर्पोङ्गि ॥

एत्तकलङ्ग ळेदिर्पोङ्गि मीदळिप्प * मात्तादे पाल्शोरियुम् वळ्ळल् पेरुम्पशुक्कळ् *
आत्तप्पडैत्तान्महने यरिवुराय् * ऊत्तमुडैयाय् पेरियाय् * उलहिनिल्
तोत्तमाय् निन्न शुडरे तुयिलेळाय् * मात्तारुनक्कु वलितोलैन्दुन् वाशर्कण् *
आत्तादु वन्दुन्नडि पणियुमापोले * पोत्तियाम वन्दोम् पुहळ्न्देलोरेम्बावाय् ॥ २१ ॥

दोहनकाले दुग्धधारणार्थं गृहीतेषु भाण्डेषु क्षणमात्रे प्रपूर्णं पयो यथा ह्यूर्ध्वमुज्जृम्भेत तथा निरन्तरपयःप्रवाहप्रसवित्रीणामौदार्यशालिनीनां भूयसीनां गवां स्वामिनो नन्दगोपस्य नन्दन भोः! प्रबुध्यस्व। दृढप्रमाणभूतनित्यापौरुषेयवेदप्रतिपाद्य! (अथवा) आश्रितजनसंरक्षणश्रद्धालो! परब्रह्मभूत! जगति प्रादुर्भूततेजःपुञ्जमय! शयनादुत्तिष्ठ। अरातयः पराजिता भूत्वा यथा स्वात्मधारणान्यथानुपपत्त्या भवदीयभवनाङ्गणं प्राप्य भवत्पादारविन्दसेवानिरता भवन्ति तथा वयमपि भवद्गुणपराजितास्सत्य इह समागतास्त्वां स्तुमः ॥
(इति मूलगाथाविवर्तः।)

अधस्तनगाथायामुत्तरार्धतः प्रबोधिता नीलादेवी सरभसमुत्थाय समागत्य 'अयि भो गोपाङ्गनाः! अह तावद्युष्मास्वन्यतमा खलु ; युष्माकमभीष्टानि सुष्ठु संपादयेयमहम् ; मा नाम मनागप्यवसीदत यूयम् ; सर्वा अपि वयं मिलित्वा भगवन्तं कृष्णं प्रार्थयेमहि, समागच्छत' इति कथितवती। अथ तथैव नीलादेव्या च सह संमिलिता गोपललना भगवन्तं स्तुवन्ति गाथयाऽनया। नन्दगोपगोसमृद्धिप्रशंसनपूर्वकं तदात्मजत्वकथनेन कृष्णमुखविकासं संपादयितुमिच्छन्त्य इमा इह विलक्षणस्तुतिं विरचयन्ति। अधस्तनगाथासु प्रकीर्तिताः कृष्णस्य प्रभावास्तु न तस्य तृप्तये कल्पन्ते। त्रैविक्रमक्रमकृताक्रमणत्रिलोकत्वं सप्तदश्यां गाथायामुक्तम् ; नीलातुङ्गस्तनगिरितटीसुप्तत्वम् एकोनविंश्यां गाथायामुदीरितम् ; त्रिदशनिवहपरित्राणपरायणत्वमनन्तरगाथायां निगदितम् ; एवंविधचर्याकीर्तनानि न भगवतस्तृप्तिमुत्पादयितुमलम्। अवतारेषु * आत्मानं मानुषं मन्ये रामं दशरथात्मजम् * अहं वो बान्धवो जातः * इत्यादिकथनेन स्वकीयहर्षप्रकर्षं प्रकाशयतो भगवतो वस्तुगत्या यदतीव संतोषसंदायकम् तदेव वक्तव्यमिति समुत्कण्ठिता इमास्तदेव नन्दनन्दनत्वमभिधाय तमानन्दपरवशमारचयन्ति। नन्दगोपस्यापि प्रशंसा निबध्यते। अधस्तात् सप्तदश्यां गाथायां नन्दगोपस्य परमधार्मिकत्वमुक्तम् ; तदनन्तरगाथायां तस्य निरतिशयबलाढ्यत्वमभिहितम् ; इह तु गव्यसमृद्धिगोसमृद्धिशालितारूपः प्रभावातिशयः प्रशस्यते। ब्राह्मणा यथा वेदाध्ययनसंपदा प्रशस्यन्ते, यथा च क्षत्रिया भुजबलभूम्ना श्लाघ्यन्ते तथा गोपा गोसमृद्धित एव हि श्लाघ्या भवितारः। तादृशीं श्लाघामत्र निबध्नन्तीति युक्तरूपमेतत्।

दोहनार्थं गोस्तनस्पर्शमात्रेण प्रतिक्षणं भूयांसि भाण्डानि पयसा प्रपूर्यन्त इति सत्यमिदमतिशयोक्तिं विना कथ्यते। व्रजे यदा कृष्णस्समवतीर्णस्ततःप्रभृति गोसमृद्धिर्गव्यसमृद्धिश्च सुमहती जातेति खलु पुराणान्यपि प्रचक्षते। निरवधिकपयःप्रवाहप्रसवितृत्वकथनानन्तरमपि उपरिष्टादौदार्यशालित्वं यत् कथितम् तस्यायं भावः ; कृष्णः परमपुरुषोऽपि सन् यथा ह्यर्भकाणां वत्सानामपि स्वात्मानमनुभवयोग्यमातनोति सौशील्यभूम्ना, तथा गावोऽपि बालकानां बालिकानां स्वगात्रं परमविधेयं कुर्वन्तीतिच, स्वात्मीयवस्तुप्रदानापेक्षया स्वात्मन एव प्रदानं हि प्रशंसनीयमौदार्यम्। प्रासङ्गिकी नन्दगोपप्रशंसा तावदास्तामियम् ; अथ तदात्मजप्रशंसाः परिशीलयेम। "नन्दनन्दन भोः प्रबुध्यस्व" इत्येतत् स्वकीयां नन्दनन्दनतामवगच्छेत्यर्थकं मन्तव्यम्! किमत्र तात्पर्यमिति चेत्, श्रीवैकुण्ठदुग्धाब्धिमथुरापुरादिकं परित्यज्य व्रजमुपेत्य नन्दात्मजभावं स्वीकृतवतस्तव अस्मास्वनुग्रहप्रकाशनमेव प्रधानं कर्तव्यं ननु, तदेतद्विद्धि भोः! इत्युक्तं भवति। वयं तु न वैकुण्ठमागताः ; नापि दुग्धाब्धिम्, न चापि मथुरापुरीम्। अपितु अस्मादृशां पामरजनतानामनुग्रहार्थमेव यत्र भवान् स्वयमागमदस्मानन्विष्य, तत्रैव ह्यागत्य प्रार्थयामहे ; अस्मदीयकार्यनिर्वर्तनं स्वकीयकार्यनिर्वर्तनात्मकमेव भवता मन्तव्यमिति तात्पर्यसारः ॥

मूले (ऊत्तमुडैयाय्) इति द्वितीयं संबोधनमस्ति द्राविडवाचि। तस्य द्वेधाऽर्थं निर्वहन्त्याचार्याः। दृढप्रमाणसिद्धत्वम् आश्रितरक्षणबद्धदीक्षत्वं च तदर्थत्वेन कथयन्ति। द्वितयमपि युज्यते नाम। * सर्वे वेदा यत्पदमामनन्ति * वेदैश्च सर्वैरहमेव वेद्यः * इत्याद्युक्तप्रकारेण नित्यनिरवद्यप्रमाणमूर्धन्यभूतवेदसिद्धत्वं हि भगवतो

दार्ढ्यम्। तथैव, * अप्यहं जीवितं जह्यां त्वां वा सीते! सलक्ष्मणाम्। न हि प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः * न त्यजेयं कथञ्चन * इत्यादिप्रमाणशतप्रतिपन्नमाश्रितजनपरित्राणप्रतिनियतव्रतशालित्वमपि खलु तस्य दार्ढ्यम्। अथ परब्रह्मभूतेति तृतीयं संबोधनम्। स्वरूपेण गुणैश्च अनवधिकातिशयस्य बृहत्त्वस्य आश्रयभूतेत्यर्थः। आश्रितानां कृते बहुतराणामुपकाराणां करणेनापि अपर्याप्त्या 'पुनः किं करवाणि? पुनरपि किं करवै?' इति उत्तरोत्तरमुपचिकीर्षामेव बिभर्ति भगवानिति इदमेव तस्य गुणतो बृहत्त्वं नाम। असंख्येयैः प्रमाणबृन्दैः प्रभावातिशयेषु प्रपञ्चितेष्वपि इतोऽपि प्रपञ्चनीयाः प्रभावा भूयस्तरामवशिष्यन्ते इति हि कथयितव्यं भवति वस्तुतः; इदमपि बृहत्त्वं ध्येयम्।

अथ [जगति प्रादुर्भूततेजःपुञ्जमय!] इति तावच्चतुर्थं संबोधनम्। स्वकीयप्रभावातिशयानां शास्त्रैकप्रतिपत्तव्यतामसहमानस्तदातदा साक्षादप्यवतीर्य तान् अतिमात्रं प्रकाश्य स्वयं निरतिशयौज्ज्वल्यशाली भवति भगवानिति प्रतिपादयन्तीम् * स उ श्रेयान् भवति जायमानः * इति श्रुतिमनुसृत्यावतीर्णमिदं संबोधनम्। उपात्तश्रुतिवाक्ये द्वितीयं पदमवधारणार्थकम्। तच्च पदम् इतरेषु चतुर्ष्वपि पदेष्वन्वेतुं प्रभवतीति विलक्षणोऽयं पन्थाः। तत्कथमिति चेदवधेयम्; उः एवकारार्थक इति न विस्मर्तव्यम्। स एव जायमानः श्रेयान् भवति; सः जायमानस्सन् श्रेयानेव भवति; सः जायमान एव श्रेयान् भवति; सः जायमानः श्रेयान् भवत्येव—इति सर्वथाऽप्यन्वयः सुशोभन इति। पुण्यपापरूपकर्मफलभूतमस्मादृशां जन्म तावदवद्यावहं भवति नः; कृपाबलैकनिदानकं भगवतो जन्म तु सर्वथा तस्य तेजस्करं भवति; अवताराकरणे तेजसः प्रच्युतिरेव इत्युक्तं भवति। पुराणरत्ने कृष्णस्य जननं कथयन् पराशरमहर्षिः नतावदुवाच 'कृष्णो जज्ञे' इति। अपि तु * ततोऽखिलजगत्पद्मबोधायाच्युतभानुना। देवकीपूर्वसंध्यायामाविर्भूतं महात्मना * इत्येव ह्यभिदधे। इदमपि वचनमनुसृत्यैव "जगति प्रादुर्भूततेजःपुञ्जमये" त्युक्तमिह। एवं संबोध्य शयनादुत्तिष्ठेति प्रार्थ्यते। यदि तावदिदानीमपि त्वं शयनमधिशयानो नास्माननुग्रहीष्यसि, तर्हि तव तेजसो हानिरेव भवित्री; तदसहिष्णुस्सन्नुत्तिष्ठेत्युक्तं भवति।

अथ गोप्यः कथयन्ति स्वात्मनामिहागमनविषये दृष्टान्तविशेषम्— [अरातयः पराजिता भूत्वा यथा भवत्सकाशमुपसर्पन्ति तथा वयमपीति।] * स पित्रा च परित्यक्तः सुरैश्च समहर्षिभिः। त्रीन् लोकान् संपरिक्रम्य तमेव शरणं गतः * इति काकचरितं प्रथितम्। एवं भृशमुद्धतास्सन्तोऽपि तेते शत्रुवर्गा अथ पराजयं प्राप्य यथा हतावलेपाः प्रपद्यन्ते, तथा वयमपि निरवलेपास्सत्यस्समागत्यात्र भवन्मङ्गलाशासनप्रवणास्स्म इति कथयन्ति। ननु वायसरावणादयो भृशमुद्धताः प्रकृत्या भक्तिविनयादिविधुरा इति प्रसिद्धम्; तादृशानां धूर्तानामत्र स्वनिदर्शनत्वेन कथनं प्रकृत्या परमभक्तानां वल्लवीनां कथमिव युज्यत इति चेत्; "तेषां पौरुषाभिमान आसीत्; अस्माकं स्त्रीत्वाभिमान आसीत्" इति तावदासामभिप्रायः। पौरुषाभिमानादपि बलीयान् हि स्त्रीत्वाभिमानः। "पुमानेव स्त्रीसकाशमागन्तुमर्हति; वनिता वयं न बहिरणुमात्रमपि पादन्यासं कलयेम" इति चिरात् स्थितमभिमानमपहाय वयमागतास्स्म इति कथयन्ति। नैच्यानुसन्धानसरण्यामियमपि काचन फक्किका हि॥

(अथ ध्वन्यर्थविवरणम्।) नन्दगोपनन्दनेति संबोधनमिह निबद्धम्। नन्दगोपस्थाने महानाचार्यो ग्राह्यः; तत्तनयस्थाने तदीयः शिष्यो ग्राह्यः। कचिदाचार्याणामुपसेवनम्, कचित् सब्रह्मचारिणामुपसेवनं च भवतीति प्रत्यक्षदृष्टं ह्येतत्। * आचार्यवदाचार्यपुत्रे वृत्तिरित्यपि सूत्रकारा उपदिशन्ति। ततश्च आचार्यपुत्रोपसर्पणमप्यत्र ग्रहीतुं योग्यम्। आचार्यस्य प्रभावः प्रथमतो निगद्यते। * सद्बुद्धिस्साधुसेवी समुचितचरितस्तत्त्वबोधाभिलाषी-त्यादिन्यासविंशतिश्लोकोक्तशिष्यलक्षणसंपन्नः सत्पात्रभूता अन्तेवासिनो यथा * शिष्यादिच्छेत्पराजयमित्याचार्येच्छानु-रूपतया भृशमभिवृद्धज्ञानयशसो भवेयुस्तथा नाम प्रतिबोधनप्रवीणता आचार्येषु कथिता भवति। दुह्यमानक्षीरधार-णार्थगृहीतभाण्डस्थाने आचार्योपदिश्यमानविद्याग्राहकाः शिष्या विवक्षिताः। अथ प्रपूर्णस्य पयस ऊर्ध्वमुज्जृम्भणं नाम आचार्यज्ञानाधिकज्ञानसाम्राज्यं शिष्यनिष्ठं यत् तदेव। निरन्तरपयःपूरप्रसवितृत्वकथनेन— शिष्येषु अलंबुद्धियुक्तेषु सत्स्वपि * भूय एव महाबाहो! शृणु मे परमं वचः * इदं च शृणु मैत्रेय * इत्याद्युक्तप्रकारेण पुनः पुनरुपदेशश्रद्धालुता गुरुवरे प्रोक्ता भवति। वासप्रपीतदुग्धापेक्षया भाण्डनिहितदुग्धस्यैव यथा सर्वोपजीव्यत्वम-क्षतम्, तथा प्रबन्धरूपेण प्रबद्धानामर्थानां सुचिरमुपयोगार्हत्वमिह शब्दसन्निवेशगम्यं भवति। उदारत्वविशेषणेन— अनुवृत्तिप्रसन्नाचार्यत्वं न, अपितु कृपामात्रप्रसन्नाचार्यत्वमस्येति स्फोर्यते। भूयसीनां गवां स्वामीति कथनेन— एवंविधानां भूयसामाचार्याणां मध्ये अत्यन्तं श्लाघनीयता गुरुवरस्यास्य कथिता भवति। दृढप्रमाणसिद्धेति द्वितीय-संबोधनेन * आचार्यवान् पुरुषो वेद * पापिष्ठः क्षत्रबन्धुश्च पुण्डरीकश्च पुण्यकृत्। आचार्यवत्तया मुक्तौ तस्मादाचार्यवान् भवेत्॥ * इत्यादिभूरितरप्रमाणसिद्धत्वं बोधितं भवति। परब्रह्मभूतेति तृतीयं संबोधनं च गुरौ संगच्छते ब्रह्मत्वेन प्रसिद्धस्य परमपुरुषस्यापि स्वहृदयकोणेऽवस्थापनात्। सर्वाधिकरणस्यापि तस्य आचार्यनिष्ठाधिक-रणतानिरूपिताधेयताशालित्वमेव हि भवति। जगति प्रादुर्भूततेजःपुञ्जमयत्वं च * यद्गोसहस्रमपहन्ति तमांसि पुंसां नारायणो वसति यत्र सशंखचक्रः। यन्मण्डलं श्रुतिगतं प्रणमन्ति विप्रास्तस्मै नमो वकुलभूषणभास्कराय * कलयामि कलिध्वंसं कविं लोकदिवाकरम् * पुण्याम्भोजविकासाय पापध्वान्तक्षयाय च। श्रीमानाविरभूद्भूमौ रामानुजदिवा-करः * इत्यादिवचनशतप्रतिपन्नं वेदितव्यम्; भगवतः अच्युतभानुत्वेन व्यपदेशवत् आचार्याणामपि वकुलभूषण-भास्कर-लोकदिवाकर-रामानुजदिवाकरादित्वेन हि व्यपदेशा भवन्ति। शयनादुत्तिष्ठेत्यनेन-स्वात्मानुभवं विहाय परोपदेशप्रावण्यं प्राप्नुहीत्युक्तं भवति। अरातयः पराजिता भूत्वेत्यादिनिदर्शनस्यायमर्थः— यादवप्रकाशयज्ञमूर्त्ति-प्रभृतीन् मतान्तरस्थानपि यथा भगवद्रामानुजो निजवैदुष्यबलनिर्जितान् कृत्वा अन्तेवासिपदव्यां न्यधत्त, तथा भवानपि विजयते— इति॥ २१

तथाच एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ दुग्धैर्भाण्डानि भूयांस्यविरतमभिपूर्योज्ज्वलै र्धेनुवर्गैः
आढ्यं नन्दं हि तातं कलयसि भगवन्! जागृहि त्यक्तनिद्रः।
रक्षादीक्षागरिष्ठ! क्षितितलतरणे! भग्नभूपालवृत्ते
गायन्त्यो दिव्यकीर्तीर्वयमिह पतिता इत्युशन्ती गतिः श्रीः॥ २१॥

इति एकविंशगाथाविवरणं समाप्तम्॥

---

२२. द्वाविंशी गाथा—अङ्गण्मा ञालत्तु ॥

अङ्गण्मा ञालत्तरशर् * अबिमानपङ्गमाय् वन्दु निन्पळ्ळिक्कट्टिल्कीळे *
शङ्गमिरुप्पार्पोल् वन्दु तलैप्पेय्दोम् * किण्गिणिवायुच्चेय्द तामरैप्पूप्पोले *
शेङ्गण् शिरुच्चिरिदे एम्मेल् विळियावो * तिङ्गळुमादित्तियनुमेळुन्दार्प्पोल् *
अङ्गणिरण्डुङ्कोण्डेङ्गण्मेल् नोक्कुदियेल् * एङ्गळ्मेल् शापमिळिन्देलोरेम्बावाय् ॥ २२ ॥

विपुले पृथिवीमण्डले विरचितसाम्राज्यनिर्वाहा भूमिपाला भग्नाभिमानास्सन्तस्समागत्य भवदीयसिंहासनपरिसरे यथा संघशोऽवतिष्ठन्ते, तथा वयमपि स्त्रीत्वाभिमानं विहाय त्वत्परिसरं प्राप्तवत्यः स्मः। अर्धविकसितसरसीरुहवत् तव नयने किमहो अस्मासु मन्दंमन्दं प्रसरं न करिष्यतः? चन्द्रसूर्ययोर्युगपदुदयवत् विलोचने उभे अपि विष्फार्य यद्यस्मान् कटाक्षयेथास्तर्हि वयं विहतशापा भवेम ॥ (इति मूलगाथाविवर्तः)

अधस्तनगाथायां गोप्यः स्वकीयामनन्यगतितां दृष्टान्तोपन्यासपूर्वकमपि प्रत्यपादयन्। अथाप्यासां भाषितं विशेषतो निशमयितुमिच्छन् भगवान् वासुदेवस्तूष्णीक आसीत्। अथ पुनर्विज्ञापयन्ति गोप्यः— भगवन् नन्दनन्दन! यदि त्वमस्मान्नाङ्गीकरिष्यसि, तदाऽपि वयं नान्यत्र कुत्रापि गमिष्यामः; अस्मदीयामनन्यार्हतामवधेहि तावत्सुदृढम्; सर्वथा वयं भवदीयकटाक्षवीक्षालाभेनैव धन्या भविष्यामो नान्यथेति। तथाचैषा गाथा अधस्तनगाथाप्रतिपादितस्यानन्यगतित्वस्य सुदृढीकरणतात्पर्येणावतीर्णेति वेदितव्यम्।

* युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः। पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुम ॥ * हुत्वाऽऽत्मानं देवदेवो बभूव * इत्याद्युक्तरीत्या विरिञ्चिशर्वप्रभृतयोऽपि देवाः स्वस्वानुष्ठितभगवदाराधनभूम्नैव स्वस्वपदवीविशेषान् प्राप्तवन्त इति स्थिते, क्षोणीकोणशतांशपालनकलादुर्वारगर्वानलक्षुभ्यत्क्षुद्रनरेन्द्रा अत्रत्यास्तस्यैव भगवतो नारायणस्य कटाक्षलवलेशेनैव भूमिपालपदवीं प्रापुरित्यत्र न कोऽपि विशयः; अथाप्यमी विस्मृतविष्णुपादारविन्दाः पौण्ड्रकवासुदेवादिवदतिमात्रमवलेपभरिताः स्थित्वा, नानाविधान् क्लेशाननुभूय अन्ततः सोऽहमित्याहङ्कारिकमनुसन्धानं विहाय दासोऽहमिति स्वरूपानुरूपेऽनुसन्धाने निरता भगवदालयेषु [अर्चास्थलेषु] प्रवणा भूत्वा भूरितराणि कैङ्कर्याणि प्राकारगोपुरमण्डपप्रासादादिनिर्माणरूपाणि वितन्वन्तीति प्रत्यक्षयामः। श्रीपरकालमुनीन्द्रदिव्यसूक्तिषु श्रीरुक्मिणीक्षेत्रकाञ्चीपुरीयाष्टभुजक्षेत्र-वैकुण्ठनाथक्षेत्र-सुगन्ध [तिरुनरैयूरु] क्षेत्रादिस्तुतिपरेषु दशकेषु तत्तादृशां राज्ञामुपश्लोकितत्वं च द्रष्टव्यम्। तथाच तेऽमी राजानो यथा भग्नाभिमानास्सन्तो भगवदनन्यार्हशेषतामवगाहन्ते, तथा वयमपि * पतिगृहे तव दास्यमपि क्षममिति कालिदासोक्तरीत्या अनन्यार्हशेषत्वाध्यवसायदृढिम्नाऽत्र समागता अभूमेति, अस्मासु भवत्कटाक्षवीक्षापात्रत्वप्रापणमत्यावश्यकमिति च विज्ञापितं भवति। कटाक्षधाराया एकपदे महत्तरप्रवाहरूपेण प्रसारणे कृते सति अतिवृष्टिरिव महती हानिस्स्यात्; सात्म्यभोगप्रदाने भगवानतीव चतुरः खलु। क्रमशः क्रमशः कटाक्षधारा अभिवर्धयितव्याः; उपक्रम एव अतिशयितकटाक्षधाराप्रसारणं बालिका इमाः कथमिव सहेरन्? नैव सहेरन्। अत एव प्रार्थयन्ते "अर्धविकसितसरसीरुहवत्तव नयने अल्पाल्पशः प्रसरतामस्मासु"

इति। तदनुगुणतयैव कथ्यते "चन्द्रसूर्ययोर्युगपदुदयवत्" इति। अभूतोपमा सेयम्। कमलं तावत् चन्द्रोदये मुकुलितं भवति, सूर्योदये विकसितं भवति। युगपच्चन्द्रार्कयोरुदये सति अर्धमुकुलितत्वम् अर्धविकसितत्वं च संभवतीति बोध्यम्। अस्मदीयेष्वपराधेषु तव चक्षुषोर्निमीलनं भवतु; स्वल्पीयस्सु गुणेषु दृष्टिः प्रसरतु इति च प्रोक्तं भवति। दुष्कृतिनां संतापनार्थं सुकृतिनां प्रह्लादनार्थं च तव चक्षुषी सूर्याचन्द्रमसाविव प्रकाशेतामित्यपि कथितं भवति।

अथ च [यद्यस्मान् कटाक्षयेथाः] इति कथनेन स्वाभाविकभगवत्कृपामूलकः कटाक्षपात एव साधीयान्, अस्मदीयनिर्बन्धनिबन्धनः कटाक्षस्तु विरस एवेति शास्त्रार्थः प्रकाशितो भवति। अन्ततश्च [वयं विहतशापा भवेम] इति कथ्यते। आसां गोपीनां कीदृशः शापः? केन प्रदत्तः? कदा संजात इति न प्रष्टव्यम्। अवश्यमनुभोक्तव्यं पापमेव शापशब्दाभिलप्यम्; प्रबलपापफलभूतो योऽयं भवद्विश्लेषश्चिरादस्माभिरनुभूयते सोऽयमपक्षीयेतेति भावः। भगवत्कटाक्षवीक्षावैभवेन ध्वस्तपातकसञ्चयत्वं भूयस्सु भक्तेष्वितिहासपुराणप्रसिद्धम्। किञ्चिदत्र प्रदर्शयामः। "श्रमणीं धर्मनिपुणामभिगच्छ" इति कवन्धोक्तिमनुसृत्य भगवान् रामचन्द्रः * सोऽभ्यगच्छन्महातेजाः शबरीम् * इत्युक्तरीत्या स्वयमेव मतङ्गाश्रममुपसृप्य शबरीं स्वकटाक्षवीक्षालक्ष्यतां निन्ये; अथ सा प्रोवाच * चक्षुषा तव सौम्येन पूताऽस्मि रघुनन्दन। पादमूलं गमिष्यामि यानहं पर्यचारिषम्॥ * इति। भगवन्! तव कटाक्षवीक्षया प्रध्वस्तप्राप्तिप्रतिबन्धकवर्गाऽहमभूवमित्युक्तवती॥ अभिजनाद्यहङ्कारयोग्यतागन्धविरहितं विदुरं परमभागवतं स्वयमेवानुग्रहीतुं * निवासाय ययौ वेश्म विदुरस्य महात्मनः * इत्युक्तरीत्या तस्य भवनमुपगतो भगवान् कृष्णः * विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च * इत्युक्तरीत्या तदीयमन्नमश्नाति स्म; स च विदुरो भगवतः कटाक्षपातेन परिपूतो बभूवेत्ययमर्थो महाभारते अतिविस्मयनीयप्रक्रियया प्रकाशितोऽस्ति; कथमिति चेत्; विदुरस्य गृहे भुक्त्वा यदा कृष्णो दुर्योधनादिसकाशमुपाययौ, तदा तमाक्षिपति दुर्योधनः * भीष्मद्रोणावतिक्रम्य मां चैव मधुसूदन!। किमर्थं पुण्डरीकाक्ष! भुक्तं वृषलभोजनम्? * इति। ज्ञाने समुत्तुङ्गं भीष्मं जात्यामुत्कृष्टं द्रोणम् ऐश्वर्ये गरीयांसं मां च विसृज्य जघन्यजातीयस्य विदुरस्यान्नं कथमहो भुक्तवानसीति दुर्योधन आचिक्षेप। अत्र भगवान् कृष्णो यदुत्तरं दत्ते तदास्तां नाम; अधिक्षेपेण कथनावसरे दुर्योधनः पुण्डरीकाक्षेति यत्संबोधनं कृतवान् तदिदमेव भृशं विमर्शनार्हम्। अधिक्षेपावसरे 'हे मूर्ख! हे जाल्म!' इत्यादिरूपेण कर्तव्यं संबोधनं विसृज्य पुण्डरीकाक्षेति संबोधनं कृतवानिति यत्तदिदं विस्मयनीयमेव खलु। वस्तुतः अधिक्षेप्तुस्तस्य बुद्ध्या नैतत्संबोधनमवतीर्णम्; अपि तु भगवत्संकल्पेनैव सत्यमिदमुद्भावितम्। मदीयदिव्यकटाक्षवीक्षाबलेनैव स पूतो बभूवेति भगवता बोधित इव सोऽभूत्। तथाच शबरीव विदुरोऽपि भगवत्कटाक्षवीक्षापवित्र इति सिद्धम्। एवमेवं बहु द्रष्टव्यम्। नित्यसंश्लेषौपयिककटाक्षवीक्षाप्रसारणेन वयमनुग्राह्या इति गोपीनां प्रार्थना फलत्यनया गाथया॥

(अथ ध्वन्यर्थविवरणम्।) आचार्यसकाशे शिष्याः स्वकीयामनन्यार्हतामावेदयन्ति। [विपुले पृथिवीमण्डले विरचितसाम्राज्यनिर्वोढा भूमिपाला इत्यादि।] विपुलपृथिवीमण्डलस्थाने पाञ्चभौतिकं शरीरं ग्राह्यम्। तत्र

अविवेकादहङ्कारममकारभरितो जीवात्मैव अवलिप्तभूमिपालस्थानीयोऽवगन्तव्यः। प्राकृतशरीरसंबन्धबलादेव ह्यात्मनोऽहङ्कारममकारप्रादुर्भावो जायते। * सत्सङ्गाद्भवनिःस्पृह इत्युक्तरीत्या सत्सङ्गमूम्ना अहङ्कारममकारभरे प्रनष्टे सति कस्यचिदाचार्यवर्यस्य परिसरप्राप्तिरनन्यार्हशेषत्वपर्यन्ता सती समिन्धे॥ अथ [अर्धविकसितसरसीरुहवत्] इत्यादिना आत्मोज्जीवनोपयुक्ता स्सदर्थाः क्रमशः क्रमश उपदेष्टव्या इति प्रार्थना प्रादुरस्ति। अन्तेवासिन उपक्रमकाल एव न हि श्रीभाष्यभगवद्विषयाद्युत्तुङ्गग्रन्थरत्नार्थोपदेशभाजनतां विन्दन्ति। सोपानक्रमत एव वयं सर्वज्ञाः कारयितव्या इति प्रार्थ्यते। चन्द्रसूर्ययोरुदयवदिति कथनेन—स्वरूपोपायपुरुषार्थयाथात्म्यप्रकाशकरहस्यग्रन्थोपदेशमुखेन सौम्यार्थाविष्करणम्, परमतदुरर्थप्रत्याख्यानप्रवणश्रीभाष्यादिग्रन्थोपदेशमुखेन तीक्ष्णतरार्थाविष्करणं चाभ्यर्थितं भवति। [विलोचने उभे अपि विष्फार्य] इत्यनेन * एकयैव गुरोर्दृष्ट्या द्वाभ्यां वाऽपि लभेत यत्। न तत्तिस्त्रभिरष्टाभिस्सहस्रेणापि कस्यचित् * इति देशिकसुभाषितनीवीप्रोक्तरीत्या अन्तर्दशा कटाक्षणम् बाह्यदृशा कटाक्षणं चेत्युभयमपि शिष्यजनसमुत्तारकं भवतीति सूच्यते। अन्तर्दृशा कटाक्षणं नाम * स्यादसाविति अन्तःकरणतः क्रियमाणं मङ्गलाशासनमेव। [वयं विहतशापा भवेम] इति कथनात्—इयता कालेन सदाचार्यकटाक्षवीक्षाभाजनत्वप्राप्तिविरहः प्रबलशापफलभूत इत्युक्तं भवति। सदाचार्यकटाक्षवीक्षामात्रेण सर्वपातकराशेस्समूलोन्मूलनं बोभवीतीति परमार्थः॥

तथाचैतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ तेते भूपाः स्वगर्वं विजहत उपसृत्याथ ते तल्पकोष्ठे
संघीभूता यथा सन्त्यहह वयमपि प्रापिमैवं प्रणम्राः।
चन्द्रार्कोद्भूतितुल्यं यदि तव नयनद्वंद्वमस्मानुपेयात्
स्याम प्रध्वस्तशापा इति कथितवतीं नौमि गोदामनन्यः॥ २२॥

इति द्वाविंशगाथाविवरणं समाप्तम्॥

---

२३. त्रयोविंशी गाथा—मारिमलैमुळञ्जिल्.

मारिमलैमुळञ्जिल् मन्निक्किडन्दुरङ्गुम् * शीरियशिङ्गमरिवुत्तु तीविळित्तु *
वेरि मयिर्पोङ्ग वेप्पाडुम् पेर्न्दुदरि * मूरिनिमिर्न्दु मुळङ्गिप्पुरप्पट्टु *
पोदरुमापोले नी पूवैप्पूवण्णा * उन्कोयिल्निन्निङ्ने पोन्दरुळि * कोप्पुडैय
शीरिय शिङ्गाशनत्तिरुन्दु * यामवन्द कारियमारायून्दरुळेलोरेम्बावाय् * ॥ २३॥

हे अतसीकुसुमसवर्ण!; वर्षासु गिरिगह्वरे गाढनिद्रावैवश्येन शयानः प्रकृत्या समुत्तुङ्गः कण्ठीरवः प्रबुध्य वह्निकणान् विकिरन्निव चक्षुर्द्वंद्वं विष्फार्य सुरभिसटापटलं विकसितमाकल्य्य अवयवांश्च सर्वथा परिस्पन्द्य

तन्द्राविसर्जनं च विरचय्य गभीरतरगर्जनोपबृंहणपूर्वकं यथा हि गह्वरान्निस्सरति, भगवन्! तथा नाम त्वं गर्भगृहाद्बहिर्निष्क्रम्य आस्थानमण्डपमागत्य रमणीयसन्निवेशं लोकोत्तरं सिंहासनमधिष्ठाय अथ विचारय तावदस्मदागमनप्रयोजनम् ॥ (इति मूलगाथाविवर्तः।)

अघस्तनगाथायां गोप्य ऊचुः— अनन्यशरणा वयमत्रागतास्स्म इति। तदाकर्ण्य कृष्णो भगवान् सरभसमुत्थाय 'अयि भो गोपाङ्गनाः! निशीथे प्रबुध्य महत्तरान्परिश्रमाननुभूय समागताः खलु भवत्य इह; युष्माकमावसथान्यन्विष्य मया खलु समागतेन भवितव्यम्; स्वयमेव खलु मया भवतीनामनुग्रहः कर्तव्यः; * प्रसीदन्तु भवन्तो मे ह्रीरेषा हि ममातुला। यदीदृशैरहं विप्रैरुपस्थेयैरुपस्थितः॥ * इति खलु मया (रामावतारे) मदाश्रममुपस्थितानां दण्डकारण्यवासिनां महर्षीणां सकाशे विज्ञापितम्; तेभ्योऽप्यतिशयितभक्तिभराणां भवतीनां सकाशे मया किं विज्ञापनीयमिति न जाने; अस्तु। युष्माकमेतावन्तं परिश्रमभरमुत्पादितवानहं क्षन्तव्यः; मत्सविधे यत् काङ्क्ष्यते भवतीभिस्तदहं प्रेम्णा प्रदातुं सज्जोऽस्मि। यदुद्दिश्य समागता यूयम्, तदभिधत्त; तदहमवश्यं फलेग्रहि करवाणि' इति सोपचारमूचे। तदाकर्ण्य गोप्यः 'भगवन् गोपालकृष्ण! अस्मदीयो मनोरथ एवं शय्यायां रहसि विज्ञापयितुं योग्यो न; महत्यां गोष्ठ्यां सिंहासनमधितिष्ठतु भवान्; अथानुयुज्यताम् किमभीप्सितं युष्माकमिति। तदनन्तरं मनसि प्रतिभातं विज्ञापयिष्यामः। किञ्च भवतः शयनकालिकमाभिरूप्यमन्वभवाम; तथा गमनकालिकमुपवेशनकालिकं चाभिरूप्यमनुभोक्तुमतीव स्पृहयालवो वयम्; सा चास्मदीया स्पृहा भवता दयानिधिना पूरयितव्या; अतश्च प्रथमतस्तल्पादुत्थाय सिंहासनपर्यन्तमागम्यताम्; तदात्वे वयं गतिचातुर्यमनुभूय प्रहृष्येम; अथ चोपविश्यतां सिंहासने; तदानीमुपवेशनकालिकमाभिरूप्यं चानुभूय संतुष्येम। तदनन्तरं च विजिज्ञापयिषितं विज्ञाप्य कृतकृत्या भूयास्म—इत्याचचक्षिरे। तदस्यां गाथायां निबध्यते गोदादेव्या। भगवत्कर्तव्ययात्रोत्सवप्रकारस्सविशेषमावेद्यते गाथायामस्यामिति सर्वत्रापि द्विरनुसन्धीयते गाथा सैषा।

तल्पं विहाय गर्भगृहाद्बहिर्निस्सरणं यद्भविष्यति कृष्णस्य, तद्विषये अनुरूपनिदर्शनविशेषप्रपञ्चनं सुष्ठु क्रियतेऽत्र। वर्षाकाले गिरिगह्वरमधिशयितवान् केसरी वर्षापगमानन्तरं प्रबुध्य सटापटलविधूनन-गभीरगर्जनाविष्करणादिपुरस्सरं गह्वराद्बहिर्निस्सरतीति सिंहजातेरियं स्वाभाविकी प्रक्रिया। दिव्यप्रबन्धेऽस्मिन् प्रथमगाथायां यशोदासिंहत्वेन कीर्तितस्य कृष्णस्यास्यापि प्रक्रिया सैषा संभवितुमर्हति। श्रीरामायणे अयोध्याकाण्डे (१६ — २५) * निश्चक्राम सुमन्त्रेण सह रामो निवेशनात्। पर्वतादिव निष्क्रम्य सिंहो गिरिगुहाशयः॥ लक्ष्मणं द्वारि सोऽपश्यत् * इत्युक्तमिहानुसन्धेयम्। * पर्वतादिव निष्क्रम्य सिंहो गिरिगुहाशयः * इत्येतदेवानुसृत्य गोदादेवी गाथामिमां निबध्नातीति सुवचम्। वर्षासु बहिरध्वनां पङ्किलत्वात् संचारयोग्यताविरहेण राजानोऽपि वैरिषु वैरं विस्मृत्य बहिर्यात्रादिकमुपरुध्य अन्तःपुरमधिशेरते। भगवान् रामचन्द्रोऽपि वैदेहीविरहावसन्नस्तद्विरहव्यथां क्षणमात्रमपि सोढुमशक्नुवन् भृशं परितप्यमानोऽपि सन् वर्षानिमित्तमेव हि यात्राप्रवृत्तीर्विसृज्य सुग्रीवं भोगप्रवणं कृत्वा स्वयं माल्यवति गिरौ सह सौमित्रिणा क्लेशाननुभवंस्तस्थौ। एवमेव सिंहोऽपि वर्षासु स्वकीयमृगयाविहारं सवासनं विस्मृत्य गिरिगह्वरान्तः शेते। एवं कृष्णसिंहोऽपि नीलातुङ्गस्तनगिरितटीसुप्त आसीदेतावता कालेन। अधुना तु

तस्य प्रबोधो जातः। लोके प्रबुध्यमानः केसरी किं किं करोतीति चेत्; 'असदीयायामटव्यामिह को वा मृगः प्रविष्टः!' इति सरोषमवेक्षमाण इव, चक्षुर्भ्यां वह्निकणान् विकिरतीति वक्तव्यतां दधानश्चक्षुर्द्वंद्वमुन्मीलयति। शयनकाले करचरणाद्यवयवानां सटापटलानां च संकुचितानां स्थितानां विकासं च वितनोति वपुषो विधूननेन। वपुषः स्वाधीनत्वाय गुहाद्वारे ततस्ततः संचरति च। अथ गभीरं कण्ठनादं चोपबृंहयति। ततः क्रमशो बहिर्निस्सरति। एवं नाम भगवता कृष्णेनापि परमगाम्भीर्येण निस्सर्तव्यमिति प्रार्थना क्रियते। प्रबुध्यमाने सिंहे प्रोक्ता अमी सर्वेऽपि गुणाः कृष्णसिंहेन प्रदर्शयितव्या इति न निर्बन्धः; अथापि ते सर्वे कृष्णेन प्रदर्शयितुं शक्या एव। वह्निकणोद्भासिवीक्षणं भक्तजनवैरिव्रातविषयकं भवितुमर्हति। करचरणकेशादिविकासनं सुप्तोत्थितस्य संभवि। गम्भीरेण कण्ठनादेन अभयोक्तिवितरणं च भवितुमर्हति। एवमेवं कृत्वा गम्भीरगतिचातुर्यमनुभाव्य अथ सिंहासनमलंकृत्य वयं कटाक्षणीया इति प्रार्थितमासीत्॥ अतसीकुसुमसवर्णेत्यत्र * अतसीसुमसुकुमारात् अवयवसौन्दर्यलेशजितमारात्। गोपाङ्गनाकुमारात् कोऽन्यो देवः करोतु सुखमारात्? ॥ * इति श्लोकरत्नमनुसन्धेयम्॥

अथ ध्वन्यर्थविवरणम्॥ गाथायामस्यां संबोध्यमानस्य गुरुवरस्य पुष्पसावर्ण्यमुच्यते; पुष्पाणि परिवृत्य यथा भ्रमरा वल्गन्ते तथा आचार्यवर्यं परिवृत्य मधुपानलोलुपभृङ्गसधर्माणः [दिव्यार्थसुधापानहेवाकिनः] शिष्यप्रवरा विराजन्ते; तथाच स्वोपजीविशिष्यमण्डलीपरिवृत भगवन् रामानुज भो! इति संबोधितं भवति। सामान्यतः पुष्पसाम्यमेवमुपवर्णितमाचार्ये; विशिष्य अतसीसुमसावर्ण्यमपि तस्मिन् सूपपादम्; अतसीसुमसच्छायस्य भगवतो निजहृदि धारणात् * निर्गुणः परमात्माऽसौ देहं ते व्याप्य तिष्ठति * इत्युक्तरीत्या तच्छायाया बहिर्विलसनेन आचार्यवर्योऽप्यतसीसुमसवर्णो भासत इति ग्राह्यम्। कण्ठीरववत् समागन्तव्यमिति प्रार्थनं भगवद्रामानुजे सुष्ठु संघटते। * जैनेभकण्ठीरव इति खलु यतीन्द्रो जोघुष्यते। * वेदोत्तंसगुहाविहारपटुना श्रीशैलशृङ्गोल्लसन्मायाकेसरिमानितेन गहनन्यायाटवीचारिणा। गम्भीरेण परात्मभेदनमहानादेन नाथेन मे गुप्तोऽहं यतिसार्वभौमहरिणा वर्ते भृशं निर्भयः॥ * इत्येतत् श्लोकरत्नं चात्र चारुतरमनुसन्धेयम्।

अथ गाथोपक्रमात्प्रभृति विवृणुमः। सिंहो वर्षाकाले गिरिगुहामधिशेते। भगवद्रामानुजसिंहस्य को गिरिः? का च गुहा? इत्यमुं विषयमधिकृत्य परस्ताद्विशदमुपन्यस्येम। वर्षाकालमधिकृत्य पुरस्ताद्वदामः। जगति सानन्दमभिनन्दनीया वृष्टिश्चास्ति, सनिर्वेदं दूषणीया वृष्टिश्चास्ति। तथा प्रकृतेऽपि। स्पृहणीयां वृष्टिं काञ्चीपूर्णमुनिः कूरनाथगुरुवरश्चावर्णयताम्। जुगुप्सनीयां वृष्टिं भगवान् यामुनार्यो मुनिराडभ्यधत्त। तथाहि, देवराजाष्टके * देवराज दयासिन्धो! देवदेव जगत्पते। त्वदीक्षणसुधासिन्धुवीचिविक्षेपशीकरैः। कारुण्यमारुतानीतैः शीतलैरभिषिञ्च माम् * इति काञ्चीपूर्णमुनिप्रोक्ता, * हस्तीश! दृष्ट्यमृतवृष्टिभिराभजेथाः * (वरदराजस्तवे) इति श्रीकूरनाथगुरुवरोक्ता च भगवद्दिव्यकटाक्षामृतधारावृष्टिः स्पृहणीया वृष्टिः। अथ, * अविवेकघनान्धदिङ्मुखे बहुधा सन्ततदुःखवर्षिणि!। भगवन् भवदुर्दिने * इति (स्तोत्ररत्ने) भगवद्यामुनमुनिकथिता वृष्टिस्तु जुगुप्सनीयकोटिप्रविष्टा वृष्टिः। तथाच स्पृहणीयां वृष्टिमुत्पादयितुं जुगुप्सनीयां वृष्टिं व्युदसितुं च समर्थो भगवान् रामानुजमुनिरिति हृदयमिहावसेयम्।

अथ गिरिं गह्वरं चाधिकृत्योच्यते। तैत्तिरीययजुर्ब्राह्मणे काठके प्रथमप्रपाठके * भरद्वाजो ह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास * इत्युपक्रम्य चारुतरमुपाख्यानं किमप्याम्नातम्; तदेवम्। भरद्वाजो नाम महर्षिः त्रिशतवत्सरावधिकमायुरुपलभ्य कृत्स्नेऽपि तस्मिन्नायुषि वेदानेवाध्यैष्ट। आयुषोऽवसाने सन्निहिते देवेन्द्रस्समुपेत्य पुनरपि शतवत्सरपरिमितमायुः प्रदद्यामित्यभिधाय, प्रदास्यमाने तस्मिन्नायुषि किं चिकीर्षसीति तं मुनिमप्राक्षीत्। स च प्राह—'तस्मिन्नप्यायुषि वेदमेवाध्येष्ये' इति। अतीत आयुस्त्रितये वेदत्रितयमधीतमिति, आगामिन्यायुषि चतुर्थवेदाध्ययने संपादिते चतुर्वेदविशारदत्वं स्वस्य भविष्यतीति तस्याभिप्राय इव। तमवगतवानिन्द्रो महर्षिणाऽनेन वत्सरत्रिशत्याऽधीतस्य वेदस्य इयत्तां दिदर्शयिषुः अदृष्टपूर्वान् सुमहत्तरांस्त्रीन् गिरीन् पुरस्तादुपस्थाप्य गिरित्रयादपि मुष्टित्रयमितां मृत्तिकामुपादाय 'भगवन्महर्षे! भवता त्रिभिरायुर्भिरधीतो वेद एतन्मुष्टित्रयमितमृत्तिकापरिमित एव केवलम्; अग्रे दृश्यमानगिरित्रयमिता वेदास्तु भवता नैवाधीताः' इति भरद्वाजमाह— इत्येष तावत्तदुपाख्यानप्रकारः। तथाच गाथायामस्यां वेद एव गिरित्वेनापदिष्ट इति वेदितव्यम्। अथ गुहा का नामेत्यभिदध्महे।

महाभारते यक्षप्रश्नं प्रत्युत्तरयन् युधिष्ठिरः— * श्रुतिर्विभिन्ना स्मृतयो विभिन्ना नैको मुनिर्यस्य मतं प्रमाणम्। धर्मस्य तत्त्वं निहितं 'गुहायाम्' महाजनो येन गतस्स पन्थाः * इत्युक्तवानिति सुप्रसिद्धमेतत्। एतत्प्रमाणरीत्या सूक्ष्मो धर्मो यत्र स्थले निलीनः तदेव स्थलं वेदगिरेर्गह्वरं विभाव्यम्। "तत्त्वं निहितं गुहायाम्" इति खलु कथितम्। श्रीरामायणे वालिनः प्रश्नं प्रत्युत्तरयन् रामचन्द्रो यदाह— * सूक्ष्मः परमदुर्ज्ञेयः सतां धर्मः प्लवङ्गम! * इति, तदप्येतदनुगुणं ध्येयम्। तथाच वेदेषु सूक्ष्मधर्मनिकेतनभूताः स्थलविशेषा एवात्र गुहात्वेन विवक्षिता इति सिद्धम्। तत्र गाढनिद्रावैवश्येन शयानः कण्ठीरवो हि भगवद्रामानुजसिंहः। अस्तमितान्यभावत्वेन महानन्दानुभवशालित्वमेव गाढनिद्रावैवश्येन शयानत्वं नाम। निद्रासमये दुःखलेशप्रतिसन्धानमन्तरेण "सुखमहमस्वाप्सम्" इत्येवं प्रत्यवमर्शयोग्यतया आनन्दानुभवस्यैव सद्भावात् निद्रा च आनन्दानुभवश्च पर्यायभूतौ वेदितव्यौ। अनादिमायया सुप्तत्वं नात्र विवक्षितम्।

अथ [प्रबुध्य] इत्यस्य—स्वावतारप्रयोजनमवबुध्येत्यर्थः। मायावादिमत्तगजकण्ठीरवस्य स्वस्य भूमाववतरणम् दुर्मतनिरसनपूर्वकसन्मतस्थापनार्थमेव हीत्यवधार्येति यावत्। शिष्यजनसमुज्जीवनमेव हि प्रधानं कृत्यमस्माकमित्यवधाय. इत्यप्यर्थस्सुवचः। [वह्निकणान् विकिरन्निव चक्षुर्द्वंद्वं विष्फार्य] इत्यनेन * पाषण्डद्रुमषण्डदावदहनः * इत्येषा सूक्तिः स्मार्यते। [सुरभिसटापटलं विकसितमाकलय्य] इत्यत्रेदमवधेयम्; मतान्तरस्था यतयः शिखाबन्धमपाकृत्य मुण्डितशिरस्का भवन्ति; रामानुजास्तु नैवम्; * काषायशोभि कमनीयशिखानिवेशम् * उपवीतिनमूर्ध्वपुण्ड्रवन्तम्.........शिखया शेखरिणं पतिं यतीनाम् * इत्याद्युक्तरीत्या चारुतरशिखाबन्धशोभिनो विलसन्ति; एष एवातिशयोऽत्रानुसन्धेयः। [अवयवांश्च सर्वथा परिस्पन्द्य] इत्यनेन यात्राविशेषः स्फोर्यते; *श्रीरङ्गं करिशैलमञ्जनगिरिं तार्क्ष्याद्रिसिंहाचलौ श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिशम्। श्रीमद्द्वारवतीप्रयागमथुरायोध्यागयापुष्करं सालग्रामगिरिं निषेव्य रमते रामानुजोऽयं मुनिः॥ * इत्यभिष्टुता दिव्यक्षेत्रदिव्यतीर्थयात्रा-

निष्णाततताऽत्रानुसन्धेया। [तन्द्राविसर्जनं च विरचय्य] इत्यनेन नित्यानुष्ठेयकर्मसु आलस्यविरहितत्वमभिधीयते। अथ गभीरतरगर्जनोपबृंहणं भगवद्रामानुजकृतमधिकृत्य किं वक्तव्यम्? परमगम्भीरकण्ठनादेन सर्वजनश्रवणानन्दसंदायकत्वमुक्तं भवति। भगवतो भाष्यकारस्य दिग्विजययात्रायां सर्वत्र सिंहगर्जनैव ह्यासीत्।

"सिंहो यथा हि गिरिगह्वरान्निस्सरति" इति (मूले) उपमानतया निर्देशसत्त्वेऽपि, उपमानार्थानामुपमेय एवोपसंहारो युज्यते; * इन्दुरिन्दुरिव श्रीमान् * गगनं गगनाकारं सागरस्सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिव * इत्याद्यनन्वयालङ्कारलक्ष्यानुसन्धानमिह स्मार्यते। [गर्भगृहाद्बहिर्निष्क्रम्य] इत्यनेन, स्वामिपादानामवतारस्थलभूतात् श्रीमन्महाभूतपुरात् श्रीकाञ्चीपुरागमनम्, ततः श्रीवेङ्कटाद्रिगमनम्, ततश्च श्रीरङ्गगमनम्, ततश्च यादवाद्रिप्रवेश इत्येवंरीत्या संपन्ना गमनविशेषा अभिव्यज्यन्ते। [आस्थानमण्डपमागत्य] इत्यनेन उभयवेदान्तरहस्यादिप्रवचनगोष्ठीभूषणत्वमनुसंहितं भवति। तदुपरि [रमणीयसंनिवेशं लोकोत्तरं सिंहासनमधिष्ठाय] इत्यनेन, यतिराजसप्तत्याम् * गाथा ताथागतानां गलति गमनिका कापिली क्वापि लीना * इत्यादिपद्ये * भजति यतिपतौ भद्रवेदीं त्रिवेदीम् * इत्युक्तं त्रिवेदीरूपभद्रवेदीविभूषणमनुसार्यते। भेदश्रुतिः, अभेदश्रुतिः, घटकश्रुतिरिति प्रसिद्धश्रुतित्रयरूपसिंहासनारूढो हि भगवान् रामानुजो वेदान्तनिर्वाहधूर्वहो भवति। अद्वैतिनो ह्यद्वैतश्रुतिमेकामेव परिगृह्णन्ति; द्वैतिनस्तु द्वैतश्रुतिमेकामेव; उभयेऽपि अन्तर्यामिब्राह्मणात्मिकां घटकश्रुतिमतीव दूरे विसृजन्ति हन्त। भगवान् रामानुजस्तु ते उभे अपि द्वैताद्वैतश्रुती परिगृह्य सुबालोपनिषदादिप्रसिद्ध-घटकश्रुत्या सामरस्यं संपाद्य सकलास्वपि श्रुतिषु समरूपमादरं प्रादर्शयत्; एतदेव रमणीयसन्निवेशलोकोत्तरसिंहासनाधिष्ठानं मन्तव्यम्। [अथ विचारय तावदस्मदागमनप्रयोजनम्] इत्यनेन-प्रवचनगोष्ठ्यां क्रियमाणो विलक्षणः शिष्यानुग्रहः सूचितो भवति॥

तथाच एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ वर्षास्वद्रेर्गुहायां विरचितशयनः केसरी द्राक् प्रबुद्धः
निर्धूताङ्गः प्रगर्जन् विचरति हि यथा तद्वदात्मीयगेहात्।
उत्थायात्रोपगत्य प्रियतम! महिते सिंहपीठे निषण्णः
शृण्वस्मत्कार्यवाचं तत इति गृणतीं नौमि गोदामजस्रम्॥ २३॥

इति त्रयोविंशगाथाविवरणं समाप्तम्॥

---

२४. चतुर्विंशी गाथा—अन्रिव्वुलहमळन्दाय्॥

अन्रिव्वुलहमळन्दा यडिपोत्ति * शेन्रङ्गु तेन्निलङ्गैशेत्ताय् तिरळ् पोत्ति *
पोन्नचहडमुदैत्ताय् पुहळ् पोत्ति * कन्नु कुणिलावेरिन्दाय् कळल् पोत्ति *
कुन्नु कुडैयावेडुत्ताय् कुणम् पोत्ति * वेन्नु पहैकेडुक्कुम् निन्कैयिल्वेल् पोत्ति *
एन्नेन्नुन् शेवहमे येत्ति प्परैकोळ्वान् * इन्नु याम् वन्दोमिरङ्गेलोरेम्बावाय् ॥ २४ ॥

पुरा जगतीतलमिदं विक्रान्तवन् भगवन्! तव चरणारविन्दमङ्गलमाशास्महे; तत्र गत्वा लङ्कां विध्वस्तवन्! तव विक्रमो जयतु विजयताम्; शकटं पादघातेन धूलिसात्कृतवन्! तव कीर्तिर्जयतु विजयताम्; कपित्थासुरहननसाधनीकृतं वत्सासुरमुच्चैः क्षिप्तवन्! तव पादो जयतु विजयताम्; गोवर्धनाद्रिं छत्रतया समुद्धृतवन्! तव गुणप्रथा जयतु विजयताम्; वैरिव्रातविमर्दनक्षमस्तव करस्थो जैत्रो हेतिराजो जयतु विजयताम्— इत्येवमेवं तवैव यशांसि संकीर्त्य पुरुषार्थं लब्धुमद्य वयमत्रागताः स्मः; भगवन् दयेथाः। (इति मूलगाथाविवर्तः।)

भारतसमरोपक्रमे * सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत! * इति पार्थेन चोदितस्तथैव कृतवानिति प्रथामुपेयिवान् भगवान् वासुदेवः अनन्यार्हशेषत्व - अनन्यशरणत्व - अनन्यभोग्यत्वनिधीनां गोपीनामभ्यर्थनां हन्त! कथमिव फलेग्रहिं न कुर्यात्? * अनन्याधीनत्वं तव किल जगुर्वैदिकगिरः पराधीनं त्वां तु प्रणतपरतन्त्रं मनुमहे * (वरदराजस्तवे) इत्युक्तरीत्या सर्वथा भक्तजनपरतन्त्रो हि भगवान्। भक्तानां शासनानि हि सततं प्रतीक्षते साभिनिवेशम्। भक्तजनताभिः क्रियमाणाः प्रार्थना अपि स्वयं दिव्याज्ञानिर्विशेषं हि प्रतिपद्यते। 'प्रभाते वल्लवीनां दिव्यं शासनमेवं खलु प्राप्तम्!' इति हर्षप्रकर्षमेदुरान्तरङ्गो भूत्वा 'अयि भो गोपाङ्गनाः! युष्माकमाज्ञामवतंसयन्नहं तथैव तल्पादुत्थाय बहिरागन्ताऽस्मि' इति सादरं सानुरागभरं चाभिधाय शयनीयात्समुत्थाय, * पतिसंमानिता सीता भर्तारमसितेक्षणा। आद्वारमनुवव्राज मङ्गलान्यभिदध्युषी॥ * इत्युक्तप्रक्रियया स्वसंमानितया नीलादेव्या च आद्वारमनुसृतो भूत्वा दिव्यसिंहासनान्तिकमागन्तुमुपचक्रमे। तदात्वे गोप्यः * यल्लक्ष्मीकरसौख्यसाक्षि जलजप्रस्पर्धमानर्द्धि यत् * (श्रीरङ्गराजस्तवे—पादारविन्दवर्णनप्रकरणे) इत्युपश्लोकितं कृष्णस्य पादारविन्दयोः परमसौकुमार्यमनुसन्धाय 'हा हन्त! एवंविधाभ्यामतिमृदुलाभ्यां दिव्यचरणाभ्यां सरणं प्रार्थितवत्यो वयं निशिचरजनतानिर्विशेषा हि भवामः; * पादारुन्तुदमेव पङ्कजरजः चेटीभृशालोकितैरङ्गम्लानिरथाम्ब! साहसविधौ लीलारविन्दग्रहः। डोला ते वनमाल्या हरिभुजे हा कष्टशब्दास्पदं केन श्रीरतिकोमला तनुरियं वाचां विमर्दक्षमा॥ * (श्रीगुणरत्नकोशे) इत्युपश्लोकिताद्दिव्यमहिषीसौकुमार्यादपि सुतरामभ्यधिकं सौकुमार्यं बिभ्राणस्य देवदेवस्यास्य दिव्यचरणयोरतिकर्कशे भूतले विन्यासं प्रार्थितवतीनामस्माकं शोचनीयं हि महत्तरं पापम्' इति भृशमनुशयानाः, * रूपसंहननं लक्ष्मीं सौकुमार्यं सुवेषताम्। ददृशुर्विस्मिताकारा रामस्य वनचारिणः * ते तं

सोममिवोद्यन्तं दृष्ट्वा वै धर्मचारिणः । मङ्गलानि प्रयुञ्जानाः प्रत्यगृह्णन् दृढव्रताः * इत्युक्तरीत्या दण्डकारण्यवासिनां महर्षीणां या प्रक्रिया समजनि पुरा, तामेव दधुः । ते खलु महर्षयो निशाचरनिवहकृतनिरवधिकहिंसनानि भगवतो रामभद्रस्य सकाशे विज्ञापयितुमाक्रन्दितुं च कृतसंकल्पा अपि अस्पृष्टचिन्तापदस्य तदाभिरूप्यस्यावलोकनमात्र एव स्वविजिज्ञापयिषितं सर्वं विस्मृत्य सौन्दर्यसौकुमार्यविवशीकृतहृदयास्सन्तो यथा मङ्गलाशासने प्रावर्तन्त, तथा गोप्योऽपि * वन्दारुवृन्दारकमौलिमालायुञ्जानचेतःकमलाकरेभ्यः संक्रान्तरागाविव पादपद्मौ पाणितलाभ्यां गृहीत्वा निजशिरस्सु निदधानास्सत्यो मङ्गलान्याशासत इति गाथा सैषा निबद्धा गोदादेव्या ।

ननु मङ्गलाशासनं नाम आशीर्वादापरपर्यायो हि भवति ; सर्वोत्तुङ्गस्य सर्वमङ्गलनिधे भगवतो विषये सर्वथा नीचा दासजना मङ्गलान्याशासत इति कथमिदमुपपद्यताम् ? अवाप्तसमस्तकामत्वेन सर्वरक्षकत्वेन च प्रसिद्धस्य भगवतस्सकाशात् स्वस्य मङ्गलप्रार्थनं खलु युक्तम् ; तादृशीं पद्धतिं विहाय मङ्गलनिधेरेव भगवतो मङ्गलाशासनं कथं नु क्रियते ? इति काचिदाशङ्का भवित्री । अत्रोच्यते । भक्तानां सज्जनानां ज्ञानदशा प्रेमदशेति दशाद्वितयं वर्तते ; ज्ञानदशायां रक्ष्यरक्षकभावो व्यवस्थितोऽवतिष्ठते ; भगवति रक्षकताधियं स्वात्मनि रक्ष्यताधियं च यथायथं बिभ्रति भक्ता इति यावत् । "सर्वरक्षको भगवान् ; वयं भगवता रक्ष्याः ; तत्सकाशादस्माभिर्मङ्गलानि प्राप्तव्यानि" इत्यनुसन्धानम् तन्मूलकप्रार्थनादिकं च ज्ञानदशायां प्रवर्तते । प्रेमदशायां तु भगवति रक्ष्यताधीः स्वात्मनि रक्षकताधीश्च हठादेव भवति । रक्ष्यरक्षकभावानुसन्धानं विपर्यस्यति । सर्वेश्वरस्य ज्ञानशक्त्यादिगुणगणान् विस्मृत्य तदीयसौन्दर्यलावण्यसौकुमार्यादिकमसकृदनुसन्धाय द्रवीभवन्मनसां प्रेमपरवशानां भगवति रक्षकत्वाध्यवसायः प्रच्युतो भवति । भगवन्तं रक्षितुं प्रयतन्ते ते । अस्थानभयशङ्कित्वं हि प्रेम्णो विपाकविशेषः । तदुक्तं श्रुतप्रकाशिकायाम्—"सम्बन्धविशेषान्वितेषु प्रीतिः स्नेहः ; यस्य विपाका अस्थानभयशङ्कित्वं दोषानवभासो दोषेऽपि गुणत्वबुद्धिरित्यादयः" इति । अखिलहेयप्रत्यनीककल्याणैकतानेऽपि भगवति कालदेशादिवैगुण्यवशात् हाहन्त ! किमप्यवद्यं संभवेत्किमु ! इति शङ्कातङ्काङ्कुरो मनसि भवति प्रीतिरूपापन्नज्ञाननिधीनां महताम् ; तयैवातिशङ्कया मङ्गलाशासनप्रवृत्तिरुन्मिषति ; एतादृशो विलक्षणः प्रेमपाकः श्रीमति वैकुण्ठे सर्वोपाधिविनिर्मुक्तानां नित्यमुक्तानामपि विलसतीति विज्ञायते । तथा ह्याहुः श्रीपराशरभट्टार्याः श्रीगुणरत्नकोशे * स्नेहादस्थानरक्षाव्यसनिभिरभयं शार्ङ्गचक्रासिमुख्यैः * इत्यादि । अज्ञानान्यथाज्ञानाद्यवद्यगन्धमसहमानायां नित्यविभूत्यां प्रकृष्टविज्ञानबलैकधामशेषशेषाशनगरुडपञ्चायुधीप्रमुखा नित्यसूरयोऽपि व्यामुग्धास्सन्तो भगवद्रक्षणदीक्षिता भवन्तीति प्रत्यग्दृशा पश्यन्तो हि विपश्चितो व्याहरन्ति । सत्यमेतत् ; भगवतः सर्वज्ञत्वसर्वशक्तित्वादिगुणभूमानं विस्मारयति तदीयमप्रमेयं सौकुमार्यम् । तथा चोपपद्यते सर्वोत्तुङ्गविषयेऽपि जघन्यजनकर्तृकं मङ्गलाशासनमिति कृतं पल्लवितेन ।

भगवान् नन्दनन्दनो वासुदेवो दिव्यसिंहासनमधिष्ठाय 'अयि गोप्यः ! यत्कार्यमुद्दिश्य समागता यूयम् तदधुना निवेद्यताम् ; सिंहासनमधिष्ठाय शृणु तावदस्मदीयं कार्यमिति खलु भवतीभिरभ्यधायि ; तथैव सिंहासनमध्यतिष्ठम् ; विजिज्ञापयिषितं कार्यं विज्ञाप्यताम् ; आज्ञापयत मां कामं शासनं करवाणि किम् ?' इत्याचचक्षे ।

अथ च गोप्यः—'भगवन्! किमस्ति कार्यमस्माकं मङ्गलाशासनादतिरिक्तम्? एतदर्थमेव खलु समागता वयम् इति विज्ञाप्य मङ्गलान्याशासते।

प्रथमतस्तावत् त्रिविक्रमापदानमधिकृत्य मङ्गलमाशासते [पुरा जगतीतलमिदं विक्रान्तवन्! भगवन्! तव चरणारविन्दमङ्गलमाशास्महे] इति। महेन्द्रवैरिणा महाबलिनाऽपहृतं त्रैलोक्यसाम्राज्यं वासवाय तस्मै प्रत्यर्पयितुकामो भगवान् याचकरूपमास्थाय महाबलिमभिवञ्च्य प्रतिगृह्य प्रायच्छत्; तदात्वे इन्द्रादयो देवाः स्वाभिलषितप्रयोजनप्राप्त्या हर्षप्रकर्षपरवशास्सन्तो भगवन्मङ्गलाशासने प्रवृत्तिं मात्रयाऽपि नोद्वहन्तिस्म। महाबलि-प्रभृतयश्च स्वकीयत्वेनाभिमतानां वस्तूनां प्रच्युत्या खिन्ना भूत्वा मङ्गलाशासने प्रसक्तिमपि न दधुः। तथा च तदात्वे मङ्गलाशासनवार्तामात्रमपि नोदभूत्! निर्विण्णानामासुरप्रकृतीनां मङ्गलाशासने प्रवृत्तिरसंभविनी; प्रहृष्टानां देवानां तु सा भवितुमर्हति; केवलं स्वार्थपरास्ते मङ्गलाशासनमिति कश्चन कृत्यविशेषो वर्तत इत्येतावन्मात्रमपि न जानन्तिस्म हन्त। परमसुकुमाराभ्यां दिव्यचरणारविन्दाभ्यां बतबत! कर्कशतमाः स्थलविशेषा आक्रान्ता इति निर्वेदभूम्ना मङ्गलान्याशासितुं तदात्वे विलक्षणोऽधिकारी नैकोऽप्यासीत्। सा हि महती न्यूनता; तामपाकर्तुं वयमधुना मङ्गलान्याशास्महे— इत्युक्तं भवति।

एवं नाम प्रयुक्तां मङ्गलाशासनवाचमाकर्णितवता भगवता कृष्णेन प्रोक्तमेवम्— भो गोप्यः! लोकवि-क्रान्तिकाले नैकोऽपि मङ्गलमाशास्त मह्यमिति न मन्तव्यम्; तदानीमपि जाम्बवदादयः स्थित्वा मङ्गलमाशासत— इति। अथ गोप्यो लङ्काविध्वंसनौपयिकविक्रममधिकृत्य मङ्गलमाशासते [तत्र गत्वा लङ्कां विध्वस्तवन्! तव विक्रमो जयतु विजयताम्] इति। रथगजतुरगराज्यादिकं सर्वं विहाय दारुणेषु भीषणेषु च महारण्येषु पदत्राणशिरस्त्राणादिपरिग्रहमप्यन्तरेण पद्भ्यां खलु हन्त पर्यटनमकारि; तदात्वे हन्त मङ्गलाशासनं केनापि न कृतम्; अथ लङ्कां प्राप्य तत्र सुमहत्तरं पौरुषं प्रख्यापितम्; तदधिकृत्यापि मङ्गलाशासनं नावातरत्; तादृशीं न्यूनतां परिहर्तुं वयमधुना मङ्गलमाशास्महे— इति कथयामासुर्गोप्यः। अथ भगवानवोचत्;— भो गोपाङ्गनाः! श्रीरामायणं युष्माभिः किमहो मनागपि नाकर्णितम्? मङ्गलाशासनमयं खलु रामायणम्; * स्त्रियो वृद्धास्तरुण्यश्च सायंप्रातस्समाहिताः। सर्वान्देवान्नमस्यन्ति रामस्यार्थे यशस्विनः॥ * इति; * पतिसंमानिता सीता भर्तारमसितेक्षणा। आद्वारमनुवव्राज मङ्गलान्यभिदध्युषी॥ * इति; * यन्मङ्गलं सुपर्णस्य विनताऽकल्पयत्पुरा। अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम्॥ * इति; * ते तं सोममिवोद्यन्तं .... मङ्गलानि प्रयुञ्जानाः * इति च मङ्गलाशासनानि भूरितराणि हि सन्ति मे। विशिष्य विहगेन्द्रो जटायुमहाराजः * यामोषधिमिवायुष्मन्! * इति सर्वोत्तमं मङ्गलाशासनमातेने। तदधुना रामावतारचर्यामधिकृत्य मङ्गलमाशासितुं नास्ति तावदावश्यकता। किञ्च, कृष्णकिशोरं मां पुरतस्सिंहासने समुपवेश्य, मामुत्सृज्य त्रिविक्रमस्य रामस्य च मङ्गलाशासनं कुरुध्वे; किमेतदहो? प्रत्यक्षं दैवतं परित्यज्य परोक्षं दैवतमाद्रियध्वे; तदिदं मम लज्जावहं ननु इति। अथ गोप्यः— भगवन् मुकुन्द! त्रिविक्रमोऽन्यः, रामोऽन्यः, कृष्णोऽन्य इति प्रतिपत्तिगन्धोऽपि नास्त्यस्माकम्; त्वयैव समयविशेषे

ल्लोका विक्रान्ताः ; त्वयैव समयान्तरे लङ्का प्रधर्षिता-इत्येव वयं सुदृढं प्रतिपद्यामहे ; वर्तमानमिममवतारमधिकृत्यापि मङ्गलमाशास्महे ; शृणु भगवन् ! इत्यभिधाय, शकटभञ्जन-वत्सासुरव्यापादन-गोवर्धनोद्धरणादिकृत्यविशेषानुद्दिश्य क्रमशो मङ्गलमाशासते।

[शकटं पादघातेन धूलिसात्कृतवन्! तव कीर्तिर्जयतु विजयताम्] इति शकटासुरभञ्जचर्याविशेषमनुसन्धाय मङ्गलमाशासते। शकटभञ्जनकथा चैवम् ;— व्रजे कदाचिद्यशोदा कृष्णशिशुं स्वगृहद्वारे शकटस्याधस्तात् शाययित्वा यमुनामयासीत् ; अथ कृष्णजिघांसया कंसप्रेरितेष्वन्यतमः (असुरविशेषः) कृष्णाश्रयभूतं शकटमाविश्य निपत्य चोपरि हन्तुमयतत ; तदात्वे कृष्णो भगवान् सर्वरक्षणदक्षिणेन स्वचरणेनैव स्वस्यापि रक्षां संपिपादयिषुः स्तन्यार्थं प्ररुदन्निव चरणमुन्नमय्य तदभिघातेन सासुरं शकटं शिथिलीचकारेति। अत्रेदमवधेयम् ; शकटे असुरावेशस्समजनीति यद्यपि पौराणिकाः स्पष्टं नाभ्यदधत ; तथाऽपि श्रीशठकोपमुनिश्रीविष्णुचित्तसूरिप्रभृतय एवमाचक्षते। व्रजभूमावङ्कुरदोषधिमात्रमप्यासुरमेवेति मङ्गलाशासनपराणां दिव्यसूरीणामभिमानः। आस्तामेतत्। एवं शकटभञ्जनचर्याविशेषमधिकृत्य गोपाङ्गनाभिः कृतं मङ्गलाशासनमाकर्ण्य कृष्णेन कथितम्— 'गोप्यः! अतिशैशवे संवृत्तमिदं चरितम् ; तदात्वे किमप्यहं नाज्ञासिषम् ; प्रबुद्धेन मया कृतेषु कृत्येषु किमपि कथयतेति। अथ, "वत्सासुरेण कपित्थासुरं प्रध्वंसयामासिथ भगवन् कृष्णकिशोर! ; तादृशमपदानमधिकृत्य मङ्गलमाशास्महे" इति गोप्य ऊचुः। तन्निशम्य कृष्णः प्राह—एतत्कृत्यविषयिणी प्रत्यभिज्ञा मम भूयसी वर्तते ; यदाऽहं वत्सकपित्थौ मिथोऽभिघातेन विध्वस्तौ विरचय्य गृहमगाम्, तदानीमेव मम जननी यशोदा विदितैतद्वृत्तान्ता मह्यं मङ्गलमाशास्तेति सम्यगेव स्मरामि ; [तदिदं श्रीभट्टनाथसूक्ते—पेरियाळ्वार्तिरुमोळिदिव्यप्रबन्धे ३—३—७ गाथायामनुसन्धेयम्।] अयि गोप्यः! कथामन्यां कथयत-इति। अथ गोपाङ्गनाः [गोवर्धनाद्रिं छत्रतया समुद्धृतवन् कृष्ण! तव गुणप्रथा जयतु विजयताम्] इपि गोवर्धनोद्धरणरूपचर्याविशेषमधिकृत्य मङ्गलमाशासते। गोवर्धनोद्धरणकथा चैवम्— व्रजे प्रतिसंवत्सरं महेन्द्रपूजां निर्वर्तयन्तो गोपालास्तदर्थं पुरस्तादेव बहुशकटपरिमितशाकसूपादिसमेतबृहदन्नकूटसज्जीकरणे प्रवर्तन्ते ; एवं नाम बहोः कालात् प्रचलति। एकस्मिन् वत्सरे तु कृष्णस्तदिदमन्नकूटसज्जीकरणमवलोक्य किमप्यजानन्निव तान् गोपानप्राक्षीत्—किमर्थमेवमपरिमितान्नसन्नाहः क्रियत इति। पृष्टाश्च ते प्रत्यूचुः 'वत्स कृष्ण! किं न जानासि त्वम्? प्रतिसंवत्सरं खल्वेवं संभ्रियते देवेन्द्रसमाराधनाय। अस्मत्कुलधनभूतानां गवां वत्सानां च सलिलयवसादिवस्तुप्रदानेन महोपकारको महेन्द्रः खलु ; स चावश्यमस्माभिस्संतर्पणीय इति चिरादेवमनुष्ठानं संपद्यते' इति। तदाकर्ण्य भगवान् कृष्णः 'परदेवभूतस्य मम पुरतो देवतान्तरसमाराधनमिदं कथमिव सह्यम्? यथाकथञ्चिद्भञ्जनीयमेवैतत्' इति मनसि कृत्वा प्रोवाच तान् प्रति, "अयि भो गोपवृद्धाः! असौ गोवर्धनाद्रिरेव खल्वस्माकं गवां वत्सानां च धारकपोषकभोग्यवस्तुप्रदानेन परिपालकः ; प्रत्यक्षदेवं परित्यज्य अनुपकारकस्य परोक्षस्य चेन्द्रस्य समाराधनं न खलु न्याय्यम् ; * यो वै स्वां देवतामतियजते प्र स्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान् भवति * इति भगवती श्रुतिश्च प्राह ; तत्सर्वथाऽप्यनुचितं देवेन्द्राराधनमिह" इति। तदिदमाकर्णितवन्तो गोपास्सर्वेऽपि युक्ततरमेवेदं वच इति प्रतिपद्यमानाः उपहारराशिस्सर्वोऽपि गोवर्धना-

चलत्तल्लजायैव समर्पणीय इत्यवधारयन्तस्तस्यैव समार्पिपन् ! अथ क्रुद्धो वासवः पुष्कलावर्तकादिपर्जन्यगणान् नियुज्य सुमहत्तरवृष्टिबाधामुदपादयत् । अथ गोगोपगोपीजनसंचये सुदुस्सहवृष्टिबाधयाऽनया भृशं व्याकुले विह्वले च सति भगवान् भक्तवत्सलो नन्दनन्दनः स्वयं यमचलं रक्षकमाचचक्षे पुरा, तेनैवाचलेन रक्षां विधित्सुः तमेव गोवर्धनाद्रिं छत्रमिवोद्धृत्य सप्तरात्रं बिभर्ति स्म ; अथ भृशमपत्रपयाऽभिभूतो बिडौजा अपचारक्षामणेन पूतो बभूवेति ।

इदमाकर्ण्य कृष्णः प्राह— सप्तरात्रमहं गोवर्धनाद्रिं छत्रतया दधानो गोगोपजनरक्षणतत्परोऽतिष्ठम् ; अथ वैरी स इन्द्र एव स्वयं समक्षमागत्य मङ्गलमाशास्य प्रतिनिवृत्तः ; अतस्तत्रापि मङ्गलाशासनमनपायम् ; अन्यत्किमपि कथयत— इति । अथ गोप्यो हेतिराजाय भगवते सुदर्शनाय मङ्गलमाशासते [वैरिव्रातविमर्दनक्षमस्तव करस्थो जैत्रो हेतिराजो जयतु विजयताम्] इति । कृष्णस्यैव सर्वप्रकारप्रभावकथने दृष्टिदोषो भवेत्किमु ! इत्यतिशङ्कया प्रभावविशेषं हेतिराजेऽधिरोप्य कथयन्त्यस्तस्मै मङ्गलमाशासते । * काशीविप्लोषचैद्यक्षपणधरणिजध्वंससूर्यापिधानग्राहद्वेधात्वमालित्रुटनप्रभृतिषु कृत्यविशेषेषु हेतिराजस्य जयशालित्वं प्रथितमिहानुसन्धेयम् । मूले हेतिराज इति शब्दो नास्ति ; (द्राविडयाम्) 'वेल्' इति पदमस्ति । गोपजात्युचित आयुधविशेषस्सः । तत्पदेन सुदर्शनस्यैव विवक्षेति वेदितव्यम् । उपलक्षणमर्यादया पाञ्चजन्यस्यापि विवक्षा भवितुमर्हति । श्रीसुदर्शनशतके *वाणी पौराणिकी यं प्रथयति महितं प्रेक्षणं कैटभारेः शक्तिर्यस्य—इषु दंष्ट्रा नख परशु मुखव्यापिनी तद्विभूत्याम्* इति कथ्यते ; हेतिराजस्यावेशः कदाचिदिषौ, कदाचिद्दंष्ट्रायाम् , कदाचिन्नखे, कदाचित्परशौ....इत्युच्यमानया प्रक्रिययाऽनया अधुना तस्यावेशो गोपजात्युचित आयुधविशेषे इति विभाव्यम् ।

अथ [इत्येवमेवं तवैव यशांसि संकीर्त्य पुरुषार्थं लब्धुमद्य वयमत्रागतास्स्मः, भगवन् ! दयेथाः] इति व्याहरन्ति । रसनायाः षड्रसोपहरणवत् षड्विषयकमङ्गलाशासनं कृतमिह । एतावता कथमिमास्तृप्तिमधिगच्छेयुः ? पर्याप्तिस्तु नैव भवितुमर्हत्यासाम् ; अत एवं "एवमेवम्" इत्याहुर्गोप्यः । मङ्गलाशासनमेव परमप्रयोजनं मन्वाना इमाः "पुरुषार्थं लब्धुमद्य वयमत्रागता" इति च कथयन्ति ; कोऽसौ पुरुषार्थ इति जिज्ञासा जायेत ; क्रमशस्तद्व्यक्तीभविष्यति— एवं नित्यमङ्गलाशासनमेव पुरुषार्थ इति ॥

अथ ध्वन्यर्थविवरणम् ॥ प्रथमतस्त्रिविक्रमापदानस्य मङ्गलमाशास्यते । आचार्योऽपि त्रिविक्रमेण भगवता सह सर्वथा साम्यं बिभर्ति । भगवान् स्वयमप्रमेयमाहात्म्यशाली सन्नपि तन्निगुह्य वामनमूर्तिस्सन् याचको बभूव ; एवमेव गुरुवरोऽपि नित्यमुक्तान्यतमस्वरूपं स्वकीयं माहात्म्यमनाविष्कुर्वन् संसारिष्वन्यतमतामेव प्रकाशयन् अत्यन्तस्पृहणीयलघुतमदिव्यमङ्गलविग्रहस्सन् आसुरप्रकृतीनामस्मादृशां सकाशे याचको भवति—रहस्यत्रयं श्रावयितुमवकाशो दीयताम्, तत्त्वत्रयं श्रावयितुमवकाशः प्रदीयताम् , षट्कत्रयं श्रावयितुमवकाशो वितीर्यताम् .... इति । भगवान् सकलमपि जगतीतलं स्वपादस्पर्शधन्यं यथा कृतवान् तथा गुरुसार्वभौमोऽपि क्षेत्रतीर्थदिव्यदेशादियात्रापदेशेन कृत्स्नमपि भुवनं स्वपादारविन्दसंबन्धधन्यतां नयति । भगवान् जगद्विक्रमणकाले स्वपादतस्तीर्थमुद्भाव्य जगतः पवित्रतां चक्रे ; तथा गुरुतल्लजोऽपि स्वचरणाम्भोजस्पर्शसम्पन्नसौरभेण पावनेन तीर्थेन प्रदत्तेन पुनाति शिष्यनिवहान् ।

एवंरीत्या त्रिविक्रमसधर्मण आचार्यस्य चरणयोरेव मङ्गलाशासनं कृतमिति ध्येयम्। अथ लङ्काध्वंसिनो मङ्गलाशासनं क्रियते; लङ्काध्वंसे हनुमानेव प्राधान्यमधत्तेति सर्वनिर्विवादमेतत्; स च हनुमान् सकलविद्याविशारदत्वेन जितेन्द्रियत्वेन च प्रथितः; * नानृग्वेदविनीतस्य नायजुर्वेदधारिणः। नासामवेदविदुषः शक्यमेवं प्रभाषितुम्॥ नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् * इत्यादिना श्रीरामचन्द्रवचसा तस्य सकलविद्यावैशारद्यं सुगमम्। * अन्यत्र भीष्माद्गाङ्गेयादन्यत्र च हनूमतः। हरिणीखुरमात्रेण चर्मणा मोहितं जगत् * इत्यनेन प्रमाणेन तस्य जितेन्द्रियत्वं च प्रथितम्। तथाच ज्ञानानुष्ठानसम्पन्नो गुरुवर इह आशासितमङ्गलो भवति। संकल्पसूर्योदये * दर्पोदग्रदशेन्द्रियाननमनोनक्तञ्चराधिष्ठिते देहेऽस्मिन् भवसिन्धुना परिवृते दीनां दशामास्थितः। अद्यत्वे हनुमत्समेन गुरुणा संबोधितार्थस्सुधीः लङ्कारुद्धविदेहराजतनयान्यायेन लालप्यते॥ * इत्यनुगृहीतं श्लोकरत्नमप्यत्रानुसन्धातुं योग्यम्।

अथ शकटध्वंसकारिणे मङ्गलमाशास्यते; आचार्यवर्योऽपि नूनं शकटध्वंसकारी; स्थलात् स्थलान्तरप्रापकं हि शकटम्। कृष्णेन हतं शकटं हि दारुणम्; तथा दारुणमेव शकटमिह विवक्षितम्। स्थलात् स्थलान्तरप्रापका मार्गाश्चोत्तराश्च सन्ति दारुणाश्च सन्ति; अर्चिरादिमार्ग एकश्चोत्तरः; अन्ये गर्भनरकस्वर्गादिमार्गा दारुणाः; तेषां ध्वंसनं हि करोत्याचार्यवर्यः स्वपादसंबन्धेन। अथ वत्सेन कपित्थं हतवते मङ्गलमाशास्यते। कण्टकेनैव कण्टकोद्धरणवत् वैरिद्वारैव वैरिक्षयापादनमिह विवक्षितम्। आचार्योऽपि दुर्मतदूरीकरणावसरे, परस्परव्याहतं व्याहरतां प्रतिपक्षिणां वादेषु परस्परव्याघातप्रदर्शनत एव विधूननं वितनोति यत् तस्मै वैदग्ध्याय मङ्गलमाशास्यत इहेति ध्येयम्। अथ गोवर्धनाद्रिमुद्धरते मङ्गलमाशास्यते। अस्मिन् गोवर्धनाचलोद्धरणचरित्रे प्रशस्ततमः कोऽपि महागुणो विराजते; महदपचरितं कृतवतोऽपि महेन्द्रस्य मनागपि दण्डनमकुर्वन् भगवान् स्वकीयकृत्यनिर्वहणमात्रे निष्णात आसीदिति; एतादृश एव हि महागुणो गुरुवरेष्वपि प्रथते। मात्सर्यवशादितरे महापचारकारिणोऽपि भवन्तु कामम्; तत्प्रतिक्रियां मनसाऽपि न चिन्तयन्ति गरीयांसः। केवलं स्वकीये कर्तव्ये बद्धश्रद्धा भवन्ति; तदिदं श्रीकूरनाथादिगुरुवरचरित्रेषु सुगमम्। अथ कृष्णकरस्थिताय वस्तुविशेषाय मङ्गलमाशास्यते; अत्र * चारित्रोद्धारदण्डं चतुरनयपथालंक्रियाकेतुदण्डं सद्विद्यादीपदण्डं सकलकलिकथासंहृतेः कालदण्डम्। त्रय्यन्तालम्बदण्डं त्रिभुवनविजयच्छत्रसौवर्णदण्डं धत्ते रामानुजार्यः प्रतिकथकशिरोवज्रदण्डं त्रिदण्डम् * इत्यनेन श्लोकरत्नेन क्रियमाणं मङ्गलाशासनमाचार्यविषये विभाव्यम्॥

तथाचैतद्गाथासारार्थसंग्राहकं पद्यद्वयम्—

श्लो॥ विक्रान्ताशेषलोकप्रभुवर! जयतात्ते पदाम्भोजयुग्मं
गत्वा लङ्कापुरीं तद्विदलनकर भो! वर्धतां विक्रमस्ते।
पादाघातेन दैत्यं शकटमपहरन्! वर्धतां ते सुकीर्तिः
वत्सं क्षिप्त्वा कपित्थे द्वयमपि दलयन्! ते जयेत्पादपद्मम्॥

छत्रं गोवर्धनाद्रिं कृतवति भवति स्याज्जयी सद्गुणौघः
हस्ते ते भ्राजमानो जयतु रिपुकुलच्छेदनो दिव्यहेतिः।
इत्थं भद्रोक्तिमालाः कथयितुमधुनोपस्थिता नो दयस्वे-
त्याहुर्गोप्यस्तदूचुष्यतिमधुरवचास्साऽस्तु गोदा जयाढ्या ॥ २४ ॥

इति चतुर्विंशगाथाविवरणं समाप्तम् ॥

---

२५. पञ्चविंशी गाथा—ओरुत्तिमहनाय् ॥

ओरुत्ति महनाय्प्पिरन्दु * ओरिरविलोरुत्तिमहना योळित्तुवळर *
तरिक्किलानाहि त्तानृतीङ्गुनिनैन्द * करुत्तैप्पिळैप्पित्तु कञ्जन्वयित्तिल् *
नेरुप्पेन्न निन्ननेडुमाले * उन्नैयरुत्तित्तु वन्दोम् परैतरुदियाहिल् *
तिरुत्तक्क शेल्वमुम् शेवकमुम् याम्पाडि * वरुत्तमुम् तीर्न्दु महिळ्न्देलोरेम्बावाय् ॥ २५ ॥

कस्याश्चन भाग्यशालिन्याः पुत्रत्वेन निशि जनित्वा तस्यामेव निशि अपरस्या भाग्यशालिन्याः पुत्रत्वेन निगूढं विवर्धमाने स्वस्मिन् असहिष्णुतामूला दुरितं हृदि चिन्तितवतः कंसस्याभिसन्धिं विपर्यस्तमारचय्य तस्य जठरे जातवेदस्समानतया स्थित सर्वेश्वर महाप्रेमशालिन्! अस्मदपेक्षितपुरुषार्थप्रदानसमुत्सुको यदि त्वमसि, शृणु तावत्; वयं त्वामेव काङ्क्षन्त्यस्समागतास्स्मः; त्वदीयं लक्ष्म्यानुरूप्यात्मकं प्रभावं विक्रमं च वयं गायन्त्यस्ततो वीतविषादा महानन्दभरिताश्च भवामः ॥ [इति मूलगाथाविवर्तः]

अधस्तनगाथायां परमरमणीयं मङ्गलाशासनं कृतवतीनां गोपाङ्गनानाम् * द्राक्षामधिक्षिपति निन्दति माकरन्दधारां सुधारसंझरीमधरीकरोतीति प्रशंसनयोग्यां फणितिपरिपाटीमाकर्णितवान् कृष्णकिशोरः परमानन्दतुन्दिलस्वान्तस्सन् "अयि गोप्यः! युष्माभिः क्रियमाणं मङ्गलाशासनं न मे विस्मयाय कल्पते; नैसर्गिको ह्ययं प्रभावो युष्माकम्; इदमास्तां तावत्। शीतबाधामप्यविगणयन्त्यो हि यूयं देहाभिमानवैमुख्यभाजो भूत्वा निशीथे प्रस्थाय महता परिश्रमेण समागतास्स्थ; मङ्गलाशासनमेकमेव कार्यतया समुद्दिश्य समागता यूयमिति न मे मनसि प्रत्ययो भवति; मन्ये किञ्चिदन्यदुद्देश्यं स्यादिति; तदवश्यं वक्तव्यं युष्माभिः" इति प्रेममयीं वाचमूचे; तदिदमाकर्ण्य गोप्यो विज्ञापयन्तिस्म— भगवन्! * जन्म कर्म च मे दिव्यमिति त्वयैव प्रशस्यमानं त्वदीयं जन्म च कर्म च सानन्दं संकीर्तयन्त्यः खलु समागता वयम्; * गच्छतां दूरमध्वानं तृष्णामूर्च्छितचेतसाम्। पाथेयं पुण्डरीकाक्षनामसंकीर्तनामृतम् ॥ * इति ह्याहुर्महर्षयः; तथा नाम समागतानामस्माकमायासलेशोऽपि नास्ति भगवन्; नान्यत्किमपि वस्तु काङ्क्षणीयमस्त्यस्माकम्; त्वामेव काङ्क्षन्त्यस्समागतास्स्म 'इति। तदिदं श्रुत्वा प्रहृष्टः कृष्णः तर्हि तद्विस्तरेण कथयत भो इति सुमहत्तरं श्रवणकुतूहलमुदजीघटत्; अथ यद्विज्ञापितं गोपीभिस्तदनया गाथया निबध्यते ॥

अधस्तनीषु बह्वीषु गाथासु कृष्णस्य प्रभावा बहुविधास्सन्ति कीर्तिताः ; तेभ्योऽप्यतिशयितः प्रभावो गाथायामस्यामुच्यते ; कोऽयं तथाविधः प्रभाव इति चेत् ; कृष्णस्य जननमधिकृत्य यदिहाभिधीयते तदेव। नन्दगोपतनयः, यशोदास्तनन्धय इत्यादिरूपेण कथनं तिष्ठतु नाम। तत्र तावत् जन्मपदघटना नास्तीति कृष्णस्य मनसि अतृप्तिरेव सत्यम्। * अजायमानो बहुधा विजायते * इति, * पिता पुत्रेण पितृमान् योनियोनौ * इति च श्रुत्युक्तरीत्या महता कुतूहलेन कृतजननं भगवन्तमुद्दिश्य * जातोऽसि देवदेवेश * इति वसुदेवदेवक्यौ कथयामासतुः ; तदेव वचः कृष्णस्य हृदये हर्षप्रकर्षमुदपादयत्। पुण्यपापरूपकर्मवशाद्धि वयं नानायोनिषु जायामहे ; भगवांस्तु केवलं करुणया तथा। तादृशं जननमधिकृत्य ये भक्ता वाचं विसृजन्ति, तेष्वेव भवति भगवतो भूयान् प्रेमविशेषः। भगवान् पाराशर्यो महर्षिश्चतुरध्यायमयीं शारीरकमीमांसां प्रणयन्नपि नैकस्मिन्नपि सूत्रे भगवतो जननमधिकृत्य मनागप्यवोचत्। ततो महदेव दुःखमासीद्भगवतः ; तद्दुःखापनोदनार्थमेव पराङ्कुशपरकालादयो दिव्यसूरयः स्वकीयेषु दिव्यप्रबन्धेषु असकृदनुसन्दधिरे भगवतो जननम्। श्रीपराङ्कुशमुनिः स्वकीये प्रथमदिव्यप्रबन्धे (तिरुविरुत्ते) प्रथमगाथायामेव हि * एन्निन्न योनियुमाय्प्पिरन्दायिमैयोर्तलैवा ! * (छाया = नानायोनिषु जायमान भगवन् देवाधिदेव प्रभो !) इति भगवन्तं संबोधयामास। अत एव भगवतस्तेषु दिव्यसूरिषु वाचामभूमिः प्रेमविशेषः सर्वजगद्विदितः प्रथते। * अत्याम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः। अतितापिभिरत्यर्थं वर्धमानातिवेदनः॥ * (श्रीविष्णुपुराणे) इत्युक्तरीत्या गर्भवासकाले तीव्रवेदनानुभवः ; अथ गर्भतो निष्क्रमणकालेऽपि * क्लेशान्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः * इत्युक्तरीत्या सुमहत्तरक्लेशानुभवश्च संसारिणां भवति ; अत एवास्माकं जननं जुगुप्सनीयतामापद्यते ; भगवतस्तु नैवम्। निरवग्रहानुग्रहपरीवाहरूपं हि तदीयं जननम्। अत एव हि स एव स्वयं गायति * जन्म कर्म च मे दिव्यम् * इति। श्रुतिश्चाह * स उ श्रेयान् भवति जायमानः * इति। एवं च तस्य परमानन्दसंदोहकन्दभूतं तदीयजननप्रस्तावम् इयता प्रबन्धेन अनाकलितमधुना कलयन्ति गोप्यः।

देवक्याः पुत्रत्वेन जनित्वा सद्य एव यशोदास्तनन्धयत्वेन निगूढं वर्धमानेति वक्तव्ये देवकीनाम यशोदानाम च नैव स्पृशन्तिस्मात्र ; अपि तु [एकस्याः पुत्रत्वेन जनित्वा अपरस्याः पुत्रत्वेन......] इति ब्राहुः ; किमत्र कारणमिति चेत् ; लोके परमपूज्यानां महनीयानां नामग्रहणं न कार्यमिति कश्चन संप्रदायो वर्तते ; 'स्वामी समागतः, स्वामिनी सेविता" इत्येवं व्यवहारास्संपद्यन्ते। एवं नाम व्यवहरणेन उद्देश्यव्यक्तिविशेषाणाम् अतिशयितमभ्यर्हितत्वं द्योत्यते। तद्वदेवात्र देवक्या यशोदायाश्च नामग्रहणप्रहाणेन तयोरसमाभ्यधिकभाग्यवत्त्वमभिव्यज्यते। देवकीं प्रति भट्टपादा अनुगृह्णन्ति श्रीरङ्गराजस्तवे— * आकण्ठवारिभरमन्थरमेघदेश्यं पीताम्बरं कमललोचनपञ्चहेति। ब्रह्म स्तनन्धयमयाचत देवकी त्वां श्रीरङ्गकान्त ! सुतकाम्यति का परैवम् !॥ * इति। साक्षात्परब्रह्मभूतं पुण्डरीकाक्षं पीताम्बरधरं पञ्चायुधोद्भासिदिव्यगात्रं भगवन्तं नारायणमेव प्रसूतवत्या देवक्या भाग्यभूमा वैदेशिकः खलु वाचाम्। अथ यशोदाया भाग्यातिशयमधिकृत्य किमस्ति वक्तव्यम् ! जन्मतः प्रभृति आषोडशहायनं संपन्नं सर्वमपि चेष्टितं साक्षात्कृत्य सन्तोषसीम्नि स्थिता खलु सा यशोदा। अस्या भाग्याधिकत्वं गोदादेवीजनको भट्टनाथसूरिराचचक्षे बह्वीभिर्गाथाभिः ; तास्वेकस्या गाथाया अस्मदीयमनुवादमा-

कर्णयत ;— श्लो॥ वैलक्षण्येन कर्णाभरणमुपवहन् चारु वासो वसानः मुक्तास्रग्भूषणाढ्यो मम तनयवरः पृष्ठतो गोगणानाम्। आयातीक्षध्वमेतं नयनशतसहस्रावलोकार्हवेषं सत्यं सर्वाः स्त्रियोऽस्मिन् जगति मदितरा हन्त! वन्ध्या हि सख्यः!॥ * इति। [भट्टनाथसूक्ते ३-३-९. गाथाया अनुवादपद्यमेतत्।] एवं नाम देवकीयशोदयोरस्त्युत्तमभाग्याधिकत्वान्नामग्रहणवर्जनमिति ध्येयम्।

यद्यपि मूले संबोधनमेकमेवास्ति, न बहूनि सन्ति, तथाऽपि बहूनि संबोधनानि योजयितव्यानि। कथमिति चेत्; कस्याश्चन भाग्यशालिन्याः पुत्रत्वेन जात! अथ सद्य एव अपरस्या भाग्यशालिन्याः पुत्रीभूय निगूढं विवर्धमान!, त्वय्यसहिष्णुताभूम्ना दुश्चरितं हृदि चिन्तितवतः कंसस्याभिसन्धिं विपर्यस्तमारचितवन्!, तस्य (कंसस्य) जठरे जातवेदस्समानतया स्थित सर्वेश्वर!— इत्येवं संबोधनवाक्यानां बहुत्वेन योजना कर्तव्या। संबोधनद्वयं विवृतम्। अथ तृतीयं संबोधनम् [त्वय्यसहिष्णुताभूम्ना दुश्चरितं हृदि चिन्तितवतः कंसस्याभिसन्धिं विपर्यस्तमारचितवन्!] इति। कृष्णं निहत्य 'मम भागिनेयो मृतो बते' ति रोदनेन दुःखाभिनयः कार्य इति कंसस्याभिसन्धिरासीत; तस्याभिसन्धेर्विपर्यासं कृतवान् कृष्णः; स्वयं कंसं निहत्य मम मातुलो मृतो बतेति हि रुरोद सः। एतदेव कंसाभिसन्धेर्विपर्यस्तताकरणं नाम। कंसस्य यदस्ति विशेषणं "दुश्चरितं हृदि चिन्तितवत" इति, अत्रेदमवधेयम्। वस्तुतः कंसो दुश्चरितानि बहूनि कृतवानेव— वसुदेवदेवक्योर्निगलबन्धप्रापणम्, कृष्णजिघांसया व्रजंप्रति आसुरप्रकृतीनां भूयसां प्रेषणमित्यादीनि; एवंच "दुश्चरितं कृतवतः कंसस्य" इति वक्तव्ये "दुश्चरितं हृदि चिन्तितवतः कंसस्ये" ति कुतः कथितमिति शङ्का जायेत; अत्रेदं तत्त्वमवबोधयन्ति गुरुचरणाः;— लोके कश्चित् भगवति भक्त इव वाचा स्तुतिशब्दान् विकिरति; परंतु तस्य हृदये प्रेमगन्धोऽपि नास्ति; तस्मिन् भगवाननुग्रहातिशयमेव प्रकाशयति; अस्य हृदये अनुरागो नास्ति हीति तं न परित्यजति; अथान्यः कश्चित् भगवन्तं भूरिशो विनिन्दति; तस्य निग्रहः खलु कर्तव्यो भगवता; परंतु तावता न निगृह्णाति; दूषकस्यास्य मात्सर्यं हृदयेऽप्यस्ति वेति परीक्षते; तत्र तदस्तीत्यवगते सति तदैव निगृह्णाति। एतेन किमुक्तं भवति? कश्चिदनुग्रहीतुं बाह्याभिनयमात्रमेव पर्याप्तम्; निग्रहीतुं तु न तावत्पर्याप्तम्; निग्रहहेतुभूतस्य वस्तुनो हृदयेऽपि सद्भाव आवश्यकः इत्युक्तं भवति। अनुग्रहाय व्याजमात्रमप्यलम्; निग्रहाय न तथा इति भगवतो निस्समाभ्यधिको गुणातिशयः ख्यापितो भवति। प्रकृते कंसस्य भगवता कृष्णेन कृतं निग्रहणं तदीयहार्दक्रौर्यनिबन्धनम् इति द्योतयितुमेव "दुश्चरितं हृदि चिन्तितवतः कंसस्य" इति कथितमिति। एतावता, कंसो दुश्चरितं हृदये केवलं चिन्तितवान्, न तु कर्मणा कृतवानिति अयमर्थो न लभ्येत। निग्रहं प्रति पुष्कलहेतुशाली सोऽयमित्यसावेवार्थः स्फोरितो भवति।

[तस्य जठरे जातवेदस्समानतया स्थित!] * उल्लंघ्य सिन्धोस्सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः। आदाय तेनैव ददाह लङ्काम् * इति मारुतिस्तुतिपरपद्योक्तप्रक्रियया, कृष्णविषयकभयाग्निं येये भक्ता हृदि बिभ्रतिस्म तेषां हृदयात्तमग्निमुत्थाप्य कंसस्य जठरे प्रक्षिप्तवान् भगवानिति कथ्यत इव। कं९घं तुकेति

सिद्धोऽर्थः। अनुपदमेव [महाप्रेमशालिन्!] इति संबोधनेन, * न मे द्वेष्योऽस्ति न प्रियः * इति कथयता भगवता कृतः कंसवधो भक्तेषु विनिहितेन महता प्रेम्णा, नतु स्वेच्छयेत्ययमर्थो द्योत्यते। स्वविरोधीति हेतुना न कंसो निहतः, अपितु भक्तजनविरोधीत्यनेनैव हेतुना; यदाह सहस्रगीत्यां श्रीशठकोपमुनीन्द्रः (३-५-५.) * शादुशनत्तै नल्लियुम् कञ्जनैचादिप्पदर्कु * इति। (परमभागवतद्रोहिणं कंसं निहन्तुं प्रादुर्भूतो भगवानिति तदर्थः।) भक्तजनप्रेमपारवश्येन तदीयान् क्लेशान् सोढुमशक्नुवन् तत्क्लेशकारिणं कंसं जघानेति सूचनार्थमेव * महाप्रेमशालिन्निति इदं संबोधनमवतीर्णमिति बोध्यम्। अथ [अस्मदपेक्षितपुरुषार्थप्रदानसमुत्सुको यदि त्वमसि] इत्येतद्वाक्यम् अतिगम्भीरम्; भगवत्पादारविन्दपरिसरे नित्यकैङ्कर्यादन्यत् नासामपेक्षितं किमपि; तत् उपरिष्टादेकोनत्रिंशगाथायां व्यक्तीभविष्यति। अथ [वयं त्वामेव काङ्क्षन्त्यस्समागतास्स्मः] इति यदभिधीयते, तदिदमनर्घं वचः। लोके तावत् प्रयोजनान्तरपरा जना न भगवन्तं कामयन्ते; अपितु भगवतस्सकाशात् अन्यत्किमपि कामयन्ते; ये ह्यनन्यप्रयोजना जनास्त एव हि त्वामेव काङ्क्षामो वयमिति धीरं वक्तुं प्रभवन्ति। एवमाचक्षाणा इमा गोप्यः स्वात्मनामनन्यप्रयोजनतां दृढीचक्रुरिति ध्येयम्। अथ स्वेषामिहागमने न मनागपि क्लेशो जात इति, परमानन्दभून्नैव समागमनं जातमिति च विज्ञापयन्ति * त्वदीयं लक्ष्म्यानुरूप्यात्मकमित्यादिना। भवदीयं प्रभावं विक्रमं च गायन्तीनामस्माकं को नाम क्लेश इति भावः॥ लक्ष्म्यानुरूप्यं नाम— * तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणाम्। राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा॥ * इति मारुतिकथितमानुरूप्यम्। अनुरूपदाम्पत्यं हि लोके दुर्घटं प्रायः; पत्यौ विशालहृदये सति पत्नी संकुचितहृदया स्यात्; पत्न्यां विशालहृदयायां सत्याम् पतिस्संकुचितमनास्स्यात्; इह तु न तथा। अतिविस्मयनीयतया घटितमुभयोरानुरूप्यं गायन्त्यो वयम् आनन्दतुन्दिलस्वान्ताः स्म इत्युक्तं भवति॥

अथ ध्वन्यर्थविवरणम्॥ कृष्णो यथा द्वयोर्मात्रोः पुत्रो जातः तथा आचार्योऽपि द्वाभ्यां मातृभ्यां जनितो भवति। * गायत्रीच्छन्दसां मातेति श्रुतिप्रक्रियया प्रथमा माता गायत्री। अथ द्वितीया माता तु अष्टाक्षरी। * कुलम् तरुम् शेल्वम् तन्दिडुम् * इत्यादिश्रीपरकालसूरिदिव्यगाथायाम् * पेत्त तायिनुम् आयिन शेय्युम् * [साक्षाज्जनन्यपेक्षयाऽप्याधिक्येन हितं वितनोति मूलमन्त्रः] इति कथनात्। कृष्णो निशि जातः— अन्धतमसे जात इति यावत्। आचार्योऽपि * इरुळ्तरुमा ञालमिति श्रीशठकोपमुनीन्द्रेणोक्तायां तमोमय्यां विभूत्यां ह्यवतीर्णः। कृष्णो यथा निगूढं ववृधे तथाऽऽचार्योऽपि निगूढमेव हि वर्धते— स्वप्रभावातिशयान् अप्रकाशयन् संसारिष्वन्यतम एवासाविति भावनीयस्सन् वर्धत इति यावत्। कृष्णे असहिष्णुतामूम्ना कंसो यथा दुश्चरितं हृदि चिन्तयामास, एवं कलिपुरुष आचार्ये द्रोहचिन्तको भवति; कृष्णः कंसमिव आचार्योऽपि कलिपुरुषं क्षणेन भञ्जयति। * जातवेदस्समानतया स्थितेत्यत्र * पाषण्डद्रुमषण्डदावदहनः * पाषण्डसागरमहाबडबामुखाग्निः * इत्यादिकमनुसन्धेयम्। महाप्रेमशालित्वमाचार्याणाम् अन्तेवासिषु वेदितव्यम्। * वयं त्वामेव काङ्क्षन्तस्समागता इत्यनेन— आचार्यनिष्ठस्य तदेकदत्तदृष्टित्वं द्योतितं भवति। अथ * त्वदीयं लक्ष्म्यानुरूप्यात्मकं प्रभावं विक्रमं

च * इत्यादि। आचार्ये लक्ष्म्यानुरूप्यं नाम लक्ष्मीतुल्यकृपातिशयशालित्वम्। * लक्ष्मीः पुरुषकारत्वे निर्दिष्टा परमर्षिभिः। ममापि च मतं ह्येतन्नान्यथा लक्षणं भवेत्॥ * इत्युक्तरीत्या पुरुषकारकृत्यैकनिष्णातायां लक्ष्म्यां कृपा पारतन्त्र्यम् अनन्यार्हत्वं च यथा पुष्कलम् तथा आचार्येऽपि तदिदं गुणत्रयमतीव पुष्कलमित्युक्तं भवति। भगवान् यथा लक्ष्मीपुरुषकारमन्तरा चेतनान् न स्वीकरोति तथा आचार्यपुरुषकारमपि विना नैव स्वीकरोतीति हृदयम्; उक्तं हि न्यासतिलके— * दत्ते रङ्गी निजमपि पदं देशिकादेशकाङ्क्षी * इति। अथ आचार्ये विक्रमो नाम—सकलविद्यावाहिनीजन्मशैलत्व— जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखित्व— निखिलकुमतिमायाशर्वरीबालसूर्यत्व—निगमजलधिवेलापूर्णचन्द्रत्वादिकथनयोग्यप्रभावातिशयशालित्वम्॥

तथाच एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ देवक्या आत्मजस्सन् निशि तदनु यशोदात्मजोऽभूदितीदं
श्रुत्वा द्रोहैकदीक्षाजुषमतिपरुषं कंसमुन्मूलयन् भोः।
त्वय्येवेच्छां वहामस्तव च शुभगुणान् प्रोच्य खेदं त्यजामो
नन्दामश्चेति गोप्यो जगदुरिति गृणत्येधतां दिव्यगोदा॥ २५॥

इति पञ्चविंशगाथाविवरणं समाप्तम्॥

---

२६. षड्विंशी गाथा—मालेमणिवण्णा॥

माले मणिवण्णा मार्गळि नीराडुवान् * मेलैयार् शेय्वनहळ् वेण्डुवन केट्टियेल् *
ञालत्तैयेल्लाम् नडुङ्ग मुरल्वन * पालन्न वण्णत्तुन्पाञ्चशन्नियमे *
पोल्वन शङ्गङ्गळ् पोय्प्पाडुडैयनवे * शालप्पेरुम्परैये पल्लाण्डिशैप्पारे *
कोलविळक्के कोडियेवितानमे * आलिनिलैयायरुळेलोरेम्बावाय्॥ २६॥

अयि भो व्यामुग्ध! मणिसवर्ण! भगवन्! मार्गशीर्षावगाहनमिति उत्तमपुरुषैराचर्यमाणः कृत्यविशेषोऽस्ति; तदर्थमुपयुक्तानंशान् विज्ञापयामः शृणु तावत्। कृत्स्नभूमण्डलकम्पप्रदनिनदशालि-दुग्धसवर्ण-त्वत्पाञ्चजन्यसदृशान् शंखान्, अतिबृहत्तमाश्च भेरीः; मङ्गलाशासननिरतान्, माङ्गलिकप्रदीपं पताकां वितानं च स्वामिन् वटदलशयन भगवन्ननुगृहाण॥ (इति मूलगाथाविवर्तः)

अधस्तनगाथायाम् "अस्मदपेक्षितपुरुषार्थप्रदानसमुत्सुको यदि त्वमसि" इत्येतद्वाक्यम्, "त्वामेव काङ्क्षन्त्यस्समागतास्स्मः" इत्येतद्वाक्यं च श्रुतवान् भगवान् कृष्णो गोपीः प्राह— अयि भो गोप्यः! परस्परं व्याहतं वचो व्याहरन्ति भवत्यः; यदि मामेव काङ्क्षन्ति भवत्यस्तर्हि "अस्मदपेक्षितपुरुषार्थे" त्यादिकथनं ह्यप्रसक्तम्; मनसि कश्चिदपेक्षाविशेषो वो वर्तत इति प्रतिभाति; युष्मदपेक्षितः पुरुषार्थः कोनामेति मम बलवती जिज्ञासा वर्तते;

तदुद्घाट्यतां नाम मनसि स्थितमपेक्षितम् इति। तत्र प्रतिवदन्तिस्म यद्गोप्यः तदनया गाथया निबध्यते। मार्गशीर्षस्नानमिति कश्चन व्रतविशेषः शिष्टाचारसिद्धो वर्तते; स एवानुतिष्ठासितोऽस्माकम्; एतदर्थं केचन वस्तुविशेषा आवश्यकास्सन्ति भोः। तान् विज्ञाप्यमानान् वितरतु भवान् कृपयेति कथयन्ति गोप्यः। कृष्णसकाशे स्वात्मनामागमनार्थं गोपवृद्धानामनुमत्यै व्रतविशेषानुष्ठानरुचिमभिनयन्तीनां गोपीनां गिरा तदिदमुच्यत इति प्रतिपत्तव्यम्।

उपक्रमे हे व्यामुग्ध! इति संबोधयन्ति कृष्णम्; अनेन गम्यते कृष्णोऽधुना विशिष्य स्वकीयं व्यामोहातिशयं प्रकाशयामासेति। 'आः! गोपालबालिका इमाः प्रत्यूषे प्रबुध्य शीतबाधामप्यविगणय्य प्रस्थाय द्वारपालकं प्रबोध्य मम पितरं मातरं भ्रातरं च प्रबोध्य मां प्रबोध्य मद्दयितां नीलां प्रबोध्य पुनरपि मां प्रबोध्य, मां सिंहासने समुपवेश्य मह्यं मङ्गलान्याशास्य, मम दिव्यं जन्म कर्म च संकीर्त्य किं किं व्याहरन्ति हन्त!' इति विस्मयविवशहृदयस्सन् तासां मुखारविन्दे चिकुरबन्धे कुचकुड्मले च चक्षुषी प्रसारयन् स्वकीयं व्यामोहभूमानमाविश्चकार; तदिदमवगतवत्यो गोप्यः व्यामोहैकनिरूपणीयोऽयं कृष्ण इति प्रतिपद्यमानाः हेव्यामुग्धेति संबोधयन्ति। सीतादेवी रामचन्द्रस्य स्वभावं "शरणागतवत्सल" इति प्राचीकशत्; [* विदितस्स हि धर्मज्ञः शरणागतवत्सलः। तेन मैत्री भवतु ते यदि जीवितुमिच्छसि॥ * इति खलु रावणं प्रति सा कथयामास।] गोप्यस्तु कृष्णस्य स्वभावं व्यामुग्धपदेन प्रकाशयन्ति। रामो यथा शरणागतेषु वत्सलः प्रोक्तः, तथाऽयं कृष्णः शरणागतेषु व्यामुग्धो न कथितः; अपितु सामान्यतो व्यामुग्धत्वमेवास्य स्वरूपमिति प्रख्यापितं भवति।

अथ मणिसवर्णेति द्वितीयं संबोधनम् कृष्णस्य सौलभ्यातिशयं दिव्यमङ्गलविग्रहशोभातिशयम् अन्यदन्यच्च वैभवं व्याख्याति। कथमिति चेत्; मणिर्नाम रत्नम्; तद्धि महार्घं सदपि चेलाञ्चले ग्रथनार्हं भवति; तथैव भगवान् निरतिशयपरत्वशाली सन्नपि सर्वेषां हस्तगतः सर्वात्मना विधेयो भवतीति सौलभ्यमुक्तं भवति। अथ मणिपदेन इन्द्रनीलमणिविवक्षा युज्यते; तत्सावर्ण्यकथनेन दिव्यमङ्गलविग्रहशोभातिशयः कथितो भवति। अथ च रत्नसाम्यं भगवति बहुधा निर्वोढुं शक्यम्। रत्नं तावन्न सामान्यपुरुषलभ्यं भवेत्; अपितु भाग्याधिकैकभोग्यं भविष्णु; भगवानपि * तेनावलोक्य कृतिनः परिभुञ्जते तम् * [श्रीरङ्गराजस्तवे. २—१.] इत्युक्तरीत्या विलक्षणभाग्यभाजामेव भोग्यो भवति। रत्नं तावत् महार्घं सदपि धीवरादिजघन्यजनहस्तगतं सत् अल्पमूल्यकं भवति; तदेव वणिजो हस्तगतं सत् यथावस्थितमूल्यकं भवति; तदेव महाराजहस्तगतं सत् तस्य स्वयं भोग्यं भवति-इति जगति पश्यामः। एवमेव भगवानपि अल्पजनैरल्पवस्तुप्राप्तये प्रार्थ्यते; उत्तमैर्महात्मभिर्मोक्षाख्यसमुत्तुङ्गवस्तुप्राप्तये प्रार्थ्यते; उत्तमोत्तमैस्तु उपायत्वानुसन्धानगन्धमन्तरेण स्वयंपुरुषार्थतया परमभोग्यतयाऽनुभूयते। एवमेवं रत्नसाम्यप्रकारा भगवति बहवोऽनुसन्धेयाः।

अथ [मार्गशीर्षावगाहनार्थमित्यादि।] यद्यप्येवंविधो व्रतविशेषः शास्त्रचोदितो न भवति, तथाऽपि शिष्टाचारसिद्ध इति गोदादेवी प्रख्यापयति गाथायामस्याम्; पूर्वमीमांसायां होलाधिकरणे शिष्टाचारस्योपादेयत्वं व्यवस्थापितम्। वस्तुतः श्रुत्यपेक्षयाऽपि शिष्टाचारस्यैव प्रामाण्यं प्रबलम्। * धर्मज्ञसमयः प्रमाणं वेदाश्चेत्याप-

स्तम्बसूत्रम्। तैत्तिरीयोपनिषदपि * अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यादित्युपक्रम्य * यथा ते तत्र वर्तेरन्। तथा तत्र वर्तेथाः * इति शिष्टाचारस्यैवानुवर्तनीयतामाम्नासीत्। गीताचार्योऽपि गायति * यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥ * इति। भगवतो यामुनमुनीन्द्रस्य सूक्तिरपि— * विषयश्च वैदिकाः त्वदीयगम्भीरमनोनुसारिणः * इति। (त्वदीयानां सतां गम्भीरमनोनुसारिण इति वैयधिकरण्येन विवक्षा; न तु सामानाधिकरण्येन।) सोऽयमौपनिषदोऽर्थ एव सकलोपनिषद्बीजभूतेऽस्मिन्दिव्यप्रबन्धे गाथायामस्यां प्रख्याप्यते। तथाच शिष्टाचारसिद्ध-मार्गशीर्षावगाहनाभिधानव्रतविशेषनिर्वर्तनोपयुक्तानि वस्तुजातानि उपरि क्रमशः प्रार्थ्यन्ते— शंखाः, भेर्यः, मङ्गलाशासनकर्तारः, मङ्गलदीपः, पताका, वितानम् इत्येतानि। अपेक्ष्यमाणानां शङ्खानां विशेषणद्वयं दीयते— कृत्स्नभूमण्डलकम्पप्रदनिनदशालित्वं प्रथमविशेषणम्। भारतसमरोपक्रमे भवदीयपाञ्चजन्यादुद्गतो घोषस्तावत् * स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् * इत्युक्तरीत्या धृतराष्ट्रसंबन्धिनां केवलं हृदयानामरुन्तुद आसीत्; अद्यास्माभिरपेक्ष्यमाणानां भवता दास्यमानानां च शङ्खानां घोषेण कृत्स्नभूमण्डलकम्पप्रदेन भवितव्यमिति कथयन्ति— भूमण्डलव्यापिनां भगवद्भागवतविरोधिनां सर्वेषामपि हृदयं विदारणीयमित्यभिप्राय आसाम्। अथ द्वितीयं विशेषणं * दुग्धसवर्णत्वपाञ्चजन्यसदृशानिति। नीलमेघनिभस्य कृष्णस्य परभागशोभां दधानः पाञ्चजन्यो दुग्धसवर्णः। भगवतो दिव्यमङ्गलविग्रहच्छविरिव भागवतानां शुभ्रवर्णोऽपि अविशेषमुद्देश्य इति व्यञ्जनार्थमेवं कथनम्। एवंविधाः शङ्खा बहवोऽपेक्ष्यन्ते। यात्रोत्सवाङ्गभूता ह्येते। भगवत्पाञ्चजन्यसदृशः शङ्ख एकोऽपि दुर्लभ इति स्थिते तादृशान् बहून् शङ्खानपेक्षमाणानां गोपीनां हृदयं तावत सपाञ्चजन्यः कृष्णो भगवान् स्वयमेव समागच्छतादिति। अथ अतिबृहत्तमा भेर्यः काङ्क्ष्यन्ते। यात्रोत्सवपूर्वाङ्गतया शङ्खनादकरणम्, अथ यात्रोत्सवे प्रवर्तमाने वीथीषु भेरीनिनदप्रपञ्चनं च समुद्दिष्टम्। यात्रोत्सवे समुपक्रान्ते * पल्लाण्डुपल्लाण्डिति मङ्गलाशासनप्रबन्धपारायणपरायणा अध्यापकाश्चावश्यकाः खलु, तेऽपि काङ्क्ष्यन्ते। तेषां गोष्ठ्या मङ्गलदीपतो हि शोभितया भवितव्यम्; तदर्थं मङ्गलदीपापेक्षणम्। तेते भक्ता भागवताश्च दूरादेव वीक्ष्य हर्षप्रकर्षमवाप्नुवन्त्विति पताकाप्रार्थनम्। शिरसि हिमपतननिरोधाय वितानप्रार्थनम्। गोपीभिरेवंनाम विज्ञापितमाकर्ण्य कृष्णोऽब्रवीत्— अयि गोप्यः! सुबहूनि हि वस्तूनि भवतीभिरपेक्ष्यन्ते, कथमहं बालक एतावन्ति महत्तराणि वस्तूनि प्रदातुं प्रभवेयमिति। अत्र प्रत्युत्तरकथनरूपेण कृष्णं संबोधयन्ति गोप्यः— * भो वटदलशयनेति। भगवन्! तव दुस्साधमपि किञ्चिदस्ति किम्? सकलमपि जगन्निगीर्य लघिष्ठं वटदलं ह्यधिशेते भवान् समयविशेषे; एवमघटितघटनापटीयसस्तवापि दुर्घटं किञ्चिदस्ति किम्? इत्युक्तं भवति॥

अथ ध्वन्यर्थविवरणम्॥ व्यामुग्धेतिसंबोधनेन * यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने * इति (श्रीकूरनाथगुरुवरेण) व्यामुग्धतया स्तुतो भगवान् रामानुजः स्मार्यते। स खलु भगवति च व्यामुग्धः, शिष्येष्वपि व्यामुग्धः। शिष्येषु व्यामोहभूम्ना "श्रद्धालुभ्यः सर्वेभ्योऽपि सर्वेऽप्यर्थाः परीक्षामन्तरेण काममुपदेष्टव्या" इत्याज्ञामुदभावयत्। अथ मणिसावर्ण्यमप्याचार्यसार्वभौमे संघटते; कथमिति चेत्; * आघ्रातं परिचुम्बितं परिमुहुर्लीढं पुनश्चर्वितं त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथां माकृथाः। हे सद्रत्न!

तवैतदेव कुशलं यद्वा नरेणादरादन्तस्सारविलोकनव्यसनिना चूर्णीकृतं नाश्मना ॥ * इति कश्चन कविराह ; रत्नस्य गौरवं यथा मर्कटादयो न जानन्ति तथा पामरा जना आचार्यगौरवं न ज्ञातुं प्रभवन्ति । तथाच, क्षुद्रजनदुरवगम-प्रभावशालिन् भो इति संबोधितं भवति । अथ मार्गशीर्षावगाहनमित्यमुं विषयमधिकृत्य वक्तव्यं विपुलमवोचाम प्रथमगाथाव्याख्यायां (द्वादशे पुटे) तदिहाप्यनुसन्धेयम् । मार्गेषु यच्छीर्षम्— तदेव मार्गशीर्षम् ; उपायेषु शिरोभूतमिति यावत् । तत्रावगाहनमेव मार्गशीर्षावगाहनम्— आचार्ये अभिनिविष्टत्वम् । एतत् पूर्वाचार्यसंप्रदाय-सिद्धम् । * रामानुजांघ्रिशरणोऽस्मि कुलप्रदीपस्त्वासीत्स यामुनमुनेस्स च नाथवंश्यः । वंश्यः पराङ्कुशमुनेस्स च...... * इति कूरनाथसूक्तिः, * अन्धोऽनन्धग्रहणवशगो याति रङ्गेश ! यद्वत् पङ्गुर्नौकाकुहरनिहितो नीयते नाविकेन । भुङ्क्ते भोगानविदितनृपस्सेवकस्यार्भकादिः त्वत्संप्राप्तौ प्रभवति तथा देशिकेन्द्रो (देशिको मे) दयालुः ॥ * इति वेदान्ताचार्यसूक्तिः । * पितामहं नाथमुनिं विलोक्य प्रसीद मद्वृत्तमचिन्तयित्वा * इति कथयन् यामुनाचार्य एव मार्गदर्शी महर्षिः । एवं पूर्वाचार्यसंप्रदायसिद्धायाम् उपायमूर्धन्यभूतायामाचार्यनिष्ठायां वयमभिनि-विष्टा इत्युक्तं भवति ।

अथ शङ्खभेर्यादिकाङ्क्षणाभिप्रायस्तावदित्थम् ; भावप्रधाननिर्देशप्रक्रियया शङ्खत्वभेरीत्वादिकमपेक्ष्यत इति ग्राह्यम् । वयमेव शङ्खा भवेम, वयमेव भेर्यो भवाम, वयमेव मङ्गलाशासनकर्तारो भवेम, वयमेव दीपा भवेम, वयमेव ध्वजा भवेम, वयमेव वितानतां भजेम— इति प्रार्थनं सिध्यति । [शङ्खा भवेम] शुद्धसात्त्विका भवेम ; अथवा सर्वज्ञा भवेम इति भावः ; भगवान् ध्रुवं शङ्खस्पर्शेन सर्वज्ञं चकारेति हि श्रूयते । [भेर्यो भवाम] आचार्यप्राचार्यपरमाचार्याणां वैभवप्रख्यापनविषये वयं पटहा भवेमेति भावः । [मङ्गलाशासनकर्तारो भवेम] एतत्तु साम्प्रतं नास्तीति न ; अस्त्येव ; एतस्याविच्छेदः उत्तरोत्तरमभिवृद्धिश्च प्रार्थ्यत इति वेदितव्यम् । [दीपा भवेम] दीपो यथा स्वस्मै स्वयं प्रकाशते अन्यानपि प्रकाशयति तथा वयं स्वपरप्रकाशका भवेमेति भावः । [ध्वजा भवेम] * श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् * इति खल्वाचार्या उपश्लोकयन्ते ; एवं भगवद्रामानुजदर्शनविजय-ध्वजविरुदभाजो भवेमेति प्रार्थना फलति । [वितानभावं भजेम] * दासस्सखा वाहनमासनं ध्वजो यस्ते 'वितानं' व्यजनं त्रयीमयः । उपस्थितं तेन पुरो गरुत्मता * [स्तोत्ररत्ने] इत्युक्तरीत्या सकलकैङ्कर्यधुरन्धरा भवेमेति प्रार्थितं भवति । वितानमित्येतदुपलक्षणं मन्तव्यम् । कृष्णो भगवान् अवतरणसमनन्तरमेव मथुरापुरीतो व्रजं नीतो वसुदेवेन ; तदात्वे फणिराजो वितानतां गत इति शृणुमः ; स एव कृष्णो यदा बृन्दावने विहरतिस्म, तदा तीक्ष्णातपबाधापरिहारार्थं वैनतेयः स्वकीये पक्षती वितानं चकारेति सैषा गोदादेवी स्वकीये द्वितीयप्रबन्धे [गोदा-सूक्ते] अन्तिमदशकतृतीयगाथायामनुसन्धत्ते । तदेवं फणिराजपक्षिराजादिवद्वयमपि कैङ्कर्यविशेषनिरता भूयास्मेति प्रार्थितं भवति ।

अथ वटदलशायिन्निति संबोधनमस्ति ; अत्रेदमवगन्तव्यम् ; * ब्रह्माण्डमण्डलममूदुदरैकदेशे * इत्युक्तरीत्या स्वोदरे सकलां जगतीं बिभ्राणो भगवानिव सकला अपि विद्या अन्तर्बिभर्ति य आचार्यसार्वभौमः स हि वटदलशायी सत्यम् । अघटितघटनासामर्थ्यं भगवत इव आचार्यस्याप्यविशिष्टं बोध्यम् ॥

तथाच एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो ॥ स्नानं यन्मार्गशीर्षे तदनघचरितं प्राच्यशिष्टाग्रिमाणाम्,
शंखास्त्वत्पाञ्चजन्योपमविभवजुषो भेर्य उच्चप्रणादाः ।
भद्रोक्तिज्ञाः प्रदीपा ध्वजपटवितितिस्सद्वितानं च देया-
न्येतान्येतद्व्रतार्थं वटदलशयनेत्यूचुषी श्रीः शरण्या ॥ २६ ॥

इति षड्विंशगाथाविवरणं समाप्तम् ॥

---

२७. सप्तविंशी गाथा—कूडारैवेल्लुम्शीर् ॥

कूडारै वेल्लुम् शीर्कोविन्दा * उन्तन्नै प्पाडिप्परैकोण्डु याम्पेरु शम्मानम् *
नाडु पुहलुम्परिशिनाल् नन्राह * शूडहमे तोळवळैये तोडे शेविप्पूवे *
पाडहमे येन्रनैय पलकलनुम् यामणिवोम् * आडैयुडुप्पो, मदन्पिन्ने पाल्शोरु *
मूड नेय्पेय्दु मुळङ्गै वळिवार * कूडियिरुन्दु कुळिर्न्देलोरेम्पावाय् ॥ २७ ॥

विमुखजनवशीकरणविचक्षणगुणशालिन् ! गोविन्द ! भवत्सङ्कीर्तनात्मकं परमपुरुषार्थमुपलभ्य, अथ च भवत्सकाशादस्माभिर्लब्धव्यं पारितोषिकं चाद्य प्रार्थयामहे ; कृत्स्नजगतीतलप्रशंसनार्हया समीच्या पद्धत्या पारितोषिकप्राप्तिरस्तु नः । करवलय-केयूर-कर्णभूषण-कर्णपुष्प-पादकटकप्रभृतीनि भूयांस्याभरणानि लभेमहि ; पीताम्बराणि च परिदधीमहि । तदनु घृतसमृद्धिभरितं दुग्धान्नं कपोणिस्रुतियोग्यं भुञ्जीमहि । त्वया सह समवेतानामस्माकमेवं नाम परमशिशिरो भोगरसंपद्यताम् ॥ (इति मूलगाथाविवर्तः)

अधस्तनगाथायाम् पाञ्चजन्यसदृशशङ्खविशेषान् पटहान् मङ्गलाशासननिरतान् मङ्गलदीपं पताकां वितानं च दातुं प्रार्थितवतीनां गोपीनां हृदयं यथावदवजगाम भगवान् कृष्णः ; इमाः खलु सत्यमनन्यप्रयोजनाः ; इतः पूर्वं "त्वामेव काङ्क्षन्त्यस्समागता वयम्" इत्युक्तवतीनां वल्लवीनामासां मद्व्यतिरिक्तवस्तुलिप्सा मनागपि न स्यादेव ; * वासुदेवस्सर्वमिति स महात्मा सुदुर्लभ इति मया सुदुर्लभत्वेन कथितेष्वधिकारिषु अग्रगण्या इमा मामेव सर्वस्वं मन्यमाना वस्त्वन्तराणि नैव कामयेरन् ; पाञ्चजन्यसदृशशङ्खकाङ्क्षणापदेशेन पाञ्चजन्यपाणिं मामेव कामयन्ते ; पटहकाङ्क्षणापदेशेन— घटनर्तनावसरेषु कटितटनिबद्धपटहस्य मम विभ्रमातिशयेषु विवशहृदया इमास्तादृशपटहविशिष्टं मामेव कामयन्ते ; मङ्गलाशासननिरतानामभिलषणापदेशेन * स्नेहादस्थानरक्षाव्यसनिभिरभयं शार्ङ्गचक्रासिमुख्यैः * (श्रीगुणरत्नकोशे) इत्युक्तरीत्या नित्यमङ्गलाशासननिरतदिव्यहेतिसनाथं मामेव वाञ्छन्ति ; मङ्गलदीपापेक्षणच्छलेन * श्रीरङ्गहर्म्यतलमङ्गलदीपरेखात्वेन प्रसिद्धदिव्यमहिषीसंमेतं मामेव काङ्क्षन्ति ; ध्वजापेक्षणापदेशेन * दासस्सखा वाहनमासनं ध्वजः .... उपस्थितं तेन पुरो गरुत्मता * इत्युक्तरीत्या ध्वजभूतवैनतेयाधिरूढं मामेव लिप्सन्ते ; वितानवाञ्छामिषेण * निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः । शरीरभेदैस्तव

शेषतां गतैर्यथोचितं शेष इतीरिते जनैः * (स्तोत्ररत्ने) इत्युक्तरीत्या यात्रासु वर्षातपवारणमुखेन वितानकार्यकारि-फणिराजपरिवृतं मामेव प्रेप्सन्ति इति मनसि कलयन् भगवान् वासुदेवो गोपीरुद्दिश्य कथयतिस्मैवम्—

अयि भोःपरमभक्तिघनहृदयगोपाङ्गनाः! मदीयपाञ्चजन्यसदृशान् शङ्खानपेक्षध्वे; मत्सदृशः कश्चिदन्यः अस्तिचेन्मदीयपाञ्चजन्यसदृशोऽपि शङ्खस्स्यात्; किञ्च तादृशान् बहून् शङ्खानपेक्षध्वे; द्रक्ष्यामि तावत्; अथ च अतिबृहत्तमभेरीरपेक्षध्वे; गोपानां सकाशे प्रायस्सुलभमिदं वस्तु; नात्र कोऽपि विचारः। अथ मङ्गलाशासन-निरतान् कामयध्वे; युष्मदपेक्षया अभ्यर्हिता मङ्गलाशासननिरता अन्ये जनाः के नाम सन्ति भुवि? स्वात्मन एवापेक्षणमिवैतत्। अथ च दीपध्वजवितानाख्यवस्तूनि काङ्क्षथ; नैतेषु दौर्लभ्यमस्ति नाम; अपेक्षितं वस्तुजातं प्रायस्सुलभमेवेति गृह्णन्तु भवत्यः; एतावद्भिर्वस्तुभिर्लब्धैः कच्चिद्भवति परिपूर्णतृप्तिर्युष्माकम्? निशीथे समुत्थाय प्रभाते समागत्य मधुरमधुराणि वचांसि व्याहृत्य काङ्क्षितवतीनां भवतीनां मनोरथपूरणं तु सत्यमवश्यकर्तव्यमेव मम; तत्तथा भविष्यति नाम; एतावता परिपूर्णतृप्तिर्भवित्री वा भवतीनाम्? तदुच्यताम्— इति। अथ गोपीभि-र्यदुक्तं तदनया गाथया निबध्यते। भगवन् कृष्ण! मार्गशीर्षावगाहनाख्यव्रतविशेषार्थमभिलषितानि खल्विमानि वस्तूनि; व्रतसमापने सति भवतस्सकाशादस्माभिरवाप्तव्या बहुमानविशेषा अवशिष्यन्ते खलु; तदधुना विज्ञापयामो निशमय तावत्— इति विज्ञाप्य पुनः स्वाभिलषितविशेषान् विनिवेदयन्ति।

[विमुखजनवशीकरणविचक्षणगुणशालिन् गोविन्द!] इति कृष्णस्संबोध्यते प्रथमतः। लोके तावत् जना अभिमुखा विमुखा उदासीना इति त्रेधा विभागमर्हन्ति। अभिमुखास्तु सुहृदः; विमुखास्तु वैरिणः। अथ श्रूयताम्— वैरिण एव विमुखा भवन्तीति न नियमः; सुहृदोऽपि कारणवशाद्विमुखा भवन्ति भगवति। कथमिति चेत्; परमभक्तियुक्ता अपि * धिगशुचिमविनीतं निर्दयं मामलज्जं परमपुरुष! योऽहं योगिवर्याग्रगण्यैः। विधि-शिवसनकाद्यैर्ध्यातुमत्यन्तदूरं तव परिजनभावं कामये कामवृत्तः॥ * (स्तोत्ररत्ने.) * गर्भजन्मजरामृतिक्लेशकर्म-पङ्क्तिमिंगः। श्वेव देववषट्कृतं त्वां श्रियोऽहमकामये॥ * (श्रीरङ्गराजस्तवे.) इत्याद्युक्तप्रक्रियया नैच्यानुसन्धा-नभूम्ना भगवता सह संगतौ विमुखा भवन्ति केचित्। केचिच्च (प्रेयसीजनाः) प्रणयरोषभूम्ना * याहि याहि माधवा! गच्छ गच्छ केशवा! माऽत्र तिष्ठ माऽत्र तिष्ठ दूरतो व्रजाच्युता; देहि देहि कन्दुकम् याहि याहि दूरतो जारचोर माधवा! दूरतोऽपसर्प हे * इत्यपसारयन्तो वैमुख्यं प्रकाशयन्ति। मात्सर्यमलिनहृदया जना विमुखा इति तु सिद्धमेव। द्वेषं स्नेहं च विना उदासीनतया वर्तमाना अपि जना विमुखकोटावेव गणनीया भवन्ति। तथाच, निर्दिष्टे संबोधने विमुखजनपदेन चतुर्विधा जना ग्रहीतुं शक्या इति सिध्यति १. नैच्यानुस-न्धानतो विमुखाः, २. प्रणयरोषवशाद्विमुखाः, ३. मात्सर्यहेतोर्विमुखाः, औदासीन्यतो विमुखाश्चेति। एषां सर्वेषामपि वशीकरणे विचक्षणा गुणा विलसन्ति नाम भगवति। 'महतो मन्दैस्सह नीरन्ध्रेण संश्लेषः— शीलम्' इति निरुच्यमानसौशील्यगुणप्रदर्शनेन वशीकरोति नैच्यानुसन्धानतो विमुखान्; प्रणयरोषतो विमुखीः प्रेयसीस्तु शृङ्गारचेष्टितवैदग्ध्यभूम्ना विनयमहिम्ना च वशयति। मात्सर्यतो विमुखान् वैरिव्रातांस्तु शौर्यवीर्यपराक्रमगुणैः स्वाधी-

नयति। औदासीन्यतो विमुखानपि निरतिशयसौन्दर्यलावण्यसमुद्घाटनेन समाकर्षति। एवंविधान् अन्यत्र सामानाधिकरण्यमसहमानान् भगवत्येव केवलं सामानाधिकरण्येन नृत्यतो विलक्षणान् गुणान् हृदि निदधाना गोप्यः "विमुखजनवशीकरणविचक्षणगुणशालिन्!" इति संबोधयन्तिस्म। अथ * गोविन्देति संबोधनेन— गोपालजन्मनोऽपि तव ईदृशं विश्वतोमुखं वैदग्ध्यमतिमात्रविस्मयनीयमिति सूचितं भवति।

[भवत्संकीर्तनात्मकं परमपुरुषार्थमुपलभ्य] इति कथितेन—. व्रतविशेषानुष्ठानमिति व्याजमात्रम्; गोपवृद्धानामनुमतिं प्राप्य प्रकाशमेव भवत्संकीर्तनं यदकार्ष्म, यच्च कुर्मः, अयमेव हि नः परमपुरुषार्थलाभ इति व्यञ्जितं भवति। भगवन् गोविन्द! * नामसमेतं कृतसंकेतं गायति मुरलीं गोविन्दः * इत्युक्तरीत्या त्वमस्मदीयानि नामानि संकेतरूपेण मुरल्यां संयोज्य गायसि तदातदा; वयं तु तादृशवैचक्षण्यविरहिताः प्रकाशमेव त्वदीयानि नामानि गायन्त्यः परमपुरुषार्थमलभामहि— इति च सूचितं भवति। [अथ च भवत्सकाशादस्माभिर्लब्धव्यं पारितोषिकं चाद्य प्रार्थयामहे] इति कथयन्ति। हिरण्यकशिपोः पुरे यथा हि भगवन्नाम न वक्तुं शक्यम्, तथा व्रजेऽप्यस्मिन् भवदीयं नाम हन्त वक्तुमशक्यमासीत् गोपवृद्धानां निर्बन्धतः; सत्यप्येवं यदस्माभिर्भवदीयनामावली उच्चैस्संकीर्तिता, एतदर्थं पारितोषिकमस्मभ्यं दातव्यमेव ननु भवता इति कथयन्तीव। दशरथाज्ञया सुमन्त्रेणाहूतो रामचन्द्रः प्रतस्थे पितुस्सकाशं गन्तुम्; तदात्वे सीताऽप्याद्वारमनुवव्राज मङ्गलान्यभिदध्युषी; तदा रामस्तस्यै किमपि पारितोषिकं प्रायच्छदिति गम्यते * पतिसम्मानिता सीता * इति तत्रत्यवचनव्यक्त्या; तादृशं पारितोषिकं गोप्योऽपि लिप्सन्ते। उपरि च विशिष्य वदन्ति [कृत्स्नजगतीतलप्रशंसनार्हया समीच्या पद्धत्या पारितोषिकप्राप्तिरस्तु नः] इति। ख्यातिलाभपूजाविमुखाः खलु परमभक्तजनाः। पारमैकान्त्यसीम्नि स्थिता इमाः किमिति परकीयां प्रशंसां वाञ्छन्तीति शङ्का मा भूत्; अनन्यलभ्यमत्युत्तमं पुरुषार्थं प्रददातु भवानिति प्रार्थनायामेव तात्पर्यमिह वेदितव्यम्। परकर्तृकया श्लाघया न किमपि प्रयोजनमासाम्; ये जनाः श्लाघन्ते तेषामुज्जीवनं संपत्स्यते; तदेव ह्यासां धिया परमो लाभः। परेषामुज्जीवनमेव स्वोज्जीवनं मन्यमाना इमा एवं कथयन्तीति प्रतिपत्तव्यम्। कृष्णस्य पाण्डवानां च यदा सख्यं समजनि तदा कदाचित् कृष्णस्सत्यभामा च अर्जुनो द्रौपदी च विविक्तस्थलविशेषे शयानास्सन्ति; अन्तर्न कोऽपि प्रवेशयितव्य इति द्वारि द्वारपालक उपवेशितो वर्तते; तदात्वे सञ्जयो द्वारान्तिकमुपाययौ; द्वारपालकस्तावदन्तः प्रविश्य 'भगवन्! सञ्जयस्समागतोऽस्ति; स कच्चिदन्तः प्रवेशनमर्हति? कथमाज्ञा?' इति व्यजिज्ञपत्। अथ भगवान् वासुदेवो व्याहरति—'परमभक्तः सञ्जयः खलु समागतः; स तावदत्रत्यां स्थितिमभिवीक्ष्य हर्षप्रकर्षसमुत्फुल्लचेता भविता; न केवलमेतावदेव; पश्चात् बहिर्गत्वा, मत्सरिणां हृदयवेधो यथा भवेत्तथा प्रशंसावचांसि वर्षेदपि; तादृशोऽयमन्तः प्रवेशनमर्हत्येव; तत् क्षिप्रं प्रवेश्यतामसौ' इति। अथ स चान्तः प्रविश्य चतुर्णां स्थितिमवेक्ष्य सन्तुष्य, पश्चात् बहिर्गत्वा धार्तराष्ट्रसकाशे कथयतिस्म— 'हा हन्त कृष्णार्जुनयोस्सख्यपरिपाटी कीदृशी नाम!; साक्षात्कृतवानहम्; हतोऽसि त्वम्; कथं ते हन्त! जीवनं घटिष्यते? निरतिशयं हि पारितोषिकं प्रददाति पार्थाय कृष्णः! हाहन्त! कीदृशः प्रेमविशेषस्सः!' इति। एवंविधानि प्रशंसावाक्यानि असद्विषयेऽपि प्रादुर्भूयासुरिति हृदयमिहेति पूर्वाचार्या मधुरतरं व्याचक्षते।

श्रीरामचन्द्रराज्याभिषेकशुभावसरे सर्वेभ्योऽपि भक्तवर्गेभ्यः पारितोषिकप्रदानं प्रचलति ; तस्मिन्प्रकरणे प्राचेतसो मुनिवरः प्राह— * अवमुच्यात्मनः कण्ठात् हारं जनकनन्दिनी। अवैक्षत हरीन् सर्वान् भर्तारं च मुहुर्मुहुः ॥ तामिङ्गितज्ञस्संप्रेक्ष्य बभाषे जनकात्मजाम्। प्रदेहि सुभगे! हारं यस्य तुष्टाऽसि भामिनि। पौरुषं विक्रमो बुद्धिर्यस्मिन्नेतानि नित्यशः। ददौ सा वायुपुत्राय तं हारमसितेक्षणा। हनूमांस्तेन हारेण शुशुभे वानरर्षभः। चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाऽचलः॥ * इति। एवं नाम दिव्यदम्पतिभ्यां हि पारितोषिकं प्रदत्तं प्रभञ्जनसुताय ; अत एव हि तत् जगति भृशं प्रशस्यते ; तथाविधं पारितोषिकं नीलादेव्या सह भवता प्रदातव्यमिति गोपीभिः प्रार्थितं भवति। अथ कृष्णो भगवान् प्राह— "अयि गोप्यः! तत्तथैव संपत्स्यते ; युष्माभिरपेक्ष्यमाणं पारितोषिकमिह कीदृशमिति न जाने ; निस्सङ्कोचं कथयत तावत् ; यावच्छक्ति प्रदातुं प्रयतेय" इति। अथ कथयन्ति गोपललनाः—

[करवलय - केयूर - कर्णभूषण - कर्णपुष्प - पादकटकप्रभृतीनि भूयांस्याभरणानि लभेमहि........] इत्यादि। * इयं सीता मम सुता। सहधर्मचरी तव। प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना॥ * इत्युक्तरीत्या पाणिग्रहणतो हि संबन्धाङ्कुरोऽस्माकम् ; तादृशभाग्यभाजनभूतौ पाणी प्रथमतो भूषयितव्यौ ; तदर्थं करवलयप्रार्थना क्रियते। पाणिग्रहणे जाते * अंसेनांसो निपीडितः * इत्युक्तियोग्यस्समाश्लेषो ह्यनन्तरभावी। स चाप्यवयवो विभूषयितव्यः ; तदर्थं केयूरप्रार्थना क्रियते। आश्लेषानन्तरं दम्पत्योर्मिथः कर्णमूले रहस्यवार्तालापो हि भविता ; तदानीं भवत उद्देश्यभूतौ कर्णावप्यलङ्करणीयौ खलु ; तदर्थं कर्णभूषणकर्णपुष्पप्रार्थना क्रियते। कर्णस्य अधोभागे धार्यमाणं वस्तु कर्णभूषणमित्युच्यते ; उपरिभागे धार्यमाणं वस्तु कर्णपुष्पमित्युच्यते। एवं द्विविधं हि भूषणं कर्णालङ्कारतां नीयते जगति। तदुभयं च प्रार्थितमिह। अथ चोन्मत्तकभोगदशायां परमरसिको भर्ता सहचरीपादग्रहणमपि हि करोति ; तौ पादावपि हि विभूषयितव्यौ ; तदर्थं पादकटकप्रार्थना क्रियते ; आदिशब्देन अवयवान्तराणामप्याभरणलिप्सा सूचिता भवति।

अथ [पीताम्बराणि च परिदधीमहि] इति वसनालङ्कारलिप्सामपि प्रकटयन्ति। आभरणधारणानन्तरमेव ललना वसनं धारयन्तीति स्त्रीणामाचारोऽप्यत्र सूचितो भवतीति रसिकालापः। अधस्तात् गोविन्देति संबोधनस्य कृतत्वात्, गोविन्दनामसंकीर्तने कृते भविष्यत्येव हि वस्त्रवृद्धिः। द्रौपदी गोविन्देति कथनेनैव हि वस्त्रवृद्धिमलभत। एवं वयमपि गोविन्दनामसंकीर्तनेन पीताम्बराणि लब्ध्वा परिदधीमहीत्याशंसन्ते। [तदनु घृतसमृद्धिभरितं दुग्धान्नं कपोणिस्रुतियोग्यं भुञ्जीमहि] इति क्षीरान्नभोजनवाञ्छामपि प्रतिपादयन्ति। * वासुदेवस्सर्वमिति सुदृढाध्यवसायशालिनीनां भगवदेकभोगनिरतानां च वल्लवीनामासां भगवत्सविधे अन्नादनवाञ्छाप्रकाशनम् तत्रापि घृतसमृद्धिभरितक्षीरान्नभोजनवाञ्छाप्रकाशनं यद्यपि नोपपद्यते, तथाऽपि बहिः प्रकाश्यमानव्रतोपवासकर्शितानामासाम् एतत्काङ्क्षाप्रकाशनं लोकानुवर्तनार्थमिति नावद्यम्। वस्तुतः अन्तरङ्गे निरूढोऽर्थः अनुपदमेव प्रतिपादयिष्यते। "कपोणिस्रुतियोग्यं भुञ्जीमहि" इत्युक्तेरभिप्रायोऽपि परस्ताद्वक्ष्यते। अन्ततः कथयन्ति— [त्वया सह

समवेतानामस्माकमेवं नाम परमशिशिरो भोगस्सम्पद्यताम्] इति । भोगे शिशिरत्वं नाम सर्वथा स्पृहणीयत्वमेव; भगवत्साहित्येन क्रियमाणेऽनुभवे शिशिरत्वं न खलु विवरणसापेक्षम् ॥

अथ ध्वन्यर्थविवरणं ॥ विमुखजनवशीकरणविचक्षगुणशालिन् ! इति संबोधनं भगवतीव आचार्येऽपि सुसाङ्गत्यमश्नुते । औदासीन्यभरितान् मात्सर्यभरितानपि विदुषः स्वकीयनिस्समाभ्यधिकवैदुष्यातिशयप्रदर्शनेन स्वाधीनयितुं समर्थो ह्याचार्यः । भगवान् रामानुजो हि * स्वबलादुद्धृतयादवप्रकाशः * (यतिराजसप्ततौ) इत्युक्तरीत्या भूतपूर्वं स्वोपाध्यायं यादवप्रकाशमपि स्वशिष्यकोटिं प्रावेशयत्; यज्ञमूर्तिप्रभृतीनन्यांश्च विपश्चिदपश्चिमान् अन्तेवासिपदे न्यधत्त । श्रीपराशरभट्टार्योऽपि विश्वातिशायिस्वकीयवैदुष्यभूम्ना माधवाचार्यनामानं वेदान्तिनं स्वशिष्यमचकलत् । एवं बहव इतिहासा इहावगन्तव्याः । अथ * गोविन्देति संबोधनमप्याचार्ये सुसङ्गतम् । नानार्थकगोशब्द इह वागर्थको ग्राह्यः । 'गोदा' इत्यत्र गोशब्दार्थोऽपि वागेव हि । गाः विन्दतीति गोविन्दः—आळ्वाराचार्यदिव्यसूक्तिलाभप्रमुदित इत्यर्थः ।

अथ आचार्यसकाशादुपलब्धव्यं पारितोषिकं प्रार्थयन्ते । करवलयमेप्सा प्रकाशिता प्रथमतः; आचार्यसकाशे शिष्येण सर्वदा बद्धाञ्जलिपुटेनैव खलु वर्तितव्यम् । अञ्जलिबन्ध एव करभूषणम्; आचार्यकृपामन्तरा नैतद्भूषणं संसारिजनानां सुलभम् । अत एव तत्सकाशे एतत्प्रार्थना प्रवर्तते । अथ केयूरलिप्सा प्रकाश्यते; केयूरशब्देन भुजभूषणं ह्युच्यते । शंखचक्राङ्कनमेव हि भुजभूषणम् । * तापः पुण्ड्रस्तथा नाम मन्त्रो यागश्च पञ्चमः । अमी परमसंस्काराः * इति पारमैकान्त्यहेतुभूतपञ्चसंस्कारप्रथमगणितस्तापसंस्कार एव केयूरप्रार्थनापदेशेन काङ्क्ष्यते । अथ कर्णभूषणं कर्णपुष्पमिति कर्णाभरणद्वितयमपेक्ष्यते; भगवद्गुणानुभवप्रधानकशब्दराशीनाम् आचार्यवैभवप्रकाशकशब्दराशीनां च कर्णश्राव्यतासम्पादनं प्रार्थितं भवति। पादकटकप्रार्थनमन्ततोऽवतिष्ठते । जननपदवीजंघालानामस्मादृशानाम् आचार्यसन्निधान एव सततमवतिष्ठमानत्वमेव हि संसारोच्छेदकं भविष्णु । यौ पादौ गुरुवरभवनद्वारे सततं तिष्ठतः, तावेव सत्यमाभरणभूषिताविव समुल्लसतः । आचार्योदिष्टकैङ्कर्यनिर्वर्तनार्थमेव सन्ततमितस्ततस्सञ्चरणशीलत्वमेव वा पादयोर्भूषणं भवतु; तादृशभूषणभूषितत्वमपेक्ष्यत इह । सदा तवैव वरिवस्यां विरचयेमेत्यशंसा प्रकाशितेति वेदितव्यम् ॥

अथ * पीताम्बराणि च परिदधीमहीति वाससः काङ्क्षणमुच्यते । कटितटे वाससो धारणं मृगविहगादीनां प्राणिनां न भवति; अपि तु मनुष्याणामेव भवति । * ज्ञानेन हीनः पशुभिस्समानः * इत्युक्तरीत्या पशुप्रायाः स्थिता वयं वस्त्रधारणयोग्यताविरहिता अवर्तामहि ; आचार्यमणे ! भवदीयकृपयैव पशुप्रायतां विसृज्य मनुष्यभावं प्राप्तवद्भिरस्माभिः " इदानीमेवास्माकं वस्त्रधारणं युज्यते " इत्येवमनुसन्धाय आनन्दशालिभिर्भवितव्यमिति कथितं भवति । * तदनु घृतसमृद्धिभरितं दुग्धान्नं कपोणिस्रुतियोग्यं भुञ्जीमहीति यदुच्यते, तत्रेदं बोध्यम् । उपनिषदि * सोऽश्नुते सर्वान् कामान् सह, ब्रह्मणा विपश्चितेति * इति भगवद्गुणानुभूतिः अशनत्वेनोच्यते । * अहमन्नादोऽहमन्नादोऽहमन्नादः * इति भगवदनुभवः अन्नादनमाम्नायते । * अन्नं ब्रह्मेति व्यजानात् * इति ब्रह्मैव साक्षादन्नमुच्यते चोपनिषदा । तथाच निरन्तरभगवदनुभवं कलयेमहीति कथितं भवति । दुग्धान्नमिति अन्ने

उत्तमत्वकथनेन भगवदनुभवापेक्षयाऽप्युत्तुङ्गो भागवतानुभवः स्फोर्यते। अथ च घृतसमृद्धिभरितमिति विशेषणेन अन्ने अत्यन्तमतिशयितत्वकथनेन आचार्यगुणानुभवसाहित्यं तत्र स्फोर्यते। एवं च भगवद्भागवताचार्यगुणानुभवैकसततसक्तचित्ताः स्यामेति प्रार्थना फलति। अत्र * कपोणिस्रुतियोग्यं भुञ्जीमहीति यदुच्यते तत्रेदं प्रतिपत्तव्यम्; लोके पिपासितो जनः प्रपायां पानीयदानार्थमधिकृतैर्जनैः पात्रतस्सिच्यमानं सलिलम् अञ्जलितः प्रतिगृह्य पिबतीति पश्यामः। इतोऽप्यत्यन्तं पिपासितो जनः पश्चात्तिष्ठति; सतु विलम्बमसहमानस्सन् पूर्वमञ्जलितः पिबतो जनस्य कपोणिद्वारा अणुशश्च कणशश्च परिस्रवत् पानीयं स्वयमञ्जलितः पिबति; एवं क्रमशः प्रचलति। इत्थं पारम्पर्येण क्रियमाणोऽनुभव एव * कपोणिस्रुतियोग्यमित्यनेन कथितो भवतीति वेदितव्यम्। अवशिष्टं स्पष्टम्॥

तथाच एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ वैरिव्रातावलेपक्षयकर भगवन्! कृष्ण गोविन्द! सम्प्र-
त्यस्माभिर्लिप्स्यमानां बहुमतिमनघां शृण्वशेषैः प्रशस्याम्।
पाण्यंसश्रोत्रपादं महितविविधसद्भूषणैर्भूषयेथाः
क्षीरान्नं प्राशयेथा वसनमपि धरेमेति वक्त्री गतिः श्रीः॥ २७॥

इति सप्तविंशगाथाविवरणं समाप्तम्॥

---

२८. अष्टाविंशी गाथा—करवैहळ्॥

करवैहळ् पिन्शॆन्ऱु कानम् शेर्न्दुण्बोम् * अऱिवॊन्ऱुम् मिल्लादवाय्क्कुलत्तु * उन्तन्नै
पिऱवि पॆरुन्तनै पुण्णियम् यामुडैयोम् * कुऱैयॊन्ऱुमिल्लाद गोविन्दा * उन्तन्नोडु
उऱवेल् नमक्कु इङ्गॊळिक्कवॊळियादु * अऱियाद पिळ्ळैहळोमन्बिनाल् * उन्तन्नै
शिऱुपेरळैत्तनवुम् शीऱियरुळादे * इऱैवा नी ताराय् पऱैयेलोरॆम्बावाय्॥ २८॥

सर्वथा परिपूर्ण भगवन् गोविन्द! वयं तावत् गवां पृष्ठतो गत्वा काननमासाद्य भोजनशीलाः; ज्ञानगन्धवैदेशिके गोकुले असत्सजातीयतया त्वं यद्जनिष्ठाः, एवंविधं परमसुकृतं हि वयं प्राप्तवत्यः। भो स्वामिन्! त्वया साकमस्माकं वर्तमानं बान्धवमिह त्वया चास्माभिश्च न विनाशयितुं शक्यम्। ज्ञानदरिद्राभिर्बालिशाभिरस्माभिः प्रेमवशात् यदसि त्वं लघिष्ठेन नाम्ना आहूतः, तत्र भोः! कोपं मा कुरु; प्रदेहि नः पुरुषार्थं कृपया॥ (इति मूलगाथाविवर्तः।)

अधस्तात् षड्विंशगाथायां मार्गशीर्षावगाहनं प्रस्तुत्य तदर्थान्युपकरणानि प्रार्थ्य, तदनन्तरगाथायां व्रतसमाप्त्यनन्तरमधिगन्तव्यान् बहुमानविशेषान् प्रार्थयामासुर्गोप्यः; उभयोरपि गाथयोरभिलषितानि वस्तूनि पुनःपुनर्मनसि कलयन् कृष्णः "ऐहिकपुरुषार्थमुपेक्ष्य आमुष्मिकं शाश्वतिकं पुरुषार्थमर्थयन्ते गोप्य इमाः" इति स्वयमध्यवस्यत्स्म।

षड्विंशगाथायां शंखभेरीप्रभृतिवस्तुप्रार्थनं यदकारि, तत् इहलोके प्रासव्यानां वस्तूनां प्रार्थनं नैव; अपितु श्रीवैकुण्ठे दिव्ये धाम्नि मुक्तभोगावली या कथिताऽस्ति तत्प्रार्थनमेव; मुक्तात्मसु दिव्यं धाम समुपस्थितेषु सत्सु तत्र भेरीगीतकाहलशंखाशीस्स्तुतिकोलाहला भवन्ति; दिव्याप्सरसो मङ्गलदीपहस्तास्सत्यस्समायान्ति। ध्वजाश्च नानाविधास्समुद्ध्रियन्ते; वितानच्छायायां नीयन्ते मुक्तपुरुषाः; एतदपेक्षाप्रकाशनमेव षड्विंशगाथायां स्थितम्; अथ च सप्तविंशगाथायाम् दिव्याभरणदिव्यपीताम्बरादिप्रार्थनं च मुक्तभोगावलीप्रार्थनमेव; श्रूयते ह्युपनिषदि— * तं पञ्चशतान्यप्सरसां प्रतिधावन्ति—शतं मालाहस्ताः, शतमञ्जनहस्ताः, शतं चूर्णहस्ताः, शतं वासोहस्ताः, शतं भूषणहस्ताः * इति। * तं ब्रह्मालङ्कारेणालङ्कुर्वन्ति * इति च। एवञ्च अप्राकृतभोगानेव लिप्समाना इमा गोपाङ्गना अन्यापदेशेन किमपि कथयन्तीति यथायथं गृह्णन् कृष्णः प्राह गोपीः प्रति— 'अयि भोः! युष्माकमन्तरङ्गाभिसन्धिमवगच्छाम्यहं यथावत्; युष्माकमधिकारपूर्तिरस्तिचेदहं तत्प्रदाने प्रभवामि; उपायविरहितानामुपेयसिद्धिः कथमिव भवित्री? सर्वमुक्तिप्रसङ्गपरिहारार्थं मया शास्त्रेषु उपायाः केचिदनुष्ठेयतया कथितास्सन्तीति युष्माभिरपि विदितं स्यान्ननु; कीदृशोपायानुष्ठानमस्ति युष्मास्विति जिज्ञासे' इति। तदाकर्ण्य गोप्यो यद्विज्ञापयन्तिस्म तदनया गाथया निबध्यते। वस्तुतः आकिञ्चन्यमनन्यगतित्वमेव परमपुरुषार्थप्राप्तावधिकारसम्पत्; ये हि जना उपायान्तरेषु परिक्लिश्यन्ते, तान् क्षिप्रं नानुगृह्णाति भगवान्; गोपीनामासां मुखादाकिञ्चन्यमनन्यगतित्वं च श्रोतुमेव कृष्णस्यापि महती समुत्कण्ठा; अकिञ्चना वयमिति कथयन्ति वा? अन्यत्किमपि कथयन्तिवेति परीक्षार्थमेव 'युष्माकमुपायानुष्ठानं कीदृशम्?' इति पप्रच्छ; गोप्यस्तु परीक्षायामस्यां न भङ्गमवाप्नुवन्ति लेशतोऽपि; वस्तुगत्या स्वात्मनि वर्तमानमाकिञ्चन्यमनन्यगतित्वं च विज्ञाप्य अपचारक्षामणमप्यनुतिष्ठन्ति गाथयाऽनया।

कृष्णं संबोधयन्ति [सर्वथा परिपूर्ण भगवन् गोविन्द!] इति। ज्ञानशक्तिबलैश्वर्यवीर्यतेजस्समाख्यषाड्गुण्यपरिपूर्णतैव हि सर्वथा परिपूर्णता। भगवन् त्वयि सर्वज्ञत्वसर्वशक्तित्वादिगुणगणपूर्णे विराजमाने सति कास्विदस्माकं न्यूनता। अस्मदीयास्सर्वविधा अपि न्यूनताः परिहर्तुमेव खलु भवान् सर्वथा परिपूर्णो विराजते; वयमपि यदि साधनानुष्ठानपरिपूर्णा भवेम, तर्हि भवदीया परिपूर्णता नैरर्थक्यमेव हि विन्देत-इत्युक्तं भवति। * गुणतुङ्गतया तव रङ्गपते! भृशनिम्नमिमं जनमुन्नमय। यदपेक्ष्यमपेक्षितुरस्य हि तत्परिपूरणमीशितुरीश्वरता॥ * (श्रीरङ्गराजस्तवोत्तरशतके) इत्येषा श्रीपराशरभट्टार्यदिव्यसूक्तिरिहानुसन्धेया। सर्वथा परिपूर्णस्य भवतस्सर्वविधां परिपूर्तिं सार्थयितुमेव वयं सर्वथा विकलास्स्म इति कथनमेव गोपीनामिह हृदि स्थितम्। अथ कृष्णः कथयतिस्म—मम परिपूर्तिरास्तां नाम; युष्माकमुपायानुष्ठानसंपत् कीदृशीति खलु मम जिज्ञासा; सा कथ्यतां तावदिति। तत्र प्रतिवदन्ति [वयं तावत् गवां पृष्ठतो गत्वा काननमासाद्य भोजनशीलाः] इति। एतेन ज्ञानयोगकर्मयोगान्वयगन्धराहित्यं प्रोक्तं भवति। ज्ञानराहित्यसीमाभूमिभूतानां गवां पृष्ठे गच्छन्तीनामस्माकं ज्ञानप्रसक्तिः का नाम? वसिष्ठादीनां महर्षीणामनुवर्तनेन तेते ज्ञानं लभन्ते; वयं तु गवामनुवर्तने निरताः ज्ञानदरिद्रा इति किमु वक्तव्यम्? अथास्माकं प्राप्यभूमिश्च काननम्; तत्रास्माकं कृत्यं च भोजनमेव। एतेन कर्मानुष्ठानदारिद्र्यं च कथितं भवति।

भोजनकाले प्राङ्मुखत्वादिनियमोऽपि नास्ति ; उपविश्य भोक्तव्यमित्येतदपि न जानीमः। जात्याश्रयनिमित्तैरदुष्टमन्नं भोक्तव्यमित्यपि न विद्मः। हस्तलब्धं यत्किमपि वाऽन्नं स्वच्छन्दं भुञ्जानानामस्माकं कर्मनिष्ठा कीदृशीति ननु भवानेव विजानातु।

इति गोपीभिरभिहितमाकर्णितवता कृष्णेन प्रत्युक्तम् ; अयि भो गोपाङ्गनाः ; अहमपि हि गवां पृष्ठतो गच्छामि ; अहमपि हि काननमासीदयामि ; अहमपि खलु यत्किमपि लब्धमश्नामि नियतिरहितः ; ममापि न्यूनतां कथयन्तीव भवत्यः इति। तत्र गोपीभिरुक्तम्— * कश्चित्तेजोविशेषेण प्रत्यवायो न विद्यते * इति खलु महान्तो वदन्ति मुकुन्द ! ; * सर्वथा परिपूर्णेति भवन्तं संबोधितवतीनामस्माकंवाचि त्वयि न्यूनतापत्तेः प्रसक्तिलेशोऽपि नास्ति भोः ! ' केवलमस्मदीयामयोग्यतामभिदध्महे ; मा स्म भावयः किञ्चिदन्यथा ; सकलविधाऽप्यपूर्तिरस्मास्वेव वर्तते— इति। अथ कृष्णः पप्रच्छ ;— 'अयि गोप्यः ! सुकृतलवलेशवर्जिता वयमिति हि युष्माभिरुच्यते ; ईदृशीभ्यः कथमहं पुरुषार्थं प्रदातुं प्रभवेयम् ? युष्मासु यत्किञ्चिदपि वा सुकृतमस्तिचेत् किमपि वितरेयम् ' इति। अथ गोप्य आहुः— भगवन् कृष्ण ! कथमस्मासु सुकृतं नास्ति ; अस्माभिः स्वप्रयत्नबलेनोपार्जितं सुकृतं किमपि नास्त्यस्मासु इत्येव कथितमस्माभिः ; भवदीयया निर्हेतुककृपयाऽस्मासु समुत्पादितं बलवत्तरं सुकृतमस्त्येव भोः !, तदपि नास्तीति नास्माभिरुक्तमिति। अथ कृष्णोऽन्वयुङ्क्त ; ' तादृशं सुकृतमहं न जाने ; कथयत, किं तत्सुकृतम् ? ' इति। तत्रोत्तरमाचक्षते गोप्यः— [ज्ञानगन्धवैदेशिके गोकुले अस्मत्सजातीयतया त्वं यदजनिष्ठाः एवंविधं परम-सुकृतं हि वयं प्राप्तवत्यः] इति। * कृष्णं धर्मं सनातनम् * इत्युक्तरीत्या साक्षादक्षय्यसुकृतभूतं त्वां गोकुलेऽस्मिन् लब्धवतीनामस्माकं भाग्यमप्रमेयं ननु। वेदान्तेषु * सोऽन्वेष्टव्य स विजिज्ञासितव्यः * इति अन्वेष्टव्यत्वेन कथितो भवानेव खल्वस्मानन्विष्य समागत इह ; किमेतत्सुकृतं सामान्यम् ? ईदृगुत्तमोत्तमसुकृतशालिनीनामस्माक-मनुग्रहो भवतः अवर्जनीय एव खलु-इति। एतदाकर्ण्य कृष्णो मनसि मन्यतेस्म— ज्ञानदरिद्रजातौ जातानामपि गोपीनामासाम् अध्यवसायभूमा बलवानहो !, महाज्ञाननिधीनां महतामपि धियस्सुदूरगं वचः खलु वदन्त्येताः ; सत्यमेता एव परमानुग्रहपात्रतां नेतव्याः ; अथाप्यासाममृतप्रायाणि वचनानि इतोऽपि कानिचन निशमयेयम्— इति। मत्वा चैनं गोपीः प्रति वदतिस्म ;— ' गोप्यः ! व्रजेऽस्मिन्नहं जातोऽस्मीति सत्यमेतत् ; नन्दस्य यशोदा-याश्चाहं तनयस्सन्नजनिषि ; नन्दात्मजो यशोदास्तनन्धय इति मां वदन्ति नाम ; तावता युष्माकं किमायातम् ? ' इति। अथ गोप्य आहुः [त्वया साकमस्माकं वर्तमानं बान्धवमिह त्वया चास्माभिश्च न विनाशयितुं शक्यम्] इति। कृष्ण भोः ! तवात्र जननेन नन्दस्य यशोदायाश्चैव भाग्यमिति किं मन्यसे ? * अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् * इत्येतद्वचनं किं त्वया न श्रुतम् ? यशोदास्तनन्धय इति नन्दसूनुरिति च यथा त्वां वदन्ति, तथा गोपीजनवल्लभ इत्यपि व्यवहरन्त्येव खलु ; किमेष व्यवहारस्तव कर्णकुहरं कदाऽपि न प्राविशत् ? * व्रजयो-षिदपाङ्गवेधनीयं हि त्वां गुरुवराः कथयन्ति ; मातापितृत्वस्वबन्धतोऽपि भर्तृभार्याभावरूपसंबन्ध एव ज्यायानिति भोः ! किं न जानीषे ? सकलवेदबीजभूते प्रणवे तावत् उकार एव मध्यस्थस्सन् महनीयतममर्थं बोधयति। स उकारो भर्तृभार्याभावरूपमुत्तमोत्तमं संबन्धमवगमयतीति निरूपयन्ति निपुणा आचार्यवर्याः। तादृशो हि गरीयान्

संबन्धोऽस्ति नः। एष तावत्सम्बन्धस्सर्वशक्तेन त्वयाऽपि नोन्मोचयितुं शक्यः; घटप्रहारादिकर्मविशेषैः प्राकृतान् संबन्धान् क्षपयद्भिरस्मादृशैरपि जनै र्नोन्मोचयितुं शक्य इति विद्धि कृष्ण! इति।

तदिदं परमभोग्यं गोपीनां वचनमाकर्णितवान् वासुदेवः प्राह— अयि गोप्यः! गोपीजनवल्लभं मां कथयन्ति भवत्यः, तदिदमतिचारु; परमानन्दसंदोहकन्दमेवैतत्; परन्तु इदानीमेव खलु एतादृशं वचः कथयन्ति भवत्यः; असकृन्मां नारायणमेव हि कथितवत्यो भवत्यः; अनन्यसाधारणसम्बन्धविशेषविज्ञानसम्पन्नाभिर्भवतीभिः कथमिव सर्वसाधारणसम्बन्धप्रतिपादकनारायणशब्देन व्यवहृतोऽभूवमहम्? कथयत. इति। एतदाकर्ण्य गोप्यो मनसि ह्रियं भियमनुतापं च दधुः; "गोपालगोविन्दादिदिव्यनामापेक्षया नारायणनाम सत्यं लघिष्ठमेव; परत्वे जुगुप्सां प्राप्य सौलभ्यसौशील्याद्यनर्धगुणप्रकाशनार्थमेव हि भुव्यवतीर्णं भगवता; त एव हि गुणा अत्र तमोगृहे प्रदीपवदतिमात्रमुद्द्योतन्ते; तादृशगुणप्रकाशकानि गोपालगोविन्ददामोदरादिनामान्येव ज्यायांसि भवितुमर्हन्ति; नारायणनाम्नो लघीयस्त्वमेवेह ध्रुवम्; तादृशेन नाम्नाऽस्माभिः कृतं व्यवहरणमयुक्तमेव; अपचरितमेवैतत्; अपचारक्षामणमन्तरेण नान्या गतिः" इति सुदृढं प्रतिपद्यमाना स्सत्यः कृष्णसविधे क्षमामर्थयन्ते [ज्ञानदरिद्राभि-र्बालिशाभिरस्माभिः प्रेमवशाद्यदसि त्वं लघिष्ठेन नाम्नाऽऽहूतः तत्र भोः कोपं मा कुरु] इति। अर्जुनो विश्वरूप-दर्शनानन्तरम् * सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति। अजानता महिमानं तवेमं मया प्रमादात्प्रणयेन वाऽपि॥ यच्चापहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु। एकोऽथ वाऽप्यच्युत तत्समक्षं तत् क्षामये त्वामहमप्रमेयम्॥ * (गी. ११-४१.) इति क्षमाप्रार्थनां कृतवान्। स तु गोपालगोविन्दादिनामक-थनमपचारं मन्यमानस्तदर्थं क्षमां प्रार्थयतेस्म। गोप्य इमास्तु नारायणनामकथनमपचारं मन्यमानास्तदर्थं क्षमां प्रार्थयन्ते। अर्जुनस्य धिया यानि नामानि लघीयांसि गृहीतानि तान्येव नामानि आसां धिया गरीयांसि गृह्यन्त इति तदिदं वैषम्यं रसिकहृदयैकवेद्यं भवितुमलम्। परत्वे बहुमानशालिनां जनानां नारायणनाम गुरुतरं भाति। सौलभ्ये सौशील्ये च बहुमानशालिनां गोपालगोविन्ददामोदरादिनामानि गुरुतराणि भान्ति। तत एव नारायण-नामव्यवहरणमधिकृत्यात्र क्षमाप्रार्थनं युज्यतेतमाम्। मूले तावत् "लघिष्ठेन नाम्ना" इत्येतावदेवास्ति; केचिदरसिका अत्रैवं मन्यन्ते— भगवन् कृष्ण! नारायणं त्वां लघुतमैर्गोपालदामोदरादिनामभिर्यद्वयमाहूतवत्यस्स्मः तत्र क्षमाम-र्थयामहे इति गोप्यो वदन्तीति। लघीयानेषोऽर्थस्सर्वथा विस्मर्तव्यो भगवद्गुणविद्भिः। (मूले) प्रेमवशादित्यस्य अज्ञानवशादित्येवार्थः। ज्ञानादितरत् प्रेमेति हि वस्तुस्थितिः। अन्ततः * स्वामिन् प्रदेहि नः पुरुषार्थमिति विज्ञप्तिमुपसंहरन्ति। काङ्क्ष्यमाणः कोऽयं पुरुषार्थ इति स्पष्टमुपरितनगाथायां भविष्यति।

अथ स्वन्यर्थविवरणम्॥ आचार्यसार्वभौमसन्निधौ स्वकीयामयोग्यतां विज्ञाप्य शिष्याः क्षमाप्रार्थनपूर्वकं परमपुरुषार्थमर्थयन्ते। सर्वथा परिपूर्णेति संबोधनम् आचार्यस्य ज्ञानानुष्ठानपौष्कल्यं क्षमादयावात्सल्यादिगुणसमृद्धिं चाभिप्रेत्य। अथ [वयं तावत् गवां पृष्ठतो गत्वा काननमासाद्य भोजनशीलाः] इति यदुच्यते, तदिदं न केवलं वर्तमानकालिकपरिस्थितिकथनम्, किन्तु भविष्यत्कालिकपरिस्थितिप्रार्थनात्मकं च भवति। तथा हि— * ज्ञानेन

हीनः पशुभिस्समान इत्युक्तरीत्या पशुप्रायाणामज्ञानामनुसरणेन विषयभोगैकनिरता वर्तामह इदानीम्-इति वर्तमानकालिकपरिस्थितिकथनम्। अथ भविष्यत्कालिकपरिस्थितिप्रार्थनप्रकारः कथमिति चेत्; * गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दशेत्युक्तरीत्या चतुर्दशभुवनधारककामधेनुवत् चतुर्दशविद्याधारिणां महाप्राज्ञानामनुवर्तनेन बृहदारण्यकाद्यारण्यकभागेषु [उपनिषत्सु] सञ्चारशीला भूत्वा * सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्युक्तरीत्या भगवद्गुणभोगनिष्णाता भूयास्मेति॥ "काननमासाद्य" इत्येतत् मूलस्थद्राविडपदरीत्या "गानगासाद्य" इत्यपि भवितुमर्हति; * एतत्साम गायन्नास्ते * इत्याम्नातगाननिरता भवेमेति च हृदयम्।

अथ [ज्ञानगन्धवैदेशिके गोकुले अस्मत्सजातीयतया त्वं यदजनिष्ठाः एवंविधं परमसुकृतं हि वयं प्राप्तवत्यः] इति; नित्यमुक्तेष्वन्यतमः सूरिरिव हि अज्ञानतिमिरघने प्राकृतमण्डले पशुप्रायपामरजनपरिपूर्णे संसारिसजातीयता प्रादुर्बभूव; तदिदम् संसारिणामप्रमेयं खलु भागधेयम् इत्युक्तं भवति। अथ [त्वया साकमस्माकं वर्तमानं बान्धवमित्यादि।] तैत्तिरीयारण्यके * नैवं विदुषाचार्यान्तेवासिनौ। अन्योऽन्यस्मै द्रुह्याताम्। यो द्रुह्यति। भ्रश्यते स्वर्गाल्लोकात् * इत्याम्नातरीत्या आचार्यशिष्ययोर्बान्धवं परस्परमनवरतमभिरक्षणीयमित्युक्तं भवति। अथ च क्षमा प्रार्थ्यते। * उपचाराषदेशेन कृतानहरहर्मया। अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम! * इति भगवत्सविधे यथा प्रार्थ्यते तदपेक्षयाऽप्यतिशयितं प्रार्थनीयमाचार्यसन्निधौ। आचार्यविषये खल्वपचारा अधिकतया संभवन्ति; अतस्तत्सकाशे क्षमाप्रार्थनमत्यावश्यकमिति सूचितं भवति॥ २८

तथाच एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ नित्यं पृष्ठे गवां नश्चरणमशनमप्यस्ति कृत्यं मुकुन्द!
त्वामस्मिन् गोपवंशे जनिजुषमलभामह्यहो भाग्यमेतत्।
त्वत्सम्बन्धस्त्वहार्यो, जडमतिभिरिहास्माभिरुक्ता लघूक्तीः
सोढ्वाऽभीष्टं प्रदेहीत्यभिहितमवदद्दिव्यगोदा मुदे नः॥ २८॥

इत्यष्टाविंशगाथाविवरणं समाप्तम्॥

---

२९. एकोनत्रिंशी गाथा—शित्तम्शिरुकाले॥

शित्तम्शिरुकाले वन्दुन्नै चेवित्तु * उन्पोत्तामरैयडिये पोत्तुम्पोरुळ् केळाय् *
पेत्तम् मेय्त्तुण्णुम् कुलत्तिर्प्पिरन्दु * नी कुत्तेवलेङ्गळै कोळ्ळामप्पोहादु *
इत्तै प्परैकोळ्वा नन्तुकाण् गोविन्दा * एत्तैक्कुमेळेळ् पिरविक्कुम् * उन्तन्नोडु
उत्तोमेयावोमुनक्के नामाळ्शेय्वोम् * मत्तै नङ्कामङ्गळ् मात्तेलोरेम्बावाय्॥ २९॥

भगवन् गोविन्द! प्रत्यूषेऽत्र समागत्य त्वां संसेव्य त्वदीयहैमपादारविन्दमङ्गलाशासनं यद्वयं कुर्मः तत्प्रयोजनमाकर्णय भोः। गोचारणेन जीवतां कुले संजातस्त्वम् अस्मत्सकाशात् कैङ्कर्यमवश्यमेव स्वीकर्तुमर्हसि।

पुरुषार्थलाभोऽस्माकम् अस्मिन्नेकस्मिन्नेव दिने न पर्यवसितो भवति। यावदात्मभावि सर्वेष्वपि च जन्मसु त्वया साकमविनाभूता वर्तेमहि; तवैव ऐकान्तिकनित्यकिङ्कर्यो भूयास्म। अन्यथाऽभिसन्धीन् नः प्रशमय॥

(इति मूलगाथाविवर्तः।)

अधस्तनगाथायाम् अन्यास्वपि च कासुचन गाथासु पुरुषार्थप्रदानं यन्नाम मुहुः प्रस्तुतम् तद्व्याख्यानमस्यां गाथायां चारुतरं संपद्यते। स्तोत्ररत्ने * भवन्तमेवानुचरन्निरन्तरं प्रशान्तनिःशेषमनोरथान्तरः। कदाऽहमैकान्तिकनित्यकिङ्करः प्रहर्षयिष्यामि सनाथजीवितः * इति यत्पद्यरत्नं विराजते तत् अस्या एव गाथाया स्तात्पर्यसारप्रतिच्छन्दभूतमिति प्रतिपत्तव्यम्। दिव्यप्रबन्धस्यास्य श्रीपराशरभट्टार्यप्रणीतं मुखपद्यं यदस्ति * नीलस्तुंङ्गस्तनगिरितटीत्यादिकम् तत्र * पारार्थ्यं स्वं श्रुतिशतशिरस्सिद्धमध्यापयन्तीति द्वितीयः पादस्तावदिमामेव गाथां हृदि कृत्वा निबद्ध इति निध्येयम्। यावदात्मभावि सर्वदेशसर्वकालसर्वावस्थासु सहयोगेन नित्यकैङ्कर्यकरणमेवास्माभिरभिलष्यमाणः पुरुषार्थ इति विज्ञापयन्ति गोप्यः। एतदेव हि श्रुतिशतशिरस्सिद्धं पारार्थ्यम्। दिव्यप्रबन्धेऽस्मिन् प्रथमगाथायाम् "नारायण एव अस्माकमेव पुरुषार्थं प्रदास्यति" इति प्रस्तुतः पुरुषार्थ इदानीं गाथायामस्यां स्पष्टीकृतः।

इह च * हे गोविन्देति संबोधनेन, पूर्वगाथायां कृतं क्षामणं नारायणनामकीर्तनमधिकृत्यैवेति स्पष्टमवगम्यते। भवतः प्रधानप्रेमपात्रभूता गावः; ता उद्दिश्य व्रजमागतस्य भवतो वयमपि परम्परया उद्देश्या अभूम; साक्षात्प्रीतिपात्रत्वादपि परम्परया प्रीतिपात्रत्वमेव हि परमोद्देश्यं प्रतिपादयन्ति प्राज्ञपरिवृढाः। तथानाम सद्वारकप्रीतिभाजनभूतत्वेनाभ्यर्हिता वयमधुना यत् प्रार्थयामहे तदवश्यमेव फलेग्रहि कर्तव्यमिति संबोधनाभिप्रायः। अन्योऽपि कश्चिदभिप्रायः संबोधनस्य वर्णयितुं योग्यः; नित्यकैङ्कर्यमेव ह्यस्माभिरधुना पुरुषार्थतयाऽभिलष्यते; सर्वज्ञस्य भवतस्सकाशे एतदभिलाषोद्घाटनमनावश्यकमनुचितमेव च; तथाऽपि कुतः प्रार्थयामह इति चेत्; गवां चारणे व्यग्रतया व्रजमासाद्य स्वकीयं शेषित्वम् अस्मदीयं शेषत्वं च सवासनं विस्मृतवान् किल भवान्; विस्मृतोद्बोधनमावश्यकं ननु—इति। अत एव श्रीभट्टार्यैः स्वकृते मुखपद्ये * सुप्तमुद्बोध्य कृष्णं पारार्थ्यं स्वम्....अध्यापयन्ती * इति चारुतरमन्वग्राहि। विस्मृतोद्बोधनमिति न; इदम्प्रथमोद्बोधनमित्यपि तदभिप्रायः। लोके तावदुपाध्यायाः प्रत्यूषे स्वपन्तं विद्यार्थिगणमुद्बोध्य वेदमध्यापयन्तीति पश्यामः। अज्ञातज्ञापनमेव हि तत्। तद्वदेव गोपीजनोऽयमुपाध्यायस्थाने स्थित्वा नीलातुङ्गस्तनगिरितटे सुप्तं कृष्णमिममुद्बोध्य 'वेदार्थं शृणु भोः!' इति अज्ञातज्ञापनरूपमध्यापनमेव करोति। सर्वज्ञस्य भगवतः कथमिदमज्ञातं स्यात्? कथं च वा अज्ञातज्ञापनं भवेदेतत्? इति तु नाशङ्कनीयम् अनादिमायया सुप्ते संसारमण्डले सर्वे जना अहङ्कारममकारविमूढात्मानो भूत्वा भगवद्विमुखा एवासन्; स्वस्य शेषित्वमस्तीत्ययमंशो भगवताऽप्यत्यन्तं विस्मृतोऽभूत्। लोके विस्मरणं विविधम्— पादांशविस्मरणम् अर्धांशविस्मरणमित्यादिरूपेण; चिरपरिचितमपि शास्त्रं भूयिष्ठकालविप्रकर्षे सति आत्यन्तिकविस्मृतिगोचरीभूतं सत् अज्ञातादनतिरिक्तमेव भवतीति बहूनामनुभवनेद्यमेतत्; एवं भगवानपि स्वसकाशमागत्य शेषत्वानुसन्धानं कुर्वतो जनस्य सुचिराददर्शनेन स्वकीयशेषित्वे ज्ञानानुदयापरपर्यायभूतविस्मरणमविन्दत; तस्मा अज्ञातज्ञापनमधुना क्रियत इति युक्तरूपमेवैतत्। अत एव * गोविन्द! आकार्णय भोः! इति लौकिकाध्यापकवदेव कथयन्ति गोप्यः।

मूलस्थमेकैकमपि पदमवधेयम् ; [प्रत्यूषेऽत्र समागत्य त्वां संसेव्य] इति कथयन्तीनां गोपीनामयं हार्दो भावः— कृष्ण! त्वं खलु नक्तंदिवमस्मदीयानि सदनानि समागत्यास्मत्पादोपसंग्रहणपूर्वकं सामवादान् प्रेममधुरानाम्रेडयन्नासीः ; तदात्वे त्वं शेषभावे स्थितवान् ; वयं च शेषित्वाभिमानदूषिता आस्म ; स्वरूपहानिरेव खलु संपादिता तदाऽऽसीदस्माभिः ; दैवादद्य हि स्वस्वरूपसत्ता लब्धाऽस्माभिः ; अद्य प्रत्यूषे प्रबोधः, त्वत्सन्निधौसमागमनम् तव संसेवनं चेति यदिदं संघटितम् अहो भाग्यमहो भाग्यम्! इति। अथ [त्वदीयहैमपादारविन्दमङ्गलाशासनं यद्वयं कुर्मः] इति। भगवत्पादयोः सौवर्णकमलसादृश्यकथनेन उपायत्वमुपेयत्वं परमभोग्यत्वं च व्यज्यते। सुवर्णं हि केषाञ्चन जनानां धिया वस्त्वन्तरग्रहणसाधनं भवति; अन्येषां महतां धिया स्वयमाभरणादिरूपेण धार्यं वस्तु भवति। तथाच उपायत्वे उपेयत्वे च सुवर्णसाम्यं सुवचम्। अरविन्दं हि भोग्यतायां प्रसिद्धम्। एवंविधसमुत्कर्षशालिनोः पादयोर्मङ्गलाशासनात् किमन्यत् कर्तुं योग्यम्? तदेव वयं कुर्मः। तत उपरि यदुच्यते [तत्प्रयोजनमाकर्णय भोः] इति ; तत्रेयं विचिकित्सा भवति ; मङ्गलाशासनं हि स्वयंप्रयोजनम् ; यत्किञ्चित् प्रयोजनान्तरमुद्दिश्य यदि मङ्गलाशासनं क्रियते, तत्रैव मङ्गलाशासनपदाभिलप्यं भवेत् ; एवं स्थिते वस्तुतत्त्वे कथमिमाः कथयन्ति * तत्प्रयोजनमाकर्णयेति— इति। हन्त! लघीयसी सेयं विचिकित्सा। इदानीन्तनमङ्गलाशासनस्य निरन्तरमङ्गलाशासनमेव प्रयोजनमिति हि कथ्यते ; नैतावता किञ्चित् क्षतम्। यावदात्मभावि निरन्तरमेवं मङ्गलाशासनसम्पदनुवर्तितामस्माकमिति एतावदेवाशास्महे इति विज्ञापयन्ति। सहयोगः, कैङ्कर्यम्, मङ्गलाशासनम् इति पर्यायपदान्येतानि परमैकान्तिनामिति मन्तव्यम्। [अस्मत्सकाशात् कैङ्कर्यमवश्यमेव स्वीकर्तुमर्हसि] इत्येतदेव वाक्यं गोपीजनकृतपरमपुरुषार्थप्रार्थनात्मकम्। 'कृपया स्वीकुरु भगवन् परमकारुणिक!' इति वक्तव्ये 'अवश्यमेव स्वीकर्तुमर्हसि कैङ्कर्यम्' इति निर्बन्धरूपेण कथनं स्वरूपोचितं भवितुं नार्हतीति यद्यपि केचन मन्येरन् तथाऽपि न किमप्यवद्यम् ; गोपीषु वाल्लभ्यातिशयस्यापि विराजमानत्वात् तत्प्रयुक्तवाग्वैखरी न खलु वर्जनीया भवेत्। सीतादेव्यपि हि * प्रणयाच्चाभिमानाच्च परिचिक्षेप राघवम् * इत्युक्तियोग्यं किमपि बभाषे। कैङ्कर्ये स्वात्मनां स्पृहातिशयमात्रमिह सूचितं भवतीति वेदितव्यम्। एवं निर्बन्धकरणे हेतुं च स्वयमेवाचक्षते हि गोप्यः— [गोचारणेन जीवतां कुले संजातस्त्वम्] इति। न वयं श्रीवैकुण्ठमागत्य प्रार्थयामहे ; नापि दुग्धाब्धिमागत्य ; न चापि वसिष्ठादिमहर्षिनियाम्यरामावतारे समागतास्स्मः। वामदक्षिणभुजमिदामप्यजानतां क्षुल्लकानां कुले हि अस्मादृशामपि नियाम्यस्सन्नवतीर्णस्त्वम् ; एवमत्रावतरितुं को नु त्वां निर्बबन्ध? को वा समादिशत्? जघन्यजनानामपि नियाम्यो भूयासमिति महता कुतूहलेनैव खलु चोदित इहावतीर्णोऽसि ; तद्धेतुं त्वां निर्बन्धुमपि प्रभवाम इति कथयन्तीव। [अस्मत्सकाशात्] इत्यनेन स्वकीयदेहं प्रदर्शयन्ति ; पश्य हे कृष्ण! कैङ्कर्यरुचिरस्माकं देहेषु परिस्फुरति न वेत्ति ; कैङ्कर्याकरणेन परिशुष्कानस्मदीयानवयवानवेक्षस्वेति।

विज्ञापनमेतदासामाकर्णितवान् कृष्णः 'पादसंवाहने व्यजनवीजने च रुचिरिव गोपीनामासाम्' इति मन्यमानो नीलादेवीं प्राह— देवि! अन्तर्गत्वा भूयांसि व्यजनानि समानीय एकैकस्या अपि हस्ते देह्येकैकं व्यजनम् ; सर्वा अपि कामं संवीज्य तृप्यन्तु' इति। सा तु कथयामास-नाथ! नैष निदाघकालः ; सुदुस्सहशीत-

बाधाप्रचुरो ह्ययं कालः ; अधुना व्यजनानि मृग्यमाणान्यपि हन्त ! न लभ्येरन्निति । अथ कृष्णः प्रोवाच गोपीः प्रति— 'अहं तु तल्पमधिशयै ; नीलया सह सर्वा यूयमुपविशत पादमूले ; उपविश्य च यथारुचि पादसेवां कृत्वा यथागतं व्रजत' इति । तदेतन्निशम्य गोप्य आचक्षते [हेगोविन्द !] इति ; एवंविधमरासिक्यं ते किं गोपालजातौ जननादजनि ? इति पृच्छन्त्य इव गोविन्देति संबोधयन्ति । असत्सकाशात् कैङ्कर्यं स्वीकर्तव्यमित्युक्तवतीनामस्माकं हृदयमवगन्तुमशक्तो ह्यभूस्त्वं गोपजातौ जननेन— इति जहसुः ; अथ कृष्णोऽब्रवीत् युष्माभिरेवोच्यताम्, किं हृदयं युष्माकमिति । अथाहुर्गोप्यः— [पुरुषार्थलाभोऽस्माकम् अस्मिन्नेकस्मिन्नेव दिने न पर्यवसितो भवति] इति । अद्य परं व्यजनसेवां पादसंवाहनवरिवस्यां वा कृत्वा न वयं तृप्तिं विन्देमहीत्यर्थः । अथ कृष्णः पप्रच्छ— अद्य परं न ; श्वोऽपि परश्वोऽपि ; ततश्च पञ्चषदिनावधि सेवाहेवाकः किमस्ति युष्माकम् ? इति । तत्रोत्तरमाचक्षते गोप्यः— [यावदात्मभावि] इति । आत्मनस्सत्ता तु परमात्मनस्सत्तावधीति तत्त्वविदः । तथाच अविच्छिन्ननित्यकैङ्कर्यं प्रार्थयामह इत्युक्तं भवति । तदिदमाकर्ण्य कृष्णः प्राह— श्रीवैकुण्ठे नित्यमुक्तपरिषदि निविश्य नित्यकैङ्कर्यं कलयितुमभिरुचिरिव युष्माकम् ; अस्तु नाम ; तत् क्रमशो भविष्यति ; श्रूयते हि * तस्य तावदेव चिरम्. यावन्न विमोक्ष्ये. अथ सम्पत्स्ये * इति । प्रारब्धकर्मावसाने प्राप्तव्यं पुरुषार्थविशेषमधिकृत्य सम्प्रति कानाम चिन्ता ? इति । तत्रोत्तरमाहुर्गोप्यः— [सर्वेष्वपि च जन्मसु त्वया साकमविनाभूता वर्तेमहि] इति । भगवन् ! दुःखायतनं जन्म माभूदिति भवत्सकाशे बहवो भक्ताः प्रार्थयन्ते ; भवानपि गायति * त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ! * इति ; अस्माकं तु देहपरिग्रहे जुगुप्सा न मनागपि भवति भो ; पुनः पुनर्भूयांसि जन्मानि घटन्तां नाम । श्रीवैकुण्ठे भोगो गरीयानिति नास्माकं मनीषा ; "धीरसमीरे यमुनातीरे वसति वने वनमाली ; गोपीपीनपयोधरमर्दननिर्दयकरयुगशाली ; श्लिष्यति कामपि चुम्बति कामपि रमयति कामपि रामाम्, धीरसमीरे यमुनातीरे वसति वने वनमाली" इत्येवं मधुरतरगानयोग्यचरितास्सत्यो यदि तावदिहैव यमुनातटे विहर्तुं भाग्यं लभेमहि तर्हि जन्मनि को दोषः ? * पत्युः प्रजानामैश्वर्यं पशूनां वा न कामये । अहं कदम्बो भूयासं कुन्दो वा यमुनातटे ॥ * आसामहो चरणरेणुजुषामहं स्यां बृन्दावने किमपि गुल्मलतौषधीनाम् । या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥ * इति खलु तेते कामयन्ते ; अपुनरावृत्तिलक्षणमोक्षपदवीं प्रेप्सन्तो जना नास्मासु केऽपि वर्तन्ते-इति ।

[सर्वेष्वपि च जन्मसु] इत्येतत् स्वात्मनां जन्मेव भगवतोऽपि जन्म विवक्षति ; * देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी । विष्णोर्देहानुरूपां वै करोत्येषाऽऽत्मनस्तनूम् ॥ * (श्रीविष्णुपुराणे १-९-१४५.) इत्युक्तरीत्या, * अनुजनुरनुरूपरूपचेष्टेति श्रीरङ्गराजस्तवोक्तरीत्या च भगवतो जन्मसुजन्मसु स्वात्मभिरपि जनितव्यम् इति तावदासामभिलाषः । [त्वया साकमविनाभूता वर्तेमहि] राघवत्वे यद्यपि सीता समजनि, तस्याश्चरितं विश्लेषमयं हि वीक्ष्यते ; मा नाम तथा भूदस्माकम् ; देहिनि देह इव, कारणे विकृतय इव, द्रव्ये जातिगुणकर्माणीव च पृथक्स्थित्युपलम्भयोग्यताविरहिता भूयास्मेत्याशंसनमासामिहावसेयम् । दशरथकौसल्याभरतादिवत् वसुदेवदेवक्यादिवच्च विश्लेषदुःखं न मात्रयाऽपि वयमनुभवितुमर्हामः । अथ च कथयन्ति [तवैव

ऐकान्तिकनित्यकिङ्कर्यो भूयास्म] इति। कर्माधीनसेव्यान्तरनिवृत्तिव्यञ्जनार्थम् पुनरपि * तवैवेति कथनम्। एकस्मिन्नेव नियतत्वम् ऐकान्तिकत्वम्; दिव्यमहिषीपरिजनसनाथस्यापि भगवत एकत्वमनपायम्। * कुरुष्व मामनुचरम् * भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते। अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते॥ * तवानुभूतिसंभूतप्रीतिकारितदासताम्। देहि मे कृपया देव! न जाने गतिमन्यथा॥ सर्वावस्थोचिताशेषशेषतैकरतिस्तव। भवेयं पुण्डरीकाक्ष! त्वमेवैवं कुरुष्व माम्॥ * इत्यादिरीत्या कैङ्कर्यप्रार्थनायास्तन्मनोरथाभिवर्धनस्य च परमोद्देश्यत्वमिहानुसन्धेयम्।

इतश्चोपरि [अन्यथाऽभिसन्धीन् नः प्रशमय] इति प्रार्थनायाम् अत्युत्तुङ्गः साम्प्रदायिकार्थविशेषो गर्भितः; तथा हि; श्रीमदष्टाक्षरमहामन्त्रमध्यवर्तिना नमःपदेन * मन्त्रब्रह्मणि मध्यमेन नमसा पुंसः स्वरूपं गतिर्गम्यं शिक्षितमीक्षितेन पुरतः पश्चादपि स्थानतः * इत्यष्टश्लोक्युक्तप्रक्रियया स्वरूपशोधनम् उपायशोधनम् उपेयशोधनं च क्रियते; स्वरूपशोधनमुपायशोधनं च आस्तां नाम; उपेयशोधनं प्रकृते भृशमवधेयम्; उपेयं नाम फलम्; फलांशे शोधनं नाम किमिति चेदवधीयताम्; फलानुभवकाले आनन्दस्त्ववश्यमेव भवेत; तस्य चानन्दस्य स्वात्मनि न योग्यमनुसन्धानम्; चन्द्रिकापवनपाटीरकुसुमादिकं परेषां भोगाय कल्पमानं सत् परानेव प्रहर्षयति, न पुनर्मात्रयाऽपि स्वयं प्रहृष्यति; तथा चेतनेनापि स्वयं हर्षशालिना न भवितुं योग्यम्; स्वकार्यनिष्पत्तौ सत्यां हि स्वेन संतुष्टेन भवितव्यम्; परमात्मना हि स्वकीयं वस्तु महता प्रयासेन लब्धम्; यस्य लाभोऽभूत्तेनैव हि सन्तुष्टेन भवितव्यम्; * अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम्। कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह॥ * इति श्रीरामायणश्लोकरत्नप्रकाशितश्चायमर्थः। भगवद्यामुनमुनीन्द्रोऽपि स्वकीये स्तोत्ररत्ने * कदाऽहमैकान्तिकनित्यकिङ्करः प्रहर्षयिष्यामि सनाथजीवितः * इत्यनुजग्राह; अत्र 'अहं नित्यकिङ्करस्सन् कदा प्रहृष्येयम्' इति वक्तव्ये तथाऽनभिधाय "भवन्तं कदा प्रहर्षयिष्यामि" इत्यभिहितमवधेयम्। अत्र भाष्ये वेदान्तसूरिराह—"[प्रहर्षयिष्यामि] त्वद्दासभूतस्य मे त्वत्प्रहर्ष एव प्रधानं प्रयोजनमिति भावः; एवम् स्वाधीनस्वार्थकर्तृत्वभोक्तृत्वभ्रमरहितकैङ्कर्यप्रार्थना कृता भवति." इति। तथाच फलांशे स्वभोक्तृत्वधीप्रहाणमेव उपेयशोधनमिति निष्पन्नम्; तदिदं द्वयाख्ये मन्त्ररत्ने उत्तरखण्डचरमपदभूतेन नमसा निष्कृष्यत इति रहस्यविदः। एतदेवात्र प्रतिबोध्यते "अन्यथाऽभिसन्धीन् नः प्रशमय" इत्यनेन।

ननु, चन्द्रिकाचन्दनपवनकुसुमादिदृष्टान्तप्रदर्शनेन साध्यमानोऽयमर्थश्चेतनेषु न संभवितुमर्हति; अचेतनानां वस्तूनामानन्दभाक्त्वयोग्यताविरहात् आनन्दितृत्वं नोपपद्यते; ज्ञानानन्दघनस्य चेतनस्य आनन्दितृत्वं कथं नु न संभवेत्? अवर्जनीयं हि तत्— इतिचेदत्र श्रूयताम्। चेतनस्य सर्वथाऽप्यानन्दितृत्वं नेति न तावदुच्यते; * रसो वै सः; रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति * इति मुक्तात्मन आनन्दवत्त्वं स्फुटमाम्नात्युपनिषदपि। स्वानुभवेन भगवन्तमानन्दानुभवशालिनमवलोक्य 'अल्पस्य मम लाभेन अवाप्तसमस्तकामस्य भगवत एतावान् महानन्दः खलु जातः!' इत्यनुसन्दधानश्चेतनः भगवदनुभूयमानानन्दजनितमानन्दमनुभवत्येव; एष एवानन्दस-

35

त्यमवर्जनीयश्चेतनस्य ; एष स्वरूपविरोधी नोच्यते। यत्रयत्र चेतनस्यानन्दशालित्वमुच्यते, नियमेन तत्रतत्र भगवदनुभूयमानानन्ददर्शनजन्यानन्दवत्त्वरूपमेव तदवगन्तव्यमिति रस्यं रहस्यम्। * कृतार्थोऽहं भविष्यामीत्यादिकतिपयवचनानां नयनमप्यनया दिशा सुगमम् ॥

अथ ध्वन्यर्थविवरणम् ॥ अन्तेवासी जनः स्वाचार्यमुपसंगम्य स्वां विज्ञप्तिमुपसंहरति। गोविन्देति संबोधनं भगवतीव गुरुवरेऽपि संघटत इति विवृतचरमेवैतत् ॥ एतावता कालेन अज्ञानतिमिरसान्द्रभाववशात् प्रबोधानुदयेन गुरुचरणसन्निधानमागन्तुमवकाशो न जघटे ; अधुनैवान्धं तमो विनष्टम् ; प्रबोधोन्मेषस्समजनि ; अथ इहागतास्स्मः। * तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवयेति गीतोक्तप्रकारेण तत्रभवन्तं सेवितवन्तः स्मः। अच्युतपदाम्बुजयुग्मे रुक्मव्यामोहो नास्ति तावदस्माकम् ; सर्वविधोऽपि व्यामोहस्सत्यमस्माकं भवत्पादारविन्दद्वन्द्वे परम्। * शीरारुमेदिराशर्तिरुवडिहळ् वाळि * शेय्यतामरैत्ताळिणै वाळिये * इति भवत्पादारविन्दद्वन्द्वमङ्गलाशासनमेवास्माकं नित्यंकृत्यम्। अज्ञानिनां संसारिणामस्मादृशां मध्ये समवतीर्णस्तत्रभवान् अवश्यमेवास्मदीयानि वरिवस्यनानि स्वीकर्तुमर्हति। विद्याग्रहणपर्यन्तमेव कैङ्कर्यानुष्ठानमिति, नदीनिस्तरणानन्तरं प्लवपरित्यागवत् परस्तात् कैङ्कर्यप्रहाणमिति च नास्माकं मतम् ; * अत्र परत्र चापि नित्यं यदीयचरणौ शरणं मदीयम् * इति स्तोत्ररत्नानुगृहीतरीत्या अत्र च परत्र च भवच्चरणैकशरणा वयम्। संसारिचेतनोज्जीवनार्थं यदायदा श्रीवैकुण्ठाद्भवानवतरिष्यति भगवन्नियोगतः, तदातदा वयमपि नियमेन * येनयेन धाता गच्छति तेनतेन सह गच्छतीतिन्यायेन भवदनुचरा भूयास्म ; सर्वथाऽपि भवदविनाभाव एवास्माभिरभिलष्यते ; तत्रभवति मनुष्यतुल्यताधियं भगवत्तुल्यताधियं च नः प्रणाश्य भगवतोऽप्यभ्यधिकत्वधियं प्रतिष्ठापय परमकृपया— इति सप्रश्रयमभ्यर्थ्य विज्ञापनामुपसंजहुः श्रीवचनभूषणदिव्यशास्त्रशिक्षितशिष्यलक्षणसंपन्ना इति सारनिष्कर्षः ॥

तथाच एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो ॥ प्रत्यूषेऽत्रागताभिस्तव चरणयुगं सेवमानाभिराभिः
गोपीभिः कथ्यमानं निशमय भगवन् कृष्ण, गोपालवंशे।
जातस्त्वं नित्यसेवां वितर, सकलजन्मस्वपि स्याम नित्यं
युक्ता इत्यूचिरे ता इति कथितवती मे मनस्यस्तु गोदा ॥ २९ ॥

इत्येकोनत्रिंशगाथाविवरणं समाप्तम् ॥

३०. त्रिंशी गाथा—वङ्गक्कडल् कडैन्द ॥

वङ्गक्कडल् कडैन्द माद्दवनै केशवनै * तिङ्गळ् तिरुमुहत्तु चेयिळैयार्शेन्निरैञ्जि *
अङ्गप्परै कोण्डवात्तै * अणि पुदुवै प्पैङ्कमल तण्डेरियल् पट्टर्पिरान् कोदैशोन्न *
शङ्गत्तमिळ् मालै मुप्पदुम् तप्पामे * इङ्गिप्परिशुरैप्पा रीरिरण्डु माल्वरैत्तोळ् *
शेङ्कण् तिरुमुहत्तु चेल्वत्तिरुमालाल् * एङ्गुम् तिरुवरुळ् पेत्तिन्बुरुवरेम्बावाय् ॥ ३० ॥

नौकापरीतम् (अथ वा) वीचिमालासंकुलम् पयोनिधिं मथितवन्तं माधवं केशवं भगवन्तं तुहिनकिरणसदृश-वदनाः सकलाभरणसमलङ्कृता गोप्यः प्रणिपत्य पुरा पुरुषार्थमलभन्तेत्यमुं विषयमधिकृत्य, जगदाभरण भूत– श्रीधन्विनव्यपुराधीशस्य नलिनाक्षमालाविभूषितवक्षसश्च श्रीभट्टनाथमुनेः (अभिमानपात्रभूतया) गोदया कीर्तिता भागवतैवृन्दशोऽनुभाव्या द्राविडवाङ्मयीस्त्रिंशद्दिमा गाथा अस्खालित्येन क्षितितल इह भावबन्धेन सह ये तावदधीयते ते पृथुतरशिखरिनिभद्वियुगभुजशालिनः पद्माक्षस्य सौम्यमुखस्य लक्ष्मीपतेर्दिव्यकरुणाम् अत्रामुत्र च समासाद्य ब्रह्मानन्दशालिनो विराजेरन् ॥ (इति फलकीर्तनेन समापितोऽयं दिव्यप्रबन्धः ।)

औपनिषदसकलार्थसंभृतस्सोऽयं दिव्यप्रबन्धः परिसमाप्तिमुपैति ।

अधस्तनगाथायाम्— भगवतः कृष्णस्य सकाशे गोप्यो नित्यनिरवद्यकैङ्कर्यमेव स्वाभिलषितपुरुषार्थत्वेन विज्ञापयामासुः । अथ भगवान् परमकारुणिकः ओमित्यभ्युपगतवानिति गाथयाऽनया व्यज्यते । कस्तत्र संदेहः ? भक्तजनपरतन्त्रो भगवान् अर्थितार्थपरिदानदीक्षितः खलु । गीतां समग्रां श्रुतवान् पार्थः * स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तवेति यथा कथयामास, तथा गोपिकागीतामिमां श्रुतवान् कृष्णोऽपि * करिष्ये वचनं वः इत्यनुक्त्वा किमन्यद्वक्ष्यति ? शिरःकम्पनेन मुखविकासप्रकाशनेन मन्दस्मितोदञ्चनेन गभीरतरकण्ठनादप्रपञ्चनेन च तथाऽस्त्वित्यभ्युपगममाविश्चकार । ततश्च परमानन्दसंदोहकन्दलितस्वान्ता गोप्यः कृतकृत्या नित्यकैङ्कर्यनिरताः प्रमोदन्ते । स चायं विषयः कथमस्मादृशैरवगन्तुमर्हो भवेद्गोदादेवीदिव्यानुग्रहादृते । सैव गोदादेवी स्वकीयेन निरवग्रहेणानुग्रहेण गोपीचर्यानुकरणापदेशेन तमाविष्कृतवती । स एष दिव्यप्रबन्धः सकलार्थपुष्टिमूम्ना स्वाध्येतृज-नान् लक्ष्मीनाथदिव्यकरुणापात्रभूतानाकलयितुं क्षम इति निरतिशयफलप्रदत्वरूपमप्रतिमवैभवं प्रबन्धस्यास्य प्रतिपाद्यते गाथयाऽनया ।

अथ गाथायामवतराम । गोप्यो गोविन्दं प्रणिपत्य पुरुषार्थमलभन्तेति तावद्वक्तव्यम् ; न तथोक्तम् ; अपितु 'पयोनिधिं मथितवन्तं भगवन्तं प्रणिपत्य पुरुषार्थमलभन्ते' ति कथ्यते ; किमित्येवमुच्यत इति चेत् अवधे-यम् ; पुरा भगवान् अमरेभ्यः अमृतं प्रदित्सुरिव जलधिं ममन्थ ; जलधिमथनस्य पारमार्थिकमुद्देश्यं तु कमलालाभ एव ; यदाहुर्भट्टार्याः श्रीरङ्गराजस्तवे— * उन्मूल्याहर मन्दराद्रिमहिना तं संवधानामुना दोर्भिश्चञ्चलमालिकैश्च दधिनिर्माथं मथानाम्बुधिम् । श्रीरङ्गेश्वर ! चन्द्रकौस्तुभसुधापूर्वं गृहाणेति ते कुर्वाणस्य फलेग्रहिर्हि कमलालाभेन सर्वः श्रमः * इति ; तथाच तदात्वे कमलालाभेन भगवतो मुखारविन्दे यावान् हर्षप्रकर्षः परिस्फुरतिस्म तावान्

ततोऽप्यधिकश्च स इदानीं कृष्णस्य मुखे विललास ; तदनुसन्धानेन जलधिमथनवृत्तान्तोऽधुना प्रस्तूयते । अथ वा, प्रयोजनान्तरपराणां पामराणामप्यमराणां कृते स्वदिव्यमङ्गलविग्रहपरिक्लेशनरूपं परिश्रममनुभूय मनोरथसिद्धिसंपादको भगवान् अनन्यप्रयोजनानामासां गोपीनां मनोरथप्रपूरक इति किमु वक्तव्यम् ? इत्याशयो वाऽत्र गम्यः । मथितस्य पयोनिधेर्विशेषणं यदस्ति मूले (द्राविडवाचि) तदुभयविधमनुवादं सहते— नौकापरीतम् इति, वीचिमालासंकुलम् इति च । वीचिमालासंकुलत्वे न किमपि चोद्यमवतरेत् ; नौकापरीतत्वकथने तु— किं भगवत्कृतमथनकर्मीभूते कलशजलधावपि तरणिसञ्चार आसीदिति केचिदाशङ्कन्ते ; अत्र ब्रूमः । नौकायन्त्रं नवीनतया समुत्पन्नमिति न मन्तव्यम् ; * नावेव यान्तमुभये हवन्ते * इतितावद्वेदेऽप्यधीमहे । श्रीरामायणे वैदेहीवचनं च प्रथितम्— * पतिसंयोगसुलभं वयो दृष्ट्वा च मे पिता । चिन्तार्णवगतः पारं नाससादाप्लवो यथा ॥ * इति । अस्तु ; क्षीराब्धौ तरणिर्नैवेत्यभ्युपगच्छेम । तत्सद्भावाभ्युपगमेऽपि प्रकृते तत्सत्ताकथनं कस्मा उपयोगाय कल्पते ? इति पृच्छा तु बलवती स्यात् ; सत्यमेतदवश्यं प्रष्टव्यम् । उच्यते । द्राविडशास्त्रमर्यादा काचन वर्तते, प्रतिपाद्यमानानां विशेषणानां प्रकृतविशेष्ये सत्तानियमो नास्ति ; विशेष्यजातौ सत्तामात्रमादाय विशेषणप्रयोगो द्राविडकवीनां समये वर्तते । गजेन्द्ररक्षाचरितमाचक्षाणो भूतयोगी (* तोडरेडुत्त माल् यानै * इति) गजेन्द्रं शृङ्खलाबन्धयुक्तत्वविशेषणेन विशिनष्टि ; वस्तुतः परमभक्ते गजराजे निगलबद्धत्वविरहेऽपि गजजातौ योग्यमिदं विशेषणमित्येतावतैव हेतुना भक्तगजेन्द्रे प्रयुज्यते । एवं भूयिष्ठमुदाहर्तव्यमस्ति । सैव प्रक्रियाऽत्र बोद्धव्या । समुद्रे तरणिसंबन्धो निरपाय इत्येतावदेवालं विशेषणतायै । द्राविडशास्त्रमर्यादानुसारेणैतदुक्तमस्माभिः ; अथ पूर्वाचार्यसंप्रदायानुरोधेनोच्यते ; इयमेव गोदादेवी स्वकीयद्वितीयदिव्यप्रबन्धे (गोदासूक्ते) पञ्चमदशके चतुर्थगाथायामाचष्टे " व्यसनार्णवान्तर्निमज्ज्य वैकुण्ठनाथाभिधानं पोतमलभमाना दूये " इति । एतेन भगवत एव तरणित्वमभिप्रेतम् । तथाच, भगवान् स्वाधिष्ठितमर्णवं स्वस्थानमित्यप्यविगणय्य भक्तजनप्रेमभूम्ना मथितवानित्युक्तं भवति ।

अथ गोप्यो विशेष्यन्ते [तुहिनकिरणसदृशवदनाः सकलाभरणसमलंकृताः] इति । इदमवधेयमिह ; प्रबन्धेऽस्मिन् प्रथमगाथायाम् " सूर्यचन्द्रोपममुखशाली " इति भगवान् विशेषितोऽभूत् ; चरमगाथायामस्यां चन्द्रोपममुखशालिन्यः कथ्यन्ते गोप्यः । सूर्योपममुखशालित्वं ललनासु न संभवितुमर्हतीति न तदुक्तिः । तदास्ताम् । उपनिषदि * तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति * इत्याम्नातत्वात् भगवान् भक्तेभ्यः स्वसाम्यं प्रददातीति लभ्यते । तदेवात्र सूचितं भवति । चन्द्रोपममुखशाली मुकुन्दः स्वसंसेविनीर्गोपीरपि चन्द्रोपममुखशालिनीः कृतवानिति व्यञ्जनेन परमसाम्यश्रुतिलक्ष्यतां प्रापुर्गोपाङ्गना इति लम्भितं भवति । अथ * सकलाभरणसंभृता इति द्वितीयविशेषणम् अधस्तात्सप्तविंशगाथायाम् आभरणलिप्सां विज्ञापितवतीभिर्वल्लवीभिः यथाप्रार्थनमाभरणालंक्रिया समुपलब्धेति सूचनाय । एतावता गोपीनां कृतकृत्यत्वं फलेग्रहिमनोरथत्वं च कथितमासीत् । अथ इमं विषयमधिकृत्य प्रबन्धं प्रणीतवती गोदादेवीति कथ्यते । वेदे आप्त्यतिशयद्योतनार्थम् * स होवाच व्यासः पाराशर्यः * यद्वै किञ्च मनुरवदत्तद्भेषजम् * इत्येवमेवं कतिपये महर्षयः प्रस्तूयन्ते ; एवमेव दिव्यप्रबन्धेष्वपि परिग्रहातिशयसिद्धये आप्तप्रणीतत्वद्योतनार्थमेव केचन दिव्यसूरयः स्वनामोट्टङ्कनं कुर्वन्ति । गोदादेव्यपि तथाऽत्र ।

सीतादेवी यथा जनकचक्रवर्तिना पुत्रीत्वेनाभिमताऽभूत्तथा सेयं गोदादेव्यपि श्रीविष्णुचित्ताख्येन भट्टनाथ-मुनीन्द्रेण दुहितृत्वेन स्वीकृताऽभूदिति प्रोक्तचरमेतत्। स मुनीन्द्रस्तु गोदामिमां पुत्रीत्वेनाभिमेने; गोदा तु तं मुनिवरम् आचार्यपदव्यामेव निधत्तेस्मेति अस्या एव सूक्तिभिरवधार्यते। तस्यैव महाचार्यस्य सम्बन्धभूम्ना भगवत्कृपापात्रता स्वस्य समजनीत्यध्यवसायगरिम्णा सेयं गोदा स्वनामनिर्देशस्थलेषु नियमेन (स्वस्य पितरमाचार्यं च) तमपि मुनीन्द्रं प्रस्तौति। तस्य पुत्रीति स्वात्मानं न निर्दिशति; अपि तु तत्सम्बन्धशालिनीत्येतावदेव व्याहरति; अत्रापि तथैव। "भट्टनाथमुनेर्गोदा— विष्णुचित्तमुनेर्गोदा" इत्येव नियतं निर्दिशति स्वात्मानम्। संबन्धसामान्ये हि षष्ठी; प्रकृते विवक्षितसम्बन्धस्तावदाचार्यशिष्यभाव एवेति स्वयमेव तत्रतत्र व्यञ्जितवती। अत एव ह्यस्याः प्रबन्धेऽस्मिन् आचार्यप्रभावस्यैव प्राधान्यं ध्वन्यर्थप्रणाल्या विशदीकृतमस्माभिः।

आचार्यभूतस्स भट्टनाथमुनीन्द्रो विशेषणद्वितयेन विशेष्यते; जगदाभरणभूत श्रीधन्विनव्यपुराधीशत्वं प्रथमविशेषणम्। श्रीविल्लिपुत्तूरितिद्राविडभाषानामधेयम् संस्कृते श्रीधन्विनव्यपुरमिति व्यवह्रियते। तदेतत् क्षेत्ररत्नं जगदाभरणभूतमिति यदुच्यते तत्तथ्यमतितराम्। लोके केचन दिव्यदेशा भगवद्वैभवेन भासेरन्; अपरे केचन लक्ष्मीवैभवेन; इतरे केचन आचार्यवैभवेन। भगवान् लक्ष्मीराचार्य इति त्रयाणामपि समरूपेण वैभवेन भासमानो दिव्यदेशः प्रकृतदिव्यदेशादन्यो न कोऽपि सुवचः। अत्र हि भगवतो वटपत्रशायिनो वैभवमप्रमेयम्। लक्ष्म्यंशभूताया गोदादेव्या महिमा सुमहान्। आचार्यशेखरस्य भट्टनाथयोगिवरस्य अवतारस्थलत्वप्रयुक्तः प्रभावातिशयश्च प्रकृष्टः। एवंविधविलक्षणवैभवनिधेरस्य दिव्यदेशस्य जगदाभरणत्वरूपविशेषणमेव युक्तरूपम्। मुनीन्द्रोऽसौ क्षेत्रस्यास्य कथमधीश इति चेत्; अत्रत्यानां सर्वेषामपि श्रीवैष्णवानां द्विजन्मनां च नान्यः कोऽपि निर्वाहक इत्यतः। अथ द्वितीयं विशेषणम् * नलिनाक्षमालाविभूषितवक्षस इति। * ये कण्ठलग्नतुलसीनलिनाक्षमाला ये बाहुमूलपरिचिह्नितशङ्खचक्राः। ये वा ललाटफलके लसदूर्ध्वपुण्ड्रास्ते वैष्णवा भुवनमाशु पवित्रयन्ति॥ * इत्युक्तप्रकारेण प्रसिद्धैः श्रीवैष्णवलाञ्छनविशेषैस्सर्वैरपि विभूषितदिव्यगात्रो ह्ययं सूरिवरः। नलिनाक्षमालायाः कथनम् तुलसीकास्रजोऽप्युपलक्षणं मन्तव्यम्। श्रीवरवरमुनिवर्यदिनचर्यायामपि * अम्भोजबीजमालाभिरभिजातभुजान्तरम् * इत्युपवर्णितमिहानुसन्धेयम्।

एवंविधमहामहिमशालिनो भट्टनाथमुनीन्द्रस्य अभिमानपात्रभूतया गोदादेव्या कीर्तितोऽयं दिव्यप्रबन्धो विशेषणत्रयेण विशेष्यते— १. भागवतैः संघशोऽनुभाव्यत्वम्; २. द्राविडवाङ्मयत्वम्; ३. पुष्पमालारूपत्वम्— इति। यत्र भागवताः संघीभवन्ति तत्र ते गोदाप्रबन्धमेव समाद्रियन्ते; यत्र गोदाप्रबन्धस्समाद्रियते तत्र भागवताः क्षणमात्रे संघशस्संमिलन्ति. इति तावद्विवक्षितम्। इतरेषां केषाञ्चन प्रबन्धानामनुभवे उपक्रान्ते संघशो निषण्णा अपि क्रमशो विरलविरला भवेयुः; गोदाप्रबन्धमनुभोक्तुं द्वित्रा निषण्णा अपि क्रमेण ते सहस्राधिका भवेयुः; गोष्ठी तथा नाम विवर्धेत; इममंशं पुरस्तादेव प्रतीचा हृदयेन साक्षात्कृतवती गोदादेवी सत्यमाह * भागवतैस्संघशोऽनुभाव्या इति। अथ द्वितीयं विशेषणम् द्राविडवाङ्मयत्वम्। संस्कृतभाषया ये ग्रन्थं लिखन्ति,

ते 'अस्माभिरयं ग्रन्थः संस्कृतभाषया लिखितः' इति न तावद्विलिखन्ति; भाषा तु स्वत एव स्पष्टीभवतीति नास्त्यावश्यकता तत्सूचनस्य। अथाप्यत्र द्राविडभाषामयत्वनिर्देशः कुतः कृत इति चेत् श्रूयताम्; भारतयुद्धकाले पार्थः शकुनिं प्रति कथयति * न द्यूतमेतत्कितव! क्रीडनं निशितैश्शरैः * इति; किमेतद्व्यक्तव्यं वचः? किमिदमज्ञातज्ञापनम्। न। सम्यग्विज्ञातस्यापि समुद्बोधनं फलविशेषं प्रजनयत्येव। द्राविडभाषामयोऽयं दिव्यप्रबन्ध इति सर्वविज्ञातस्याप्यंशस्य समुद्घट्टनम्— माधुर्यातिशयप्रतिबोधनार्थमिति प्रतिपत्तव्यम्। वस्तुतो द्राविडभाषाया अतिमात्रमाधुर्यमनुभवरसिकहृदयैकवेद्यमित्यलम्।

अथ च दिव्यप्रबन्धस्यास्य पुष्पमालारूपत्वं मूले प्रोक्तम्। मालिका यथा भगवता भागवतैश्च शिरसा धार्यते तथा स एष प्रबन्धोऽप्यवतंसपदे निधातव्य इति सूचितं भवति। गोदादेवी पुष्पमालां सृष्ट्वा भगवते प्रादात्, पद्यमालां सृष्ट्वा भागवतेभ्यः प्रादात्। पुष्पमालां भगवान् शिरसाऽधारयत्। पद्यमालां भागवताः शिरसा धारयन्ति। न केवलं शिरसा; मनसा, वचसा च।

तामिमा अथ [त्रिंशदिमा गाथा अस्खालित्येन क्षितितल इह भावबन्धेन सह ये तावदधीयते] इति॥ अष्टाक्षरादिवत् अतिसंक्षिप्तं न; गीतादिवदतिविस्तृतमपि न; सकलसारार्थभरितत्रिंशद्गाथात्मना निबद्धोऽयं दिव्यप्रबन्ध इति सुमहत्त्वं द्योत्यते। अत्र नैकाऽपि गाथा त्यक्तव्या भवति। अनर्घत्रिंशद्रत्नखचिते हारे एकरत्नशून्ये सत्यपि तस्य वीतशोभत्वं यथा भवति, तथा त्रिंशद्गाथात्मकेऽस्मिन् दिव्यप्रबन्धे एकस्यां गाथायां परित्यक्तायामपि

प्र सदर्थजीवातूनां सतां महती हानिर्भवेन्नाम। तदिदं गोदादेवी स्वयमेव विदित्वा त्रिंशदपि गाथा अस्खालित्येनानुभोक्तव्या इति समादिशतीव। अस्खालित्यं नाम— एकस्या अपि गाथाया अवर्जनमिव, वर्णपदवाक्यादिभ्रंशराहित्यं च। शब्दोच्चारणकाले संभावितानां स्खालित्यानां सर्वथा वर्जनमनुशास्ति गोदादेवीति प्रतिपद्य भृशमवहितैर्भवितव्यं भक्तैः। * इह क्षितितल इति कथनेन श्रीवैकुण्ठेऽपि दिव्यसूक्तीनामासां गानमस्तीति सूचितं भवति। शुष्कहृदयैर्न वक्तव्यमिति स्फोरणाय * भावबन्धेन सहेति कथ्यते। गोपीनां भावबन्धो यथा गोदाया समजनि, तथा भक्तानामपि स भूयादित्याशंसा गम्यते। * ये तावदिति कथनेन— श्रद्धालवस्सर्वेऽपि जनिधर्माण एतत्कथनाधिकारिण इति द्योतितं भवति। अथ तेषां यद्भविष्यति श्रेयः तदुदीर्यते [ते पृथुतरशिखरिनिभद्वियुगभुजशालिन इत्यादिना।] दृष्टादृष्टविषयेषु सर्वत्र भगवत्करुणापात्रभूतास्सन्तो महानन्दभागिनस्स्युस्ते इति यावत्॥ अथ, एतद्दिव्यप्रबन्धाध्येतृषु भक्तेषु कृपां प्रदर्शयिष्यन् भगवान् चतुर्भुज इति, सरसिजाक्ष इति, लक्ष्मीपतिरिति च विशेष्यते। * चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः * इत्युक्तरीत्या यथाधिकारं चतुर्विधपुरुषार्थप्रदानोत्सुको भवेदिति द्योतनाय चतुर्भुजत्वोक्तिः। कटाक्षवीक्षणेन तान् पुनीयादिति द्योतनाय पद्माक्षत्वोक्तिः। उत्तरोत्तरमनवधिकातिशयश्रेयःप्रापणोत्कण्ठितत्वद्योतनाय सौम्यमुखत्वोक्तिः। निग्रहहेतुसत्त्वेऽपि अनुग्रहैकसक्तचित्तत्वद्योतनाय लक्ष्मीपतित्वोक्तिरिति सर्वं समञ्जसम्॥

गाथायामस्यां ध्वन्यर्थविवरणावश्यकत्वाधिक्यविरहेऽपि उपक्रमे कतिपयवाक्यानां तदावश्यकता वर्तते। भगवतस्सन्निधौ गोप्यः प्रणिपत्य पुरुषार्थसिद्धिमलभन्तेत्यन्यापदेशः। आचार्यसन्निधावन्तेवासिनः प्रणिपत्य स्वसमी-

हितसिद्धिमलभन्तेति तु स्वापदेशः। भगवान् यथा जलधिमथनमकार्षीत्तथा गुरुवरोऽपि। कथमिति चेत्; * मतिमन्थानमाविध्य येनासौ श्रुतिसागरात् * इत्युक्तप्रक्रियया सोपबृंहणोभयवेदान्तसागरमथनप्रवीणो ह्याचार्यवर्यः। भगवांस्तु जलधिमथनेनोद्धृतममृताभासं प्रयोजनान्तरपरेभ्यस्सुरेभ्यः सकृत् प्रादात्। आचार्यस्तु उभयवेदान्तसिन्धुमथनसमुद्धृतं वस्तुतोऽमृतत्वप्रापकं दिव्यार्थामृतम् अनन्यप्रयोजनेभ्यः परमभक्तेभ्यो भूसुरेभ्य आचन्द्रार्कमसकृत्प्रयच्छति। जलधिमथनेन श्रियं लेभे भगवान्; आचार्यस्तु श्रीवैष्णवश्रियम्। एवमादयो विशेषा उन्नेयाः। माधवमिति संस्कृतपदस्य मूलभूतं द्राविडपदं तु (मूलस्थम्) महातापसमित्यप्यनुवादं सहते। * तपस्स्वाध्यायनिरतं तपस्वीत्यादावनुसन्धीयमाना अर्थविशेषा अत्राप्यनुसन्धानार्हा इति दिक्॥ केशिनामकवाजिवधकर्तृत्वेन भगवान् केशवः प्रथितः; आचार्योऽपि इन्द्रियरूपहयदौष्ट्यहननकर्तृत्वेन केशवप्रथां प्राप्तुमर्ह इति वेदितव्यम्। अथ गोपीस्थानीयशिष्यविषये चन्द्राननत्वं सकलाभरणसमलंकृतत्वं च सूपपन्नम्। आचार्योपदिष्टशिशिरार्थपुञ्जलाभेन तत्प्रवचनेन च शिशिरमुखो हि शिष्यः। शमदमादिभिस्सकलैरात्मालङ्कारैरलंकृतश्चेति॥ एवम्भूतत्वमेव शिष्यस्य लब्धपुरुषार्थत्वमिति च ध्येयम्॥

अथ दिव्यप्रबन्धेऽस्मिन्नुदीरिता अर्था गाथाक्रमेण संगृह्यन्ते;— १. कालमधिकारिणम् कार्यनिर्वाहककृष्णं च संश्लाघ्य व्रतमुपाक्रंसत गोप्य इति प्रथमगाथायामुक्तम्। २. प्रकृतव्रताधिकारिभिः अकृत्यकरणकृत्याकरणयोर्वर्जने भृशमवहितैर्भवितव्यमिति प्रत्यपादि द्वितीयगाथायाम्। ३. प्रकृतव्रतानुष्ठानतः सम्पत्स्यमानं फलम् असंकुचितं सर्वजनपदव्यापि भविष्यतीति कथितं तृतीयगाथायाम्। ४. लोकक्षेमनिदानभूतपर्जन्यदेवाज्ञापनमुपनिबद्धं चतुर्थगाथायाम्। ५. * श्रेयांसि बहुविघ्नानि भवन्ति महतामपीति वचनानुसन्धानेन प्रत्यूहशङ्कामुद्भावितवतां जनानां समाहितिरकारि पञ्चमगाथायाम्। ६—१५. * एकस्स्वादु न भुञ्जीतेत्यध्यवसायेन सर्वाभिर्वनिताभिस्सह मिलित्वा भगवदनुभवं कर्तुमुत्कण्ठया अन्तश्शयानानामपि गोपीनामुद्बोधनमुपनिबद्धम् षष्ठादिपञ्चदशान्ताभिर्दशभिर्गाथाभिः। १६. संमिलितास्सर्वा अपि गोपाङ्गना नन्दगोपभवनद्वारमुपेत्य तत्र द्वारपालकसकाशे कवाटोद्घाटनप्रार्थनां प्रचक्रुरिति प्रास्तावि षोडश्यां गाथायाम्। १७. नन्दगोप-यशोदा-कृष्ण-बलरामाणां प्रतिबोधनं न्यबध्यत सप्तदश्यां गाथायाम्। १८. कृष्णावतारे प्रधानमहिषीपदवीमलङ्कुर्वाणाया नीलादेव्याः प्रतिबोधनं पर्यकल्प्यत गाथायामष्टादश्याम्। १९—२१. नीलादेव्या नीलावल्लभस्य च पुनःपुनरुद्बोधनं प्रक्लृप्तम् एकोनविंशाद्येकविंशान्तगाथात्रये। २२. गोपीभिः स्वकीयमनन्यार्हत्वम् कृष्णकटाक्षवीक्षैकधार्यत्वं च विज्ञापितं द्वाविंशगाथायाम्। २३. शयनकालिकमाभिरूप्यमनुभूतवतीभिः अथ च गमनकालिकमुपवेशनकालिकं चाभिरूप्यमनुभोक्तुं कामयमानाभिश्च गोपीभिः कृष्णं प्रति तल्पादुत्थाय सिंहासनान्तिकमागत्य तस्मिन्नुपवेशनमभ्यर्थितम् त्रयोविंशगाथायाम्। २४. यथाभ्यर्थनं सिंहासनमध्यासीनस्य भगवतः कृष्णस्य दिव्यचरितानि प्रस्तुत्य मङ्गलमाशासत चतुर्विंशगाथायाम्। २५. उषसि शीतबाधामप्यविगणय्य कथमिहागता हन्त बालिका यूयमिति कृष्णेन पृष्टा गोप्यो भवदीयं जन्म कर्म च गायन्त्यः क्लेशलेशमन्तरेण समागतास्स्म इति सानन्दमूचुः पञ्चविंशगाथायाम्। २६. मार्गशीर्षावगाहनमिति व्रतविशेषप्रस्तावपूर्वकम् तदर्थमपेक्षितान्युपकरणानि व्यजिज्ञपन् गोप्यः षड्विंशगाथायाम्। २७. व्रतसमापने सति भगवतस्सका-

शाद्वात्सल्या बहुमानविशेषा न्यवेदिषत सप्तविंशगाथायाम्। २८· स्वात्मनामाकिञ्चन्यनिवेदनपूर्वकमपचारक्षामणमक्रियत गोपीभिरष्टाविंशगाथायाम्। २९· आदितः प्रभृति असकृत्प्रस्तुतं पुरुषार्थप्रदानं सुष्ठु व्याख्यातं गोपीभिरेकोनत्रिंशगाथायाम्। ३०· गोपीनां व्रतस्य फलेमहित्वकथनपूर्वकम् प्रकृतदिव्यप्रबन्धस्य निरतिशयश्रेयःप्रापकत्वरूपं फलप्रदत्वमभ्यधायि चरमगाथायाम्— इति सर्वमवदातम् ॥ .... ३०.

अथच एतद्गाथासारार्थसंग्राहकः श्लोक एषः—

श्लो॥ कल्पांभोराशिमन्थं सरसिजनिलयानायकं केशवं प्राक्
सुन्दर्यो गोपकन्यास्सविनयमुपसृत्याप्नुवन्तिस्म सिद्धिम् ।
इत्येतद्धन्विनव्यालयपतिभगवद्भट्टनाथस्य गोदा
प्रोचे सद्द्राविडोक्त्या तदनिशमनुसन्धेयमानन्दपूर्त्यै ॥ ३० ॥

श्लो॥ पूर्वं तावद्व्रजे यत्समभवदनघं गोपिकानां व्रतं तत्
गोदा स्वीयान्तरङ्गोद्यदनुभवपरीवाहरूपप्रबन्धे ।
द्राविड्या दिव्यवाचाऽप्रथयत, तदिदं सर्वदेशस्थविद्व-
द्भोगायाण्णङ्गरार्यस्सुरगिरि रचयामास बृन्दावने सन् ॥

इत्थं वादिभयङ्करवंशीयाण्णङ्गरार्यरचितैषा ।
गोदाव्रत बन्धव्याख्या विदुषां मुदे चिरं जीयात् ॥

देवी गोदा यतिपरिवृढो रम्यजामातृयोगीत्येतास्तिस्रः परमकरुणामूर्तयो मानसे मे।
स्थेम्ना स्थित्वा निरुपममहानुग्रहं दर्शयन्त्यो व्याख्यामेतां व्यदधत ततश्चानवद्यैव सैषा ॥

इति
श्रीजगदाचार्यसिंहासनाधीश्वर-
श्रीकाञ्ची· प्रतिवादिभयङ्कराण्णङ्गराचार्यविरचितः
तिरुप्पावैदिव्यप्रबन्धसंस्कृतविवर्तस्सव्याख्यस्समाप्तः ॥

श्रीमदण्णङ्गराचार्यसंस्कृतग्रन्थमाला- अङ्कः ७.

॥ श्रीरस्तु ॥

श्रीगोदादेव्याऽनुगृहीतः

नाच्चियार्तिरुमोऴि नामकः

श्रीगोदासूक्तं नाम दिव्यप्रबन्धः ॥

[द्राविडवेदात्मकदिव्यप्रबन्धवर्गे प्रथमसहस्रान्तर्गतः ।]

श्रीकाञ्ची-श्रीजगदाचार्यसिंहासनाधीश-प्रतिवादिभयङ्कर-

अण्णङ्गराचार्य प्रणीतः

सस्कृतविवर्तः ।

वैदिकमनोहराद्वारा प्रकाशितः ।

श्रीरङ्गस्थ श्रीविलासमुद्रालये समुद्रयत ।


प्राप्तिस्थानम्— ग्रन्थमाला आफीस्, काञ्चीपुरम् ।

मूल्यम् एकरूप्यकमात्रम् ।

1953

॥ श्रीरस्तु ॥

श्रीपराङ्कुशपरकालयतिवरवरवरमुनिभ्यो नमः ।



श्रीकाञ्ची प्रतिवादिभयङ्कर- अण्णङ्गराचार्य कृतिषु

द्राविडाम्नायसर्वस्वे— प्रथमसहस्त्रे चतुर्थो दिव्यप्रबन्धः

श्रीगोदासूक्तम् ॥

[नाच्चियार् तिरुमोऴिदिव्यप्रबन्धः]

सरोमुनिमुखान् मुनीन् गुरुवरांश्च नाथादिमान् प्रणम्य च विशेषतो वरवरं मुनिं चिन्तयन् ।
मुदा द्रविडवेदवाग्विततिहृद्यभावान् गृणन् मुकुन्दगुणसागरे सततमस्मि मज्जन्मनाः ॥

गोदाप्रबन्धद्वितये द्वितीयां श्रीसूक्तसंज्ञां कृतिमद्भुतार्थाम् ।
गीर्वाणवाण्याऽद्य विवर्तयामि गीर्वाणवाणीरसिकोपभुक्त्यै ॥

[तनियन्— * अल्लिनाळ् तामरैमेल्]

सद्यो विकस्वरसरोरुहवासिलक्ष्मीसख्याञ्चिता सुभृतमल्लिसमाख्यदेशा ।
तन्वी मयूरसदृशी मधुवैरिभोग्या श्रीविष्णुचित्तकुलदीपशिखा हि गोदा ॥

— अवतारिका —

श्रीविष्णुचित्तदिव्यसूर्यात्मजा श्रीमती गोदादेवी स्वकीयानुभवपरीवाहरूपं भक्तजनभागधेय-परीपाकात्मकं च दिव्यप्रबन्धद्वितयं प्रणिनाय । तत्र द्वितीयोऽयं दिव्यप्रबन्धः "नाच्चियार् तिरुमोऴि" इति सुप्रसिद्धः । त्रिचत्वारिंशदुत्तरशतगाथात्मकेऽस्मिन् दिव्यप्रबन्धे चतुर्दश दशकानि विलसन्ति । एकैकमपि

दशकं एकैकाऽपि च गाथा सर्वथाऽपि रसघनतां बिभर्तीति पुनरुक्तमेतत् । पुरुषोत्तमं भगवन्तं स्त्रीरत्नान्येव सम्यगनुभोक्तुं प्रभवन्ति । श्रीपरांकुशपरकालादयोऽपि दिव्यसूरयो मध्येमध्ये स्त्रीभावनामधिगत्य स्त्रीवाचैव भगवदनुभवं परमविलक्षणं प्रचक्रिरे । स्वयं स्त्रीरत्नत्वेन समुत्पन्नाया अस्या गोदादेव्याः तादृगारोपिताकारधारण-मनपेक्षितं खलु । अत एवैतस्या अनुभवः स्वतः परमशोभनः प्रथते । गोदास्तुतौ श्रीवेङ्कटनाथगुरुवरेण—
* भोक्तुं तव प्रियतमं भवतीव गोदे भक्तिं निजां प्रणयभावनया गृणन्तः । उच्चावचैर्विरहसंगमजैरुदन्तैः शृङ्गार-यन्ति हृदयं गुरवस्त्वदीयाः ॥ * इत्युक्तं श्लोकरत्नमिहानुसन्धेयम् ।

अत्र च दिव्यप्रबन्धे * तैयोरुतिङ्गलुम् * इत्यादिके प्रथमदशके गोदादेवी नन्दनन्दनादितरस्य कस्यापि मानुषस्य पतित्वेन प्रस्तावमप्यसहमाना श्रीरङ्गनाथात्मनाऽवतीर्णस्स एव स्वस्य पतिर्भवितुमर्हतीत्याशं-समाना तादृशं स्वकीयं सिद्धान्तं सम्यगाविष्कृत्य मन्मथदेवमुद्दिश्य प्रपत्तिं प्रयुङ्क्ते— "भगवन्, कामदेव ! मम मनोरथं निर्वर्तयतु भवान्" इति । न केवलं मन्मथमेव प्रपद्यते, सपरिकरस्य तस्य प्रपदनमविलंबेन कार्यसाधकं भवितुमलमिति मन्वाना तस्यानुजमपि (साम्बं) प्रपद्यते । आशाया उत्पादको मन्मथ एवेति लौकिकी प्रसिद्धिः । भगवद्विषयिण्या आशाया अपि स एवोत्पादको भवितुमर्हतीति प्रतिपत्तिरिवं गोदादेव्याः । उत्पादकस्स एव तस्याः (आशायाः) फलेग्रहित्वमपि प्रजनयितुं प्रभवतीति तत्प्रपदनमत्र निबध्यते । पुरा गोपीभिः कृतस्य व्रताचरणस्यैवानुकारो यथा "तिरुप्पावै" नाम्नि पूर्वप्रबन्धेऽभूत्तथा ताभिः कृतस्यैव काम-प्रपदनस्यापि अत्रानुकरणमिति सुवचम् । अनुकारमात्रमिति न; स्वानुष्ठानरूपं च भवतीति विशेषः ।

ननु अनन्यार्हशेषत्वद्रढिमशालिनी गोदादेवी कथमिव देवतान्तरप्रपदनप्रावण्यं प्राचीकशदिति चेत्; अत्र समाहितिरेषा वेदितव्या— देवतान्तरप्रपदनमिदं अज्ञानकार्यमेव । तथाऽपि न किंचिदवद्यमिह । कर्मनिबन्धनमज्ञानमेव हेयम्; ज्ञानविपाककार्यमज्ञानं तु न तथा । तदत्यन्तमुपादेयमेवेति श्रीवचनभूषणदिव्य-शास्त्रे सिद्धान्तितमस्ति । * ज्ञानविपाककार्यमान अज्ञानत्ताले वरुमवैयेल्लाम् अडिक्कळञ्जु पेरुम् * इति तत्रत्या सूक्तिस्सुप्रथिता । तस्य सिद्धान्तस्य गोदाया इदमाचरणं निदानभूतमिति वेदितव्यम् । इत्यन्यत्र विस्तरः ।

तथा चैतद्दशकसारांशसंग्राहक श्लोक एषः—

कृष्णादन्यः पतिर्मे न भवितुमिह कोऽप्यर्हतीति स्वकीयं
सिद्धान्तं संप्रकाश्य प्रपदनमकरोन्मन्मथे भ्रातृयुक्ते ।
अज्ञानं ज्ञानपाकोद्भवमिह तनुते यत्तदादृत्यमेवे-
त्येनं राद्धान्तमुच्चैर्जगति विदधती विष्णुचित्तात्मजाऽऽद्ये ॥

अथ प्रबन्धोपक्रमः ।

प्रथमदशकम्— तैयोरुतिङ्गलुम् ॥

१. (तैयोरुतिङ्गलुम्) अयि भोः कामदेव ! कृत्स्नेऽपि पौषमासे त्वदीययात्रोत्सवोचितवीथिकास्संशोध्य मण्डलपूजार्थं मण्डलवेदिकां च प्रतिष्ठाप्य माघमासस्य प्रथमपक्षे चारुलघुसिकताभिर्वीथीरलंकृत्य त्वां त्वदनुजं साम्बं च नमस्करोम्युज्जिजीविषया । एतेन प्रसन्नस्त्वं सुतीक्ष्णहेतिराजाञ्चितहस्तस्य श्रीवेङ्कटाद्रीशितुर्भगवतो नित्यकिंकरीं मां कुरुष्व । [इति मन्मथदेवप्रार्थनया स्वस्य भगवदनुरागभूमानं प्रख्यापयति गोदा ।]

२. (वेल्लैनुण्मणल्कोण्डु तेरुचणिन्दु) हे कामदेव ! धवलतनुसिकतास्समाहृत्य वीथीरलंकृत्य प्रत्यूषात्प्रागेव जलाशयं विगाह्य निरवद्यास्समिधो जातवेदसि हुत्वा शुचिः प्रयता सती त्वदाराधननिरताऽहं वर्ते । आराधनेनानेन प्रसन्नस्त्वं मधुस्यन्दीनि कुसुमानि धनुषि संयोज्य सिन्धुसवर्णस्य गोपालकृष्णस्य नाम मनसि कृत्वा बकासुरहन्तृभगवदात्मके लक्ष्ये मां प्रयुञ्जीथाः । [तेन सह भगवता मां संयोजयेति कथितं भवति ॥] ... ... (२)

३. (मत्तनन्नरुमलर् मुरुक्कमलर् कोण्डु) हे कामदेव ! तव भोग्यानि धुत्तूरपुष्पाणि किंशुककुसुमानि चोपार्ज्य त्रिसन्ध्यं च ते पादयुग्मं प्रणिपत्य प्रार्थयमानाऽहं यथा तव नैर्घृण्यमुद्घुष्य न त्वां विनिन्देयं तथा नाम दयेथाः । विकस्वरकुसुमात्मकान् सायकान् धनुषि संयोज्य गोविन्दनाम मनसि धृत्वा विदग्धवेङ्कटनाथाख्यदीपे मामैक्यभाजं कलयेथाः ॥ ... ... (३)

४. (शुवरिल् पुराण निन्पेरेलुदि) चिरादेव मदुपकारक कामदेव ! भित्तौ तव नामानि विलिख्य मत्स्यात्मकान् ध्वजान् तुरङ्गमान् चामरहस्ता वनिता इक्षुमयं धनुश्च ते पुरतोऽर्पयामि । अवरवयसः प्रभृति (बाल्यात् प्रभृति) तमेव गोपालकृष्णमभिलष्य समुज्जृम्भितौ मम पयोधरौ तस्यैव द्वारकाधीशस्योपभोग्याविति संकल्प्य त्वां प्रणमामि । तमिमं मनोरथं क्षिप्रं फलेग्रहिमाधेहि ॥ ... ... (४)

५. (वानिडैवालुमव्वानवर्क्कु) अयि भोः कामदेव ! वैदिकैर्द्विजन्मभिरध्वरेषु दिविषद्भ्यस्समर्प्यमाणं हविः कश्चन काननचारी जम्बुकः पादाघातेन आघ्राणेन च दूषयति चेत् तद्यथा वृथा भवति, तथा शङ्खचक्रधरभगवदेकार्हतया समुद्भूतयोर्मम पयोधरयोः मनुष्योपभोज्यताप्रस्तावमात्रमपि सत्यमवद्यावहं मम । तथा सति सत्यं प्राणापाय एव मम संभविता भो मदन ! .... (५)

६. (उरुवुडैयारिलैयार्कल् नल्लार्) अयि कामदेव ! कामतन्त्रविदुषीस्सुन्दरीर्युवतीः पुरस्कृत्य नित्यं वीथीः परिष्कृत्य त्वद्विषयकफाल्गुनोत्सवव्रतविशेषानुष्ठाननिष्ठाऽहमस्मि । वर्षुकवलाहकसवर्णः

अतसीसुमसुकुमारो वन्यकुसुमनिभश्च भगवान् निजमुखारविन्दविलसद्विलोचनाभ्यां यथा मां कटाक्षयेत् तथा मयि त्वमनुग्रहमुपबृंहयेथाः ॥ .... (६)

७. (कायुडैनेल्लोडु करुम्बमैत्तु) अयि मन्मथदेव ! रुचिरव्रीहिगुच्छमिक्षुदण्डं च ते समर्प्य गुडमिश्रतण्डुलपृथुकादिकं च निवेद्य कामतन्त्रनिपुणजनकीर्त्यमानमन्त्रघोषपुरस्सरं त्वामाराधयाम्यहम् । पुरा रोदसी विक्रान्तवान् परमपुरुषो यथा हि निजकरतलेन मदङ्गं स्तनौ चाभिमृशेत् तथा नाम विधाय भुवि यशश्च मे विवर्धय ॥ .... (७)

८. (मासुडैयुडम्बोडुतलैयुलरि) विश्लिष्टजनसंघटनरूपवैभवशालिन् ! भगवन् ! कामदेव ! मलिनवपुरहं कचभरं विकीर्य अधरोष्ठश्वेतिमानं च प्राप्य एकवेलाशनव्रतं चावलम्ब्य यत्तपोऽनुतिष्ठामि तदव-धेहि । अधुना तावदभ्यर्थनीयमेकमेव प्रभो । महाप्रभो ! केशवभगवतः पादसंवाहनकैंकर्यरूपपरमपुरुषार्थ-निरता सेयमिति प्रथां मे समुत्पादयेथाः कृपया ॥ .... (८)

९. (तोळुदु मुप्पोदुमुन्नडिवणङ्गि). अयि कामदेव ! त्रिसन्ध्यं च प्रणतिपूर्वकं त्वामाश्रित्य पवित्राणि पुष्पाणि च समर्प्य त्वदभिष्टवनिरताऽहं सिन्धुसवर्णस्य भगवतो निरवद्यकैंकर्यमेव कृत्वा यदि नोज्जी-वेयं तर्हि पश्चात् प्रलापविलापैरेव मया कालः क्षेप्तव्यो भवेत् ! तदिदं ते महत्तरं हि पातकं स्यात् । कर्षण-क्लेशसहमनड्वाहं यष्टिप्रहारेण अशननिरोधेन च बाधमानस्य जनस्य पापं च ते संभवेत् ॥ ... (९)

१०. (करुप्पुविल् मलर्क्कणैक्कामवेळै) कुवलयापीडाख्यमत्तवारणमदभञ्जनविचक्षणस्य बका-सुरभेदननिपुणस्य च मणिवपुषो भगवतो मां वल्लभां कुरुष्वेति इक्षुधन्वानं कामदेवमाश्रित्य प्रार्थितवत्या शैलोपमसौधाञ्चितश्रीधन्विनव्यनगराधीश विष्णुचित्तसूर्यात्मजया गोदया साभिनिवेशमभिहिता इमा द्राविडदिव्य-गाथाः कीर्तयन्तस्सन्तो दिविषदधीशदिव्यपादभाजस्स्युः— इति फलकीर्तनेन समापितमिदं दशकम् ॥ ...(१०)

इति श्रीगोदासूक्ते प्रथमदशकविवर्तस्समाप्तः ॥

द्वितीयं दशकम्— नाममायिरमेत्तनिन्र ।

— अवतारिका —

दशकेऽस्मिन् गोपीकृष्णसंवादविशेषमेकं निबध्नाति गोदा । गोपीतादात्म्यभावनया दशकमिदं निबध्यत इति यावत् । कृष्णसंश्लेषैकरसिका गोप्यः कदाचित् तत्संश्लेषसुखमलभमानाः प्रणयरोषभूम्ना अन्य-परतां प्रदर्शयितुमिच्छन्त्यः सिकतासु कृत्रिमसद्मनिर्माणात्मके विहरणविशेषे प्रावर्तन्त । अद्यापि लोके प्रत्यक्ष-विषयोऽयं विहारो बालानाम् ; यत्र यत्र गृहनिर्माणकर्म प्रचलति तत्र बहिः प्रक्षिप्तासु कार्योपयोगिनीषु सिकतासु

बाला अवस्थाय सिकतागृहाणि क्षुद्राणि निर्मिमत इति। एतादृश एव विहरणे प्रवृत्ता गोप्यः कृष्णे विमुखतां प्रादर्शयन्निव। अथवा ताभिः प्रदर्शितं वैमुख्यं सैकतसद्मनिर्माणप्रवृत्तिरूपत्वेन कीर्तितमित्यपि ग्रहीतुं योग्यम्। स्वयमागते कृष्णे आभिमुख्यमप्रकाश्य कार्यान्तरपरताविष्करणेन वैमुख्यं प्रकाशितवत्यो गोप्य इति वेदितव्यम्। तदिदमसहमानः कृष्णकिशोरः "कथमिमाः कन्यका मया सह विहरणेऽभिरुचिं विहाय आन्यपर्यमभिनयन्ति!" इति रुषित इव सहसा सन्निकृष्टो भूत्वा, ताभिर्निर्मीयमाणानि सैकतसद्मानि स्वपदघातेन शिथिलयितुमुपचक्रमे। उच्चावचकितववाक्यविन्यासैः शृङ्गारचेष्टिताचरणैश्च तासामन्यपरतां निवर्तयितुं प्रायतनेति यावत्। येन केनापि प्रकारेण मिथो वाग्विवादप्रपञ्चनं कृष्णस्य गोपीनां च भृशमभिसंहितम्। "अत्र कृष्णस्समागन्ता; कामपि कामपि कामुकचेष्टकर्ता च सः" इत्याशयैव गोप्यस्सैकतसद्मनिर्माणविहरणनिरता अभूवन्। ताभिर्विनाऽवस्थातुमशक्नुवन्मुकुन्दश्च मनोरथानामतटान् प्रवाहानभिवर्धयन्नुपागतस्तत्रैव। सपदि भञ्जयामास च स्वचरणघातेन तासां तानि कृत्रिमलघुसदनानि। तदात्वे अवशात् तं प्रति भाषणमुपनतमभूत्तासाम्। "हे कृष्ण! किमन्धस्त्वम्? चक्षुष्मता त्वया साभिनिवेशमवलोकनीयं खल्वस्मदीयं विहरणम्। तथा सत्येव हि अस्माकमपि प्रयासस्सफलो भवेत्। भूयसा कालेन भूरिपरिश्रमेणास्माभिः परिकलितानीमानि रमणीयलघुसदनानि निर्घृणं शिथिलीकुर्वता त्वया बत किं नाम फलमवाप्तम्? अद्यापि तवास्मासु मनागप्यनुक्रोशः कुतो नु नोदेति? एवं नाम क्लेशमुत्पादयत्यपि त्वयि नास्माकं मनो विरक्तं भवति। त्वदीयानि मञ्जुमधुरभाषितानि मुग्धविलोकितानि कैतवचेष्टितानि च प्रसभमपहरन्ति हृदयानि नः। बालिकानामस्माकं स्तनोद्भेदोऽपि नाभूदिति ननु जानाति भवान्। ईदृशीष्वस्मासु उच्चावचं किमपि किमपि शृङ्गारमयं भाषणजालं प्रपञ्चयतस्तव हन्त! किं नाम समीहितं सेत्स्यति? सन्ति भूयस्यो रसिकचक्रवर्तिन्यो ललनाः; ताभिस्सह यदि भवानीदृशानि कम्रवचनानि भाषेत, तद्धि भवेद्रासिक्यानुरूपम्। त्वां वयं सत्यं जानीमः शङ्खचक्रगदापाणिं साक्षान्नारायणं देवम्। तथाऽपि त्वयि नास्माकमभिरुचिः। सितायामपि कषायतामतिर्यदि नाम जायते केषाञ्चित् ते तां दूरीकुर्वन्त्येव खलु। तथैवास्माकं कटुभूतो भवान् दूरत एव वर्तितुमर्हति। सहसा परिसरमुपेत्य देहेषु चास्माकं निपत्य शृङ्गारचेष्टाः कुर्वन्तं भवन्तं परिसरस्था यदि केऽपि पश्येयुस्तर्हि किमपि किमपि कथयेयुर्ननु। माभूद्बत! वृथापवादास्पदम्। मा चकार्षीरस्मदीयसिकतासद्मशैथिल्यम्" इति सविनयं सानुनयं च ताः प्रार्थयन्तेस्म। तदिदं तद्भावभावनया दशकेऽस्मिन् प्रतिपादयति गोदादेवी॥ तथा चैतद्दशकसारसंग्राहकं पद्यम्—

गोप्यः कार्यान्यपर्यप्रकटनकुतुकात् सैकतं सद्म कर्तुम्
प्रावर्तन्ताथ कृष्णो विहरणरसिकस्तत्र गत्वा स्वपद्भ्याम्।
तच्छैथिल्यं वितेने तदनु सविनयं प्रार्थयन्तेस्म मैवं
कार्षीरिति, एतदूचे सरसमधुरवाग्दिव्यगोदा द्वितीये॥

१. (नाममायिरमेत्तनिन्न) अयि भोस्सहस्रनामस्तुत्य नारायण! नरवेषधारिन्! धूर्तं त्वां श्वश्रूतनयपदेऽपि कलितवतीनामस्माकं हंहो! कथमिव क्लेशनिवृत्तिर्भवित्री। फाल्गुने मासि मन्मथयात्रोत्सवसमयविशेषोऽयमिति धिया तद्यात्रोत्सवोचितां वीथीं वयमधुना विभूषयामः। अये धौर्त्यनिरत श्रीधर! मास

भञ्जयस्सैकतसदनमस्मदीयम् ॥ (" त्वां श्वश्रूतनयपदेऽपि " इत्यादेरयं भावः श्वश्रूतनयो नाम भर्ता । आर्यपुत्र इतिवदयं व्यवहारः । संबन्धविरहितव्यक्तिष्वपि स्वैरं बाधां कुर्वतस्तव अस्माभिस्सह भर्तृभार्याभावरूपसंबन्धो यदि स्यात् सततमस्माकं बाधनमेव ते कृत्यं भवति । क्लेशनिवृत्तेर्न कोऽपि मार्ग इति ।) ... (१)

२. (इन्नुमुत्तुमुद्दुन्नोच) कृत्स्नेऽपि दिवसेऽस्मिन् वपुषः क्लेशमप्यनालोचयन्तीभिरस्माभिरारचितमिदं सैकतसदनं यदि लोचनाभ्यां पिबन्निव सुष्ठु वीक्षेथास्तर्हि परिश्रमोऽस्माकम् अवितथस्स्यात् । तथा नाम वीक्ष्य अस्मदीयमनोरथसाफल्यं कुरु तावत् । पुरा शिशुभावेन वटदलमधिशयितवन् महाप्रभो ! पुराणपुरुष ! अस्मासु त्वं न कदाऽपि दयमानमना भवसि । पापमेव ह्यस्माकमेतत् ॥ ... ... (२)

३. (कुण्डुनीरुरैकोलरि) भो अगाधमहोदधिशयन ! प्रबलकण्ठीरव ! गजेन्द्रबाधाविमोचन ! एवमाश्रितदुःखहरोऽसि त्वमिति त्वयि स्पृहामुद्वहन्तीरस्मान् कटाक्षवीक्षात्मकनिशितशरप्रयोगतो मास्म बाधथाः । स्वच्छवीचिसुभगपयोधिशायिन् ! एतत्सैकतसद्मनिर्माणाय सूक्ष्मतरसिकतास्सञ्चीय वयमतिमात्रश्रमशालिन्यो ह्यभूम । परिश्रमं नो मनसि कलयन् सन् विरम तावत्सैकतसद्मभञ्जनात् ॥ ... ... (३)

४. (पेय्युमामुहिल्पोल्वण्णा) अयि वर्षुकवलाहकसवर्ण कृष्ण ! तव भाषितानि चेष्टितानि चास्माकं व्यामोहभूमानमेव जनयन्ति हन्त । किं ते मुखारविन्दं मायामन्त्रगुलिकाविशेषः ? भवानिव वयमपि यद्यरुन्तुदभाषितभाषणे प्रवर्तेमहि, तर्हि " बालिका इमाः क्षुद्रबुद्धय " इति त्वं विभावयिष्यसीति भियैव तूष्णीमास्महे । अयि सरोरुहसदृशनयन ! मा स्म भञ्जयोऽस्मद्भिर्निर्मितं सैकतसद्म ॥ ... ... (४)

५. (वेल्लैनुण्मणल्कोण्डु) अयि तस्कर ! माधव ! केशव ! अतिधवलतनुतरसिकताभिर्वीथिकासु अत्यद्भुतमस्मद्भिर्निर्मितानि चित्राणि यद्यपि विध्वंसयसि त्वम्, तथाऽपि तव सौशील्याद्यनुसंधानेन द्रवीभवन्मनस्का एव भवामः ; न तु रोषवशंवदहृदया भवामः । आस्तां नामैतत् । सस्पृहं द्रष्टव्यमपि सैकतसद्म सहसा भञ्जयतस्ते मुखे किमहो चक्षुषी न स्तः ॥ ... ... (५)

६. (मुत्तिलादपिल्लैहलोम्) सागरे सेतुं बध्वा लङ्कां समराङ्गणीकृत्य रक्षःकुलानि निश्शेषं विनाशितवन् विक्रमाढ्य ! अस्पृष्टयौवना अनुत्पन्नस्तनोद्भेदाश्च वयं बालिशास्स्मः । ईदृशीष्वस्मासु ते प्रत्यहं किमपि किमपि क्षोदिष्ठं कर्म प्रवर्तते सैकतसद्मभञ्जनात्मकलीलापदेशेन । अये ! त्वदधीतासु शृङ्गारकलासु नास्माकं परिचयगन्धोऽप्यस्ति । तद्विजहीहि वृथाऽस्माकं परिबाधनम् ॥ ... ... (६)

७. (पेदनन्मारिवाहलोडु) अयि भगवन् अर्णवसवर्ण ! नर्मोक्तीर्बहु भाषसे त्वम् । भावज्ञानां रसज्ञानां सविधे एवंविधोक्तीर्यदि भाषेथास्तर्हि परमभोग्यमेव स्यात् । लौकिकज्ञानेनापि दरिद्राणां बालिकानामस्माकं बाधनेन बत ! किं नाम ते फलम् ? । सेतुबन्धसमर्थ मुकुन्द ! तव दयिताभिश्शपामहे, मास्म शिथिलयो नस्सैकतसद्म ॥ ... ... (७)

८. (वट्टवाय्शिरुतूदैयोडु) जाज्वल्यमानहेतिराजालंकृतपाणितल ! भगवन्मुकुन्द ! लीलोपकरणभूतलघुकलशलघुशूर्प—सिकतादिसमेताभिः स्वच्छन्दविहारनिरताभिरस्माभिः कल्प्यमानानां सैकतसद्मनां शिथिलीकरणेन हन्त ! किं ते फलम् ? । हस्तस्पर्शपादघाताभ्यां हिंसां मास्म जनयः । रसनायां (आमयादिवशात्) तिक्तायां सत्याम् इक्षुरसखण्डेऽपि वैरस्यधीरुदेतीति ननु जानासि सागरसवर्ण कृष्ण ! .... (८)

९. (मुत्तत्तूडुपुडुन्दु) पुरा कदाचित् त्रैविक्रमक्रमकृताक्रमणत्रिलोक ! गोविन्द ! अस्माकमैकान्तिकविहरणास्पदं सदनाङ्गणं प्रविश्य स्वकीयमाननं प्रदर्श्य मन्दस्मितं च विरचय्य सैकतसद्मभञ्जनेन साकम् अस्मदीयहृदयवैक्लव्यमपि खलु वितनोषि । अथ चास्मदीये वपुषि संमर्दं च हन्त ! संजनयसि । एवं सति तदेतदवेक्षमाणाः परिसरवर्तिनो जनाः किं वा न कथयेयुः । (अपवादमेव हि वृथा प्रख्यापयेयुः ॥) .... (९)

१०. (शीदैवायमुदमुण्डाय्) "अयि सीताधरामृतपानरसिक हरे ! अस्मद्विनिर्मितं (खेलनात्मकं) सैकतसद्म मास्म भञ्जय" इति कृष्णमुद्दिश्य वीथीविहारनिरताभिर्गोपालकन्यकाभिर्यदुक्तमतिमधुरम् तदिदम्—वेदाध्ययनानुष्ठानसंपत्सम्पन्नश्रीवैष्णवोत्तमालंकृतश्रीधन्विनव्यनगराधीशश्रीविष्णुचित्तात्मजया गोदया द्राविड्या गिराऽनुगृहीतम् । तदेतद्दिव्यगाथादशकमधीयाना भागवता अविकलैश्वर्यास्सन्तोऽथ काले दिव्यं धाम विन्देरन् । (इति फलकीर्तनेन समापितमिदं दशकम् ।) .... (१०)

इति श्रीगोदासूक्ते द्वितीयदशकविवर्तस्समाप्तः ॥

तृतीयं दशकम्— कोलियलैप्पदन्मुन्नम् ॥

— अवतारिका —

गोपीवस्त्रापहरणकथाविशेषश्चारुतरं निबध्यतेऽस्मिन् दशके । (* वासो हृत्वा दिनकरसुतासन्निधौ वल्लवीनाम् लीलास्मेरो जयति ललितामास्थितः कुन्दशाखाम् । सव्रीडाभिस्तदनु वसने ताभिरभ्यर्थ्यमाने कामी कश्चित्करकमलयोरञ्जलिं याचमानः ॥ * इतीदं गोपालविंशतिसूक्तिरत्नमिह स्मर्तव्यम् ।) गोप्यः कृष्णवियोगतापशान्त्यै शिशिरे सलिले विगाहनं कामयमानाः प्रत्यूषे समुत्थाय यामुनं कमपि ह्रदं प्रति जग्मुः । कृष्णोऽपि तासां प्रवृत्तीस्तदातदा सद्वारकमद्वारकं चावगच्छत्येव खलु । अधुनैवं प्रययुरिमाः स्नानार्थमिति जानन् स गृहेऽवस्थातुमशक्नुवन् निगूढमनुव्रजन् तस्यैव ह्रदस्य तीरं प्राप्य तरुमूले निलीन आसीदिव । गोप्यश्च यथासमुदाचारं वसनान्याभरणानि चोद्वास्य कूले निधाय स्नानक्रीडातत्परा आसन् । तदात्वे कृष्णस्तानि वासांसि भूषणानि च गूढं हृत्वा कूलस्थकुन्दशाखिनः शीर्षमधिरुह्य विटपे निषसाद तैस्स्वयं भूषितदिव्यगात्रः । अथ समापितस्नाना वल्लव्यः स्थानेषु वस्त्रादिकमनवेक्षमाणाः कथमिदं गतम् केन वा हृतमिति संभ्रान्तचित्ता दिक्षु विदिक्षु च दृशं दिशन्त्यः अन्ततो ददृशुरनोकहे नन्दनन्दनं परमानन्दसंदोहसंदायकदिव्यमङ्गलविग्रहं वासोभिर्भूषाभिश्च विलक्षणां शोभां दधानम् ।

तानि वासांसि लब्ध्वा परिधाय हि निर्गन्तव्यमाभिस्ततः । हन्त ! किं कुर्युरिमाः । जलाशयाद्बहिरागन्तुं योग्यता हि नास्त्यासाम् । लज्जाधना हि ललनाः । जलाशये तु नानाविधा मत्स्याः खादन्तो बाधामतीव जनयन्ति ।

अतस्तत्रावस्थातुमपि न प्रभवन्त्यहह ! आपदोऽस्याः परिहरणसरणिः का स्विदिति मुह्यन्ति शोचन्ति च । प्रयासशतैरपि वा चेलानामार्जनमत्यावश्यकं ननु । कथञ्चित् स एव वृक्षावस्थितो भगवान् कृष्णकिशोरः प्रार्थनीय इति निश्चिन्वन्ति स्म ।

कृपया प्रदेहि वसनानि नो हरे ! दययाऽस्मदीयवसनानि यच्छ भोः ।
करुणाकराद्य वितराशु नः पटान् कितव प्रदेहि कृपयाऽम्बराणि नः ॥ इति काश्चन गोप्यः ॥

चिराद्वयं जलाशये स्थिता झषैर्निपीडिताः विषादमुल्वणं हरे ! भजामहे विटाग्रिम ।
इमं ह्रदं कथं भवानुपागतो मुकुन्द भो अलं विषादनेन नः पटान् प्रदेहि माधव ॥ इत्यपरा गोपाङ्गनाः ।

जारचोरतल्लज ! स्वैरमेवमाचरन् । बन्धुभिः क्षणेन नो दण्ड्यसे ध्रुवं हरे ॥ इति इतरा गोपिकाः ।

एवं नाम प्रसादनभीषणादितत्परा आसन् गोपालयुवतयः । कितवाग्रणीः कृष्णस्तु,
जलाशयाद्बहिस्स्थले समागतः पृथक्पृथक् । कृताञ्जलिर्जनोऽधुना लभेत वस्त्रमञ्जसा ॥ इत्यब्रवीत् ।

हन्त ! कथमिमा एवं कुर्युः । अञ्जलिबन्धस्त्ववर्जनीयोऽभूत् । सदुपायज्ञास्ता एवमूचुः "भगवन् ! मानधना हि वयं वनिताः । सर्वा वयं सखीहस्तसंवलितहस्तास्सत्यो रचिताञ्जलयो भवेम । प्रसीद भगवन् ! प्रदेहि नो वासांसि" इति । (अथ करुणावरुणालयस्स भगवान् कृष्णः प्रसन्नहृदयो वितताार वासांसि ।) ईदृशं क्रीडितविशेषमाचष्टे गोदादेवी मधुरललितदशकेन । तथा चैतद्दशकसारांशसंग्राहकं पद्यमिदम्—

प्रत्यूषे गोपकन्याः स्वदयितविरहश्रान्तिशान्त्यै स्रवन्त्यां
कालिन्द्यां स्नातुकामा ययुरथ वसनादीनि कूले निधाय ।
सस्नुः, कृष्णस्तदात्वे कथमपि सहसाऽऽगत्य वासांसि हृत्वा
तासां शुश्राव याच्ञागिर इति मधुरं प्राह गोदा तृतीये ॥

१. (कोलियलैप्पदन्मुन्नम्) भो भोगिभोगशयनीयशायिन् माधव ! अवगाह्य स्नानार्थं कुक्कुटकूजितानेहसः प्रागेवात्र वयमागतास्स्मः । भगवान् गभस्तिमाली च उदयशिखरिशिखरमाससाद । हन्त ! त्वया वयमतीव क्लेशिता अभूम । सत्यं शपामहे.... इतःपरं न कदापि वयमागच्छेम जलाशयम् । सखीहस्तसंवलितहस्तास्सत्यो वयमञ्जलिबन्धं कुर्मः । परमकृपया प्रदेहि नः परिधानम् ॥ .... (१)

२. (इदुवेन्पुइुन्ददिङ्गन्दो) मधुस्यन्दिनीं तुलसीस्रजमवतंसयन्महानुभाव ! आश्चर्यगुणचेष्टित ! अस्माकममृतकल्प भगवन् ! हन्त ! कथमिह प्रविष्टो भवान् ? ननु केन पथा जलाशयोऽयमधिगतो भवता ?

हा हरे! दौर्भाग्योपहता वयं बत संश्लेषाभिमुख्यं नोद्वहामः। अयि विदग्धकिशोर! विजहीहि संभ्रमम्। कालियफणिनि कलितताण्डव कृष्ण! कुन्दशाखानिहितान्यस्मदीयानि वासांसि वितर कृपया॥ .... (२)

३. (पल्लेयीदेन्नविलमै) हा! धनुरुपमर्दितलङ्कैश्वर्य भगवन्! हन्त किमिदं नाम बाल्यलौल्यम्! यदीदं जानीयुरस्मदीया मातरस्तर्हि भृशं विमनायेरन्। नास्माकं पुनरपि गृहेषु प्रवेशं संमन्येरन्। तदेतदतीव दुश्चरितमिति न मन्यसे। कुन्दशाखिशाखासु निषण्णोऽसि हन्त। यच्च यच्च कामयसे त्वं तदखिलमपि वितरेम। सर्वजनसंदर्शनयोग्यादस्मात् स्थलादन्यत्र व्रजेम। दुकूलं देहि नः कृपया॥ .... (३)

४. (परक्कविलित्तेङ्कुम् नोक्कि) अयि लङ्काप्रणाशक भगवन्! बहुतरजनतावगाहनोचितेऽस्मिन् जलाशये अस्माकमश्रुधारा दुर्निरोधाः प्रसर्पन्ति हन्त पश्य। सर्वा अपि दिशः पश्यताद्भवान् स्फारेक्षणस्सन्। करुणालवलेशविधुर भगवन्! शाखामृगाग्रगण्यतां च ते संविद्महे। कुन्दविटपिविटपनिहितानि वासांसि वितर कृपया॥ ... ... (४)

५. (कालैक्कदुविड्डहिन्न) अयि सुन्दर गोपालकृष्ण! उच्चावचा झषा इह जलाशये हन्त नः पादान् परिबाधन्ते। यदीमामस्मदीयां विपदं शृणुयुरास्माकीना भ्रातरः अथ सरभसं शूलपाणयस्सन्तोऽत्र समागत्य त्वामुत्सारयेयुः। अथ च ते खेलनं विपरीतफलकमेव हि स्यात्। माभूत्तथा नाम। कुन्दानोकहे विन्यस्तानि वासांसि विश्राणय दयया॥ ... ... (५)

६. (तडत्तविल्तामरैप्पोयूहै) जात्युचितकुम्भनर्तनविचक्षण कृष्ण! विपुलायामिह नलिन्यां कमलनालकण्टकवृन्दबाधितचरणा वयं विषभरितवृश्चिकसंदष्टा इव भृशं विषीदामः। अस्मत्स्वामिन्! विसृज्यैवंविधधूर्तचेष्टितरुचिं वासांसि नः प्रदेहि कृपया॥ .... (६)

७. (नीरिलें निन्नयर्क्किन्नोम्) युगान्तकाले जगद्रक्षणचिन्ताजागरूक! भगवन्! चिराद्वयं पाथसि खलु स्थित्वाऽवसीदामः। त्वं तु अपनीतिचरितानि स्वैरं वितनोषि। अस्माकमावसथानि च दवीयांसि हन्त। त्वय्येव वयं पुष्कलप्रेमशालिन्यो वर्तामहे। इमामस्मदीयां शोचनीयामवस्थितिं यद्यवेक्षेरन्मातरस्तर्हि न विद्मः किं करिष्यन्तीति। कृपया प्रदेह्यस्मदीयमंशुकम्। कुन्दमहीरुहमूर्धनि स्थित्वा एवं नाम परिबाधनं च विजहीहि तावत्॥ .... (७)

८. (मामिमार्मक्कलेयल्लोम्) अयि नित्यजागरूक भगवन्! अत्र परिभूयमाना वयं न केवलं ते कलत्रगोष्ठीप्रविष्टा एव। किंतु उच्चावचबन्धुवर्ग्याश्चात्र संगतास्सन्ति। भो कोमल गोपालकृष्ण! सुदृढं ब्रूमो वयम् इदं ते कृत्यं न कल्पेत क्षेमाय। तद्वितर कुन्दशाखिशाखानिवेशितं वासः॥ ... (८)

९. (कञ्जन्वलैवैत्तवन्नु) आः कंसस्य मायाचेष्टितानि मोघानि कृत्वा तिमिरघने निशीथे व्रजमुपागतोऽसि हन्त! कन्यकानामस्माकं मनोवेदनाप्रजननायैव। तत्र जननी यशोदाऽपि त्वां न भीषयति। प्रत्युत

3

सा धूर्तचेष्टितेष्वेव त्वां समेधमानकुतूहलं च कुरुते । तथा नाम सा त्वां पुष्णाति । अयि वञ्चकपूतनास्तन्यपायिन्! व्रीडाविधुर कृष्ण! वासांसि नो वितर ॥ ... ... (९)

१०. (कन्नियरोडेङ्गलूनम्वि) अस्मदीयगोपालकृष्णस्य गोपकन्यकाभिस्सह संजातविलक्षणं खेलनमधिकृत्य, सौवर्णसौधाङ्कित श्रीधन्विनव्यनगराधीश श्रीविष्णुचित्तसूर्यात्मजया गोदया सुष्ठु संकीर्तितमिदं दिव्यगाथादशकं सादरमधीयाना महान्तोऽथ काले वैकुण्ठं प्रविश्य श्रियः पत्या सह नित्यानुभवभाग्यभाजस्स्युः ॥ (इति फलकीर्तनेन समापितमिदं दशकम् ।) ... . (१०)

इति श्रीगोदासूक्ते तृतीयदशकविवर्तस्समाप्तः ॥

चतुर्थं दशकम्— तेल्लियार्पलर् ॥

— अवतारिका —

विरहिजनानां दैवप्रश्नविधानेन कालयापनमिति काचिदस्ति प्रक्रिया । दैवप्रश्नविधानं नाम- त्रैकालिकज्ञानयुक्तं देवताविशेषम् अथवा दैवाविष्टं व्यक्तिविशेषं संबोध्य "मदीयः पतिः क्षिप्रमागच्छेद्वा ?" इत्यनुयोगकरणम् । दैवतस्य दैवाविष्टव्यक्तिविशेषस्य वा अलाभे तु, धरातले स्वयमेव सुबहूनि रेखाङ्कनविन्यसनानि कृत्वा अथ तासां रेखाणां युग्मशस्संख्याने कृते यदि एकानवशेषेण युग्ममेवं समाप्नोति तर्हि पत्या सह स्वस्य युग्मभावस्सिद्ध इति मत्वा संतोषानुभवः । यदि तु पूर्वोक्तसंख्याने एकमेवावशिष्यते, तर्हि "संयोगो न स्यादावयोः, एकाकितयैवावस्थानमवर्जनीयम्" इति मत्वा शोकानुभवः- इति काचन पद्धतिरस्ति । इयं तु प्रक्रिया द्राविड्यां "कूडलिलैत्तल्" इति नाम्ना व्यपदिश्यते । मनोविनोदनार्थमीदृशं व्यापारविशेषं पुरा गोप्यश्चक्रुरिति तदनुकारोऽस्मिन् दशके गोदादेव्या क्रियते । (अनुकारमात्रं नः स्वानुभवरूपता चात्र सुसमृद्धेति न विस्मर्तव्यम् ।) "श्रीरङ्गक्षेत्राधीशः श्रीवनाद्रिनाथः श्रीवेङ्कटाचलपतिः श्रीकृष्णपुराधिनाथः कालियदर्पहन्ता कुवलयापीडाख्यमत्तवारणमदनिवारणो यमलार्जुनभञ्जनः कंसहन्ता शिशुपालशिरश्छेत्ता द्वारकापतिर्वसुदेवसूनुर्यशोदात्मजो यद्यधुना मदन्तिकमागच्छेत्तर्हि तत्सूचनं कलय भोस्समागमपिशुनदैवत!" इति कथनेन तत्संगमकुतूहलं स्वकीयम् अतिमात्रमाविष्कृतवती गोपीजनतादात्म्यापत्तिधन्या गोदादेवीति वेदितव्यम् । तथाचैतद्दशकसारसंग्राहकं पद्यमिदम्—

श्रीरङ्गे श्रीवनाद्रौ वृषगिरिशिखरे चोल्लसन् देवदेवः
कैङ्कर्यं पादसेवात्मकमिह कृपया स्वीचिकीर्षुर्मदीयम् ।
आगच्छेद्वा कृपालुर्हरिरिति विमृशन्तिस्म गोप्यः पुरा, तत्
तत्तादात्म्येन गोदा कथयति दशकेऽस्मिंश्चतुर्थेऽनुरागात् ॥

१. (तेल्लियार्पलर्) अयि भो संघटनदैवत ! प्रसन्नचित्तभक्तवर्गप्रणतपादः परमोदारः श्री-वनाद्रीश्वरो भगवान् यं देशमधिशेते तत्र (श्रीरङ्गे धाम्नि) पादाब्जसंवाहनकैङ्कर्यं मे यद्यनुगृह्णीयात्सः, तर्हि त्वं संगच्छस्व । (विरहिणौ दम्पती संघटयितुं क्षमं किमपि दैवतमस्तीत्यभिमानेन "भोस्संघटनदैवत !" इति संबोधनं क्रियते । अवतारिकायां विस्तारिकायां विस्तरोऽनुसन्धेयः । "त्वं संगच्छस्व" इति कथनम्— आनुकूल्यं प्रकाशयेत्यर्थकम् ॥) .... (१)

२. (काट्टिल्वेङ्गडम्) भो संघटनदैवत ! काननस्थवेङ्कटाद्रौ श्रीकृष्णपुराभिधदिव्यनगरे च सहर्षप्रकर्षं विराजमानो वामनो भगवान् क्षिप्रमत्रागत्य पाणिना मम पाणिं गृहीत्वा स्वात्मना यदि मां संश्लेषयेत्तर्हि त्वं संगच्छस्व ॥ ... ... (२)

३. (पूमहन्पुहल्वानवर्) कमलासनेन वेधसा नित्यसूरिभिश्च संकीर्त्यमानकीर्तिविशेषः पुरुषोत्तमो विलक्षणफालशालिन्या देवक्याः पुत्ररत्नं शुभगुणाधिकवसुदेवात्मजश्च कृष्णो यद्यत्र समागत्य संश्लिष्येत्तर्हि त्वं संगच्छस्व ॥ ... ... (३)

४. (आयुचिमार्कलुम्) भो संघटनदैवत ! वल्लवीनां वल्लवानां च भीतिमुत्पादयन् पुष्पितोत्तुङ्गकदम्बमहीरुहादुत्प्लुत्य भाग्यशालिनः कालियफणिनश्शिरसि निपत्य कलितताण्डवो नट इह यदि समागच्छेत्तर्हि त्वं संगच्छस्व ॥ (भाग्यशालिन इत्यत्र * कालियस्य फणतां शिरस्तु मे सत्कदम्बशिखरस्त्वमेव वा । वृष्टि जुष्टवनशैलसुन्दर ! त्वत्पदाब्जयुगमर्पितं ययोः * इत्येतत् सुन्दरबाहुस्तवश्लोकरत्नमनुसर्तव्यम् ।) .... (४)

५. (माडमालिहैशूलू) भो संघटनदैवत, सालङ्कारं कुवलयापीडाख्यं मत्तगजं व्यापादितवान् गोपालकृष्णः प्रासादवृन्दपरिवेष्टितायामुत्तरमथुरायां मदीयवीथिकामागत्य 'गोदागृहं कुत्र' त्यनुयुञ्जानस्सन् यदि संनिदध्यात्तर्हि त्वं संगच्छस्व ॥ (उत्तरमथुरायां गोदादेव्याः काचिद्वीथी (गृहम्) कच्चिदस्तीति शङ्का जायेत । अत्र समाधत्ते पूर्वाचार्याः :—दिव्यदेशेषु सर्वेष्वपि भक्तानामगारसद्भावभावना न हि न युज्यते । किंच परमभागवताग्रेसरो मालाकारो मथुरापुरकृतावसथः खलु । तद्गृहे इयमपि मालाकारविष्णुचित्ततनया भागिनी ननु ॥)

६. (अत्तवन् मरुदमुरिय) भो संघटनदैवत !, मदेकशरणभूतो यमलार्जुनभङ्गसंपादकरिङ्खणः कंसहन्ता मथुरापुराधिनाथः कृष्णो यद्यत्र समागच्छेत्तर्हि त्वं संगच्छस्व ॥ .... (६)

७. (अन्निन्नादनशेय्) भो संघटनदैवत !, पुरा गर्हणीयकृत्यवर्गकरणनिरतं शिशुपालं यमलार्जुनम् वृषभसप्तकं बकासुरं जैत्रायुधशालिनं कंसं च पञ्चतां प्रापितवान् गोपालकृष्णो यद्यत्रागच्छेत्तर्हि त्वं संगच्छस्व ॥

८. (आवलन्बुडैयार्तम्) भो संघटनदैवत !, भक्त्या अभिनिवेशेन च भूषितानां भक्तानां हृदयादन्यत्र विमुखः सौगन्ध्यसंभृतद्वारकापुराधिनाथो वत्ससंचारणविहरणनिरतो गोपालो यदि संश्लिष्येत्तर्हि त्वं संगच्छस्व ॥ ... ... (८)

९. (कोण्डकोलक्कुरल्) भो संघटनदैवत!, पुरा * कौपीनं कटिसूत्रसीम्नि घटयन् मौञ्जीममिव्यञ्जयन् कृत्तिं कृष्णमृगस्य वक्षसि वहन्नाषाढमंसेऽर्पयन् * इत्युक्तरीत्या परमसुन्दरदिव्यवपुः परिगृह्य वामनरूपी सन् महाबलिमहाध्वरभूमिमुपेत्य द्यावापृथिव्यौ विक्रान्तवान् परमपुरुषो यद्यत्र समायायात्तर्हि त्वं संगच्छस्व ॥ ... ... (९)

१०. (पलढुनान्मरैयिन्पोरुलाय्) भो संघटनदैवत!, अनादिनिधनचतुर्वेदपरमतात्पर्यभूतो मदजलसुरभिवारणेन्द्रसमुज्जीवनसमर्थो मच्चित्तापहारिसौन्दर्यनिधिः वल्लवीजनहृदयावासो गोपालकृष्णो यदि अत्र समागच्छेत्तर्हि त्वं संगच्छस्व ॥ ... ... (१०)

११. (ऊडल्कूडल्) प्रणयरोषवैशिष्ट्ये दूतप्रेषणादिना स्वाभिसंधिसमुद्बोधने संश्लेषे च चिराद्व्यासक्तानामद्वितीययशसा विराजमानानां च वल्लवीनां संघटनदैवतप्रार्थनामधिकृत्य गोदादेव्या कथिता इमा दिव्यगाथाः कीर्तयन्तो भागवता अनघा भवितारः ॥ (इति फलकीर्तनेन समापितमिदं दशकम् ॥) ... (११)

इति श्रीगोदासूक्ते चतुर्थदशकविवर्तस्समाप्तः ॥

पञ्चमं सूक्तम्— मन्नुपेरुंपुकळ् ॥

— अवतारिका —

एतत्सूक्तं कोकिलप्रार्थनात्मकं निबध्यते। गोदादेवी स्वकीयोद्याने कोकिलादिपक्षिगणानभिवर्धयति भगवद्गुणाद्युपदेशतः। तथाऽभिवर्धितेषु पक्षिष्वन्यतमं मधुरवाचं रमणीयतनुं परभृतशावं संबोध्य "यथा सरभसमत्र समागच्छेन्मन्नाथः श्रीवेङ्कटाद्रीशः श्रीरामचन्द्रो गरुडध्वजो लोकविक्रान्तचरणः श्रीधन्विनव्यनगराधीशः शङ्खचक्रपाणिः क्षीरसागरशायी शार्ङ्गधन्वा नारायणः, तथा त्वं कुरु मधुरं कूजितम्। एवं तर्हि त्वयि भृशमहं कृतज्ञा स्याम्। मया वर्ध्यमानेन शुकशावेन सह ते सख्यं च संविदध्याम्। यद्येवं मत्प्रार्थनानुसारेण न करोषि : तर्हि त्वामुद्यानादुद्वासयेयम्; त्वदीयकूजितेन भगवानत्रागतश्चेत् अथ तस्मिन् यद्यदहं कुर्याम् तदवलोकनं च ते परमप्रयोजनं भविष्यति परमधार्मिकत्वं च ते सेत्स्यति" इत्यादिकमतिमधुररमणीयमुक्तवती गोदा दशकेऽस्मिन् ॥

अत्रेदं विवेचनीयम्। न तावद्विवेकान्धा गोदा। अपि तु परमविवेकशालिनी। ईदृशी सैषा परभृतशावकूजितेन भगवान् स्वसकाशमायास्यतीति प्रतिपत्तिं कथमिव धत्ताम्। सर्वथाऽप्यसंभावितमेव खल्विदम्। ईदृगसंभावितवचनराशिमयी गाथा वेदसनाभित्वेन कथमुपलाल्यते ? इति। अत्रोत्तरमिदमवधेयम्। * उभाभ्यामेव पक्षाभ्यामाकाशे पक्षिणां गतिः। तथैव ज्ञानकर्मभ्यां प्राप्यते पुरुषोत्तमः ॥ * इति महर्षिभिरभिहितम्। ज्ञानानुष्ठानसंपन्नः आचार्यस्सब्रह्मचारी पुत्रश्शिष्यो वा भगवता सह घटयितुं शक्तः पक्षित्वेन दिव्यसूरिभिरभिधीयते। यत्र पक्षिणां दूतकृत्ये प्रेरणं दिव्यप्रबन्धेषु दृश्यते श्रीपराङ्कुशपरकालसूरिसूक्तिषु, तत्र च आचार्यादीना-

मेव विवक्षेति संप्रदायः । "आचार्यहृदय" तद्व्याख्यानादिषु विशदमिदम् । तथाचात्र कोकिलविहगप्रार्थनम् आचार्यादिप्रार्थनमेवावगन्तव्यं यथायोगम् । अस्मिन् दशके प्रायश्शिष्याणां विवक्षेति प्रतिपत्तुं योग्यम् । तृतीयगाथायां 'सहचरीसमेतकोकिल' इति संबोधनेन सर्वोपकारक्षमगृहस्थाश्रमप्रशस्तिस्सूचिता भवति । "नारायणं यदि न कूजसि कोकिल ! त्वामुद्यानतोऽहमधुनैव विवासयेयम्" इति दशमगाथायां कथनेन आचार्यनिग्रहमपि परमभोग्यं गृह्णाति यः स एव शिष्यलक्षणपूर्तियुक्त इति द्योतितं भवति । एवमर्थविशेषा बहवः शब्दस्वारस्यगम्या वेदितव्या व्याख्यानमुखतः ॥

पक्षिसामान्यनाम्ना कथनं विहाय कोकिलाख्यपक्षिविशेषकथनेन चात्र बहवोऽर्थविशेषा अवगन्तव्या भवन्ति । मनागिह व्याचक्ष्महे । (१) कोकिलाः प्रायः पुन्नागवृक्षवासिनो भवन्ति । दशकेऽस्मिन् प्रथमगाथायां तत् स्पष्टमुक्तम् । श्रीरङ्गराजस्तवे— * पुन्नागतल्लजमजस्रसहस्रगीतिसेकोत्थदिव्यनिजसौरभमामनामः * इति श्लोकरत्नेन सविशेषमभिष्टुतस्य पुन्नागवृक्षवरस्य छायायां निषद्य ये बहुश्रुता अभूवन् ते तावदत्र विवक्षिताः । (२) कोकिलानां परभृतत्वं प्रसिद्धम् । तथा आचार्याधीनपोषणाश्शिष्या इह विवक्षिताः । (३) कोकिलाः प्रथमतश्चूतकिसलयखादनेन कषायितवदनास्सन्तः, अथ पनसफलमधुररसचूषणेन तृप्ता भवन्तीति श्रीपरकालमुनीन्द्रः स्वकीयदिव्यगाथासु [पेरियतिरुमोळि ५–३–४] कथयति । एवं प्रथमतः काव्यनाटकादिग्रन्थेषु सामान्यशास्त्रेषु च निष्ठया कषायितहृदया भूत्वा, अथ वेदान्तशास्त्राभ्यासङ्गेन हृष्यन्तोऽधिकारिविशेषा इह विवक्षिताः । (४) * वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः * इति कवयोऽपि ननु कथयन्ति । वसन्तर्तौ पिकाः विशेषतः स्वकण्ठनादं प्रदर्शयन्ति यथा, तथा समयविशेषेष्वतिमधुरगम्भीरवाग्विशेषप्रपञ्चनेन रसिकजनहृदयान्यावर्जयन्तो वाग्मिन इह विवक्षिताः । (५) * पिकः कूजति पञ्चमम् * इत्यभिधानात् पिककूजितं पञ्चमध्वनिरिति व्यपदिश्यते । एवं येषां वाग्विततिश्चतुर्वेदतोऽप्यभ्यधिका सती "किमयं पञ्चमवेदाविर्भावविशेषः !" इत्युल्लेखयोग्या विजृम्भते ते विवक्षिता इह । एवंविधा व्यङ्ग्यार्थविशेषाः निशितमतिभिरन्तर्वाणिभिरुन्नेयाः ।

तथा चैतद्दशकसारांशसंग्राहकमिदं पद्यम् :—

उद्याने वर्ध्यमानं ललितमधुरवाग्वैखरीकं मनोज्ञं
पुन्नागादिद्रुमस्थं परभृतशिशुमुद्दिश्य भोः कोकिलाग्र्य ।
मन्नाथं जारचोरं मणिनिभवपुषं माधवं कूजितैस्स्वैः
अत्र द्राक् प्रापयेथा इति कथितवती पञ्चमे दिव्यगोदा ॥

१. (मन्नुपेरुम्पुकऴ् मादवन्) पुन्नागमाधवीप्रियङ्गुसुरपुन्नागादिपूर्णे विपिने कूजन् कोकिल ! यशस्विनः श्रियःपत्युः नीलमणिनिभस्य नवरत्नाञ्चितमकुटधारिणो माधवस्यानुरागं वहाम्यहमित्येतावता हेतुना शरीरकार्श्यमनुभवामि हन्त ! किमिदं न्याय्यम् ? विद्रुमसमाधरो मदीयस्स भगवान् यथा मम परिसरमुपेयात्तथा नाम सततं तन्नामानि संकीर्त्य झटिति तमिहाह्वय ॥ ... ... (१)

२. (वेल्लैविलिशङ्गिडङ्कैयिल्) मधुस्यन्दि चाम्पेयकुसुमसारग्रहणतस्सानन्दं कूजन् अयि कोकिल! धवलमुखरपाञ्चजन्यालंकृतवामपाणिस्स विमलो भगवान् स्वं रूपं हन्त! नैव संदर्शयति। मम हृदयान्तः प्रविश्य मे मनसश्शैथिल्यमुत्पाद्य, गच्छतोऽपि प्राणान् प्रसभमवस्थाप्य मद्व्यथामवलोकयन्नास्ते सः नृत्तदर्शनहेवाकिजनवत्। हे कोकिल! त्वमपि अव्यक्तमधुरकूजितैर्मा मावधीः॥ ... ... (२)

३. (मातलितेर्मुन्वुकोल्) कुसुमविकासोल्लासिनि विलक्षणसौरभसंभृते चोपवने मधुरमधुकरगीतश्रवणतस्सानन्दं सहचर्या सह विहरन् कोकिल! पुरा मातलिना सारथिना सनाथं रथमधिरुह्य मायाविनं दशाननं प्रति शरवर्षं मुहुराकलय्य तच्छिरसां लवनं संकल्पितवतो महाप्रभोरिहागमनं नैवावलोके। नीलमणिनिभं मम नाथं तमिहाकारयेथाः॥ ... ... (३)

४. (पन्वुरुह्वियिनवेल्नेडम्) अयि परभृत! अस्थीनि च मे वपुषि द्रुतानि। चक्षुषी च चिरादेव निद्राविदूरगे आस्ताम्। एवं नाम व्यसनार्णवान्तर्निमज्ज्य वैकुण्ठाभिधानं पोतमलभमाना दूये। प्रियजनविश्लेषजं दुःखं त्वमपि वेत्सि ननु। हिरण्मयविग्रहशालिनं गरुडध्वजं पुण्यात्मकं च तं भगवन्तमिहाकारयेथाः॥ ... ... (४)

५. (मेन्नडैयन्नम् परन्दु) ललितगतिचतुरहंसक्रीडोल्लासि श्रीधन्विनव्यपुरीशितुः भगवतः पादाम्बुजयुगमरुक्मदिदृक्षावशात् मिथो बद्धस्पर्धस्फुरितशफरद्वन्द्वललिते मम दृशौ न निद्रां स्वीकुरुतः। अयि कोकिल! मधुरान्नेन सह दुग्धमुपभोज्य संवर्धितं मम सुन्दरकीरपोतं तव सखायं कुर्याम्, यदि त्वं त्रिविक्रमं भगवन्तमत्राह्वयेथाः॥

[विशेषविवरणम्— अस्यां गाथायां श्रीधन्विनव्यनगरसंकीर्तनं विराजते। तस्यां च नगर्यां ललितगतिचतुरहंसक्रीडोल्लासित्वकथनं साभिप्रायम्। स्वकीयः पिता श्रीभट्टनाथसूरिरेवात्र हंसत्वेन कीर्त्यते। * यत्सारभूतं तदुपाददीत हंसो यथा क्षीरमिवाम्बुमिश्रम् * इत्युक्तरीत्या नीरक्षीरविवेकचतुरो हंस इव भट्टनाथसूरिस्सारासारविवेककुशलः। भगवान् हंसरूपी सन् वेदानुद्धरद्यथा तथा भट्टनाथसूरिरपि * गुरुमुखमनधीत्य प्राह वेदानशेषान् * इत्युपश्लोकितरीत्या राजपरिषदि वेदप्रकाशकः। हंसे गतिचातुर्यमिव भट्टनाथसूरौ अनुष्ठानचातुर्यं वेदितव्यम्। एतादृशेन सूरिवरेण श्रीधन्विनव्यपुर्या उल्लासस्समजनीति सूचितं भवति॥] .... (५)

६. (पत्तिशैयुममरर् पणिन्देत्तुम्) विकस्वरकुसुमस्तबकाञ्चितवनविततिविहरणरसिक कोकिल! सर्वासु दिक्षु विनतैरमरैरभिष्टूयमाणो भगवान् हृषीकेशो यन्मयि विमुखः, ततोऽहं मौक्तिकसमस्य स्मितस्य विद्रुमनिभस्याधरस्य पयोधरयोश्च ग्लानिमनुभवामि। हे कोकिल! यदि त्वं मम जीवातुं परमपुरुषमाकारयेथाः तर्हि शिरसाऽभिवादनेन चिरं कृतज्ञा स्याम्॥ .... (६)

७. (पोङ्गियपार्क्कडल् पळ्ळिकोळ्) अयि स्पृहणीय परभृत! उत्तरङ्गं क्षीरार्णवमधिशयानं भगवन्तं समाश्लेष्टुकामाया मम स्तनयुगं कुतूहलभूम्ना विजृम्भमाणं सत् बत! प्राणान् श्लथयति। अस्यामव-

स्थायां त्वं निगूढमवतिष्ठसे । किमिदं युक्तम्? चारुसुदर्शनपाञ्चजन्यकौमोदकीभूषितहस्तं भगवन्तं यदि त्वमिहाह्वयेस्तर्हि महाधार्मिकस्स्याः ॥ .... (७)

८. (शार्ङ्गम् वळैयवलिक्कुम्) स्वादुफलभरितरसालोपवनेषु नवकिसलयखादनतत्पर परभृतशाव ! शार्ङ्गधन्वा परमचतुरो भगवान् प्रणयधारास्वपि भृशमवगाढः । आवाभ्यां मिथः कृतं रहस्यसंकेतम् आवामुभावेव विद्वः । दवीयांसं तं भगवन्तं यदि त्वमतिशीघ्रमिहाह्वयेथाः तर्हि तत्सविधे मया करिष्यमाणानां कृत्यविशेषाणामवलोकनं ते परमप्रयोजनं भविष्यति ॥ .... (८)

९. (पैङ्गिळिवण्णन् शिरीदरन्) स्पृहणीय प्रभोज्ज्वल भृङ्गझङ्कारसंकुलवनराजिविहारिन् कोकिल ! सावधानमिदमाकर्णयेथाः । चारुतरशुकशावोपमेयश्रीधरसमाख्यायां वागुरायामहं बद्धाऽस्मि । शङ्खचक्राङ्कितपाणितलस्य तस्यात्र समानयनं वा, मदीयकनकमयकरवलयसमाहरणं वेत्येतद्द्वितये अन्यतरस्य करणं तवावर्जनीयम्, यद्यत्रैवोपवने तव विजिहीर्षा स्यात् । [टिप्पणी । लोके विकल्पा हि विरुद्धकोटिद्वयावगाहिनः प्रथन्ते । अत्रत्ये विकल्पे विरुद्धकोटिद्वयमस्ति वेति विमर्शनीयम् । भगवतोऽत्र समानयनं गोदायाः कनकमयकरवलयसमाहरणं चेत्युभयमपि न विभिन्नम् ! गोदायाः करवलयसमाहरणं नाम शरीरकार्श्यापनोदनमेव । तच्च भगवतस्समानयनमन्तरा नोपपद्यत इति तदिदमुभयमविशेषमेव । तथा चात्रत्ये विकल्पे विषमकोटिद्वयं नैवेति सुवचम् । यमसविधे सावित्र्या उक्तिचातुर्यमिव इदमपि विलक्षणोक्तिचातुर्यमिति मन्तव्यम् ।] .... (९)

१०. (अन्नुलहमळन्दानैयुहन्दु) हे कोकिल ! पुरा त्रैविक्रमक्रमकृताक्रमणत्रिलोके भगवति कैंकर्यं कर्तुमहं कुतूहलिनी । स तु भगवान् मां वञ्चयति । अथ मलयपवनशिशिरकिरणाभ्यामुत्पाद्यमानां व्यथामावेदयितुं नाहं प्रभवामि । सततमस्मिन्नेवोद्याने स्थित्वा मावधीर्माम् । अद्य यदि त्वं तव कूजितैर्नारायणमिह नानेष्यसि नूनमुपवनादस्मादुत्सारयेयं त्वाम् ॥ .... (१०)

११. (विण्णुरनीण्डडितावॆिय) विक्रम्य रोदसी समाक्रान्तवन्तं भगवन्तमच्युतं कामयमानया, 'भो कोकिल ! सिन्धुसवर्णं मम वल्लभं मत्साक्षात्कारयोग्यमिहाह्वय' इत्युक्तवत्या च वैदिकाग्रेसरालंकृतधन्विनव्यनगराभिनाथभट्टनाथयोगिनो दुहित्रा गोदयाऽभिहिता इमाः परममधुरदिव्यगाथाः ये कीर्तयन्ति, ते श्रीमदष्टाक्षरमहामन्त्रानुसन्धानफलभागिनः स्युः ॥ (इति फलकीर्तनेन समापितमिदं दशकम् ।) ... (११)

इति श्रीगोदासूक्ते पञ्चमदशकविवर्तस्समाप्तः ॥

षष्ठं सूक्तम्— वारणमायिरम् ॥

— अवतारिका —

अधस्तनदशके कोकिलप्रार्थनापदेशेन स्वाभिनिवेशभरमसमाभ्यधिकं प्रकाशितवत्या गोदादेव्याः कथंचिदात्मधारणं दित्सुः परमः पुमान् दीनबन्धुः कृष्णकिशोरो विलक्षणस्वप्नानुभवप्रदानेन समाश्वासनमकार्षीत् ।

पाणिग्रहणसन्नाहतः प्रभृति शेषहोमावसानमङ्गलस्नानपर्यन्तां चर्यां स्वप्नतोऽनुभूतवती गोदा प्रभाते स्वसखी सविधे सर्वं तत्सुविशदमभिदधे । तदिदं निबद्धमस्मिन् दशके । असंख्येयैर्मत्तवारणैः परिवृतस्सन् नन्दसूनुर्नारायणो मदभिमुखस्समायातीति, हिरण्मयाः पूर्णकुम्भास्तत्रतत्र विन्यस्ता इति, सर्वतश्च क्रमुकफलकदम्बककदलीस्तम्भवृन्दतोरणमालिकाद्यपरिमितविविधालंकाराः कृता इति, श्वो भावि विवाहमहोत्सव इति सर्वतः प्रथने सति सर्वालंकारालंकृतवैवाहिकमण्डपसविधे गोविन्दस्समायात इति, वरपक्षीया इन्द्रादयस्सर्वेऽपि सुपर्वास्समुपस्थितास्सन्तो वैवाहिककार्यवर्गनिर्वाहनिरतास्सन्तीति, ननान्दा दुर्गादेवी मम मन्त्रवासस्संवेष्टनपरा भूत्वा दिव्यकुसुमधारणमप्यचीकरदिति, शिष्टाग्रेसरा वैदिकोत्तमा ब्राह्मणवरिष्ठा नानादिगन्तेभ्यस्तीर्थविशेषान् समानीय समङ्गलाशासनं संप्रोक्षन्निति, कृष्णस्य मम च प्रतिसरबन्धमङ्गलं निरवर्ततेति, बह्व्यस्तरुण्यो मङ्गलदीपान् सौवर्णकलशांश्च भृत्वा समागच्छन्तीति, मथुराधिनाथो मधुसूदनो भगवान् पादुकाढ्यपादारविन्दस्सन् ध्वनिविशेषमुल्लासयन्नुपैतीति, मुरजादिषु वाद्येषु घोष्यमाणेषु शङ्खनादे च समुज्जृम्भमाणे माधवो मत्पाणिमग्रहीदिति, वैदिकवरेण्येषु पुरुषसूक्तोपनिषदादिपारायणपरायणेषु माधवस्समन्त्रकमग्निकार्याणि निर्वर्त्य अथ मत्पाणिं गृह्णन् होमाग्निं प्रदक्षिणीकृतवानिति, अश्मारोहणमपि सुष्ठु संपन्नमिति, लाजहोमोऽपि यथायथमनुष्ठित इति, माङ्गलिकालंकारमयीषु रथ्यासु महागजशिरसि निषद्य परिभ्रमणपूर्वकं दम्पत्योरावयोर्मङ्गलस्नपनमहोत्सवोऽपि संपन्न इति च सर्वमिदं स्वप्नानुभववृन्दमतिमधुरगाथाभिराविष्क्रियत इह ॥

तथाचैतद्दशकसारांशसंग्राहकश्लोक एष इहानुसन्धेयः—

मत्तानां वारणानामयुतमुपनयन् माधवो नन्दसूनुः
नानालङ्कारचित्रं निजगृहममरैस्साकमिन्द्रादिभिश्च ।
आगत्याम्नायघोषैस्सह च मुरजशंखादिनादैश्च पाणिं
जग्राह स्वप्नकाले हरिरिति कथयामास षष्ठेऽत्र गोदा ॥

१. (वारणमायिरं शूळ) अयि सखि! सकलशुभगुणगणभरितः श्रीमन्नारायणः वारणानां सहस्रेण परिवृतस्सन् प्रादक्षिण्येन समायातीति वाद्यघोषादिभिरवधार्य पुरतस्सौवर्णकुम्भान् निधाय कृत्स्नेऽपि नगरे तोरणस्तम्भप्रतिष्ठापनं संपन्नम् , तदिदमहं स्वप्नतोऽन्वभवम् ॥ ... ... (१)

२. (नाळै वदुवैमणम्) गोदाया गोविन्दस्य च श्वः पाणिग्रहणमहोत्सव इति मुहूर्तसंविधाने कृते सगुच्छक्रमुकानोकहप्रतिष्ठापनालंकृतवितानिकाया अधस्तात् नरहरिर्माधवो गोविन्द इत्यभिधाभिराम्नातः कोऽपि युवा प्रविष्टः ; तदिदं स्वप्नतोऽन्वभूवं सखि! ॥ ... ... (२)

३. (इन्दिरनुळ्ळिट्टदेवर्) वासवप्रभृतिसुरसमुदायास्सर्वेऽपि समागत्य मां कृष्णकलत्रतयाऽभिभाषमाणा वैवाहिकसंमन्त्रणानि चाकुर्वत । अथ ननान्दा दुर्गादेवी मन्त्रवाससा मामलंकृत्य पुष्पधारणं चाचीकरत् ; तदिदं स्वप्नतोऽन्वभूवं सखि! ... ... (३)

४. (नात्तिशैत्तीर्तङ्गोणन्दु) ब्राह्मणाशिष्टा भूयांसो दिशां चतुष्टयादपि पावनानि तीर्थानि समानीय संप्रोक्ष्य स्वस्तिवाचनमन्त्रांश्च उच्चैरुद्घुष्य पुष्पमालालंकृतभुजेन परमपावनेन दामोदरेण सह मां संयोज्य प्रतिसरबन्धमचीकरन् ; तदिदं स्वप्नतोऽन्वभवं सखि ! ॥ ... ... (४)

५. (कदिरोळिदीपम्) सुन्दर्यो बालवनिताः जाज्वल्यमानान् मङ्गलदीपान् हैमकलशांश्च करतलेषूपगृह्य समागच्छन्त्याभिमुख्येन । तदात्वे मथुराधिनाथो वासुदेवः पादुकापरिकर्मितपादतलः सर्वतोऽपि गभीरनिनदमुत्पादयन्नुपागतः ; तदिदं स्वप्नतोऽन्वभवं सखि ! ॥ .... (५)

६. (मत्तळं कोट्ट) अयि सखि ! मृदङ्गध्वनिरतिमनोहरः शङ्खध्वनिश्च परमविलक्षणः श्रुतः । अस्यामवस्थायां मधुसूदनो भगवान् मौक्तिकमालालंकारभासुरवितानच्छायायामुपागत्य मम पाणितलं परिगृहीतवानहो ! तदिदं स्वप्नतोऽन्वभवम् ॥ ... ... (६)

७. (वायुनल्लारूनल्ल) अयि सखि ! वेदाध्ययनविचक्षणवैदिकाः श्रुतिसुभगवेदराशीनुच्चार्य वैदिकक्रियाकलापानुगुणमन्त्रोच्चारणपूर्वकं कुशकाशपरिस्तरणं चाकलय्य समिधो जुह्वति । तदात्वे मदमुदितमातङ्गसन्निभो भगवान् मम पाणिं गृह्णन् अग्निवेदीं परिक्रामति ; तदिदं स्वप्नतोऽन्वभवम् ॥ ... (७)

८. (इम्मैक्कुमेळ्ळ्) अयि सखि ! वर्तमाने जन्मनीव सर्वेष्वपि जन्मसु अस्माकं शरण्यभूतो भगवान् नारायणः परमसुन्दरेण स्वकीयेन पाणितलेन मम पादं परिगृह्य अश्मारोहणमङ्गलमाचरति । तदिदं स्वप्नतोऽन्वभूवम् ॥ .... (८)

९. (वरिशिलै वाण्मुहत्तु) अयि सखि ! विलक्षणप्रभाविभासुरा मम सोदरास्समागत्य जातवेदसं सुष्ठु प्रज्वाल्य तत्पुरतो मामवस्थाप्य नरहरेरच्युतस्य भगवतो हस्तोपरि मद्धस्तं विन्यस्तं कृत्वा लाजहोममचीकरन् । तदिदं स्वप्नतोऽन्वभूवम् ॥ .... (९)

१०. (कुङ्कुममप्पि) अयि सखि ! घुसृणकर्दमं शिशिरपाटीरपङ्कं च मे वपुष्यभिलिप्य माधवेन सह हस्तिनि वीथीपरिभ्रमणोत्सवमारचय्य मङ्गलस्नानमथाचीकरन् ; तदिदं स्वप्नतोन्वभूवम् ॥ (१०)

११. (आयनुक्काह) वैदिकोपगीतयशसो धन्विनव्यनगरीशितुर्भट्टनाथमुनेर्दुहित्रा गोदया स्वात्मनाऽनुभूतं गोपालकृष्णपाणिग्रहोत्सवगोचरं स्वप्नानुभवमधिकृत्य कीर्तितमिदं विशुद्धदिव्यद्राविडगाथादशकमधीयानास्सन्तो विलक्षणसंततिसमृद्धास्संमोदेरन् (इति फलकीर्तनेन समापितमिदं दशकम्) ॥ .... (११)

इति श्रीगोदासूक्ते षष्ठदशकविवर्तस्समाप्तः ॥

सप्तमं दशकम्— करुप्पूरं नारुमो ॥

— अवतारिका —

इतः प्राक्तने दशके गोदादेव्याः परमानन्दसंदोहमयोऽतिविलक्षणोऽनुभवो यद्यपि संपन्नः, तथाऽपि हन्त ! स्वप्नमात्रविश्रान्तस्स समभूदिति जागरणानन्तरं महतो मनःखेदस्य संभावितत्वेन तथा नाम खेदमतिशयितमापद्यमाना गोदा "हा हन्त ! दैवेनाहं सुबहु विप्रलब्धा ह्यभूवम् ; स्वप्नानुभवमात्रं हि सर्वं व्यतीतम् ; एतादृशे विप्रलम्भे वा विदग्धस्स भगवान् । अस्तु तावत् । किमेवमेव स सर्वानपि वञ्चयति ? उत यं कमपि वा जनं पारमार्थिकानुभवप्रदानेन प्रहर्षयति ?" इति हृदि पर्यालोचयन्ती तस्य वामपाणितले नित्यनिवासनन्दथुशाली परमभाग्यसंदोहमयः पाञ्चजन्यो निरन्तरं तदीय दिव्याधरामृतास्वादनेन निर्विशतीति निध्यायन्ती तदीयमप्रतिमभाग्यपरिपाकमधिकृत्य एकतस्संप्रहृष्यन्ती अन्यतश्चाभ्यसूयन्ती भृशं तमेव शङ्खमनारतमचिन्तयत् । भावनाप्रकर्षस्तु तमिमं पाञ्चजन्यं पुरतः प्रत्यभासयत् । तथा नाम प्रतिभासमानं तं संबोध्य भो भाग्यनिधे ! भगवतो नन्दसूनोर्दिव्याधरामृतमजस्रमास्वादयसि खलु ; तस्याधरस्य सौरभं तद्गतामृतस्य सौवादवं च कीदृशमस्ति ? कथय मे मनाक् ; श्रवसाऽपि वाऽहं श्रुत्वाऽभिनन्देयम् । हा शङ्ख ! त्वं तु लवणार्णवेऽजनिष्ठाः ; पञ्चजनाख्यस्य दैत्यस्य वपुष्यभ्यवर्धथाः ; ईदृशोऽपि सन् भगवतः पाणितलमधिरुह्य आसुरप्रकृतीनामन्तःकरणविदारणं निनदं वितनोषि । अलभ्यलाभः खल्वयं तव । दामोदरस्य हस्ततलं निरन्तरमलंकृत्य तत्कर्णमूले रहस्यमुपदिशन्निव भासमानस्त्वं अवाङ्मनसगोचरविभवशाली ननु । त्वदीयजननभवने त्वया सह जातानि वस्तूनि सन्ति नाम सुबहूनि । तानि पदार्थतयाऽपि गणयन्तो न केऽपि सन्ति । एकाकिनस्तवैव खलु भाग्यमद्वितीयमिन्धे । जगति तेते दवीयांसि देशान्तराणि गत्वा पुण्यतीर्थविगाहनपरिश्रममधिकमनुभवन्ति । त्वं तु तथा परिश्रमलेशमप्यननुभूय भगवत्पाणितल एव नित्यनिवासभाग्यभाजी सन् असमाभ्यधिकतीर्थावगाहनसुकृतम् अनिशमासादयसि भोः । अरविन्दमधिष्ठाय सदा मधु पिबतो मरालस्येव वासुदेवहस्तारविन्दमध्यासीनस्य तदधरामृतपानमत्तस्य च तव संपदतीव खलु विलक्षणा। तव नित्याशनं तु भगवदधरामृतम् : नित्यनिवासश्च तद्धस्तारविन्दे ; ईदृशं त्वां प्रति मादृशो ललनाः कथमिव न दूयेरन् ? * एकः स्वादु न भुञ्जीत * इति नीतिं च न जानासि किमहो त्वम् ? सर्वथाप्यन्याय्यं खलु ते चरितम् । न केवलमहमेकाकिनी तदधरामृतास्वादनलोलुपा । षोडशस्त्रीसहस्राणि हि सन्ति तथा नाम । सर्वसाधारणं परमभोग्यवस्तु यदि त्वमेकाकी भुङ्क्षे, अथ कथमितरास्सुदृश्यो न प्रस्पर्धेरन् ?" इत्येवमुच्चावचभाषितैरात्मीयामसूयां च प्रख्यापयतीह गोदादेवी ॥

तथा चैतद्दशकसारांशसंग्राहकमिदं पद्यम्—

स्वाप्नीं दिव्यानुभूतिं हृदि मुहुरनुचिन्त्याथ नन्दात्मजस्य
श्रीमत्कृष्णस्य वक्त्रे रसभरमनघं सौरभं चातिभोग्यम् ।

पृच्छन्ती पाञ्चजन्यं तदनुभवकलादेशिकाग्रेसरं स्वाम्
ईर्ष्यां प्रख्यापयन्ती कथयति मधुरं सप्तमं सूक्तमार्या ॥

१. (करुप्पूरम् नारुमो) अयि गम्भीरधवलपाञ्चजन्य! कुवलयापीडमत्तवारणदन्तभञ्जनविचक्षणस्य माधवस्य वाचस्सारस्यं सौरभ्यं च साभिनिवेशमहं भवन्तं पृच्छामि। कथय तावदुत्तरम्। किं तस्य प्रवालसन्निभदिव्याधरः कर्पूरसन्निभसौरभशाली? उत कमलकुसुमसन्निभसौगन्ध्यशाली? किमहो विलक्षणमाधुर्यशाली? कथय तावत् ॥ ... ... (१)

२. (कडलिल् पिरन्दु करुदादु) अयि चारुपाञ्चजन्य! त्वं खलु लवणार्णवे जनित्वा ततः पञ्चजनाभिधानस्य दैत्यस्य वपुषि वृद्धिं प्राप्तवानसि। जन्मभूमिवृद्धिभूम्योरवस्थितावेवं स्थितायामपि त्वं भगवतः पाणितलात्मकमुत्तुङ्गस्थानमधिरुह्य वैरिव्रातहृदयभेदननिपुणघोषविजृम्भणनिरतो विराजसे। महत् खलु ते भाग्यम् ॥ ... ... (२)

३. (तडवरैयिन्मीदे) अयि रमणीयमहत्तरपाञ्चजन्य! पूर्णिमायामुदितं शारदं चन्द्रमसं तुलयन् भवान् उत्तरमधुराधिनाथवासुदेवपाणितले नित्यवासभागी विराजते। तवायं विभवो विलक्षणः ॥ ... (३)

४. (शन्दिरमण्डलम् पोल्) 'चन्द्रमण्डलमेव दामोदरस्य पाणितलमध्यास्ते' इत्युल्लेखयोग्य पाञ्चजन्य! तत्र भगवतो हस्ते निरन्तरवासमासाद्य तस्य कर्णमूले रहस्योपदेशं कुर्वन्निव विराजसे। हन्त! महेन्द्रोऽपि न भवति त्वत्तुल्यविभवः ॥ ... ... (४)

५. (उन्नोडुडने) भोः पाञ्चजन्य! भवता सह जलनिधौ कृताधिवासानन्यान् पदार्थान् वस्तुत्वेनाऽपि हन्त! न केऽपि मन्वते; सत्यं भवानेक एव खलु सर्वस्वामिनो मधुसूदनस्य वागमृतं नित्यमुपभुङ्क्ते: महत् खलु भाग्यमेतत्ते ॥ ... ... (५)

६. (पोय्त्तीर्तमाडादे) यमलार्जुनभञ्जनविचक्षणस्य भगवतः करतलमधिरुह्य विराजमान भोः पाञ्चजन्य! सुदूरतो गत्वा गङ्गायमुनादिपुण्यतीर्थावगाहनश्रमावकाशमन्तरेण लोकोत्तरतीर्थभूतं पुण्डरीकाक्षस्य वागमृतरूपं दिव्यतीर्थमेव नित्यमवगाहसे: त्वं खलु कृती ॥ ... ... (६)

७. (शेङ्गमलनाण्मल मेल्) सद्योविकस्वरकमलकुसुमे निषद्य मधु पिबन्तं राजहंसं सारयन्निव सरसिजनयनस्य नीलमणिनिभस्य वासुदेवस्य करतलमधिरुह्य शयान, भोः पाञ्चजन्य! शङ्खतल्लज! तव खलु विभवो लोकोत्तरः ॥ ... ... (७)

८. (उण्बदु शोल्लिल्) भोः पाञ्चजन्य! तव तु नित्याशनं त्रिविक्रमस्य भगवतो वागमृतम्। शयनस्थलं तु तस्यैव सागरसवर्णस्य भगवतः पाणितलम्। एवं नाम अनन्यसामान्यं दिव्यानुभवं नित्यमनु-

विन्दन्तं त्वामधिकृत्य स्त्रीवर्गास्सर्वेऽपि महान्तमाक्रोशमाचरन्ति। (किमिति ?) अयमस्मदीयजीवनसर्वस्वापहारीति। एवं स्त्रीजनविषादनमन्याय्यमेव खलु तव॥ ... ... (८)

९. (पद्निारामायिरवर्) अयि महत्तरैश्वर्यभरित पाञ्चजन्य! षोडशस्त्रीसहस्रप्रतीक्ष्यमाणं माधवस्य वागमृतं हन्त! त्वमेकाकी खल्वेवमश्नासि। कथमहो त्वया सह न प्रस्पर्धेरन्नितरे जनाः ? ... (९)

१०. (पाञ्चशन्नियस्सै) भगवता पद्मनाभेन सह संनिकृष्टसंबन्धशालित्वरूपभागधेयभासुरं पाञ्चजन्यमुद्दिश्य यशस्विभट्टनाथयोगीन्द्रतनयया गोदया कथितमिदं दशकं सविमर्शं ये कीर्तयन्ति, तेऽपि भगवत्सन्निकृष्टा भवितारः (इति फलकीर्तनेन समापितमिदं दशकम्)॥ ... ... (१०)

इति श्रीगोदासूक्ते सप्तमदशकविवर्तस्समाप्तः॥

अष्टमं सूक्तम्— विण्णीलमेलाप्पु॥

(श्रीवेङ्कटाद्रीशं प्रति मेघसंदेशात्मकम्)

— अवतारिका —

गोदादेव्या भगवद्विरहव्यथा क्रमशोऽभिववृधे। विरहिजनानामरुन्तुदो वर्षाकालश्च समुपनतः। मेघास्तु विद्युद्विलसितस्तनितोपबृंहणादिसनाथा अतिकोमलदर्शना दृष्टिपथातिथीबभूवुः। पुरा संश्लिष्य अथ विश्लिष्य गतवता भगवता "वर्षासु पुनस्समागमिष्यामि" इति यदुक्तमासीत् तदधुना स्मृतिपथमुपयातं गोदायाः। नीलमेघनिभस्सोऽपि तैर्मेघैस्सह समागतस्स्यादिति गोदा समभावयत्। अप्राक्षीच्च "भो मेघाः! अस्मत्स्वामी च समागतः कच्चिदि"ति। ते तु न किञ्चिदुत्तरमुदैरिरन्। नापि स भगवान् ददृशे मुकुन्दः। अथ च तेषामेव तोयदानां दूततया प्रेषणं युज्यत इत्यध्यवस्यन्ती, "भोः कथयत मद्दशां श्रीवेङ्कटाद्रीशसविधे" इति प्रार्थयितुमुपचक्रमे। तदिदमभिधीयते दशकेऽस्मिन्।

अत्र च मेघापदेशेन महाभक्ताग्रेसरा एव विवक्षिता वेदितव्याः। (१) मेघो यथा क्षारमपि सागरसलिलं स्वयं निपीय स्वादुः वर्षति, तथा श्रुतिसागरगतानर्थान् दुरवगाहानपि स्वादिष्ठानारचय्य सर्वोपभोग्यतया प्रतिपादयन्ति महागुरवः। यथोक्तम् * स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् * इति। (२) मेघो यथा तत्रतत्र सञ्चरन् वर्षति, तथा महान्तोऽपि क्षेत्रतीर्थयात्रापदेशेन तत्रतत्र पर्यटन्तस्सन्तस्सर्वोपजीव्यानर्थविशेषानभिवर्षन्ति। (३) जीमूतो यथा निम्नस्थलानि वृष्ट्या परिपूरयन्ति, तथा ज्ञानिनोऽपि सदुपदेशवृष्टिभिर्नीचानपि ज्ञानपरिपूर्त्या समुत्तुङ्गान् विदधति। (४) जलदस्तु सर्वदाऽपि न वर्षति; अपि तु कालविशेषेष्वेव। एवं गुरवोऽपि समयविशेषेष्वेव सदुपदेशनिष्णाता भवन्ति। (५) प्राप्तकालेषु यदि न वर्षति पर्जन्यस्तर्हि जगति नानाविधाः पीडास्संभवन्ति। एवं समयेषु सदाचार्य सदुपदेशविरहे सति देहात्मभ्रम–स्वस्वातन्त्र्यभ्रम—अन्य

शेषत्व भ्रम—स्वरक्षणे स्वान्वययोग्यताभ्रम—अबान्धवेषु बन्धुत्वभ्रम—विषयप्रावण्यादिरूपाः पीडा उत्पद्येरन् । (६) अत्यधिकं वर्षन्तोऽपि वलाहकाः कदाऽपि तृप्तिं नाधिगच्छन्ति ; नापि प्रत्युपकारप्रतीक्षिणो भवन्ति । एवमाचार्या अपि अधिकाधिकमर्थविशेषोपदेशनिरता अपि सन्तो न पर्याप्तिमधिगच्छन्ति, नापि प्रत्युपकारं प्रेप्सन्ति । अनन्यप्रयोजनास्सन्त उपर्युपर्युपदेशानुकूलसमयप्रतीक्षिणस्समुत्कण्ठिता एव भवन्ति । (७) तोयदाः कदाचित्कतिपयान् पयःकणान् विकीर्य विरमन्ति ; कदाचन तु अलमलमित्युक्तिं जनयन्तीं महावृष्टिमुत्पाद्य विस्मापयन्ति । एवं प्राज्ञपुङ्गवा अपि कदाचित्कर्णमूले मन्त्रोपदेश इति कानिचिदक्षराण्युपदिश्य विरमन्ति । अन्यदा तु श्रुतिस्मृतीतिहासपुराणोभयवेदान्तरहस्यसारार्थरत्नामृतानि उद्वेलं सुचिरमुपदिशन्तो हन्त केयं महावृष्टिरिति विस्मयविवशान् विदधति श्रोतृजनान् । (८) वलाहकैः कदाचित्कुत्रचित्सिच्यमानं सलिलं तप्तायःपिण्डे क्षिप्तं जलमिव सद्य एव विन्दत्यसत्कल्पताम् ; कदाचिदन्यत्र सिच्यमानमुदकं मुक्ताफलात्मना परिणमति । एवमाचार्यैः कुत्रचिदुपदिश्यमाना अर्था अनवधानविस्मरणादिभिरसत्कल्पतामाप्नुवन्ति । अन्यत्र तु मेधाविष्वनवधिं पुष्टिमनुविन्दन्ति । मुक्ताफलवत् श्रीवचनभूषण-उपदेशरत्नमालादिनामभिर्भूषणतामुपयन्ति च । (९) तोयदप्रत्तं तोयं सरित्कूपसरस्यादिषु प्रविष्टं सत् सर्वोपजीव्यं भवति । अन्यत्र प्रविष्टं तत् ग्रहीतुमप्ययोग्यं भवति । एवमभिज्ञैरधिकारिषु सत्पात्रेषु समुपदिष्टा अर्थाः * पूर्वे पूर्वेभ्यो वच एतदूचुः * इत्याम्नातरीत्या सदुपदेशपरम्परायामुपजीव्या भवन्ति । अनधिकारिषु निविष्टास्तु ते निष्प्रयोजना भवन्ति हन्त । (१०) जीमूता अनन्यगतिभिस्सस्यादिभिस्सततं प्रतीक्ष्यमाणा भवन्ति ; त एव अर्कक्षुपादिषु वर्षन्तः * त्वयि वर्षति पर्जन्य ! सर्वे पल्लविता द्रुमाः । अस्माकमर्कवृक्षाणां पूर्वपत्रेषु संशयः ॥ * इत्युक्तरीत्या अपायप्रदा भवन्ति । एवं सदाचार्यैरनुगृह्यमाणास्सदर्थराशयोऽप्यनन्यगतीनां सच्छिष्याणां सादरं प्रतीक्षणार्हाः, इतरेषां तु * गाथा ताथागतानां गलति गमनिका कापिली क्वापि लीना * इत्युक्तरीत्या प्रणाशप्रदाश्च भवन्ति । एवमेवं बहुधा निर्वाह्यैस्साम्यप्रकारैरिह मेघत्वेन विवक्षितास्सदाचार्या एवेति सुगमम् ।

दशकेस्मिन् भगवत्पादारविन्दघटकाग्रणीर्भगवान् भाष्यकारो रामानुजो यतिराज एव मेघत्वेन संबोध्यत इति एकैकस्यामपि गाथायां विन्यस्तैर्विशेषणैस्सुगमम् । तत्तु क्रमशस्तत्तद्गाथासूपपादयिष्यते । एतद्दशकसारांशसंग्राहकमिदं पद्यम् :—

तत्ताद्दिव्यभोगानधिगमजमहादुःखनिर्विण्णचित्ता
जीमूतान् पूर्णगर्भान् नयनहररुचो वीक्ष्य संबोध्य चैनान् ।
संश्लिष्येद्वेङ्कटेशो यदि कुचघुसृणक्षोदलोपं दिशन्मे
जीवेयं ब्रूत तस्मा इदमिति गदति स्माष्टमे दिव्यगोदा ॥

१. (विण्णीलमेलाप्पु) व्योम्नि विस्तृतवितानसोदरा भो घनाः ! स्वच्छतीर्थप्रवाहशालिश्रीवेङ्कटाद्रिनाथो भगवानपि किं युष्माभिस्सह समाययौ ? चूचुकनिष्यन्दिनीभिरश्रुधाराभिरवसीदन्तीमिमां स्त्रियं (माम्) एवं नाम व्यथयति सः ; किमिदं तस्य महिम्नोऽनुरूपम् ? तदिदं तमेव पृच्छत ॥ [अस्यां गाथायां * व्योम्नि

विस्तृतवितानसाधर्म्यं यदभिधीयते मेघे, तेन दूतत्वेनात्र विवक्षितस्य भगवद्रामानुजमुनेरवताररहस्यमवबोध्यते। आदिशेषावतारो हि रामानुजः। स एव हि शेषः पुरा मथुरातो निशीथे घनवृष्टिकाले वसुदेवेन व्रजं नीयमानस्य कृष्णशिशोर्वितानभावमाससाद। तथा चात्रत्यो वितानशब्द आदिशेषव्यञ्जकस्सन् तदपरावताररूपतां यतिराजे स्फोरयतीति बोध्यम्। * तोड्डुत्तु मेलू वितानमाय पौवनीररावणै * इति तिरुचन्दविरुत्तगाथयाऽपि शेषस्य वितानशब्दवाच्यता वेदितव्या॥ .... (१)

२. (मामुत्तनिदिशोरियुम्) मुक्ताफलानि च निधींश्च वर्षन्तो भोः पयोदाः! वेङ्कटाद्रिनिवासिना श्यामसुन्दरेण भगवता संदिष्टा कच्चिदस्ति काऽपि वार्ता? अन्तः प्रसृमरकामाग्निदन्दह्यमानाऽहं हन्त! रात्र्या च मलयपवनेन चातिमात्रं व्यथां प्रापिताऽवसीदामि; आः किमिदमुचितं नाम॥ [अत्र मुक्ताफलानां निधीनां च वर्षुकत्वं यदभिहितं मेघे, तेन चावबोध्यते– भगवान् भाष्यकारो नवनिधिकल्पानि नवग्रन्थरत्नानि मौक्तिककल्पान् दिव्योपदेशसूक्तिनिकरांश्च सृजति स्मेति। यथा निधयो नव, तथा भगवद्रामानुजदिव्यग्रन्थरत्नान्यपि नव हि॥] .... (२)

३. (ओलिवण्णम् वलैशिन्दै) अयि दयाघना घनाः! मम सौन्दर्यं लावण्यं वलयततिः हृदयं निद्रा चेत्येतत्सर्वमपि मम दैन्यमवेक्ष्य मां विहाय दूरतोऽपससर्प। शिशिरनिर्झरालंकृतवेङ्कटाद्रीशितुर्गोविन्दस्य गुणगणानुसन्धानत एवाहं प्राणधारणप्रवीणाऽस्मि॥ [अत्र, मेघे दयाघनत्वाभिधानं भगवद्रामानुजमुनेः परमकृपैकतानत्वं द्योतयति। रामानुजमुनेरन्ये पूर्वाचार्या अनुवृत्तिप्रसंन्नाचार्याः, असावेक एव केवलं कृपामात्रप्रसन्नाचार्य इति सर्वजनीनप्रसिद्धिसद्भावादस्यैवाचार्यसार्वभौमस्येह विवक्षितत्वमतितरां स्पष्टम्। श्रीमद्वरवरमुनीन्द्रैरप्युपदेशरत्नमालायाम् ॐ ओराण् वलियाय् ॐ इत्यनया गाथया विशदीकृतमस्य गुरुवरस्य कृपाघनत्वम्॥]

४. (मिन्नाहत्तेलुहिन्नमेहङ्गाल्) भो विद्युद्भास्वरदिव्यदेहा मेघाः! श्रीवेङ्कटाद्रिनिलयस्य निजवक्षस्थलाहतलक्ष्मीकस्य भगवतस्सविधे निवेदयत स स्वकीयेन वक्षसा मम कुचकुड्मलसंश्लेषं क्रियादिति मे समुत्कण्ठा समेधत इति। [अत्र विद्युद्भास्वरदिव्यदेहत्वं यदभ्यधायि मेघे, तेन बहवो विशेषा इह स्फोर्यन्ते। वर्षुकवलाहकेष्वेव विद्युद्भानम्, न तु साधारणमेघेष्विति प्रसिद्धम्। सन्ततमर्थविशेषरूपदिव्यामृतप्रधानैकनिरतो यतिपतिरिति कथितं भवति। किञ्च, दिव्यवपुषि विद्युद्विलसितकथनेन भगवति रामानुजे सौदामनीसवर्णसौवर्णयज्ञसूत्रमानं कथितं भवति! * जयति यतिपतेर्वक्षसि ब्रह्मसूत्रम् * उपवीतिनमूर्ध्वपुण्ड्रवन्तम् * दण्डत्रयोज्ज्वलकरं विमलोपवीतम् * इति हि विशिष्य स्तुवन्ति भक्ताग्रेसराः। मतान्तरीययतीनां वेषादपि वैलक्षण्यमवश्यमभिधेयं हि। किञ्च, विद्युत्सन्निभकाषायाम्बरशालित्वमपि विवक्षितमिह सुवचम्। * काषायेण गृहीतपीतवसनेति देशिकोक्तिरिह ध्येया॥] .... (४)

५. (वान्कोण्डुकिलर्न्दॆलुन्द) अन्तरिक्षं समाक्रम्य समुदित्वरा भो मेघाः! श्रीवेङ्कटाद्रौ मधुस्यन्दिनः पुष्पनिकरानुपमर्द्य बृन्दशो वर्षन्तो भो मुदिराः! दृढतरनिशितनखैर्हिरण्यवक्षःकवाटविभेदनविशा-

रदो भगवान् स्वेनापहृतानि मदीयवलयानि यदि प्रत्यर्पयितुमिच्छति तर्हि तन्निगदत मह्यम् ॥ (शरीरकार्श्यमेव वलयापहारमिषेण कथ्यते । अपहृतवलयप्रत्यर्पणं नाम— शरीरकार्श्यापनोदनमेव । तच्च संश्लेषजन्यमिति संश्लेषस्यैवात्र विवक्षा वेदितव्या ।) अत्र, अन्तरिक्षं समाक्रम्य समुदित्वरत्वं मेघे कथ्यते । अन्तरिक्षपदमिह परमाकाशाख्यवैकुण्ठवाचि । भगवद्रामानुजदिव्यपादारविन्दानुबन्धविधुराणां दिव्यधामप्राप्तिकथाऽप्यसंभविनीति संप्रदायः । यतीन्द्रः स्वयमेव वैकुण्ठधाम वितरितुं प्रभविष्णुरित्यप्यनवद्यस्सिद्धान्तः । तथा च * अन्तरिक्षं समाक्रम्य समुदित्वर ! इत्युक्तिः स्वाधीनपरमपददातृत्वोक्तिपर्यवसितेत्यवसेयम् ॥) .... (५)

६. (शलम् कोण्डु किलर्न्देलुन्द) जलं गृहीत्वा सरभसं समुत्थिता भो वलाहकाः ! महाबलिसकाशान्महीमण्डलमायत्तीकृतवता भगवता सनाथे वेङ्कटाद्रौ निषद्य वर्षन्तो भो घनाः ! कीटविशेषोपभुक्तकपित्थफलवन्माम् अन्तस्सारविधुरामाकलय्य मत्तस्सर्वस्वापहारं कृतवतो नारायणस्य सविधे कथयत मम महतीं मनोव्यथाम् ॥ [जलग्रहणपूर्वकमुत्थितत्वं मेघे यथा प्रसिद्धं तथा भगवद्रामानुजेऽपि । काञ्चीपुर्यां शालकूपतीर्थं गृहीत्वा समुत्थितः खलु । तथा चोक्तं यतिराजसप्ततौ * दत्तं येन दयासुधाम्बुनिधिना पीत्वा विशुद्धं पयः काले नः करिशैलकृष्णजलदः काङ्क्षाधिकं वर्षति * इति । किञ्चात्र, द्राविडशब्दमर्यादयाऽवलोकने सति " छलं गृहीत्वा सरभसं समुत्थिते "त्यपि अनुवादो युज्यते । यादवप्रकाशसकाशे ब्रह्मविद्यामधीयाने रामानुजे वेदान्तार्थविषयका वादविवादास्तदा तदा बभूवुरुभयोः । अन्ततश्च असूयाप्रवृद्धया यादवस्य रामानुजजिघांसा समजनि । गङ्गायां निपात्य हननमपातकमित्यध्यवस्यन् प्रतस्थे सशिष्यगणोऽथ यादवः ! सह प्रस्थितेष्वन्तेवासिषु रामानुजार्यगोविन्दार्यावप्यन्यतमौ । गच्छत्सु चैवं सर्वेषु विन्ध्याटवीप्रान्ते यादवस्य छलं [कपटाभिप्रायम्] गृहीतवान् [ज्ञातवान्] रामानुजः । गृहीत्वा च सद्यः प्रतिनिववृत इति कथा प्रथिता । सैवात्र श्लेषतस्सुष्ठु व्यञ्जिता । छलग्रहणसमनन्तरमेव जलग्रहणमपि जातं रामानुजस्येति उक्तिचारुता चात्र वर्तते ॥] .... (६)

७. (शङ्गमाकडल् कडैन्दान्) शङ्खालंकृतमहोदधिमथनपटुना भगवता सह संबन्धसम्पन्ना भोः शिशिरपयोदाः ! श्रीवेङ्कटाद्रीशितुः पुण्डरीकाक्षस्य दिव्यपादारविन्दपरिसरे दास्या मम विज्ञप्तिरेषा विज्ञापनीया— यथा मम कुचतटलिप्तघुसृणपङ्कविलोपदायकं संश्लेषं यदि स सकृदपि वा कुर्यात्तदैव मे प्राणधारणं भवितेति ॥ [अस्मिन्दिव्यप्रबन्धे प्रथमदशकीय— अष्टमगाथायाम्, चतुर्थदशकीयप्रथमगाथायां च भगवच्चरणारविन्दपरिचर्यायामेव स्वकीयामतिशयिनीमुत्कण्ठामाविष्कृतवती सेयं गोदादेवी कथमिह स्तनसंश्लेषरूपे प्राकृतभोगे प्रकाशयत्यौत्सुक्यमिति काचन शङ्का भवेदिह । अत्रोच्यते ; अन्यापदेशमर्यादयैवात्र स्तनशब्दः प्रायोजि । भोगोपकरणभूतवस्तुवाची स्तनशब्दो भगवदनुभवोपकरणभूतां भक्तिसंपदमेवाचष्टे । स्तनयोः स्थाने ज्ञानभक्ती ग्रहीतव्ये । ज्ञानभक्तियुक्तानामेव परिपूर्णभगवदनुभवयोग्यतासंभवात् । स्तनयोः घुसृणपङ्कलेपलोपकाङ्क्षणं यदिहास्ति तस्य च हृदयमेतत्— ज्ञानभक्त्योः स्वाभाविकाकारः आरोपिताकारश्चेति आकारद्वितयमस्ति तावत् । भगवदनुभवैकविषयकत्वं स्वाभाविकाकारः । विषयान्तरविषयकत्वं तु आरोपिताकारः । तथा च आरोपिताकारस्य लोपो भूयादिति काम्यतेऽत्र । लोके स्तनयोर्घुसृणपङ्कलेपनमारोपिताकार एव हि । तेन च स्वाभाविकसुषमाच्छादनं भवति खलु ।

तथाऽत्र मांभूदिति कामना ननु युज्यते। किञ्च, रक्तवर्णचुरणक्षोदलोपप्रार्थनं च रजोगुणक्षपणप्रार्थनायां पर्यवस्यति। रजोगुणमेव यो न सहते तस्य तमोगुणान्वयासहिष्णुता कैमुतिकन्यायसिद्धा। एवं च शुद्धसात्त्विकज्ञानभक्त्यभिवर्धनमिह प्रार्थितं भवतीति न किञ्चिदवद्यम्। गाथायामस्यां महोदधिमथनपटुना सह संबन्धः पर्जन्ये कथितः। सुरेभ्यस्सुधां प्रदातुं सागरं ममन्थ भगवान् हरिः। तद्वास्यरूपसंबन्धः पर्जन्ये संगतः। * भीषाऽस्माद्वातः पवते, भीषोदेति सूर्यः * इत्याद्युपनिषदाम्नातप्रक्रियया वायुसूर्याग्नीन्द्रादीनामिव पर्जन्यस्यापि भगवदाज्ञावतंसित्वद्रढिम्ना तावदेव मुक्तिः। (अथ भगवद्रामानुजविवक्षायां तु) भूसुरेभ्यस्सकलभक्तेभ्यो ऽद्यापि भोग्यां वचस्सुधां प्रदातुं * निर्मथ्य श्रुतिसागरादित्युक्तरीत्या चतुर्वेदसागरमथनं कृतवतः पर्यायश्रीपतेः श्रीपराङ्कुशमुनेरनुबन्धित्वं रामानुजमुनौ वेदितव्यम्। * श्रीनाथवांघ्रिजरुजद्वयनित्यसेवाप्रेमाविलाशयपराङ्कुशपादभक्तमिति हि तदभिष्टुतिः प्रथते।] .... (७)

८. (काहॅलत्तेलुहिच्च) भो वेङ्कटाद्रिनिकेतना वर्षाकालसमुत्थिताः पर्जन्याः! समराङ्गणेषु समुपस्थाय विरोधिनिरसनं वितन्वानस्य तस्य महाप्रभोर्नामानि संकीर्त्य वर्षासु अर्कपलवदवशीर्यमाणां मामुद्दिश्य हन्त! चिरात्सकृदपि स्वकीयामनुग्रहमयीं फणितिं न खलु स प्रहिणोति॥ [अत्र, पर्जन्ये वर्षाकालसमुत्थितत्वकथनेन * अविवेकघनान्धदिङ्मुखे बहुधा सन्ततदुःखवर्षिणि। भगवन् भवदुर्दिने पथः स्खलितं मामवलोकयाच्युत! * इति श्रीयामुनाचार्यफणितिप्रक्रियया नित्यं निखिलैस्स्वयमनुभूयमाने सांसारिकदुःखवर्षाकाले तत्प्रशमनाय समुदितस्स भगवान् भाष्यकार इति बोध्यते। यद्वा * देवराज दयासिन्धो देवदेव जगत्पते!। त्वदीक्षणसुधासिन्धुवीचिविक्षेपशीकरैः। कारुण्यमारुतानीतैः शीतलैरभिषिञ्च माम् * इति श्रीकाञ्चीपूर्णमुनिना, * हस्तीश! दुःख्यमृतवृष्टिभिराभजेथाः * इति श्रीवत्साङ्कगुरुणा च प्रोक्तरीत्या प्रथिते भगवत्कटाक्षामृतवर्षाकाले तत्सन्धुक्षणाय समुत्पन्नोऽयं श्रीरामानुजकालमेघ इत्यपि सुवचम्॥ .... (८)

९. (मदयानै पोलेलुन्द) मत्तवारणवदुत्थाय दर्शनं दिशन्तो वेङ्कटाद्रिनिकेतना भो नीलजलदाः! फणिशयस्य भगवतो वार्ता काऽपि विद्यते कच्चित्?। सततमप्याश्रितानां शरणमिति प्रथितस्स भगवान् तां प्रथमामविगणय्य कामपि बालिकां (माम्) यदि हिनस्ति, हा बत! तमेनं स्त्रीनृशंसं न खलु लोकोऽभिनन्देत्॥ [अत्र भगवद्रामानुजमुनेर्मत्तवारणत्वेन कथनमतितरामौचित्यभरितम्। ऐतिह्यं चैतदिह स्मरणीयम्। पुरा कदाचिद्भगवान् भाष्यकारस्सह शिष्यवर्गैः श्रीवेङ्कटाद्रिमधिजगाम। तदात्वे तत्र स्थिता महान्तः पादारविन्दमूले प्रणिपत्य कांश्चिदर्थविशेषानुपदेष्टुमर्थयन्ते स्म। प्रार्थनां च तामुररीकृत्य गुरुवरो यतिपतिर्मन्त्ररत्नस्यार्थविशेषान् प्राधान्येनोपदिशन् मूलमन्त्रचरमश्लोकयोरप्यर्थं समगृह्णात्। अवसिते चास्मिन् मधुरललितोपदेशे श्रोतृष्वन्यतमोऽनन्तार्यः [अनन्दाल्वान्] समुत्थाय "द्राविडाम्नायेषु श्रीभूतयोगिनाऽनुगृहीते द्वितीयान्तादिदिव्यप्रबन्धे * पेरुहुमदवेलम् * इत्युपक्रमशालिनी या गाथा विराजते तस्या हार्दमाशयमचैव वयमवगन्तुं भाग्यमलभामहि" इति विज्ञाप्य, तस्या भूतयोगिसूक्तेरर्थं सुविशदमुपन्यास्थत्। तस्या गाथायास्संस्कृतविवर्तपद्यमस्मदीयमिदम्:—
स्रवन्मदजलः करी स्वदयितां पुरस्कृत्य सन् द्विपर्वसहितं मृदुं मधुरवेणुदण्डाङ्कुरम्। प्रगृह्य सविधस्थिते मधुनि

मेलयित्वाऽथ तां प्रभोजयति यत्र वै स खलु वेङ्कटाद्रिर्हरेः ॥ इति ! तत्तत्र शैलेषु चरन्तः करिणः करिण्यां प्रेमभूम्ना (पर्वद्वयविशिष्टम्) वेणुदण्डाङ्कुरमुत्खाय तं मधुनि मिश्रयित्वा करिणीं प्राशयन्तीति वस्तुस्थितिः । स्वभावोक्तिरियम् । एवमेव श्रीवेङ्कटाद्रिवर्णनेऽत्र श्रीभूतयोगिनाऽन्वग्राहि । अन्यापदेशगाथा सेयमिति महतां महामतीनां प्रतिपत्तिः । रामानुजमुनिरेवात्र करिवरत्वेन कथ्यते । अभिमता शिष्यमण्डली करिणीत्वेनापदिश्यते । खण्डद्वयात्मकं मन्त्ररत्नं [द्वयमन्त्रः] पर्वद्वयसहितमृदुमधुरवेणुदण्डाङ्कुरत्वेनाभिधीयते । मूलमन्त्रश्चरमश्लोकश्च सविधस्थितमधुरत्वेनोपवर्ण्यते । वस्तुतः श्रीमन्नारायणवदनारविन्दविनिर्गलितं मधु खलु तद्द्वितयम् । द्वयमन्त्रस्य तस्मिन्मधुनि संमिश्रणं नाम- मूलमन्त्रचरमश्लोकार्थसंवलितद्वयार्थवर्णनमेव । एवं भगवान् मधुरतरार्थवर्णनेनास्मानुग्रहीष्यतीति पुरैव प्रत्यग्दृशा समीक्ष्य भूतयोगी बभाषे– इति तावदनन्तार्योपन्यासससर्वस्वम् । एतेन च मत्तवारणत्वं भगवति रामानुजे सूपपन्नं वेदितव्यम् ॥] .... (९)

१०. (नाङ्कत्तिनणैयानै नन्नुदलाल्) विलक्षणललाटशालिनी, भगवदनुभवेषु सर्वप्रकारेष्वपि संसक्तस्य भट्टनाथमुनेरात्मजा गोदा नागेशयं वेङ्कटाद्रीशं कामयमाना मेघसन्देशविज्ञापनात्मकमिदं दशकं द्राविड्या गिरा समगिरत । तदिदं हृदि बिभ्राणा मुखे च कलयन्तो भागवता नित्यकिङ्करा भवितारो भगवतः ॥ इति फलकीर्तनेन समापितमिदं दशकम् ॥ .... (१०)

इति श्रीगोदासूक्ते अष्टमदशकविवर्तस्समाप्तः ॥

नवमं दशकम्— शिन्दुरच्चेम्पोडिप्पोल् ॥

— अवतारिका —

अग्रतो दृष्टिगोचरतां गतान् कालमेघान् संबोध्य 'यूयं श्रीवेङ्कटाद्रीशभगवदन्तिकं प्राप्य मामिकां दशां तत्सन्निधौ विज्ञाप्य तेन सह मां घटयत भो !' इति बहुधा प्रार्थयतेस्म गोदा प्राक्तनदशके । एवं नाम प्रार्थितास्ते तु मेघा अस्याः कामनामनिर्वर्त्य स्वकीयमेव कार्यं सुष्ठु चक्रिरे । सलिलवर्षणं हि स्वकीयं कार्यं मेघानाम् । तदेव ते सम्यगकार्षुः । सद्य एव सुबहूनि पुष्पाणि वर्षाकालोचितानि मुखं दर्शयितुमुपचक्रमिरे । साक्षाद्भगवन्तमेव दिदृक्षमाणायास्तस्यास्तद्दर्शनं तद्दिव्यावयवस्मारकवन्यकुसुमसंदर्शनं च महत्यै वेदनायै कल्पते स्म । न केवलं कुसुमानामेव दर्शनमभूत् ; वर्षासु ये ये जन्तवः इन्द्रकोपकोकिलकेकिप्रभृतय इतस्ततः उद्गन्तुमर्हन्ति तेऽपि बहुश उद्गताः । तेषां दर्शनेनापि व्यथा ववृधेऽस्याः । तादृशीं व्यथामसह्यां व्याहरति सेयमस्मिन् दशके । एतद्दशकसारांशसंग्राहकमिदं पद्यम्—

संदिष्टस्सोऽथ मेघो निजसलिलभरं सर्वतश्चाभिवर्षन्
नानापुष्पाणि हृद्यान्यभिनवसुषमान्युद्गमय्य प्रयातः ।

7

तेषां वीक्षामसह्यां भृशमभिदधती श्रीवनाद्रीशभोग्यं
स्वाद्वन्नं चार्पयन्ती निजमुखवचसा लक्ष्मणार्थस्वसाऽभूत् ॥

१. (शिन्दुरच्चेम्पोडिप्पोल्) वनाद्रिप्रान्तेषु कृत्स्नेष्वपि हन्त! मद्वल्लभाधरसंस्मारका इन्द्रकोपा रक्तसिन्दूरचूर्णवत् हन्त! समुत्थितास्सर्वतः प्रसमराश्च बाधन्ते। पुरा मन्दराद्रिं मन्थानमाकलय्य अतिमधुरामृतं स्वीकृतवता सुन्दरबाहुना भगवता संपादितं मायाजालमिदमतिलङ्घ्य कथमहं जीविष्यामि भो। (गाथायामस्या- मुत्तरार्धस्य हार्दभावं श्रीवत्साङ्कमिश्रो गुरुवरः सुन्दरबाहुस्तवे * उदधिंगमन्दराद्रिमथिमन्थनलब्धपयोमधुररसे- न्दिराहसुधसुन्दरदोःपरिघम् * इत्यनया सूक्त्या विशदीकृतवान्। तदिदमत्रानुसन्धेयम्ः अस्मदीयतद्व्या- ख्यया सह! समुद्रमथनतः स्वीकृतमतिमधुरामृतम्— इन्दिरैव ॥ .... (१)

२. (पोक्कॆळिरुपोरुम्) वप्रक्रीडापरिणतगजप्रेक्षणीयस्य वनाद्रेः परमरमणीयेषु सानुषु प्रफुल्लानि यूथिकाकुसुमानि हन्त! संदर्शयन्ति मद्वल्लभस्य वनाद्रिनाथस्य शुचिस्मितम्। किंच वन्यलताविशेषाश्च कोरक- कुसुमादिकं संदर्शयन्तो हन्त! कृष्णस्य हसितं संस्मारयन्ति। तदिदमवलोक्य नाहमात्मानं धारयितुं प्रभवामि। अन्यानि च वन्यकुसुमानि 'किमहो गोदे! अस्मानवलोक्यापि किं त्वं जीविष्यसि' इति परिहसन्तीव। हन्त! अयि प्राणसखि! मदीयस्पृहाविषयभूतया तदीयभुजमालिकया संपाद्यमानं परिभवं कस्य सकाशे कथयेयम्। भग- वतो भुजमालिकायाः प्रेप्सयैव खलु एतावदनर्थजातमहमनुभवामीत्युक्तं भवति।) ... . (२)

३. (करुविळैयोण्मलर्काळ्) भोः काकणकुसुमानि! अतसीकुसुमानि च! मदीयानुरागलक्ष्य- भूतस्य श्रीमाधवस्य दिव्यमङ्गलविग्रहच्छायां संदर्शयथ यूयम्। आः कथमहं जीवेयम्? कथयत। अन्यमपि कमप्यनर्थं निशमयत। श्रीमहालक्ष्मीं विहारस्थलायितदिव्यबाहुर्भगवान् वनाद्रिनाथः सुन्दरबाहुः मम गृहान्तः प्रसभं प्रविश्य मत्करवलयापहरणं यदकुरुत तत्किमहो न्याय्यम्? [टिप्पणी— भगवान् स्वयमेवागत्य संश्लिष्य विश्लिष्टो हन्तेति कथनमेव चरमवाक्यपरमतात्पर्यम्। करवलयापहरणकथनं स्वशरीरकार्श्याभिधाने पर्यवस्यति। तेन च विश्लेषो व्यञ्जितो भवति॥ .... (३)

४. (पैम्पोळिल् वाळ् कुयिल्काळ् मयिल्काळ्) उद्यानवननिवासिनो भोः कोकिलाः! केकिनः! काकणप्रसवाः कलाफलानि! सुरभिरमणीयान्यतसीकुसुमानि च! भोः, पञ्चमहापातकिनः खलु यूयम्। रमणीय- काननाद्रिमधिवसतो भगवतस्साचर्ण्यं किमर्थमहो युष्माकं समघटत? (मम वधार्थमेव ननु?) [कोकिलाः केकिनः काकणप्रसवाः कलाफलानि अतसीकुसुमानि च भगवतो दिव्यमङ्गलविग्रहस्मारणमुखेन स्वात्मनो मारणं कुर्वन्तीति हृदि निधाय तेषां पञ्चानां वस्तूनां पञ्चमहापातकित्वेन कथनमत्र वेदितव्यम्।] ... (४)

५. (तुङ्गमलर् प्पोळिलूशूळ्) उच्चैः प्रफुल्लकुसुमालंकृतोद्यान परिवृतवनगिरिमधितस्थुषः पुण्डरीकाक्षस्य नीलमेघनिभस्य भगवतो दिव्यमङ्गलविग्रहसवर्णा भोः कुसुमनिषण्णमधुपव्राताः! भो स्पृहणीय- तटाकाः! भोस्तटाकस्थनलिनकुसुमानि! युष्मासु यमकिंकरताधियं वहन्त्या मम किमपि शरणं प्रदर्शयत। [गाथा- यामस्यां निर्दिष्टानां वस्तूनामुद्दीपकत्वातिशयो वेद्यः।] ॥ ... ... (५)

६. (नारुनरुम्पोळिल्) श्लोकरूपो विवर्तः—

सुगन्धिवनसन्तति प्रचुरकाननाद्रिप्रभोः कटाहशतसंभृतं सुनवनीतमत्यादरात् ।
समार्पिपमथो तथा मधुरशर्करान्नं गिरा श्रियः पतिरुपेत्य ते किमुररीकरिष्यत्युमे ॥ (६)

७. (इन्रु वन्दित्तनैयुम्) श्लोकः—

सुगन्धिमलयानिले वनगिरौ मुदा तस्थिवान् मुकुन्द उपगम्य मे हृदयमद्य संभूषयन् ।
मयाऽर्पितमिदं द्वयं यदि निषेवते तर्हि तत् वितीर्य च सहस्रशः परिचरेयमात्यन्तिकम् ॥ (७)

[टिप्पणी— षष्ठसप्तमगाथाद्वितयेन श्रीवनाद्रीशस्य सुन्दरबाहोर्भगवतो भोग्यं भाण्डशतकभरित-नवनीतशर्करान्नरूपं स्वादु भोज्यं वाचा समर्प्य तत्स्वीकारप्रार्थना क्रियते । अत्यधिकवेदनानुभवप्रकाशनप्रकरणेऽस्मिन् स्वादु भोज्य कथनप्रसक्तिः कास्विदिति शङ्का संभविनी । अत्रेदमवधेयम् । असह्यवेदनासंभवसमयेषु द्वयाख्यमन्त्ररत्नानुसंधानं महतामाचारसिद्धम् । तेन कथंचिद्वेदनायाः परिहारो भवेदिति । गोदा च तथा मन्त्ररत्नमनुसंदधे । तत्र च उत्तरखण्डं पुनः पुनरावर्तयामास । कैंकर्यप्रार्थनाप्रकाशनं हि उत्तरखण्डकृत्यम् । अधुना कायिकं कैंकर्यं किमपि कर्तुमक्षमा सैषा वाचिककैङ्कर्ये निष्णाता सती स्वादुभोज्यसमर्पणकुतूहलं वाचा न्यवेदयदिति ।] ... ... (६–७)

८. (कालैयेळुन्दिरुन्दु) शितिवर्णटिट्टिभगणाः प्रत्यूषे समुत्थाय वनाद्रिनाथस्य द्वारकापुराधीशस्य वटदलशायिनस्सर्वेश्वरस्य वार्त्तां उद्गृणन्ति । एवं नाम आश्रितजनव्यामुग्धस्य तस्य शुभागमनसूचनपूर्वकम् अव्यक्तमधुरभाषितभाषणमेतैः क्रियमाणम् अपि नाम यथार्थं भविता ? ... . (८)

९. (कोङ्गलरुम् पोळिल्) विकस्वरसुरभिमहीरुहाढ्यारामपरिवृते श्रीवनाद्रौ रौद्रवृक्षोद्भवैर्हिरण्मयपुष्पसंचयैस्समं हन्त ! अहमपि मोघजन्मा भवति । स्पृहणीयदिव्याधरपुटाध्मातपाञ्चजन्यध्वनिः शार्ङ्गज्यानिनदश्च कदा नु मम सन्निकृष्टौ भवितारौ ?

[टिप्पणी— भाषायां " कोन्रै " इति व्यवह्रियमाणो भूरुहो रौद्रवृक्ष इत्युच्यतेऽत्र । रुद्रपूजार्हकुसुमस्रष्टा ह्ययमनोकहः । श्रीवनाद्रौ एषा वृक्षजातिरस्ति बृन्दशः । एतत्कुसुमानि नित्यं तत्र विशेषतस्समुद्भवन्ति । रुद्रादिदेवतान्तराराधनैकयोग्यानीमानि पुष्पाणि देवतान्तरभक्तैरेव खल्वाद्रियेरन् । देवतान्तरभक्ता राजसास्तामसाश्च तत्र नैव गच्छन्ति । श्रीमन्नारायणैकभक्तास्सात्विका एव तत्र समागच्छन्ति । तादृशाः परमैकान्तिनस्तानि कुसुमानि न चक्षुषाऽपि वीक्षन्ते । अतश्च तत्रत्यानि कुसुमानि सर्वथा निरर्थकजन्मान्येव भवन्ति । तथैव स्वस्य जन्मापि भगवदनुभवयोग्यताविधुरं सत् व्यर्थमेव भवतीत्यवसादः प्रकाश्यतेऽत्र गोदादेव्या । पाञ्चजन्यध्वनेः शार्ङ्गज्यानिनदस्य शुश्रूषाप्रकाशनं यदत्र क्रियते तत्र चैतद्वेदितव्यम् । पुरा रुक्मिणीदेव्यास्सीतादेव्याश्च यत् ध्वनिद्वितयमाप्यायनमकार्षीत्तदेव ध्वनिद्वितयमनयाऽपि गोदादेव्या कांङ्क्ष्यते । रुक्मिणीदेव्याश्शिशुपालेन सह पाणिग्रहणनिर्वर्तनं यदा निर्धारितमासीत्तदा सा देवी कृष्णभगवत्संनिधिं प्रति ब्राह्मणं कमपि प्रेषितवती ।

सोऽपि न प्रत्यावृत्तः। कृष्णभगवानपि न सन्निहितः। शिशुपालस्तु पाणिं ग्रहीतुं त्वरते। रुक्मिण्याः प्राणास्तु निर्गमनसज्जा एव सन्ति। अस्यामवस्थायां सरभसमागच्छन् भगवान् वासुदेवो दूरादेव ब्रह्मानन्दसंदोहसन्दायकं शङ्खध्मानं वितेने। तन्निनदनिशमनेन सा देवी परमानन्दकन्दलितस्वान्ता समजनि॥ अशोकवनिकामधिवसन्तीं वैदेहीं प्रलोभयितुकामो दशाननो विद्युज्जिह्वसहायस्सन् असिधाराविलूनं मायारामशिरः प्रदर्श्य तां अतिमात्रं विषादयामास; तस्यामवस्थायां भगवान् रामचन्द्रो लङ्काद्वारसन्निहितस्सन् स्वकीयशार्ङ्गज्यानिनदमतिमात्रगभीरमधुरमुदभावयत्; तदाकर्णनेन सीतादेवी सा निरुपमनन्दथुसिन्धुमग्नमानसा संवृत्ता। एवं नाम दिव्यमहिषीद्वितयप्रीणनं निनदद्वितयं गोदादेवी स्वयं शुश्रूषते।] ... ... (९)

१०. (शन्दोड्ड कारहिलुम् शुमन्दु) चन्दनकाष्ठान्यगुरुकाष्ठानि च समूह्य प्रवहन्त्या कूलंकषप्रवाहसंभृतया नूपुरापगया परिवृतं वनाद्रिमधितिष्ठन्तं भगवन्तं सुन्दरबाहुमधिकृत्य मुखरभ्रमरकुन्तलशालिन्या गोदया संकीर्तितमिदं द्राविडदिव्यगाथादशकमधीयानास्सन्तः सर्वेश्वरपादभाजस्स्युरिति फलकीर्तनेन समापितमिदं दशकम्॥ ... ... (१०)

इति श्रीगोदासूक्ते नवमदशकविवर्तस्समाप्तः॥

दशमं सूक्तम्—कार्क्कोडल् पूकाळ्॥

— अवतारिका —

पूर्वदशके यो निर्वेदस्समजनि गोदायाः, स दशकेऽस्मिन्नप्यनुवर्तते, भृशमभिवर्धते च। पुरा दृष्टाश्च संदिष्टाश्च ये मेघास्ते घनघनवृष्टिमुत्पाद्य स्वकालोचितानि पुष्पाण्यतिशयेन विकसितान्यकार्षुः। तेषां मध्ये श्रीकृष्णदिव्यमङ्गलविग्रहसच्छायानि अतसीप्रभृतीनि कुसुमानि सान्द्राण्यभूवन्। तदवलोकनं कृष्णविरहव्यथाया अतिमात्रमुद्दीपकमभूत्। तानि च दर्शंदर्शमतितरामुद्विजते गोदा कृष्णविग्रहसौन्दर्यसंसरणेन। हन्त! किं कुर्यादेषा? उच्चैराक्रन्दितुमारेभे! हा हा वन्यकुसुमानि! मां मारयितुं युष्मान् प्रेरितवानर्णवतर्णकः कुत्र वर्तते? हा बत? युष्माभिः क्रियमाणामनीतिमधिकृत्य कुत्र पुनरहमाक्रोशेयम्! न शक्नोमि चाहं स्वकीयं मनो विनेतुम्। अयि भो नृत्यन्तशिशिखिगणाः! युष्माकं पादमूलेषु प्रणिपतामि। कृपया युष्मदीयानि नर्तनानि विरमयत। मद्भर्तुः स्मारणेन हि मां मारयथ यूयम्। अयि भोः गायन्तः कोकिलाः! कर्णकठोरमिदं वः कूजितं किं नाम? विरम्यतामस्मात्कूजितात्। श्रीवेङ्कटाद्रीशो भगवान् अत्र कृपया समागत्य यदि मां संजीवयेत् तर्हि सद्यो युष्मानहमेव समाहूय वः कूजितानि शृणुयाम्। इत्येवमुक्तिततिभिरात्मीयामार्तिपूर्तिमाविष्करोति गोदा दशकेऽस्मिन्।

तथा चैतद्दशकसारांशसंग्राहकश्लोक एषः—

वर्षाकालप्रफुल्लान्यतिशयितरुचीन्यद्भुतानि प्रसूना-
न्यालोक्योद्विग्नचित्ता हरितनुसुषमां संसरन्ती रटन्ती।

दृष्ट्वा नृत्ताभिरामानपि च शिखिगणान् कोकिलानां च नादं
श्रुत्वाऽसह्यार्तिभूम्ना कलितविलपना बोभवीत्यत्र गोदा ॥

१. (कार्कोडल् पूक्काळ्) अयि भो मेचकमसृणवन्यकुसुमानि! सिन्धुसवर्णस्स कृष्ण एव खलु युष्मान् युद्धसन्नद्धतासमुत्पादनपूर्वकं मद्वधाय प्रजिघाय। आः! स घातुको भगवान् कुत्रास्ते? युष्माभिरतितरामवमर्दिताऽहं हन्त कस्य सकाशमुपेत्य इमामापदमावेदयेयम्? अस्यामप्यवस्थायां तदीयतुलसीस्रजि स्पृहया तदेकाभिमुखं हृदयं खलु पापिन्यहं बिभर्मि ॥ .... (१)

२. (मेल् तोन्ऱिप्पूक्काळ्) अयि ऊर्ध्वाभिमुखविकस्वरवन्यकुसुमानि! उपरितनसर्वलोकातिशायिदिव्यधामनिकेतनस्य वेदैकसमधिगम्यस्य परमपुरुषस्य दक्षिणहस्तविराजमानहेतिराजवत् हन्त! मां किमिति तपथ? एवं नाम संतापसमुत्पादनमपहाय कच्चिन्मां नित्यकिङ्करगोष्ठीनिविष्टां कलयध्वे? ॥ .... (२)

३. (कोवै मणाट्टि) अयि देवि! बिम्बलतिके! त्वदीयैरभिरूपैः फलैः भगवतः कृष्णस्य दिव्याधरसुषमास्मारणमुखेन मम हिंसनं हन्त किमिति कलयसे। विरम तावदेवंविधाद्वधात्। बिम्बाधरसुन्दरं भगवन्तं स्मर्तुमहं भृशं बिभेमि। पापिन्या मम जन्मना शेषशयनो भगवानपि निजतल्पभूतशेषवत् हन्त! द्विरसनो जातः। तस्य चेयं दशा न सर्वत्र; निर्लज्जाया ममैव विषये ॥ .... (३)

४. (मुल्लैप्पिराट्टि) अयि गम्भीरस्वभावे देवि यूथिकालतिके! भगवतो वासुदेवस्य मन्दस्मितं स्मारयता तव विकासेन मास्म विषादयो माम्। त्वामहं शरणं प्रपद्ये प्रार्थनाया अस्याः फलेग्रहित्वाय। स्वैरचारिण्याश्शूर्पणखाया अङ्गभङ्गमाकलितवतो भगवतो रामचन्द्रस्य वचनं यद्यपि वितथं भवतु; मम यदस्ति विष्णुचित्तमुनीन्द्रपुत्रीत्वं, तदपि किं वितथं भवेत्? [इदमत्र हृदयम्— * मित्रभावेन संप्राप्तं न त्यजेयं कथंचन * इत्यादि भगवद्वाक्यवैतथ्ये सत्यपि आचार्यसंबन्धस्य वैतथ्यं न खलु संभविष्णु। * सिद्धिर्भवति वा नेति संशयोऽच्युतसेविनाम्। न संशयोऽस्ति मद्भक्तपरिचर्यारतात्मनाम् ॥ * इति ह्याहुः। * द्यौः पतेत् पृथिवी शीर्येत् हिमवान् शकली भवेत्। शुष्येत्तोयनिधिः कृष्णे! न मे मोघं वचो भवेत् ॥ * इत्युक्तवतो भगवतो वचनादपि आचार्यसंबन्धस्य विश्वसनीयता व्यञ्जिता भवति ॥] .... (४)

५. (पाडुम् कुयिल्काळ्) अयि भोः गायन्तः कोकिलाः! कर्णकठोरध्वनिकलनात्मकं हन्त! किमेतद्गानम्? श्रीवेङ्कटाद्रिनिलयो भगवान् यदि मय्यनुग्रहाभिमुखो भविता, तदा यूयमत्र समागत्य कामं गायत। गरुडध्वजस्स भगवानत्रागत्य परमकृपया यदि मां संश्लिष्येत्तर्हि अहमेव युष्मानाहूय वो गानमाकर्णयेयम् ॥ ... . (५)

६. (कणमामयिल्काळ्) अयि भो मयूरगणाः! श्रीकृष्णभगवद्दिव्यमङ्गलविग्रहसधर्मवपुः प्रदर्श्य नृत्यतां युष्माकं चरणेषु निपतामि ममारुन्तुदमिदं वो नर्तनं परिहर्तव्यमिति। फणिपुङ्गवशयनं सततमधिशयानो भगवान् श्रीरङ्गनाथो हन्त! ईदृशीमवस्थितिं मे समुत्पादितवान् ॥ [आदिशेषात्सकलविधान्यपि

कैङ्कर्याणि स्वीकुर्वन् भगवान् यतो हि मामत्यन्तमुपैक्षत तत एवाहं नृत्तनिरतान् युष्मान् वीक्षितुमप्यशक्ता सती वः पादेषु पतित्वा एवं नाम प्रार्थये— इत्युक्तं भवति ।] .... (६)

७. (नडमाडित्तोहै विरिक्किन्र) बर्हाणि विकास्य चारुनटनं कुर्वन्तो हे मयूराः ! युष्माकमिदं ललितं नटनमवलोकयितुं प्रधानेन साधनेन विकलाऽस्म्यहम् । [आन्ध्यमनुभवामीति यावत् ।] घटनर्तनविचक्षणो भगवान् वासुदेवः स्वैरचेष्टितान्याकलय्य सर्वस्वापहारमकरोद्धत ! अस्यामवस्थायां मम पुरतो नटनेन मत्प्राणहरणं न खलु न्याय्यं वः ॥ ... ... (७)

८. (मळैये मळैये) आः पर्जन्य पर्जन्य ! बहिष्टान्मृत्तिकालेपनमारचय्य अन्तस्स्थितं मधूच्छिष्टं द्रवीकृत्य यथा बहिर्निस्सारयन्ति, तथा मां संश्लिष्य मदन्तस्सारभूतमात्मानं द्रवयन् श्रीवेङ्कटाद्रिनाथस्सुन्दरमूर्तिर्भगवान् यथा मयि नित्यसंश्लिष्टस्स्यात् तथा विधाय [आवयोर्निरन्तरसंश्लेषमुत्पाद्य] अथाभिवर्ष तावत् ॥ [इदमत्र हृदयम्— लोके कांस्यप्रतिमादिनिर्माणनिरताः आदौ प्रतिमासमानाकारां मृदं निर्माय तदुपरि मधूच्छिष्टावरणं कृत्वा पुनश्च तदुपरि मृत्तिकालेपं विरचय्य कुत्रचित् द्वारं विधाय ततो बहिर्निर्गमयन्ति अन्तस्थितं मधूच्छिष्टम् । एवं नाम करोति भगवान् वेङ्कटाद्रीश इत्यभिहितमत्र । बहिर्मृदमभिलिप्य अन्तस्स्थमधूच्छिष्टनिस्सारणवत् सोऽपि भगवान् वपुरुपरि संश्लिष्य अन्तस्सारमपसारयितुं शक्तः । स यदि नित्यसंश्लिष्टस्स्यात् तर्हि ममैतादृशी दुर्दशा न स्यान्नाम पर्जन्य ! त्वमावयोरविच्छिन्नसंश्लेषं संघटय्य पश्चात् स्वैरं वर्ष तावत् । तदा न मे भवेदुद्दीपनमिति ॥] .... (८)

९. (कडले कडले युन्नैक्कडैन्दु) भो पारावार पारावार ! भगवान् स्वकीयतल्पभूतं त्वां मन्दराद्रिणा मथित्वा कलुषीकृत्य त्वदन्तस्सारभूतममृतमपहृतवान् खलु । तथैव मदन्तस्सारमात्मानमप्यपजह्रुषस्तस्य सकाशे विज्ञापयितुं मामकीनं व्यथा सर्वस्वं तदीयतल्पभूतशेषसविधे निवेदयेथाः । [समुद्रघोषं कर्णमूलपतितं निशम्य तमर्णवं संबोध्य कथयति गोदा । भगवतस्सागरस्य च सन्निहितसंबन्धसद्भावात्तमेव संबन्धं पुरस्कृत्य वक्ति—मदीयां दशां शेषशायिने भगवते निवेदयेति । तव च मम च केनचित्प्रकारेण साधर्म्यमप्यस्ति खलु । स भगवान् पुरा मथनव्याजेन यथा त्वामन्तस्सारविहितमाततान, तथा मामपि संश्लेषमिषेण आत्तसारामतानीत् । अनेन चांशेन मम साधर्म्यमासेदुषा त्वया मम वयस्येन एतद्विज्ञापनात्मक उपकारोऽवश्यं कर्तव्य इति प्रार्थयते ॥ ... ... (९)

१०. (नल्लवेन् तोळि) अयि भो मदीयप्राणसखि ! भोगिभोगशयनीयशायी भगवान् सर्वस्मात्परो निरवधिकैश्वर्यसंपन्नः सर्वाभ्यधिकः परमपुरुषः । वयं तु क्षुल्लका मर्त्यजनाः । हन्त ! किं वयं करवामहै ? सर्वाधिकस्य तस्य भगवतः क्षुद्राणामस्माकं च कथमिव साङ्गत्यं घटेत ? [इति वैयाकुल्यां सत्यां मनस्समाहितिरीदृशी भवितुमर्हति । कथमिति चेत्] मदाचार्यो धन्विनव्यनगराधिनाथो विष्णुचित्तसूरिः सर्वथा स्वस्य विधेयभूतं तं भगवन्तं स्वस्य सुकरैस्सदुपायैर्यदि समाहूय स्वसन्निकृष्टं कुर्यात्, तदा वयं तं सुखेन सेवेमहि । [टिप्पणि—अनया गाथया एतदुक्तं भवति—आचार्यद्वारैव भगवान् लभ्येत, न प्रकारान्तरैरिति ।

प्रतिदशकं चरमगाथायां फलकीर्तनं भवति। तथा दशकेऽस्मिन् नैवाऽभूत्। एतद्दशकाध्यायिनां सताम् आचार्यद्वारा भगवत्प्राप्तिरेव फलमिति व्यञ्जितं भवतीति वेदितव्यम्।] ... (१०)

इति श्रीगोदासूक्ते दशमदशकविवरणं समाप्तः॥

एकादशं सूक्तम्—तामुहक्कुम्॥

— अवतारिका —

दशकेऽस्मिन् गोदादेवी स्वसदृशीष्वन्यासु दयितासु भूदेवीजानकीरुक्मिण्यादिषु भगवता कलितान् अनुग्रहातिशयान् अनुसंदधाना तथैव मामप्यनुग्रहीतुमर्हस्स भगवान् शेषशायी सर्वजगत्पतिः रङ्गनाथश्श्रीमान् हन्त! कथं नु मां निगृह्णातीति रोदितीव। मम भर्ता तु * अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन * रामो द्विर्नाभिभाषते * न मे मोघं वचो भवेत् * इत्याद्युक्तरीत्या सत्यसन्ध एव। तथाऽपि द्विजिह्वेन भुजङ्गेन तस्य नित्यसहवाससत्त्वात् * संसर्गजा दोषगुणा भवन्ति * इति न्यायेन तद्गतमेव द्विजिह्वत्वं स्वयमपि बत! प्राप्तवानिवेति कथयतीव। अथवा, आदिशेषो हि चेतनेष्वग्रगण्यः। स तु घटककृत्यमेव कर्तुं क्षमः। तेन सह नित्यं वसन्नपि भगवान् हन्त! मामुपेक्षत इति विस्मयप्रकाशनाभिप्रायो वा स्यात्। हिरण्याक्षनाम्ना दैत्येन नीतां भूमिदेवीं समुद्धर्तुं वाराहमपि वपुरास्थाय दुर्घटानि कृत्यानि कृतवान्। जानकी विश्लिष्टाभूदिति * अनिद्रस्सततं रामः * न मांसं राघवो भुङ्क्ते न चापि मधु सेवते ※ नैव दंशान् न मशकान् न कीटान् न सरीसृपान्। राघवोऽपनयेद्गात्रात् त्वद्गतेनान्तरात्मना॥ ※ इत्याद्युक्तरीत्या भृशं विह्वलश्च विक्लवश्च व्यामुग्धश्चासीत् सः। शिशुपालेन सह कृतविवाहनिश्चयामत्यन्तमवसीदन्तीं रुक्मिणीं स्वयं परिग्रहीतुं दविष्ठादपि देशान्तरात्सरभसमाधावतिस्म सः। एवमेवं तासु तासु ललनासु प्रेमप्रकर्षपिशुनमतिमानुषचेष्टितवर्गं कृतवान् स एष भगवान् तादृशीष्वन्यतमायां मयि भृशमुदासीन इति हन्त कथमिदं सह्यतां दुःखमिति विलपति।

तथा चैतद्दशकसारांशसंग्राहकश्लोक एषः—

हाहा श्रीरङ्गनाथः फणिवरशयनस्सर्वलोकैकशास्ता
भूदेवीं भूमिपुत्रीं निजहृदयसमाकर्षिणीं रुक्मिणीं च।
संश्लेष्टुं सर्वथैव प्रकटितविविधाश्चर्यचर्यस्स कामी
मामेवं धिक्करोतीत्युपचितरुदिता चोभवीत्यत्र गोदा॥

१. (तामुहक्कुम् तम् कैयिल्) अयि भो भूषणभूषिता ललनाः! विषाग्निवमनचणवदनफणिपतिशयनस्स भगवान् रङ्गनाथो हा हन्त! मम मुखावलोकनमपि न कुरुते। [तेन शरीरकार्श्यमनुभवन्ती साऽहं प्रच्युतकरवलया भवामि।] मयाऽऽद्रियमाणो मदीयः करवलयः किं नु तेनाद्रियमाणस्य तदीयहस्तस्थितस्य

पाञ्चजन्यस्य तुलनां नार्हति? तदीयपाञ्चजन्यो यथा कदाऽपि तदीयहस्तान्न च्यवते, तथा मदीयकरवलयेनापि मदीयहस्तादप्रच्युतेन भवितव्यं न किमु? इति युष्माभिस्स भगवान् प्रष्टव्य इत्युक्तं भवति ।] (१)

२. (पळ्ळिलुडैयवम्मनैमीर्) अयि भोः सौन्दर्यशालिन्यो मातरः! मम परमभोग्यदिव्यामृतसधर्मा श्रीरङ्गनाथः दिव्यालकसुन्दरः दिव्याधरसुन्दरः दिव्यनयनसुन्दरः दिव्यनाभिसमुद्भूतदिव्यारविन्दसुन्दरश्च स तावदस्मत्स्वामी भगवान् मम करवलयं नित्यमपाययुक्तमेव वितेने । [कदाचिदपि संश्लेषसुखमप्रयच्छन् नित्यविश्लिष्ट एव सन् विषादयति हन्तेति भावः ।] ... ... (२)

३. (पोङ्गोदम् शूळ्न्द) सागरमेखलामिमां महीं दिव्यं धाम च साधु निर्वहन् भगवान् दिव्याज्ञादण्डमण्डितस्स श्रीरङ्गनाथः मदीयकरवलयापहरणेन किं ननु संपन्नो भविता? [विश्लेषेण मम व्यथासमुत्पादनं तस्य नैव शोभनमित्युक्तं भवति । श्रीरङ्गक्षेत्रे श्रीरङ्गनाथभगवत्परिसरे सदा विलसन् सौवर्णदण्डविशेषः दिव्याज्ञादण्डपदेन पूर्वाचार्यैर्व्यपदिश्यते । "शेङ्गोल्" इति भाषानाम ।] ... (३)

४. (मच्चणिमाडमदिळरङ्गर्) रमणीयप्रासादप्राकारादिपरिवृतश्रीरङ्गदिव्यधामा स भगवान् देवाधिदेवः पुरा वामनो भूत्वा भूमिभिक्षामकार्षीत् । यदि सा भिक्षा सावशेषा स्यात् यदि च स मदीयकरवलयकाङ्क्षी स्यात् किमहो मदीयवीथिकायां न सञ्चरेत्? [पुरा महाबलिसकाशात् भूमिं जिघृक्षन् स भगवान् न खलु बलात्कारेण गृहीतवान् अपि तु भिक्षाचर्ययैव । तथा मत्सविधादपि करवलयग्रहणकुतूहली स बलात्कारेण न ग्रहीतुमर्हति । भिक्षित्वा कामं गृह्णातु । यदि भिक्षितुमिच्छति तर्हि महाबलियज्ञवाटे यथा मनोहरसंचरणं कृतवान् तथा मम पुरतोऽपि अभिरामसञ्चरणं करोतु नाम इत्युक्तं भवति । तदीयगतिविभ्रमदिदृक्षा सूचिता भवति ।] ... ... (४)

५. (पोङ्गाक्कुरळुरुवाय्) विलक्षणवामनरूपमास्थाय उदकधाराग्रहणपूर्वकं सकलानि भुवनानि स्वायत्तीकृतवान् सज्जनततिसमलंकृतश्रीरङ्गक्षेत्रवासरसिको नागेशयस्स भगवान् हा बत! अकिंचनाया मम वपुरपि ह्यपहर्तुमुत्कण्ठित इवालक्ष्यते ॥ ... . (५)

६. (कैप्पोरुळ्कळ् मुन्नमे) सस्यभूमिषु स्वैरं प्रवहन्त्या सह्यजया सरिता परिवृते श्रीरङ्गनामनि धामनि विराजमानः सर्ववस्तुनिकरान्तरात्मा सर्वस्यापि जनस्य दुर्लभः चतुर्वेदस्थितशब्दराशिपरमतात्पर्यभूतश्च स भगवान् प्रागेव मदीयानि बाह्यवस्तूनि (करवलयादीनि) अपजहार । संप्रति तु शरीरमप्यपहरति हन्त!

७. (उण्णादुरङ्गादु) सुदृढप्राकारपरिवृतश्रीरङ्गदिव्यधामा जगत्पतिर्भगवान् सीतासमाख्यललनावपुषि कामुकस्सन् अशनेन निद्रया च रहितो जलनिधौ सेतुबन्धनात्मकमतिमानुषकृत्यं च विरचयन् स्वकीयमतिमात्रं व्यामोहं प्राचीकशदिति प्रसिद्धं ह्येतत् । तत्तादृशव्यामोहशालितां निजां विस्मृत्य सोऽधुना स्वकीयं परत्वमेव विचिन्तयन्नवलिप्यमान इव विमुखतां प्रकाशयति मयि ॥ ... (७)

८. (पारितूत्तुक्किडन्द) पुरा प्रलयार्णवे चिरं निमज्जनेन विकृतिं गताया भूदेव्याः कृते सलिलधारासमाकुलमलीमसदेहविशिष्टनिरपत्रपवराहरूपतेजिष्ठदिव्यमङ्गलविग्रहं भृतवता देवदेवेन श्रीरङ्गनाथेन गीतम् * अहं स्मरामि मद्भक्तं नयामि परमां गतिम् * इत्यादि चरमश्लोकवाक्यं मम मनसि सुदृढप्रतिष्ठं हि विराजते ॥ ... ... (८)

९. (कण्णालम् कोडित्तु) पाणिग्रहणोत्सवसन्नाहं सर्वं सुष्ठु संविधाय रुक्मिणीपाणिग्रहाय दृढव्यवसायशालिनं स्थितं शिशुपालं हततेजसमाकाशावलोकननिरतं चाकलय्य तां रुक्मिणीं स्वपाणिना गृहीतवता स्त्रीजनवल्लभेन भगवता सादरमुररीकृतस्य दिव्यदेशस्य नाम श्रीरङ्गमिति खलु ॥ [तत्रैव स्वस्यापि जिगमिषा सूचिता भवति ॥] .... (९)

१०. (शेम्मैयुडैयतिरुवरङ्गर्) आर्जवगुणनिधिना श्रीरङ्गनाथेन पुरा विभवावतारकाले पार्थं प्रपन्नमुद्दिश्य परमकृपयाऽनुगृहीतं सत्यार्थसंपन्नं चरमश्लोकं मदाचार्यो विष्णुचित्तसूरिः श्रुत्वा निर्भरो हि वर्तते । [तत्पदपद्माश्रिताया ममापि तदधीनं नैर्भर्यमनपायम् ।] "ये मयि प्रियास्तेष्वहमपि प्रियः" इति स्वेनैव कथितं वाक्यं स्वात्मन्येव यदि मिथ्या भवति, अथ तस्य परमपुरुषस्य शास्ता को हि नाम । [अति मात्रदुःखत एव फलकीर्तनगाथानिबन्धनमजहादिह गोदेति ध्येयम् ॥] (१०)

इति श्रीगोदासूक्ते एकादशदशकविवर्तस्समाप्तः ॥

द्वादशं सूक्तम्—मत्तिरुन्दीर्हैट्करियलाहा ॥

— अवतारिका —

अस्मिन् दशके मथुरापुरीप्रभृति द्वारकापुरीपर्यन्तं श्रीकृष्णकिशोरविहरणस्थलानि सर्वाणि प्रोच्य तत्रतत्र गत्वा भगवन्तमनुभोक्तुं कामयमाना स्वयमेव च गन्तुमशक्नुवन्ती गोदादेवी स्वबान्धवानुद्दिश्य कथयति तत्रतत्र नेतुमात्मानम् । (१)* एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः । नागपर्यङ्कमुत्सृज्य ह्यागतो मथुरां पुरीम् * इति श्रुत्वा संप्रति मथुरामधिवसति मधुसूदन इति मत्वा तत्र स्वात्मनः प्रापणं प्रार्थयतेस्म प्रथमगाथया । (२) मथुरायामवतीर्णोऽपि स भगवान् * अकृतसेतुमनाकलितप्लवां जननसिन्धुदृढप्लवमुद्वहन् । रविसुतामतिलंघ्य रमापतिं सपदि घोषसमीपमुपानयत् ॥ * (यादवाभ्युदये) * यमुनां चातिगम्भीरां नानावर्तझषाकुलाम् । वसुदेवो वहन् कृष्णं जानुमात्रोदको ययौ ॥ * इत्याद्युक्तरीत्या व्रजं प्रापितोऽभूदित्याकर्ण्य तत्र मां नयतेत्याचचक्षे द्वितीयगाथया । (३) * श्रुतिमपरे स्मृतिमपरे भारतमपरे भजन्तु भवभीताः । अहमिह नन्दं वन्दे यस्यालिन्दे परं ब्रह्म ॥ * इत्युपश्लोकितरीत्या धन्यजन्मनो नन्दगोपस्य सदनाङ्गणमधिवसति स दामोदर इति निशम्य तत्र मां नयतेत्याह तृतीयगाथया । (४) नन्दगोपगेहाङ्गणे विहरणं विहाय * धीरसमीरे यमुनातीरे वसति वने वनमाली । गोपीपीनपयोधरमर्दननिर्दयकरयुगशाली ॥ * 'गीतागोविन्दे' इत्युक्तरीत्या

यमुनारोधसि विहर्तुं गत इति श्रुत्वा तत्र मां नयतेत्यवादीच्चतुर्थगाथया। (५) यमुनायाः कस्मिंश्चन ह्रदेऽवस्थाय गरलवमनादिना विविधां पीडामुत्पादयन्तं कालियं भुजगं दमयितुं गत्वा तत्र कदम्बमहीरुहात्तच्छिरसि निपत्य विचित्रं नृत्तं वितनोतीति विज्ञाय तत्र मां नयतेत्यब्रवीत्पञ्चमगाथया। (६) यमुनातीरात्कृष्णप्रेषितानां क्षुधितानां गोपकुमाराणां प्रार्थनया प्रहृष्टा महर्षिपत्न्यो भक्ष्यभोज्यलेह्यचोष्यादिपरमान्नवर्गपरिपूर्णपात्रहस्तास्सत्यः कृष्णबलरामान्तिकमागत्य समाराधयन्तीति निशम्य, भक्तविलोचनमिति प्रथमानं तादृशं स्थलं स्वात्मानं नेतुं प्रार्थयत षष्ठगाथया। (७) अथ प्रलम्बासुरजिघांसया भाण्डीरवटस्थलीं प्रयातेन बलरामेण अग्रजेन सह कृष्णोऽपि प्रययाविति विदित्वा तत्र स्वात्मानं नेतुमयाचत सप्तमगाथया। (८) अथ क्षुधितकुपितसुरपतिसमुत्पादितमहावृष्टिपीडितगोगोपवृन्दपरित्राणाय गोवर्धनाद्रिसमुद्धरणकृतये प्रवणः प्रभुरित्यवगत्य तत्पर्वतप्रान्तं स्वात्मानं नेतुमर्थयतेस्म अष्टमगाथया। (९) अथ च कालयवनभीत इव कृष्णो मथुरापुरीतोऽन्यत्र गत्वा द्वारकापुरीं प्रतिष्ठाप्य तामधिवसतीत्याकर्ण्य तत्र मां नयतेति याचतेस्म नवमगाथया। (अथ च दशमी गाथा फलकीर्तनपरा।) एवंनाम नवसु स्थलविशेषेषु स्वकीयमद्वितीयमस्मितात्ममभिनिवेशमाविष्करोति दशकेनानेन गोदादेवी॥

तथा चैतद्दशकसारार्थसंग्राहकं पद्यमेतदत्रानुसन्धेयम्॥

उत्सृज्याहीन्द्रशय्यां हरिरिह मथुरामेत्य चाभीरपल्लीं
नन्दस्यागारमागादथ च विषधरं हन्तुमैत्सूर्यकन्याम्।
पश्चाद्भक्तावलोकं वटतरुमथ गोवर्धनं द्वारकां च
इत्याकर्ण्यैतत्प्रदेशाननुभवितुमहो कामनां वक्ति गोदा॥

१. (मत्तिरुन्दीर्हैंदूकु अरियलाहा) मत्प्रातिकूल्येऽवस्थिता भो जननीप्रभृतयो बन्धुजनाः! युष्माकं मनीषया अत्यन्तमगोचरं माधवविषयकं प्रेमसम्पद्भरं वहन्त्यै मह्यं यद्यूयं कथयथ, यच्चाहं युष्मभ्यं प्रतिवच्मि; तत्सर्वं सत्यं मूकबधिरसंवादमात्रम्। (सर्वथा च निरर्थकम्।) वस्तुतः किमधुना कर्तव्यमिति चेत्, साक्षाज्जनयित्रीं देवकीं विहाय व्रजमुपेत्य यशोदाभिधाया मातुरगारे अभिवृद्धस्य मल्लयुद्धविचक्षणस्य च भगवतो गोपालकृष्णस्य जन्मभूमिं मथुरापुरीं मां प्रापयत॥ (टिप्पणी—सिद्धोपायनिष्ठानां प्रपन्नानां नैर्भर्येणावस्थानमेव स्वरूपप्राप्तम्: त्वरातिशयो न बोढव्यः—इत्येवमध्यवसायो जननीप्रभृतीनाम्। प्राप्यवस्तुवैलक्षण्ये मनसि प्रतिभाते सति सत्वरमनुबुभूषा कथं न जायेत? स्वभोगसिद्धये यथाशक्ति त्वरितव्यमेवेति व्यवसायो रुचिविवशाया दुहितुः। अत एव "मत्प्रातिकूल्येऽवस्थिता भो जननीप्रभृतयो बन्धुजनाः!" इति संबोधनमिह सम्पन्नं वेदितव्यम्।) .... (१)

२. (नाणियिनियोरु करुममिल्लै) इतः परमपि लज्जापरिपालनेन न किमपि फलं सेत्स्यति। यतो हि मदीयां स्थितिं मात्सर्यशालिनश्चत्वारोऽपि जना जानन्तिस्म। अविलम्बेन कामपि चिकित्सां कृत्वा मामिकां पुरातनीं सुषमां पुनरावाहयितुं यदि कामयध्वे, यदि च मां सत्यं रक्षितुं स्पृहयध्वे, तर्हि मां गोपालवाटिकामेव प्रापयत। तत्र लोकविक्रान्तचरणो भगवान् यदि दृश्येत, तदा मे रुजा शान्तिमृच्छतु॥ (टिप्पणी।

"मात्सर्यशालिनश्चत्वारोऽपि जना" इति यदुच्यतेऽत्र तस्यायमभिप्रायः— उपायान्तरत्वेन प्रसिद्धेषु कर्मयोगज्ञानयोगभक्तियोगेषु निष्णातास्त्रयः अथ प्रपन्नवर्गान्तर्भावे सत्यपि स्वगतस्वीकारनिष्ठ एकः—इत्येते चत्वारोऽधिकारिणः पारमैकान्त्यसीमाभूमिमधितिष्ठतां शुद्धप्रपन्नानां प्रतिकूला इति वेदितव्यम् ॥) (२)

३. (तन्दैयुम् तायुमुत्तारुम् निक्क) "पितरि मातरि बन्धुवर्गे च विराजमाने सेयं सर्वानप्यवधीयं हन्त ! स्वैरिणी बभूवे"ति एवंविधोऽपवादो यदि भुवि विजृम्भेत अथ तत्प्रशमनं सर्वथा दुष्करं स्यात् । तादृशापवादस्यावकाशलेशमप्यप्रदाय युष्माभिर्यत्कर्तव्यं तत् क्षिप्रं कर्तव्यम् । (अपवादप्रसक्तिः कास्विदितिचेत् ;) आश्चर्यगुणचेष्टितः कृष्णस्संनिहितस्सन् मानससाक्षात्कारगोचरं हि करोति स्वकीयं दिव्यं वपुः । ततश्च मे संभ्रमोऽत्यवश्यं भविता । तदधुना किं कर्तव्यमिति चेत् ; दुर्विनीतधूर्तचेष्टितकरणविचक्षणं कुमारकं प्रसूतवतो नन्दगोपस्य भवनालिन्दं मां प्रापयत निशीथे । एतदेव कर्तव्यं वः ॥ .... (३)

४. (अङ्गैत्तलत्तिडैयाळिकोण्डान्) सुन्दरकरतलललामभूतहेतिराजशालिनो भगवतो गोपालकृष्णस्य वदनारविन्दादन्यद्वस्तु नैव वीक्षिषीयेति कञ्चुकधारणच्छलेनात्मानं पिधाय क्षुद्रजनावलोकने सति जुगुप्सां बिभ्राणमिदं मदीयं कुचयुगममवेक्षध्वम् ! पुनरपि वच्मि स्तनयुगमिदं गोविन्दादन्यं नैव कामयते । तन्मामितः प्रस्थाप्य यमुनासरित्कूलं प्रापयत ॥ ... ... (४)

५. (आर्क्कुमेन्नोयिदरियलाहादु) भो जनन्यः ! हन्त मदीयोऽयं विलक्षणो व्याधिर्विपुलज्ञानशालिनामपि धियस्सत्यमगोचरः । किमेवंविधोऽयं दारुणो व्याधिरिति माभूदवसादो वः । सिन्धुसवर्णगोपालकृष्णकरस्पर्शमात्रेण शाम्येदयं व्याधिरिति विदांकुरुत । अमोघोऽयमभ्युपायः । तदद्य किं कर्तव्यमिति चेत् ; कूलस्थितकदम्बमहीरुहात् कालियफणिफणामण्डले निपत्य तत्र समराङ्गणधियमारचय्य चित्रं ताण्डवमाकलितवतो गोपालकृष्णस्यावसथभूतं यामुनं ह्रदं प्रापयत माम् ॥ .... (५)

६. (कार्त्तण्मुहिलुम् करुविलैयुम्) शिशिरो वर्षुकवलाहकः वन्यनालकुसुमविशेषः, अतसीकुसुमम्, अम्भोजसूनं च मम पुरत उपस्थाय (भगवद्दिव्यविग्रहदिव्यावयवसंस्मारणपूर्वकं) गोपालकृष्णान्तिकमुपसर्पेति मामाकर्षन्ति । तदधुना किं कर्तव्यमिति चेत् ; गोचारणश्रान्त्या स्वेदं प्राप्य क्षुद्बाधां चाधिगत्य ओदनभोजनावसरस्सोऽयमिति मत्वा महर्षिपत्नीनामागमनं प्रतीक्षमाणेन कृष्णेन स्वकीयकटाक्षधारागोचरीकृतं भक्तविलोचनाभिधानं स्थलं मां प्रापयत ॥ [टिप्पणि—बृन्दावनप्रान्ते भक्तविलोचनमिति पुण्यस्थलं प्रथितम् । श्रीभागवतदशमस्कन्धे त्रयोविंशाध्याये तदेतत् स्थलमधिकृत्य प्रोक्तमस्ति । कदाचित् कृष्णो बलभद्रश्च गोपालैरसह यमुनासरित्तटे भृशं श्रान्ताविव क्वचन निषण्णावास्ताम् । तदात्वे गोपालडिम्भास्सर्वेऽपि कृष्णबलभद्रयोस्सविधे स्वकीयक्षुद्बाधातिशयं विज्ञापयामासुः । तदा कृष्णेनोक्तम्—नातिदूरे आङ्गिरसाख्यमध्वरविशेषमनुतिष्ठतां महर्षीणामन्तिकमुपेत्य याचध्वमिति ! ते च बालकास्सहसा तत्र गत्वा रामरामानुजयोर्नाम प्रोच्य अन्नमयाचन्त । ते तु महर्षयः स्वकार्यैकनिरता उपैक्षन्त । अथ विषण्णा व्रीडिताश्च बालकाः कृष्णान्तिकमागत्य सनिर्वेदं तदिदं

न्यवेदयन्। तदा कृष्णः प्राह सस्मितमेवम्—महर्षिपत्नीनां सविधमुपेत्य साग्रजस्य मम अत्रावस्थितिमावेद्य याचध्वमन्नमिति। अथ तत्रैव याचिता ऋषिपत्न्यः कृष्णनामश्रवणमात्रेण परमानन्दकन्दलितस्वान्ताः पुलकांकितदेहाश्च सत्यः सद्यो भक्ष्यभोज्यलेह्यचोष्यवर्गसम्भरणपूर्वकं गुरूणां प्रतिरोधमप्यवधीर्य परमभक्तिभूम्ना रामरामानुजयोरन्तिकमुपेत्य सानन्दं समार्पिपन्नन्नवर्गमिति। ता मुनिललना एवं प्रत्यहमुपाहरन्। यस्यां वेलायां ता आहरन्ति तस्यां वेलायां कृष्णस्तद्दिशाभिमुखस्तिष्ठति। भक्तम् (अन्नम्) विलोकयन्नास्तेति हेतुना तत् स्थलं भक्तविलोचनमिति प्रथामाश्नुत। इति ज्ञायतेऽनया गाथया॥] ... (६)

७. (वण्णन्तिरुवुम् मनं कुलैवुम्) मम वपुस्सुषमाया विपर्यासः, मनसो वैक्लव्यम्, व्रीडाया विनाशः, आनने वैवर्ण्यम्, अभ्यवहारे वैमुख्यम्, अन्तःकरणे दौर्बल्यम् इत्येतत्सर्वमपि सिन्धुसवर्णस्य गोपालकृष्णस्य तुलसीस्रजो मम शिरसि विन्यासमात्रेण शान्तिमृच्छेत्। यदि तां तुलसीस्रजमिहानेतुं न शक्नुथ यूयं तर्हि प्रलम्बवधविचक्षणबलदेवसनाथं पाण्ड्यवटाह्वयं दिव्यदेशं मां प्रापयत॥ [' पाण्ड्यवटस्य भाण्डीरमित्यपि व्यपदेशः प्रथत इति वदन्ति॥] ... ... (७)

८. (कत्तिनम् मेयुक्कलुम् मेयुक्कप्पेत्तान्) (भगवति रामचन्द्रे तावदभिनिवेशः कामं तव युज्येत; गवां पृष्ठतो गत्वरे जघन्यजातीये स्तेने च कितवेऽनुरागो नोपपद्यते इति केचन जना केलिवाचमवदन्निव; तान्प्रति चारुतरमभिदधाति गोदा।) मम नाथो गोपालकृष्णो गोगणसञ्चारणैकव्यग्रो विरेजे; कांतारप्रांतवासिजनसजातीयश्चाभूत्; नवनीतस्तेयेन गृहीतस्सन्नुलूखलबन्धं च प्रापितोऽभूत् हा हन्त! परमसौलभ्यकाष्ठाभूता इमाश्चर्या भोः पापिनः! युष्माकं गर्हणगोचरतां खलु गताः। स्तुत्ये भगवति दूषणोक्तीस्स्वकीयें मदीयधिक्कारपात्रतां किमिति प्राप्नुथ। माभूदेवम्। किंतु गोवृन्दसमुज्जीवनाय वर्षबाधानिवारणाय च छत्रीकृत्य भगवता धृतं गोवर्धनाद्रिं मां प्रापयत॥ .... (८)

९. (कूट्टिलिरुन्दुकिलियेप्पोदुम्) मयाऽभिवर्धितः शुकशावः कुलाये स्थित्वा गोविन्द गोविन्देत्यविरतं कूजति हन्त। यद्यहं तस्मै भोज्यमप्रदाय क्लेशं जनयेयं तदा त्रिविक्रमभगवन्नित्युच्चैराक्रोशति। एवं नाम यदृच्छया भगवन्नामश्रवणेऽपि भृशमवसीदन्तीं मां प्रति संप्रति किं कर्तव्यमिति चेत्; उत्तुङ्गसौधमण्डलाञ्चितं द्वारकाक्षेत्रं मां प्रापयत। अन्यथा तु जगति वृथाऽपवादवाचः प्रथेत; युष्मदीयं यशश्च क्षीयेत। शिरसोऽवनतिश्च वो भवेत्॥ (मम स्वच्छन्दचारित्वं भवेदित्युक्तं भवति।) ... (९)

१०. (मन्नुमदुरैतोडक्कमाह) अलकभरसुन्दरीसौवर्णसौधाञ्चितश्रीधन्विनव्यपुराधीशश्रीविष्णुचित्तात्मजा गोदा मथुराप्रभृतिद्वारकापर्यन्तस्थलविशेषाणां नामान्यभिधाय तत्र तत्र स्वात्मानं प्रापयितुं प्रार्थयमाना याभिर्दिव्यगाथाभिर्निजमध्यवसायं प्राचीकशत् ता इमा दिव्यसूक्तीः कीर्तयतां सतां दिव्यं धामैव धाम स्यात्॥ (इति फलश्रुत्या समापितमिदं दशकम्।) .... (१०)

इति श्रीगोदासूक्ते द्वादशदशकविवर्तस्समाप्तः॥

त्रयोदशं सूक्तम्—कण्णनेन्नुम् करुन्दैवम् ॥

— अवतारिका —

अधस्तनदशके मथुरादिद्वारकापर्यन्तदिव्यस्थलेषु स्वस्य प्रापणं प्रार्थयामास गोदा । एवं प्रार्थिता बान्धवा अमन्यन्त— " कृष्णस्तु भगवान् बहुतिथादेव कालात्पूर्वमवतारकृत्यानि परिसमाप्य निजं दिव्यं धाम जगाहे ; इदानीं मथुरायां व्रजे यमुनातटे द्वारकायां वा हन्त! किमस्ति ? तत्र प्रापणेन किं वा प्रयोजनमस्या भविष्यति ? एतादृशवस्तुतत्त्वप्रकटने कृते सति तु अस्या अवसादो भूयो भूयोऽप्यभिवर्धेत ; परं न पुनर्मनागपि हीयेत । अतश्च सेयं [गोदा] येन केनापि प्रकारान्तरेणैव समाश्वासनीया " इति । मत्वा चैवम् " अयि गोदे! तथैव कामं करिष्यामः ; इदानीं तु वर्षाकालः खलु ; अधुना तत्र प्रयाणं दुश्शकम् ; मनागिव सहस्व विलम्बं मुग्धे ! । परस्तान्नेष्यामः । संप्रति तु तदीयगुणगणानुसन्धानेनैव कथंचित्सानन्दमेव कालं क्षिप " इति च अन्यदन्यच्च प्राहुः । ततश्च प्रोज्जृम्भमाणविरहव्यथा गोदा " यदि मामद्यैव कृष्णसकाशं नेतुं न शक्नुथ यूयं तर्हि तदुपभुक्तवस्तुषु यत्किमपि वा सद्यस्समानीय दत्वा मां समाश्वासयत " इति प्रार्थयते दशकेनानेन । कृष्णस्य कटितटभूषायितं वसनमानीय तेन संवीज्य मत्तापं हरत । माधवस्य तुलसीस्रजमानीय विक्षिपत मम कबर्याम् । दामोदरस्य वनमालामानीय विक्षिपत कबर्याम् । अपर्याप्तामृतस्य मुकुन्दस्य वागमृतमाहृत्य पाययित्वा मम श्रान्तिं शमयत । गोधूलिधूमरितकोमलकेशवेशस्य केशवस्य मुरलीद्वारतो निर्यदमृतमानीय मम मुखं तेन मार्जयत । मधुसूदनस्य पादाब्जन्यासधन्यस्थलस्थितं पांसुमाहृत्य लिम्पत मद्वपुषि । ईदृशैः कार्यैरविलम्बेन मां प्रहर्षयत— इत्युच्यते दशकेऽस्मिन् । तथा चैतद्दशकसारांशसङ्ग्राहकमिदं पद्यमिहानुसन्धेयम्—

स्त्रीदुःखाज्ञस्य शौरेः कटितटवसनं मालिकां वैजयन्तीं
वक्त्राम्भोजामृतौघं सुमधुरमुरलीद्वारनिर्यत्सुधां च ।
पादाब्जन्यासधन्यस्थलजमपि रजो दिव्यमादाय मह्यं
दत्त्वा मां मोदयध्वं द्रुतमिति कथयत्यत्र सूक्ते तु गोदा ॥

१. (कण्णनेन्नुम् करुन्दैवम्) श्रीकृष्णाभिधानपरदैवतसन्दर्शनैकसमिन्धानकुतूहलां मामुद्दिश्य भो मातरः!. यूयं वैरिजनसाधर्म्यमास्थाय क्षते क्षारमिव कटुवाग्विसर्गं कलयध्वे । नैतद्युक्तं मनागपि । तर्हि किं कर्तव्यमिति चेत्, स्त्रीजनदुःखानभिज्ञस्य महाप्रभोः कृष्णस्य कटितटे विराजमानं पीताम्बरमाहृत्य तेन मां वीजत यथा हि मे ग्लानिरुपशममियात ॥ .... (१)

२. (पालालिलैयिल् तुयिल्कोण्ड) अतिमृदुलवटदलमधिशयितवता परमपुरुषेण प्रसभं वशंवदीकृतां मां प्रति अत्यन्तदारुणवचोविसर्गं मास्म कुरुत स्वच्छन्दम् । तर्हि किं कर्तव्यमिति चेत् ; गोपजात्युचितयष्टिग्रहणपूर्वकं गास्सञ्चारितवतो घटनर्तनदक्षिणस्य श्रीकुम्भघोणक्षेत्रमधिशयानस्य च मुकुन्दस्य शिशिरसुभगतुलसीस्रजमानीय मम कुन्तलेषु विधत्त ॥ [टिप्पणी—घटनर्तनं नाम भुजयोरुभयोरपि घटवृन्दं निधाय

10

शिरसि च तथा विन्यस्य पाणितलाभ्यां घटद्वयं परिगृह्य क्रियमाणं ताण्डवम्। एतादृशे नर्तने भुजगतानां शीर्षगतानां च घटानां मनागपि चलनमन्तरेण पाणितलद्वयस्थितघटयोः पर्यायेण विनिमय एव सामर्थ्यविशेषः। एवंविधनर्तनप्रावीण्यं कृष्णे दिव्यसूरिभिरसकृदनुसन्धीयते ॥ .... (२)

३. (कञ्जैकायुन्दकरुविल्लि) चापसधर्मभ्रूलताशालिनः कंसद्विषः कटाक्षवीक्षणाख्यनिशितशरताडितां निर्दग्धकृत्स्नहृदयां दशाविपर्यासतो भृशमवसीदन्तीं मां प्रति अभयगिरमप्यननुगृह्णन् स भगवान् स्ववक्षःस्थलविधृतां वनमालां विप्रलम्भविरहेण यदि वितरेत्तर्हि तामानीय मम वक्षसि प्रक्षिपत शश्वत् ॥ (३)

४. (आरेयुलहत्तात्तुवार्) कृत्स्नामपि व्रजभूमिमात्मसात्कृत्वा स्वैरमुपभुञ्जानेन कालुर्षमेण कृष्णेनातिमात्रं व्यथितां सर्वथा च विह्वलां मां जगतीह को वा जन आश्वासयितुमलम्। यदि यूयमाश्वासयितुमिच्छथ तर्हि अपर्याप्तामृतस्य गोपालकृष्णस्य दिव्यवक्त्रसुतममृतबिन्दुमानीय झटिति मां पाययित्वा वीतश्रमां कुरुत ॥ .... (४)

५. (अळिलुम् तोत्रिलुमुरुक्काट्टान्) चिरं विलापेऽपि मुहुः प्रणामेऽपि निजं दिव्यगात्रमप्रदर्शयन् अभयवाचमप्यप्रयच्छन् स कोऽपि महानुभावो मानसानुभवैकयोग्यतयाऽत्र समागत्य गाढपरिरम्भणमाकलय्य पुरतः पृष्ठतश्च विचरन् नापसर्पति। प्रत्यक्षानुभवविरहेण दूये। ततश्चैतत्कर्तव्यं युष्माभिः— बर्हिबर्हातपत्रच्छायायां गवां पृष्ठतो मुरलीगानेन सह समागन्तुस्सर्वेश्वरस्य वंशनालरन्ध्रोद्भवदमृतबिन्दुमाहृत्य तेन मम मुखं मार्जयत सुशिशिरम् ॥ .... (५)

६. (नडैयोन्निल्लावुलकत्तु) खत एव वीतनीतिके जगतीह नन्दगोपात्मजनाम्ना परमदारुणेन प्रभुवरेण भृशमर्दिता साऽहं मनागपि चलितुं न प्रभवामि। अतश्च, तरङ्कितवपादन्यासधन्यात् स्थलविशेषात् तत्पादावमर्दजनितं पांसुमाहृत्य स्थिरतरप्राणप्रतिष्ठै मम वपुषि रूषयत ॥ [टिप्पणी—नन्दगोपात्मजकृतां स्वोपेक्षणरूपामनीतिमनुसंदधाना गोदा रोषवशादाचष्टे "खत एव वीतनीतिके जगतीह" इति।] (६)

७. (वेत्तिक्करुलक्कोडियान्तन्) जैत्रगरुडध्वजस्य दिव्याज्ञामतिलङ्घयितुमशक्ते जगतीह सा जननी यशोदा तं गोपालकृष्णं हा हन्त निम्बानोकहसममेव ह्यभ्यवर्धयत्। अस्तु नाम तत्। तदेकव्रतं मत्कुचयुगं तस्यैव गोपकुमारस्य रमणीयपृथुभुजयुग्मेन सह यथा ह्यद्वैतमवाप्नुयात्तथा सुदृढघटितं कुरुत तदैकान्त्यदोषशान्तये॥ [टिप्पणी—"गरुडध्वजस्य दिव्याज्ञामतिलंघयितुमशक्ते जगतीह" इति कथनं किमभिप्रायकमिति चेत्ः इह जगति मम यो योऽनर्थो भवति स सर्वोऽपि भगवदाज्ञानुसारी खलु भवेत्ः सर्वमपि सह्यमेव ननुः आक्रन्दनेन किं फलं सेत्स्यति? इति स्वात्मन्येव समाश्वसनं व्यज्यत इति ध्येयम्। अथ च; "तदैकान्त्यदोषशान्तये" इत्युक्तेरयं भावः— लोके ललनानां कुचा भगवदैकान्त्यमवहन्तः स्वैरचारिणो भवन्ति। तेषां न किमपि दुःखं जायते, प्रत्युत सदा सुखित्वमेव दृश्यते। मम कुचयोस्तु सदा दुःखित्वमेव दृश्यते; किमत्र कारणमिति विमर्शे कृते कुचयुगमस्यास्य सापराधत्वमेवात्र हेतुरित्युन्नीयते। कोऽयमपराध इति पर्यालो-

चनायां कृष्णादन्यं कमपि वीक्षेयेति यदैकान्त्यव्रतमालम्बितं तदेवापराध इति वक्तव्यं भवति । लोके सापराधिनां जनानां कारागारादिषु बन्धनं भवति । तथा सापराधस्य मत्कुचयुग्मस्यापि बन्धनमेव शिक्षा भवतु । कुत्र बन्धनमस्य युक्तमिति चेत् ; तस्यैव कितवस्य पृथुभुजयुग्मे इति चमत्कारातिशयशालि चारुतरमिदं वचः ॥ (७)

८. (उल्लेयुरुहिनैवेनै) द्रवीभूतविह्वलविक्लवहृदयां मामधिकृत्य 'किं प्राणिति सा ? उत पञ्चतां गता ?' इत्यनुयोगमप्यकुर्वन्तं सर्वस्वापहारिणं कितवं गोवृन्दवर्धनं मुकुन्दं यदि कदाचिदहं पश्येयम्, तर्हि सर्वथाऽपि विफलजन्मशालि मदीयं कुचयुग्मं समूलमुत्खाय तस्य वक्षसि प्रसभं क्षिप्त्वा कथञ्चिदहं वीतशोका भवेयम् ॥ [उन्मीलितस्य स्तनस्य तस्य वक्षसि क्षेपणं किमर्थमिति चेत्, स्त्रीजनदुःखानभिज्ञस्य तस्योरसि इमौ कुचौ स्यातां यदि तदा गोदादेव्या दुःखमीदृशमिति स जानीयादित्यभिप्राय इव ।] (८)

९. (कोम्मैमुलैहल्डिर्तीर) मदीयकुचकुड्मलवेदनाविहतये गोविन्दस्य भगवत इहैव जन्मनि सेवामकृत्वा देशान्तरे कालान्तरे यत्किञ्चित्करणं हा बत ! किमर्थम् ? यदि मां स स्वकीये सुभगे वक्षसि संयोजयितुमिच्छति कामं तथा भवतु । यदि न, मम साक्षात्कारगोचरो भूत्वा 'गोदे ! त्वमुपेक्षितैव मया' इति यदि तथ्यं कथयेत् तदुत्तमोत्तमम् ॥ [यथाकथञ्चित्तस्य कृष्णकिशोरस्य साक्षात्कारलिप्सया एवं कथ्यत इति वेदितव्यम् ।] ... ... (९)

१०. (अल्लल्विळैत्तपेरुमानै) आर्तिहर इति नाम्नः स्थाने आर्तिकर इति नाम विभ्रतं महानुभावं गोकुलरत्नदीपं गोपालकृष्णमुद्दिश्य, श्रीधन्विनव्यनगराधीशश्रीविष्णुचित्तात्मजया धनुर्जैत्रभ्रूलतया गोदया साभिनिवेशं सकुतूहलमुदीरिता इमा गाथा ये प्रशंसन्ति ते दुःखाब्धिदूरगा भवितारः ॥ [इति फलकीर्तनेन समापितमिदं दशकम् ॥] ... ... (१०)

इति श्रीगोदासूक्ते त्रयोदशदशकविवर्तस्समाप्तः ॥

अथ चतुर्दशं दशकम्– पट्टिमेय्न्दोर्कारेरु ॥

— अवतारिका ...

परमकारुणिको भगवान् भक्ताभीष्टप्रपूरकः खलु । भक्तानां स्वानुभवपर्याप्तमार्तिभरमभिवर्ध्य अथ परिपूर्णस्वानुभवं प्रयच्छति स इति हि प्रसिद्धिः । तथैव भृशमभिवृद्धार्तिभराया गोदादेव्याः परमेण प्रेम्णा स्वात्मसंदर्शनरूपं दिव्यानुभवमनुजग्राह स बृन्दावनधामा कृष्णकिशोरः । तादृशमत्यद्भुतानुग्रहं विलक्षणसंवादापदेशेन प्रथयति गोदादेवी चरमदशकेनानेन । इयमेकैव गोदादेवी उभयोस्सख्योर्भूमिकां परिगृह्य एकस्यास्सख्या वाचा 'कृष्णकिशोरोऽत्र किमु दृष्ट इति प्रश्नप्रकटनम्, अथान्यास्यास्सख्या गिरा 'दृष्ट एव स बृन्दावने' इति तदुत्तरकथनं च कलयन्ती भगवतो नन्दनन्दनस्य स्वात्मना सुष्ठु संदृष्टतामाविष्कृत्य सानन्दं

समापयति स्वकीयमिमं दिव्यप्रबन्धम्। दशकेऽस्मिन् प्रतिगाथं च पूर्वार्धे प्रश्नप्रतिपादकम्, उत्तरार्धमुत्तरप्रतिपादकम्। 'मत्प्राणनाथो बलरामसहचरो जारचोरशिरोमणिर्मम विश्लेषदुःखसमुत्पादकः कोऽपि कितवः प्रान्तेऽस्मिन् यत्र कुत्रापि विचरन् कच्चिदवलोकित इति प्रश्नप्रकारः। आः! अद्यैव स दृष्टो बृन्दावने विहरन् वत्सैस्सह गास्संचारयन् धेनुकवत्सकपित्थकेशिप्रमुखानासुरप्रकृतीन् प्राणैर्वियोजयन् नटविटतल्लजो नन्दनन्दनो नीरुजीमूतसङ्काशो वैनतेयपक्षवितानच्छायायामटन् करिकलभनिभः पीताम्बरधरो वीथीप्रपूरकदिव्यगात्रसुषमः श्रीकृष्ण इति प्रत्युत्तरदानप्रकारः। अनया च प्रश्नोत्तरप्रणालिकया स्वानुभवानन्दभूमा संप्रकाश्यते गोदादेव्या दशकेऽस्मिन्निति विभाव्यम्। तथा चैतद्दशकसारांशसंग्राहकं पद्यमिदमत्रानुसन्धेयम्॥

मत्प्राणेशो मुकुन्दो मुसलिसहचरस्तस्करो जारडिम्भो
　मह्यं विश्लेषदुःखप्रद इह कितवः कोऽपि कच्चिन्नु दृष्टः?।
दृष्टो दृष्टोऽद्य बृन्दावनभुवि विहरन् चारयन् गास्सवत्साः
　निघ्नन् दैत्यांश्च कोऽपीत्यनुभवमतुलं वक्ति गोदाऽन्त्यसूक्ते॥

१. (पट्टिमेयुन्दोरूकारेरु) कच्चिदिह दृष्टो युष्माभिः कश्चन कालर्षभः, यः खलु बन्धमन्तरेण यथेच्छं विचरन् बलभद्रानुज इति स्वात्मानं प्रथयन् सन्तोषवशादुच्चावचान् कोलाहलान् विरचयन्नत्रैव प्रान्ते विहरन् वर्तते। (इति प्रश्नः: अथ प्रत्युत्तरम्।) आम्, दृष्ट एव स तावदस्माभिर्बृन्दावने– यः खल्वभिमतान् गोगणान् सानन्दं सञ्चार्य पानीयं च पाययित्वा तैस्सहैव सदा विहरति [टिप्पणी–"बलभद्रानुज इति स्वात्मानं प्रथयन्" इत्यस्य भावः: यत्र कुत्रचन गेहे कृष्णो नवनीतचौर्यादिनिमित्तं प्रविशति चेत्; कस्त्वं बालेति तत्रत्यैः पृष्टस्सन् बलानुज इति प्रतिवक्तीति प्रसिद्धिः। व्रजे बलभद्रस्य अतिमात्रसाधुत्वेन प्रसिद्धत्वात् तदीयोऽयमनुजोऽपि साधुरेव स्यादिति ते विभावयन्त्विति कृष्णस्य मतिरिव।] ... (१)

२. (अनुङ्गवेन्नैप्पिरिवुशेयुदु) कच्चिदिह दृष्टो युष्माभिः यः खलु विश्लेषेण मां भृशमवसाद्य स्वैरं गोपीबृन्दमुपभुञ्जानो गव्यगन्धी कालर्षभसमो गोविन्दनामा विहरतीह। (उत्तरम्।) आम्, दृष्ट एव स तावदस्माभिर्बृन्दावने– यः खलु विद्युता विलसन् बलाहक इव वनमालाविराजमानो वयस्यगणैस्सह विहरन्नास्ते॥ .... (२)

३. (मालायुप्पिरन्दनम्बियै) कच्चिदिह दृष्टो युष्माभिः यः खलु मूर्तो व्यामोह इव जातः परेषामपि व्यामोहमेव जनयन् असङ्गतान्यनृतभाषणानि व्याहरन्निह विचरति। (उत्तरम्।) आम्, दृष्टस्स बृन्दावने– उपरि प्रसृमरमातपं वारयितुं वैनतेयपक्षतिरूपवितानच्छायायां व्रजति यः॥ [टिप्पणी– "असङ्गतान्यनृतभाषणानि व्याहरन्" इत्यत्र "नवनीतभाण्डविवरे हस्तं किमर्थं न्यधाः। मातः कञ्चन वत्सकं मृगयितुम्" इत्यादिकमनुसन्धेयम्॥] ... ... (३)

४. (कार्त्तण्कमलक्कण्णेन्नुम्) कच्चिदिह दृष्टो युष्माभिः यः खलु, कालमेघे कमलकुसुममुद्भूतमिवेत्युल्लेखार्हस्वकीयनयनाभिधानवागुरायां मां निपात्य समाकृष्यात्र विहरति । (उत्तरम् ।) आम्, दृष्ट एव स बृन्दावने—यो मौक्तिकवारवाणावृतस्सन् कश्चन कलभो विहरति किमु ! इत्युल्लेखयोग्यतया स्वेदाञ्चितदिव्यगात्रो विहरति ॥ ... . (४)

५. (मादवनेन्मणियिनै) कच्चिदिह दृष्टो युष्माभिः श्रियःपतिः नीलमणिवन्मम परमभोग्यो जालविनिर्मुक्तदिव्यवराहवदत्यन्तमवलिप्तः स्वात्मानं मनागपि मह्यमप्रयच्छन्निह विहरति यः । (उत्तरम् ।) आम्, दृष्ट एव बृन्दावने— जङ्घावलम्बिपीताम्बराञ्चितदिव्यगात्रो मेचकमुदिरशावकनिभो वीथीपूरकस्सन् विलक्षणयात्रोत्सवमिहानुभवति यः ॥ ... ... (५)

६. (तरुममरियाक्कुरुम्बनै) कच्चिदिह दृष्टो युष्माभिः अनभिज्ञातानृशंस्यो धूर्तः स्वकरतलविधृतशार्ङ्गसमभ्रूलतः प्रियजनविमुख इह विचरति यः । [उत्तरम् ।] आम्, दृष्टोऽस्माभिरिह बृन्दावने मनोहरनीलदिव्यगात्रः कोकनदसमानन उदयाद्रिशिखरोदञ्चद्गभस्तिमालीव विराजते यः ॥ (६)

७. (पोरुत्तमुडैयनम्बियै) कच्चिदिह दृष्टो युष्माभिः यः खलु परमसाधुः वपुषीव मनस्यपि मेचको मदीयमनोरथवैदेशिकः कालमेघनिभः । (उत्तरम्) आम्, दृष्ट एव बृन्दावने—स्पृहणीयनक्षत्रवृन्दभरितआकाश इव वयस्यवृन्दसमेतो यात्रोत्सवमनुबोभवीति यः ॥ ... ... (७)

८. (वेळ्ळियशङ्गोन्नुडैयानै) कच्चिदिह दृष्टो युष्माभिः, धवलश्रीपाञ्चजन्याढ्यः पीताम्बरधरः परमकृपाभिरामः श्रियःपतिश्चक्रपाणिर्यः पर्यटति । (उत्तरम्) आम्, दृष्ट एव बृन्दावने, 'किं भ्रमरा एव परितो वलन्ते !' इत्युल्लेखयोग्यं यथा तथा सुरभिरमणीयकुन्तलान् अंसावलम्बिनो बिभ्राणो विहरति यः ॥ (८)

९. (नाट्टैप्पडैयेन्नयंन्मुदलात्तन्द) कच्चिदिह दृष्टो युष्माभिः, विश्वप्रपञ्चप्रजननाय विरिञ्चमादौ स्वनाभीनलिने समुत्पाद्य लीलाविभूतिप्रपञ्चनेन विहरति विमलः । [उत्तरम्] आम्, दृष्ट एव बृन्दावने, धेनुकासुरदुष्टहस्तिबकासुरप्रभृतिदुर्जन्तुमारणाय विपिनमवगाह्य मृगयोत्सवमनुभूय समायाति यः ॥ (९)

१०. (परुन्दाळ्कलित्तुक्करुळ्शेयुद) गजेन्द्ररक्षणदीक्षणजुषः परमपुरुषस्य दर्शनं पृथिव्यां बृन्दावने सम्पन्नं प्रकाशितवत्या विष्णुचित्तात्मजया गोदया कीर्तितामिमां दिव्यसूक्तिमालां दिव्यौषधधिया ये हृदि बिभ्रति ते महिमशालिपादारविन्दपरमेश्वरचरणारविन्दपरिसरावस्थितिमनारतमाप्नुयुः ॥ इति फलकीर्तनेन समापितमिदं दशकम् ॥ ... ... (१०)

इत्थं ह्यत्यद्भुतानामनुभववचसामाकरं भक्तिसम्पत्संवृद्धौ हेतुभूतं रसघनमतुलं प्राह दिव्यप्रबन्धम् ।
श्रीगोदा द्राविडोक्त्या, तमिममनुवदन् वादिभीकृत्कुलीनः काञ्चीस्थोऽण्णङ्गरार्यः कविरमरगिरा धन्यजन्मा समिन्धे ॥

इति श्रीकांची प्रतिवादिभयङ्कराण्णङ्गराचार्यकृतिषु श्री गोदासूक्तविवर्तः समाप्तः ॥

॥ श्रीः ॥

श्रीवैष्णवसंप्रदाय पुस्तकसूची ॥

॥ श्रीकाञ्ची प्रतिवादिभयङ्कर-अण्णङ्गराचार्य संमुद्रणम् ॥

		रू.	आ
१.	सिद्धित्रयम्—भगवद्यामुनमुनिभिरनुगृहीतम्	१	०
२.	श्रीविष्णुसहस्रनामभाष्यम्-भगवद्गुणदर्पणम् श्रीपराशरभट्टार्यानुगृहीतम्	२	०
३.	पूर्वाचार्यस्तोत्रमाला (श्रीवैष्णवसम्प्रदायधुरंधर श्रीकुलशेखरसूरिप्रभृति श्रीवरवरमुनिशिष्यवर्गपर्यन्त सकलपूर्वाचार्यप्रणीता)	२	०
४.	श्रीवचनभूषणमीमांसाभाष्यम् - कुन्रत्तूरय्यन् कृतिः ॥	३	०
५.	श्रीमद्वेदान्तदेशिकग्रन्थमाला समग्रा समीचीनरक्षावन्धनसहिता	४५	०
६.	यतीन्द्रमतदीपिका	१	०
७.	तर्कशास्त्रसर्वस्वम्	०	८
८.	रहस्यरत्नमालिका (मुमुक्षुप्पडिनामक रहस्यत्रय, तत्त्वत्रय, श्रीवचनभूषणानि श्लोकवद्धानि.)	१	०
९.	क्षेत्रतीर्थयात्रादर्शः	०	८
१०.	यतिराजविंशतिः (हिन्दीटीका)	०	१२
११.	ब्रह्मव्याप्तिपरिष्क्रिया	०	८
१२.	पाठशोधनपरीक्षा	०	१०
१३.	रक्षाविलोचन भावप्रकाशिका	०	८
१४.	आल्वारवैभवम् (हिन्दीभाषायाम्)	०	१२
१५.	रामानुजदयापात्रपद्यचरित्रम्	१	०
१६.	दिव्यसूरिवैभवम्	०	१२
	द्राविडवेददिव्यप्रवन्ध संस्कृतानुवादाः- अण्णङ्गराचार्यविरचिताः		
१७	तिरुप्पल्लाण्डुदिव्यप्रवन्धस्य संस्कृतव्याख्या	०	१२
१८.	पेरियाळ्वार्तिरुमोळिनामक भट्टनाथसूक्तदिव्यप्रवन्धः- सार्धचतुश्शतगाथाविवर्तः सम्पुटद्वयम्	४	०
१९.	तिरुप्पावै नामक श्रीगोदाव्रतदिव्यप्रवन्धः—रसघनविपुलव्याख्यासमेतः	२	०
२०.	नाच्चियार्तिरुमोळिनामक श्रीगोदासूक्तदिव्यप्रवन्धविवर्तः	१	०
२१.	शिरियतिरुमडल् पेरियतिरुमडल् रामानुजनूत्तन्दादि नामक दिव्यप्रवन्धत्रितयविवर्तः	१	०
२२.	औत्तरदिव्यदेश दिव्यप्रवन्धावली	२	०
२३.	वात्सल्यार्थप्रकाशिका. अभिनवदयाशतकम्, सभाभुजङ्गीसर्वस्वम्, श्रीतत्त्वशोधनम्. श्रीरामायणदण्डकः, श्रीरामायणरसायनम्, श्रीरामभद्रकर्णामृतम्, गोपालभक्तामृतम्, गोविन्दगीतामृतम्, श्रीवरवरमुनिदण्डकश्च.	२	०
	* वैदिकमनोहरानाम्नी पत्रिका प्रतिमासमवतरति। अस्या वार्षिकमूल्यम्	३	०
	* द्राविडभाषायामान्ध्रभाषायां च वहवो ग्रन्था अप्यत्र सुलभाः ॥		

प्राप्तिस्थानम्— ग्रन्थमाला आफीस्, कांचीपुरम्.

P. B. ANNANGARACHARYA,
Editor, Granthamala, Kancheepuram.

